CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथर्ववेदसंहितायाः

विंशं काण्डम्

अभिनवसायणभाष्य-समन्वितम्
(अष्टात्रिंशसूक्तादारभ्य समाप्तिपर्यन्तम्)

卐

भाष्यकाराः
वेद-दर्शनाचार्याः महामण्डलेश्वराः
श्रीमत्-स्वामि-गङ्गेश्वरानन्दा उदासीनाः

❀

सम्पादकौ
स्वामी गोविन्दानन्दो वेदान्ताचार्यः
तथा
म० म० पं० नवलकिशोर-काङ्करः

卐

सद्गुरु-गङ्गेश्वर-इण्टरनेशनल वेदमिशन
बम्बई

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री वीर राघवन जी
को सादर भेंट
— स्वामी [illegible]
22/6/95

भारतीय विद्या भवन, नई दिल्ली

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री गुरुगङ्गेश्वरग्रन्थमाला पुष्प–३५

शौनकीयायाः

अथर्ववेदसंहितायाः

विंशं काण्डम्

(अष्टात्रिंशसूक्तादारभ्य समाप्तिपर्यन्तम्)

अभिनवसायणभाष्येण समन्वितम्

भाष्यकाराः

वेद-दर्शनाचार्य-महामण्डलेश्वर-

श्रीमत्-स्वामि-गङ्गेश्वरानन्दा उदासीनाः

सम्पादकौ

स्वामी गोविन्दानन्दो वेदान्ताचार्यः

तथा

विद्यावाचस्पतिः कविशिरोमणिः गद्यसम्राट्

महामहिमोपाध्यायः

आचार्य–नवलकिशोर–काङ्करः

प्रकाशकः

सद्गुरु-गङ्गेश्वर-इण्टरनेशनल वेदमिशन

तुलसीनिवास, चर्चगेट, बम्बई-२०

१९८५

Bhavan's Sri Sankaracharya Sanskrit Mahavidyalaya Bharatiya Vidya

1054

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुस्तक-प्राप्ति-स्थानानि

तुलसीनिवास, फ्लैट ३१, डी रोड, चर्चगेट, बम्बई-२०

गुरुगङ्गेश्वरधाम, तिडके कालोनी, त्र्यंबक रोड, नासिक-२

गङ्गेश्वरधाम, १३ पार्क एरिया, करोलबाग, नई दिल्ली-५

चतुर्वेदशोधसंस्थान, श्रौतमुनि निवास, वृन्दावन (मथुरा)

[अस्य ग्रन्थस्य सर्वविधा अधिकाराः प्रकाशकाधीनाः]

मुद्रकः

चन्द्रोदय प्रिन्टर्स, जयपुर

प्रथमं संस्करणम्

५००

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
1054

मूल्यम्

चत्वारिंशद् रूप्यकाणि

विदेशेषु विंशतिडालराणि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्पादकीयम्

समस्त–शास्त्रार्थ–विलासभूतयो–रनन्त–सम्पद्–विशदावकाशयोः ।
श्रीसद्गुरोर्वन्द्यपदारविन्दयोः रजःकणाः सन्तु शिवाय नः सदा ।।

इह नास्ति अणोरणीयानपि संशयलेशावकाशो यदिमे भगवन्तो वेदाः सर्वस्मिन्नपि ब्रह्मसर्गे प्रथित-प्रशस्त-प्रभावतया निखिल-वाङ्मयमूलभूता निरवधिक-सर्वविधशास्त्रसाहिती-समवेता आर्यजनसंस्कृति-निदानभूताः स्वरवर्णसंस्कारसमुपेताश्च कामप्यपूर्वामभिख्यां दधाना विराजन्ते । यावत्योऽस्मदीया धार्मिकपरम्परा यावच्च वाङ्मयं निखिलमेवेदं वेदानुप्राणितम् । स्मृतिषु दर्शनेषु तन्त्रागमेषु पुराणेतिहासादिषु तथा शास्त्रान्तरेष्वपि सर्वत्रैव वेदानुमतत्वेनैव सिद्धान्तविशेषस्य विद्वत्समाजे समादरः परिग्रहश्च भवतीत्यपि संशीतिशून्यं वचः । अत एव सर्व एव सम्प्रदायप्रवर्त्तका अस्माकमाचार्यचरणाः स्वं स्वं सिद्धान्तं श्रुतिसम्मतमेव निरदेदिशुः । विदन्त्यनेनेति यौगिकशक्त्या ज्ञानकरणीभूतं सामान्यमर्थं प्रकटयन्नपि अनादिकालतो रूढशक्त्या वैदिकैश्छन्दोभिर्वैदिकभाषायामेव निबद्धे उदात्तादिस्वरवर्णसंवलिते मन्त्रशब्दव्यपदेश्ये वाक्यसमुदाये प्रयुक्तोऽयं वेदशब्दः सर्वत्रासमानं सम्मानं लभमानो राजानति ।

बृहती बृहदारण्यकोपनिषदिमान् वेदान् **'अस्य महतो भूतस्य निःश्वसित-मेतद्यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरसः'** इत्युल्लिख्य ब्रह्मनिःश्वसितान् भणति । अथर्ववेदेऽथ महर्षिकुत्सो **'देवस्य पश्य काव्यं न ममार न जीर्यति'** इत्यभि-धाय वेदानक्षयकाव्यत्वेन स्वीकुरुते । वस्तुतस्तानिमान् छन्दोनिबद्धान् वेदान् श्रौतयज्ञेषु इन्द्र-वरुण-मरुदग्निप्रभृतिदेवताः स्तोतुं वत्स-वसिष्ठ-विश्वामित्र-प्रभृतयो महर्षयो महाकवय आर्षेण चक्षुषा तत्त्वज्ञानमुपलभ्य वैदिकमन्त्ररचनारूपेण अतन्वे-निषत । इमे श्रौतयागाश्च ऋत्विजां गणचतुष्टयेन सम्पन्नतां यान्ति । तत्र ऋचैव हौत्रं, यजुषा आध्वर्यवं, साम्नोद्गीथमथ अथर्वमन्त्रैश्च ब्रह्मकर्म सम्पाद्यते । चतुर्णा-मेषामृत्विग्गणानामुपयोगिमन्त्रविभाजनं विना यजनविधौ प्रकृष्टं कष्टं समनुभूय भूयः श्रीव्यासमहर्षिः समस्तान् वैदिकान् मन्त्रान् ऋत्विग्गणानुसारं चतुर्धा विभक्तवान् । तत्र होतृगणोपयोगिनो मन्त्रान् ऋग्वेदे, अध्वर्युगणेन समनुष्ठेयान् मन्त्रान् यजुर्वेदे, उद्गातृगणेन गेयान् मन्त्रान् सामवेदे, ब्रह्मगणेन चोच्चार्यमाणान् मन्त्रान् अथर्ववेदे सञ्जग्राह व्यासः । वेदानां व्यसनादेवासौ व्यासाभिधेयतां प्राप । तत्तन्मन्त्राणां सङ्ग्रहस्वरूपसंनिकर्षादेव च ऋग्वेदसंहिता, यजुर्वेदसंहिता, सामवेद-संहिता, अथर्ववेदसंहिता चेति नामभिरपि ते ते वेदाः प्रसिद्धिभाजो जाताः । अत्र

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चतुर्षु वेदेष्वन्तिमोऽयमथर्ववेदो **नैकदृष्टया** विशिष्टं वैशिष्टयं **बिभर्त्तीति** द्वादश-काण्डस्याभिनवसायणभाष्य-सम्पादकीयेऽहं **बहुशः** प्रत्यपीपदम् । **अथर्ववेदोऽयं** भृग्वङ्गिरोवेदः, ब्रह्मवेदः, **अङ्गिरोवेदः**, अथर्वाङ्गिरसवेदश्चेत्यपरैरपि नामधेयैरभि-धीयते ।

महाभाष्यस्य पस्पशाह्निके महामुनिः पतञ्जलिः 'नवधाऽऽथर्वणो वेदः' इत्युल्लिख्य वेदमिममाङ्गिरसं नवशाखासु विभक्तम् अर्थान्नवसंहितापरिबृंहितं निर्दिदेश । प्रपञ्चहृदये, चरणव्यूहे, सायणभाष्यस्योपोद्घाते चाप्ययं नवशाखात्मकः स्वीकृतः । किन्तु सत्यामपि सङ्ख्याया अभिन्नतायां शाखानामस्वत्र महती भिन्नता वरीवर्त्ति । नवशाखानां साम्प्रतं केवलं शाखाद्वयमेवोपलभ्यते— शौनकशाखीया अथर्वसंहिता पिप्पलादशाखीया अथर्ववेदसंहिता चेति । संहिताद्वयमपीदं विंशति-काण्डात्मकम् ।

महामुनिः पतञ्जलिः **'शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभि स्रवन्तु नः'** मन्त्रमिममथर्ववेदस्याद्यं मन्त्रं निर्दिष्टवान् । मन्त्रश्चायं पिप्पलादर्षिदृष्टः प्रथमः । यथा च छन्दोग्यमन्त्रभाष्ये लभ्यते—**'शन्नो देवी**·········**इत्यथर्ववेदादि-मन्त्रोऽयं पिप्पलाददृष्टः'** इति । शौनकशाखायान्त्वयं मन्त्रः प्रथमकाण्डस्य षष्ठसूक्ता-रम्भे पठितः । अतो निश्चेचिमो यत् पतञ्जलिसमये पिप्पलादशाखीयैवाथर्ववेद-संहिता स्वाध्याये प्रचुरप्रचारमुपगताऽवर्तिष्टेति । इदानीन्तु सर्वत्र पठने पाठने शौनकसम्प्रदाय एव लब्धप्रसरो विद्यते । अस्तु ।

सोऽयं वेदः **'ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च'** (महाभाष्यम्), **'वेदमेवाभ्यसेन्नित्यं यथाकालमतन्द्रितः'** (मनुस्मृतिः), **' योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम् । स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः'** (मनुस्मृतिः) इत्याद्यभियुक्तवचोभिरवश्यमध्येतव्यः । परन्तु वेदाध्ययनं विना तदर्थज्ञानं निष्फल-मित्यपि सडिण्डिमघोषमुद्घोषयन्ति शास्त्राणि । यथाहि—

"स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् ।
योऽर्थज्ञ इत्सकलभद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा ।।" (निरुक्तम्)
"यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते ।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् ।।" (निरुक्तम्) इत्यादि ।

अतः सार्थकमेव वेदाध्ययनं निःश्रेयसाय कल्पते । परं वेदार्थज्ञानं न समेषां कृते सरलम्, यतः पञ्चसहस्रवत्सरेभ्योऽपि पूर्वकालिकीयं वैदिकी भाषा, साम्प्रति-कानां कृते क्लिष्टातिक्लिष्टा वरीवर्त्ति, विषयोऽपि दुरूह एव । शिक्षा-कल्प-व्याकरण-निरुक्त-प्रभृतिवेदाङ्गेषु दर्शन-पुराणेतिहासादिशास्त्रान्तरेषु च कृत-प्रचुर-परिश्रमो विहितविविधानुसन्धानोऽपि विद्वान् पूर्वाचार्यैर्विलिखितं भाष्यमाश्रित्यैव कथञ्चित् तदर्थमवगन्तुं प्रभवति । वेदभाष्येषु च सनातनं, ब्राह्मण-श्रौतसूत्रादिसम्मतं प्रमाण-भूतञ्च सायणभाष्यमेव सममन्यत सर्वैः कोविदकुलैः । किन्तु सर्वेषां वेदानां भाष्यं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वितत्यापि विंशतिकाण्डेषु विस्तृततममथर्ववेदं व्याचिख्याषुणाऽपि सायणाचार्येण न जाने केन कारणेन पञ्चमकाण्डस्य, नवम-दशमकाण्डयोः, द्वादशादिषोडशकाण्डानाम्, अष्टमकाण्डस्य कतिपयसूक्तानां, विंशकाण्डस्यास्य चाष्टात्रिंशसूक्तादारभ्य त्रिचत्वारिंशदुत्तरैकशतसूक्तपर्यन्तानां षडुत्तरैकशतसूक्तानां भाष्यं न व्यतायत, यतो नाद्यत्वेऽपि तल्लोकेक्षणताङ्गतम् । अथवाऽत्रापि केनचनाज्ञातकारणेन दुर्दैवेन वा स्वप्रभुत्वं प्रादर्शि । आश्चर्यमञ्चति चेतो यत्तदुत्तरभाविनाऽपि केनचन श्रौतशास्त्राचार्येण सायणाचार्यस्यैव ब्राह्मण-कल्पसूत्रादिसम्मतां शैलीमवलम्ब्य न तादृशं भाष्यमलेखि । परमिदं परमं भागधेयं श्रौताम्नायानुयायिनां मनीषिणां यदिदानीं शताधिकवर्षायुषः पुमवतारभूता इव वाग्देव्याः, पदवाक्यप्रमाणपारावारपारीणाः, प्रज्ञाचक्षुषोऽपि चर्मचक्षुष्मतो विचक्षणान् न्यक्कुर्वन्तो महामण्डलेश्वराः वेददर्शनाचार्याः पूज्यचरणाः स्वामिश्रीगङ्गेश्वरानन्दोदासीनमहाराजाः दिवानिशं परिश्रम्याप्रतिमेन तपोवलेन विलुप्तभाष्याणामेषां काण्डानामभिनवसायणभाष्यमिदमलेलिखिषत, मयि नितान्तमावर्जितस्वान्ताश्चैते मां दयासन्दोहेनानुगृह्णन्त इव भाष्यस्यास्य परिष्करणसम्पादनसंशोधनादिकर्मणि न्ययोयूजिषत। एभ्य एव चाचतुराननेभ्यः कमलासनेभ्यः सद्गुरुभ्यः प्राप्तमेधावलोऽहमपि तदिदं कार्यं सहजमेव सम्पाद्याद्य विंशकाण्डभाष्यमेतद्वेदविदां पुरः समुपस्थापयन्नमन्दमानन्दमनुभवामि ।

प्रस्तुतेऽत्र विंशे काण्डे समधिका मन्त्रा ऋग्वेदोद्धृताः सन्ति, वहवश्च अथर्ववेदस्यैवान्यकाण्डेभ्यो गृहीता वर्त्तन्ते। समेषामेषां यथास्थानमस्माभिः सङ्केतोऽक्रियत। अस्मिन् विंशे काण्डे सप्तविंशत्युत्तरशततमसूक्तादारभ्य षट्त्रिंशदुत्तरशततमसूक्तान्तानि दश सूक्तानि कुन्तापसूक्तनाम्ना आम्नायन्ते वेदविद्भिः ।

विंशकाण्डस्यास्य नवमानुवाके श्रीमद्भिः स्वामिचरणैस्त्रयः पर्याया निर्धारिताः। तत्र प्रथमे पर्याये सप्तनवतितमसूक्तादारभ्य षड्विंशत्युत्तरशततमान्तानि त्रिंशत्सूक्तानि, द्वितीये पर्याये सप्तविंशत्युत्तरशततमसूक्तादारभ्य षट्त्रिंशदुत्तरशततमान्तानि दश सूक्तानि, अथ तृतीये च सप्तत्रिंशदुत्तरशततमसूक्तादारभ्य त्रिचत्वारिंशदुत्तरशततमान्तानि सप्त सूक्तानि वर्त्तन्ते। द्वितीयपर्यायस्य दश सूक्तान्येव कुन्तापसूक्तानि वर्त्तन्ते। किन्तु खिलसूक्तसंज्ञयाऽप्येतानि परिचिन्वन्ति आथर्वणिकाः। अथर्ववेदीयबृहत्सर्वानुक्रमण्यामेषां खिलसूक्तसंज्ञैवालिख्यत । आराध्यचरणा इमे कुन्तापसूक्तानामेषां विविधभावरहस्यप्रदर्शनपूर्वकं समन्वयभाष्यं पूर्वमेवातनिषत। वैदिकविज्ञानस्य निस्तुलव्याख्यातृभिः एम. ए. पदभाग्भिः स्वामिश्रीसुरजनदासाचार्य्यैश्च सम्पाद्य तत् प्रकाशितमपीति नात्र दश सूक्तानामेषां भाष्यं प्रकाशितम् । पिपठिषुभिस्तत एव पठनीयं कुन्तापसूक्तानां भाष्यम् । सायणाचार्येणैषां पदपाठोऽपि नादीयत, न च ऋषिच्छन्दोदेवतानामुल्लेखोऽकारीत्यत्रापि तेषामुल्लेखो नाक्रियतास्माभिरिति ।

यद्वीमे श्रीसद्गुरुभगवत्पादास्तुरीयवेदस्यास्य विलुप्तभाष्याणां काण्डानां ब्राह्मण-कल्पसूत्राद्यनुमतमभिनवसायणभाष्यं विलिख्य विद्वत्समाजमुपकृतवन्तः,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

माञ्चास्य सम्पादनादिकर्मणि नियुज्यानुगृहीतवन्तस्तदर्थमेतान् पूज्यपादान् कैर्वचोभिरभिनन्दामि ? अथवा अलमत्र वाग्व्यापारेण, नात्र वचसामवसरः। पावनमूर्त्तीनामेषां पावननामस्मरणेनैवात्मानं पावयामि । अथ चैतेषां परमविश्वासपात्रभूताः शिष्यतल्लजा अनारतञ्च गुरुसेवायामेव संलग्ना वेदान्ताचार्याः श्रीगोविन्दानन्दस्वामिनो महाभागा अपि भृशमभिनन्दनीयाः । एतेषामस्मिन् कर्मणि सहयोगश्चिरस्मरणीय एव, येन च वम्बईस्थेन "श्रीसद्गुरुगङ्गेश्वर इण्टरनेशनल वेदमिशन" इति नामकेन संस्थानेनास्य प्रकाशनव्ययभारो व्यूढस्तदर्थं तदपि धन्यवादार्पणेनाभिनन्द्यते । अथ पर्यवसाने चास्य प्रूफसंशोधनादिव्यापारे पूर्णं सहयोगमाचरन् यो मां वीतचिन्तमिवाकरोत् तं लेखन-सम्पादनाध्यापन-गवेषणादिचणं यथाविध्यधीतवेदवेदाङ्गम् अस्मज्ज्येष्ठतनुजनुषम् एम. ए., पी-एच. डी. पदजुषं डा. नारायणशास्त्रि-काङ्करं व्याकरण-साहित्य-साङ्ख्ययोगदर्शनाचार्यमप्यहं शोभनाशिषां राशिभिः संयोजयामि । अस्य साहाय्यं विनास्याशु मुद्रणं दुष्करमेवासीत् ।

अथान्ते धिषण-धिषणोपमधिषणान् सर्वशास्त्र-नदीष्णान् पाठकमहाभागान् सप्रश्रयमिदमेवावेदये यत्तेऽत्र मानवसुलभं दोषजातं समुपेक्षमाणाः सन्तः मन्त्रार्थस्वारस्यञ्च चिन्वन्तः संलप्स्यन्तां स्वलिप्सितमिति ।

नवलकिशोरकाङ्करः

श्रौतमुनिनिवासः,

वृन्दावनम्

अक्षयतृतीया, वि. सं. २०४१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जयन्ति गुरवो मम

(१)

षट्शास्त्रार्णव - मन्थनोत्थित - सुधाधारा - रसाप्लाविताः
कुन्देन्दूज्ज्वल - दिग्विदिक् - प्रसृमर - प्रोद्यद्यशोभास्वराः ।
वादीन्द्र - द्विप - गर्व - खर्वण - पर - प्राज्य - प्रतापोदया
भौमा विश्वसृजो जयन्ति गुरवो गङ्गेश्वर-स्वामिनः ॥१॥

(२)

आयामा गुणवाससामथ महाग्रामा निधीनां धिया-
मारामाः श्रुतिसम्पदाञ्च विपदां नामासहा धीमताम् ।
स्तोमा आगमदर्शनादिवचसां भीमाश्च धर्मद्विषां
वामा मूढधियां जयन्ति गुरवो गङ्गेश्वरस्वामिनः ॥२॥

(३)

आधारः श्रुतिसम्पदामथ परीहारः समस्तांहसां
साकारस्त्वधिकार आत्मवचसां सारः समेषां सताम् ।
उद्धारः कृतिनां श्रुतिस्मृतिविदां भारः परः श्रेयसां
भावः कोऽपि रसोज्ज्वलो विजयते गङ्गेश्वरस्वामिनाम् ॥३॥

(४)

भाष्य - सम्पादनाद्येषां धन्योऽद्याहमबोभवम् ।
ते श्रीगङ्गेश्वरानन्दा जयन्ति गुरवो मम ॥४॥

नवलकिशोरकाङ्करः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीसद्गुरुवन्दना

(१)

अभिनव-सायणभाष्य-प्रणेतृवर्यान् मनीषिमूर्धन्यान् ।
गङ्गेश्वरगुरुपादान् स्तौति गोविन्दानन्दोऽयम् ॥

(२)

विद्वत्सम्मानदक्षानशरण-जनता-रक्षणे दत्तचित्तान्
वेदे वेदाङ्गशास्त्रे सुरगुरुसमतां गाहमानानमानान् ।
श्रीमद्गङ्गेश्वराख्यान्मुनिजनमुकुटान् सद्गुरून्नम्रमौलि-
र्गोविन्दानन्दनामा चरणयुगरजः - सेवको नन्नमीति ॥

(३)

श्रीस्वामि-गङ्गेश्वर-पूज्यपादान्
महर्षिकल्पान् श्रुति-शुभ्र-मूर्त्तीन् ।
साक्षादहो भौम-हिरण्यगर्भान्
एतानहं नौमि विनम्रशिष्यः ॥

श्रीसद्गुरुसेवासंलग्नो

गोविन्दानन्द उदासीनः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाष्यलेखका:

वेद-दर्शनाचार्या महामण्डलेश्वरा:

श्रीमत्-स्वामि-गङ्गेश्वरानन्दा उदासीनाः



धर्माचार-विचार-चारुचरिताः सादगुण्य-पुण्यालयाः
शुद्धाहार - विहार - हृद्यहृदयास्तेजः - प्रकर्षोदयाः ।
लुप्तं भाष्यमवेक्ष्य सायणकृतं वेदस्य ये ब्रह्मणो
नूत्नं भाष्यमलेलिखुर्हि त इमे सन्त्यत्र गङ्गेश्वराः ।।

—काङ्कुरः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ

शौनकीयायाम् अथर्ववेद-संहितायाम्

विंशं काण्डम्

मङ्गलम्

विश्ववन्द्यपदो वन्दे विबुधान् वेदविश्रुतान् ।
पञ्च हेरम्ब-वैकुण्ठ-शक्ति-शङ्कर-भास्करान् ॥ १ ॥
श्रौतवंश-समुद्भूतः श्रौतमार्ग-प्रवर्त्तकः ।
भक्तिविरक्ति-समुच्चेता श्रीचन्द्रः पातु सद्गुरुः ॥ २ ॥
स्वान्तध्वान्तमपाकुर्वन् वेदविज्ञान-भानुभिः ।
सर्वं समीहितं देयाद्रामानन्दो दिवाकरः ॥ ३ ॥
अभिनवमिदं भाष्यं सायणकृति-सन्निभम् ।
अनुपलब्ध-तद्भाष्य-स्थाने निर्मीयते मया ॥ ४ ॥

विंशे काण्डेऽत्र नवानुवाकाः । तत्र चत्वारोऽनुवाकाः सायणाचार्येण व्याख्याताः । अथ पञ्चमानुवाकस्य अभिनवसायणभाष्यमिदं प्रारभ्यते । तस्येदं प्रथमं सूक्तं प्रारम्भतश्चेदम्—

अष्टात्रिंशं सूक्तम्

षड्ऋचस्यास्य सूक्तस्य प्रथमादितृचस्य इरिम्बिठिः, चतुर्थ्यादितृचस्य च मधुच्छन्दा ऋषी । इन्द्रो देवता । गायत्री छन्दः ।

अभिप्लवे षडहे "आयाहि सुषुमा हि ते" इत्यादयो यथाक्रमं षड् आज्य-स्तोत्रिया भवन्ति । तदुक्तं वैतानश्रौतसूत्रे--"अभिप्लवे "आयाहि सुषुमा हि ते" इति षड् आज्यस्तोत्रिया आरम्भणीयापर्यासवर्जम्" (वै. श्रौ. ३१।२१) इति । पाठक्रमात् 'इन्द्रं वो विश्वतस्परि' (अथर्व० २०।३९।१), 'व्यन्तरिक्षमतिरत्' (अथर्व० २०।३९।२) इत्येतयोः प्रयोगे प्राप्ते प्रतिषेधार्थमारम्भणीयापर्यासवर्ज-मित्युक्तम् । तेन 'आयाहि सुषुमा हि ते' (अथर्व० २०।३८।१-३) 'इन्द्रमिद् गाथिनो बृहत्' (अथर्व० २०।३८।४-६), 'इन्द्रेण सं हि दृक्षसे' (अथर्व० २०।४०। १-३), 'इन्द्रो

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दधीचो अस्थभिः' (अथर्व० २०।४१। १-३), 'वाचमष्टापदीमहम्' (अथर्व० २०।४२। १-३), 'भिन्धि विश्वा अप द्विषः' (अथर्व० २०।४३।१-३), इति षट् स्तोत्रियाः। तथा गवामयनस्य चतुर्विंशे 'इन्द्रमिद् गाथिनो बृहत्' (अथर्व० २०।३८।४-६) इत्याज्य-स्तोत्रियो भवति। 'चतुर्विंशे "इन्द्रमिद् गाथिनो बृहद्" 'इत्याज्यस्तोत्रियः' (वै. श्रौ. ३१।१६) इति सूत्रितत्वात्। तथा स्वरसामाख्येषु त्रिष्वहःसु यथाक्रमम् 'आ याहि' इत्यादयः आज्यस्तोत्रिया भवन्ति। तदुक्तं वैताने "स्वरसामसु "आ याहि सुषुमा हि ते", "इन्द्रमिद् गाथिनो बृहत्", "इन्द्रेण सं हि दृक्षसे", (वै. श्रौ. ३३।३) इति।

आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम्।
एदं बर्हिः सदो मम ॥१॥ (ऋ. ८।१७।१)

पदपाठः

आ। याहि। सुसुम। हि। ते। इन्द्र। सोमम्। पिब। इमम्। आ। इदम्। बर्हिः। सदः। मम ॥१॥

हे **इन्द्र**! परमैश्वर्यादिगुणविशिष्ट! त्वम् **आयाहि** आगच्छ। किमर्थम् आगमनमिति तत्राह—**ते** त्वदर्थं **सोमं सुसुम हि** अभिषुतवन्तः खलु। षुञ् अभिषवे धातोः 'बहुलं छन्दसि' (पा. २।४।७६) इति शपः श्लुः। 'हि च' (पा. ८।१।३४) इति सूत्रेण निघातप्रतिषेधः। 'सुषुमा हि ते' इत्यत्र छान्दसः सांहितिको दीर्घः। **इमम्** अभिषुतं सोमं **पिब** सोमपानं कुरु इत्यर्थः। इदं वेद्यामास्तीर्णं **मम** यजमानस्य **बर्हिः आसदः** आसीद। लेटि अडागमे इतश्च लोपे च कृते रूपम्। मन्त्रोऽयं सायणेनापि व्याख्यातोऽन्यत्र (अथर्व. २०।३।१)।

आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना।
उप ब्रह्माणि नः शृणु ॥२॥ (ऋ. ८।१७।२)

पदपाठः

आ। त्वा। ब्रह्मऽयुजा। हरी इति। वहताम्। इन्द्र। केशिना। उप। ब्रह्माणि। नः। शृणु ॥२॥

सायणेन व्याख्यातोऽयं मन्त्रः (अथर्व. २०।३।२)।

ब्रह्माणस्त्वा वयं युजा सोमपामिन्द्र सोमिनः।
सुतावन्तो हवामहे ॥३॥ (ऋ. ८।१७।३)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

ब्रह्माणः । त्वा । वयम् । युजा । सोमऽपाम् । इन्द्र । सोमिनः । सुतऽवन्तः । हवामहे ॥३॥

हे **इन्द्र ! वयं** यजमानाः **ब्रह्माणः** ब्राह्मणाः **त्वा** त्वां **युजा** युज्यते इति युक्, योग्येन स्तोत्रेण । स्तोतव्यदेवताहृदयस्पृशा स्तोत्रेणेत्यर्थः । **हवामहे** आह्वयामः । कथंभूतं त्वां ? **सोमपाम्** सोमस्य पातारम् । इन्द्रस्य सोमपानस्यातिप्रियत्वादेवं विशेष्यते । कीदृशा वयम् ? **सोमिनः** कृतसोमयागाः सोमवन्तः । अस्तु । प्रस्तुते किमायातम् इति तत्राह— **सुतावन्तः** सोमान् अभिषुतवन्तः, अभिषुतैः सोमैरुपेताः । अभिषवग्रहणादिसंस्कारैः सम्पादितसोमा इत्यर्थः । सुतावन्तः इत्यत्र छान्दसो दीर्घः । सायणेनाप्ययं मन्त्रो व्याख्यातः (अथर्व. २०।३।३) ।

इन्द्रमिद् गाथिनो बृहदिन्द्रमर्केभिरर्किणः ।

इन्द्रं वाणीरनूषत ॥४॥ (ऋ. १।७।१)

पदपाठः

इन्द्रम् । इत् । गाथिनः । बृहत् । इन्द्रम् । अर्केभिः । अर्किणः । इन्द्रम् । वाणीः । अनूषत ॥४॥

गाथिनः सामगाः, गीयमानसामयुक्ता उद्गातार इत्यर्थः । **इन्द्रमित्** इन्द्रमेव **बृहद्** बृहता साम्ना, 'त्वामिद्धि हवामहे' (ऋ. सं. ६.४६.१) इत्यस्यामृचि समुत्पन्नेन बृहन्नामकेन साम्नेत्यर्थः, **अनूषत** अस्तुवन् । **अर्केभिः** ऋग्भिः । ऋच स्तुतावित्यस्माद्धातोरुत्पन्नोऽर्कशब्द ऋचमाचष्टे । अर्कशब्दस्य मन्त्रपरत्वं यास्कोऽपि स्वीकुरुते— "अर्को मन्त्रो भवति यदनेनार्चन्तीति" (निरु. ५।४) इति । **अर्किणः** अर्चनहेतुमन्त्रोपेता होतारोऽपि **इन्द्रम्** एव अस्तुवन् । ये चावशिष्टा अध्वर्यवस्तेऽपि **वाणीः** वाग्भिर्यजूरूपाभिः इन्द्रमेव **अनूषत** । सप्तपञ्चाशत्सु वाङ्नामसु "वाशी वाणी" (नि. १.११.१२) इति पठितम् । गाथिनः । 'उषिकुषिगार्तिभ्यस्थन्' (उ. सू. २। १६१) इति गायतेः थन् प्रत्ययः । गाथा एषां सन्तीति गाथिनः । 'व्रीह्यादिभ्यश्च' (पा. सू. ५.२.११६) इति सूत्रेण इनिः । बृहद् बृहता । तृतीयैकवचनस्य 'सुपां सुलुक्' इति लुक् ।

इन्द्र इद्धर्योः सचा संमिश्ल आ वचोयुजा ।

इन्द्रो वज्री हिरण्ययः ॥५॥ (ऋ. १।७।२)

पदपाठः

इन्द्रः । इत् । हर्योः । सचा । सम्ऽमिश्लः । आ । वचःऽयुजा । इन्द्रः । वज्री । हिरण्ययः ॥५॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इन्द्र इत् इन्द्र एव **हर्योः** हरिनामकयोरश्वयोः **सचा** सह युगपद् **आ संमिश्लः** सर्वतः सम्यग् मिश्रयिता । कीदृशोरश्वयोः । **वचोयुजा** । इन्द्रस्य वचनश्रवणकालमेव रथे युज्यमानयोः । सुशिक्षितयोरित्यर्थः । अयम् **इन्द्रः वज्री** वज्रधारकः । **हिरण्ययः** हिरण्मयसर्वाभरणभूषित इत्यर्थः । अस्तीति शेषः । हर्योः । हरतः इति हरी, इन् । "सचा सह" (निरु. ५।५) इति नैरुक्ताः । हिरण्ययः । अत्र 'ऋत्व्यवास्त्व्यवास्त्व-माध्वीहिरण्ययानि छन्दसि' (पा. सू. ६।४।१७५) अनेन हिरण्मयशब्दस्य मलोपो निपात्यते ।

इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद् दिवि ।
वि गोभिरद्रिमैरयत् ॥६॥ ऋ. १.७.१

पदपाठः

इन्द्रः । दीर्घाय । चक्षसे । आ । सूर्यम् । रोहयत् । दिवि । वि । गोभिः । अद्रिम् । ऐरयत् ॥६॥

अयम् **इन्द्रः दीर्घाय** प्रौढाय निरन्तराय **चक्षसे** विनान्तरायं दर्शनाय **दिवि** द्युलोके **सूर्यम्** आदित्यम् **आरोहयत्** । पुरा वृत्रासुरेण संसारे यद् आपातितं तमस्त-न्निवारणेन प्राणिनां दृष्टिसिद्ध्यर्थमादित्यं द्युलोके स्थापितवानित्यर्थः । मन्यन्ते चैवं काठकाः 'असौ वा आदित्य इन्द्रो रश्मयः' (काठ. ३६।१०) इति । स च सूर्यः **गोभिः** स्वकीयकिरणैः **अद्रिं** पर्वतप्रमुखं सर्वं जगत् **वि ऐरयत्** विशेषेण दर्शनार्थं प्रेरितवान् प्रकाशितवानित्यर्थः । अथवा इन्द्र एव गोभिर्जलैर्निमित्तभूतैः अद्रिं मेघं व्यैरयत् विशेषेण प्रेरितवान् । पञ्चदशसंख्याकेषु रश्मिनामसु "किरणा गावो" (नि. १.५.३) इति पठितम् । त्रिंशत्सङ्ख्याकेषु मेघनामसु च 'अद्रिः ग्रावा' (नि. १।१०।१) इत्यपि पठितम् । चक्षसे चक्षिङ् धातोरौणादिकोऽसुन् प्रत्ययः । चष्टे पश्यतिकर्मा । चक्षसे दर्शनायेति यास्कः (नि. ६।२७)

इति पञ्चमेऽनुवाके प्रथमं सूक्तम् ।

एकोनचत्वारिंशं सूक्तम्

पञ्चर्चस्यास्य सूक्तस्य प्रथमर्चो मधुच्छन्दाः, द्वितीयादिचतसृणाञ्च गोषूक्त्यश्वसूक्तिनावृषयः । इन्द्रो देवता । गायत्री छन्दः ।

गवामयनादौ संवत्सरे प्रातःसवने अनुरूपादनन्तरम् 'इन्द्रं वो विश्वतस्परि' (अ. २०।३९।१) इति ऋग् आरम्भणीया । तत्रैव 'व्यन्तरिक्षम् अतिरत्' (अ. २०. ३९.२) इति पर्यासो भवति । तदुक्तं वैतानश्रौतसूत्रे--'इन्द्रं वो विश्वतस्परि' इत्यारम्भणीया । 'व्यन्तरिक्षमतिरत्' इति पर्यासः' (वै. श्रौ. सू. ३५, १०; ११)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इति । आरभ्यते उक्थमुखम् अनया इत्यारम्भणीया । पर्यस्यते परिसमाप्यते अनेन शस्त्रमिति पर्यासः ।

तथा गोसवविवधवैश्यस्तोमेषु त्रिषु एकाहेषु 'इन्द्रं वो विश्वतस्परि' (अ. २०।३९), 'आ नो विश्वासु हव्यः' (अ. २०, १०४, ३) एतौ आज्यपृष्ठस्तोत्रियौ भवतः । तदुक्तं वैताने "गोसवविवधवैश्यस्तोमेषु 'इन्द्रं वो विश्वतस्पर्या णो विश्वासु हव्यः' इति" (वै. श्रौ. ३९, १०) इति ।

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः ।
अस्माकमस्तु केवलः ॥१॥ ऋ. १।७।१०

पदपाठः

इन्द्रम् । वः । विश्वतः । परि । हवामहे । जनेभ्यः । अस्माकम् । अस्तु । केवलः ॥१॥

हे ऋत्विग्यजमानाः ! **विश्वतः** सर्वेभ्यो लोकेभ्यः **परि** ऊर्ध्वम् अवस्थितम् **इन्द्रं** परमैश्वर्यादिगुणविशिष्टं देवराजमिन्द्रं **वः** युष्मदर्थं **हवामहे** वयमाह्वयामः । अतः स इन्द्रः **अस्माकं** याजकानां **केवलः** असाधारणः **अस्तु** । अर्थात् स इतरेभ्यो-ऽप्यधिकमनुग्रहमस्मासु करोत्विति । जनेभ्यः । जन्यन्ते इति जनाः । जनयतेः कर्मणि घञ् । 'जनिवध्योश्च' (पा. सू. ७।३।३५) इति उपधाया वृद्धयभावः ।

व्यन्तरिक्षमतिरन्मदे सोमस्य रोचना ।
इन्द्रो यदभिनद् वलम् ॥२॥ ऋ. ८।१४।७

पदपाठः

वि । अन्तरिक्षम् । अतिरत् । मदे । सोमस्य । रोचना । इन्द्रः । यत् । अभिनत् । वलम् ॥२॥

सायणेन व्याख्यातोऽयं मन्त्रः (अथर्व. २०।२८।१) ।

उद् गा आजदङ्गिरोभ्य आविष्कृण्वन् गुहा सतीः ।
अर्वाञ्चं नुनुदे वलम् ॥३॥ ऋ. ८।१४।८

पदपाठः

उत् । गाः । आजत् । अङ्गिरःऽभ्यः । आविः । कृण्वन् । गुहा । सतीः । अर्वाञ्चम् । नुनुदे । वलम् ॥३॥

सायणेन व्याख्यातोऽयं मन्त्रः (अथर्व. २०,८,२) ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इन्द्रेण रोचना दिवो दृल्हानि दृंहितानि च ।
स्थिराणि न पराणुदे ॥४॥ ऋ. ८।१४।९

पदपाठः

इन्द्रेण । रोचना । दिवः । दृल्हानि । दृंहितानि । च । स्थिराणि । न । पराऽनुदे ॥४॥

सायणेन व्याख्यातोऽयं मन्त्रः (अथर्व. २०,२८,३) ।

अपामूर्मिर्मदन्निव स्तोम इन्द्राजिरायते ।
वि ते मदा अराजिषुः ॥५॥ ऋ. ८।१४।१०

पदपाठः

अपाम् । ऊर्मिः । मदन्ऽइव । स्तोमः । इन्द्र । अजिरऽयते । वि । ते । मदाः । अराजिषुः ॥५॥

सायणेन व्याख्यातोऽयं मन्त्रः (अथर्व. २०,२८,४) ।

इति पञ्चमेऽनुवाके द्वितीयं सूक्तम् ।

चत्वारिंशं सूक्तम्

तृचस्यास्य सूक्तस्य मधुच्छन्दा ऋषिः । प्रथमाद्वितीययोर्ऋचोरिन्द्रः, तृतीयायाश्च मरुतो देवताः । गायत्री छन्दः ।

'इन्द्रेण सं हि दृक्षसे' इत्यस्य 'आ याहि सुषुमा हि ते' (अ. २०।३८) इत्यत्र विनियोग उक्त एव ।

तथा पृष्ठ्यस्य तृतीयेऽहनि 'इन्द्रेण सं हि दृक्षसे' (अ. २०।४०), 'वयं घ त्वा सुतावन्तः' (अ. २०।५२), 'त्वं न इन्द्रा भर' (अ. २०।१०८) इत्येते आज्यपृष्ठोक्थ-स्तोत्रिया भवन्ति । तदुक्तं वैताने—"तृतीये 'इन्द्रेण सं हि दृक्षसे', 'वयं घ त्वा सुतावन्तः', 'त्वं न इन्द्रा भर' इति" (वैता. श्रौ. ४२।२) इति ।

इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा ।
मन्दू समानवर्चसा ॥१॥ ऋ. १,६,७

पदपाठः

इन्द्रेण । सम् । हि । दृक्षसे । सम्ऽजग्मानः । अबिभ्युषा । मन्दू इति । समानऽवर्चसा ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे मरुद्गण ! त्वम् **इन्द्रेण संजग्मानः** सङ्गच्छमानः **संदृक्षसे हि**। सम्यग् दृश्येथाः खलु। अवश्यमेवास्माभिर्द्रष्टव्य इत्यर्थः। कीदृशेनेन्द्रेण ? **अबिभ्युषा** भीतिरहितेन। कीदृशाविन्द्रमरुद्गणौ। **मन्दू** नित्यं प्रमुदितौ। **समानवर्चसा** तुल्यदीप्ती। पुरा कदाचिद् वृत्रवधदशायामिन्द्रस्य सखायः सर्वे देवा वृत्रश्वासेन अपसारिताः। तदानीमिन्द्रस्य वृत्रसम्बन्धिसकलसेनाजयार्थं मरुद्भिः संगमोऽभूत्। सोऽयमर्थो दाशतय्यां 'वृत्रस्य त्वा श्वसथात्०'। (ऋ. सं. ८।९६।७) इत्यपि मन्त्रे संगृहीतः। 'इन्द्रो वै वृत्रं हनिष्यन्०' (ऐ. ब्रा. ३।२०) इति ब्राह्मणे प्रपञ्चितश्च। इन्द्रशब्दः परमैश्वर्यवन्तं मरुद्गणम् अभिधत्ते। तदानीमिन्द्रस्य सम्बोधनं बहिरेवाध्याहर्त्तव्यम्। तथा चायं मन्त्रो यास्केनैवं व्याख्यातः—"इन्द्रेण हि संदृश्यसे संगच्छमानोऽबिभ्युषा गणेन मन्दू मदिष्णू युवां स्थोऽपि वा मन्दुना तेनेति स्यात् समानवर्चसेत्येतेन व्याख्यातम्" (निरु. ४।१२) इति। समानवर्चसा। समानं वर्चो ययोरिति वा यस्येति वा बहुव्रीहिः। द्विवचने 'सुपां सुलुक्' इत्यादिना आकारादेशः।

अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति।
गणैरिन्द्रस्य काम्यैः ॥२॥ ऋ. १,६,८

पदपाठः

अनवद्यैः। अभिद्युऽभिः। मखः। सहस्वत्। अर्चति। गणैः। इन्द्रस्य। काम्यैः ॥२॥

मखः प्रवर्त्तमानोऽयं यज्ञः **अनवद्यैः** निर्दोषैः **अभिद्युभिः** द्युलोकमभिगतैः **काम्यैः** फलप्रदतया कामयितव्यैः **गणैः** मरुद्गणैः सहितम् **इन्द्रस्य** इन्द्रं **सहस्वत्** बलसमुपेतं यथा भवति तथा **अर्चति** पूजयति। अयं यज्ञो मरुद्गणम् इन्द्रञ्चात्यन्तं प्रीणयतीत्यर्थः। न विद्यतेऽवद्यं येषां तेऽनवद्याः। सहो बलमस्मिन्नर्चनकर्मण्यस्तीति सहस्वत्।

आदह स्वधामनु पुनर्गर्भत्वमेरिरे।
दधाना नाम यज्ञियम् ॥३॥ ऋ. १,६,४

पदपाठः

आत्। अह। स्वधाम्। अनु। पुनः। गर्भऽत्वम्। आऽईरिरे। दधानाः। नाम। यज्ञियम् ॥३॥

अह इत्यवधारणार्थः। **आदह** वर्षर्तोरनन्तरमेव। **स्वधामनु**। इतः परं जनिष्यमाणमन्नं जलं वा अनुलक्ष्य मरुद्गणाः **गर्भत्वम् एरिरे**। मेघमध्ये जलस्य गर्भाकृतिं प्रेरितवन्तः। अर्थात् जलस्य कर्त्तारं पर्जन्यं प्रेरितवन्तः। प्रतिवर्षमेवं ते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुर्वन्तीति प्रदर्शयितुं **पुनः** शब्दोऽत्र प्रयुक्तः । कीदृशा मरुद्गणाः ? **यज्ञियं** यज्ञयोग्यं **नाम दधानाः** धारयन्तः । सप्तसु गणेषु मरुताम् 'ईदृङ् चान्यादृङ् च' इत्यादीनि यज्ञयोग्यानि नामानि अन्यत्र समाम्नातानि । स्वधां स्वं लोकं दधाति पुष्णातीति स्वधा । यज्ञमर्हति यज्ञियम् । 'यज्ञर्त्विग्भ्यां घखञौ' (पा. ५,१,७१) इति सूत्रेण घप्रत्ययः । 'आयनेयीनीयियः फढखछघां प्रत्ययादीनाम्' (पा. ७,१,२) इति इयादेशः ।

इति पञ्चमेऽनुवाके तृतीयं सूक्तम् ।

एकचत्वारिंशं सूक्तम्

तृचस्यास्य सूक्तस्य गोतम ऋषिः । इन्द्रो देवता । गायत्री छन्दः ।

'इन्द्रो दधीचो अस्थभिः' इत्यस्य 'आ याहि सुषुमा हि ते' (अ. २०।३८) इत्यत्र पूर्वमेव विनियोग उक्तः ।

तथा पृष्ठ्यषडहस्य एकविंशस्तोमके चतुर्थेऽहनि एकाहैकीभूते 'इन्द्रो दधीचो अस्थभिः' इत्यादयः आज्यपृष्ठोक्थस्तोत्रिया भवन्ति । तदुक्तं वैताने--"पृष्ठ्यस्यैकविंशे 'इन्द्रो दधीचो अस्थभिः' (अ. २०।४१), 'विश्वाः पृतना अभिभूतरं नरम्' (अ० २०।५४), 'एवा ह्यसि वीरयुः' (अ. २०।६०) इति" । (वैता. श्रौ. सू. १४.१४) इति ।

इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः ।
जघान नवतीर्नव ॥१॥ ऋ. १.८४.१३

पदपाठः

इन्द्रः । दधीचः । अस्थऽभिः । वृत्राणि । अप्रतिऽस्कुतः । जघान । नवतीः । नव ॥१॥

अथर्वणस्तनयः कश्चिद् ऋषिर्दध्यङ्नामा तस्य यान्यस्थीनि वज्रतुल्यानि तैरस्थिभिर्वृत्राणि जघानेन्द्रः । अत्र शाट्यायनिन इतिहासमेवमाचक्षते--"आथर्वणस्य दधीचो जीवतो दर्शनेनासुराः पराबभूवुः । अथ तस्मिन् स्वर्गतेऽसुरैः सम्पूर्णा पृथिव्यभवत् । अथेन्द्रस्तैरसुरैः सह योद्धुमशक्नुवंस्तमृषिमन्विच्छन् स्वर्गं गत इति सुश्राव । अथ पप्रच्छ तत्रत्यान् नेह किमस्य किञ्चित् परिशिष्टमङ्गमस्तीति ? तस्मा अवोचन् । अस्त्येतदाश्वं शीर्षं येन शिरसाऽश्विभ्यां मधुविद्यां प्राब्रवीत् । तत्तु न विद्मः यत्राभवदिति । पुनरिन्द्रोऽब्रवीत् तदन्विच्छतेति । तद्धान्वैषिषुः । तच्छर्यणावत्यनुविद्याजह्रुः । शर्यणावद्ध वै नाम कुरुक्षेत्रस्य जघनार्धे सरः स्यन्दते । तस्य शिरसोऽस्थिभिरिन्द्रोऽसुरान् जघान" इति । **इन्द्रः** परमैश्वर्यगुणविशिष्टो देवराज इन्द्रः । कीदृशः ? **अप्रतिष्कुतः** प्रतिकूलो भूत्वा कुतोऽयमित्येवं निराकर्त्ता वैरी यस्यासौ

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतिष्कुतस्तथाविधशत्रुराहित्यादयमप्रतिष्कुतः । परैरप्रतिशब्दितः, प्रतिकूलशब्दरहितः इत्यर्थः । **दधीचः** दधीचर्षेः **अस्थभिः** अश्वशिरःसम्बन्धिभिरस्थिभिः **वृत्राणि जघान** हतवान् । कियन्ति वृत्राणि ? **नवतीर्नव** । नव सङ्ख्याका नवतीः । दशोत्तराष्ट-शतसङ्ख्याकाः । दशाधिकान्यष्टशतानीत्यर्थः । तथाहि लोकत्रयवर्त्तिनो देवाञ्जेतु-मादावासुरी माया त्रिधा सम्पद्यते । त्रिविधा सा अतीतानागतवर्त्तमानभेदेन तत्काल-वर्त्तिनो देवाञ्जेतुं पुनरपि प्रत्येकं त्रिगुणिता भवति । एवं नव सम्पद्यते । पुनरप्यु-त्साहादिशक्तित्रयरूपेण त्रैगुण्ये सति सप्तविंशतिः सम्पद्यते । पुनः सात्त्विकादिगुण-त्रयभेदेन त्रैगुण्ये सति एकोत्तराशीतिः सम्पद्यते । एवं चतुर्भिस्त्रिकैर्गुणिताया मायाया दशसु दिक्षु प्रत्येकमवस्थाने सति नव नवतयः सम्पद्यन्ते । एवं विधमाया-रूपाणि वृत्राणि आवरकाण्यसुरजातानि हतवान् । अस्थभिः । 'छन्दस्यपि दृश्यते' (पा. सू. ७।१।७६) इति अनजादावपि अस्थिशब्दस्य अनङादेशः ।

इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितम् ।
तद् विदच्छर्यणावति ॥२॥ ऋ. १।८४।१४

पदपाठः

इच्छन् । अश्वस्य । यत् । शिरः । पर्वतेषु । अपऽश्रितम् । तत् । विदत् । शर्यणाऽवति ॥२॥

पर्वतेषु पर्ववत्सु अद्रिषु **अपश्रितम्** अपगत्य स्थितम् **अश्वस्य** अश्वसम्बन्धि दधीचः **यच्छिरः इच्छन्** इन्द्रो वर्त्तते **शर्यणावति** एतन्नामके सरोवरे **तत्** शिरः **विदत्** अजानात् । ज्ञात्वा च तदाहृत्य तदस्थिभिर्वृत्राणि जघानेति पूर्वस्यामृचि सम्बन्धः । शर्यणावति । शर्यणा नाम देशाः । तेषामदूरभवं सरः शर्यणावत् । मध्वादिषु शर्यण-शब्दस्य पाठात् 'मध्वादिभ्यश्च' (पा. ४।२।८६) इति सूत्रेण चातुरर्थिको मतुप् । 'संज्ञायाम्' इति मतुपो वत्वम् । 'मतौ बह्वचोऽनजिरादीनाम्' (पा. ६।३।११९) इति दीर्घः ।

अत्राह गोरमन्वत नाम त्वष्टुरपीच्यम् ।
इत्था चन्द्रमसो गृहे ॥३॥ ऋ. १।८४।१५

पदपाठः

अत्र । अह । गोः । अमन्वत । नाम । त्वष्टुः । अपीच्यम् । इत्था । चन्द्रमसः । गृहे ॥३॥

अत्र अह अस्मिन्नेव **गोः** गन्तुर्गमनशीलस्य **चन्द्रमसो गृहे** मण्डले **त्वष्टुः** प्रदीप्तस्य आदित्यस्य सम्बन्धि **अपीच्यं** रात्रावन्तर्हितं स्वकीयं **यत् नाम** तेजस्तदा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दित्यस्य रश्मयः, **इत्था** इत्थम् अनेन प्रकारेण **अमन्वत** महर्षयः अजानन् । जलमये निर्मले चन्द्रबिम्बे आदित्यरश्मयः प्रतिफलन्ति । तत्र च प्रतिफलिताः रश्मयः सूर्ये यादृशीं संज्ञां प्राप्नुवन्ति तादृशीं चन्द्रेऽपि लभन्ते इत्यर्थः । एतदुक्तं भवति । यन्निशायामन्तर्हितं सौरं तेजस्तच्चन्द्रमण्डलं प्रविश्य अहनीव नैशं तमो निवार्य सर्वं प्रकाशयति । ईदृग्भूततेजसा युक्तः सूर्यश्च इन्द्र एव द्वादशसु आदित्येषु इन्द्रस्यापि परिगणितत्वात् । ततोऽहोरात्रयोः प्रकाशक इन्द्र एवेतीन्द्रस्तुतेः प्रतीयमानत्वादिन्द्रो देवतेत्येतदुपपन्नं भवति । अत्र निरुक्तमेतत् । 'अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते तदेतेनोपेक्षितव्यमादित्यतोऽस्य दीप्तिर्भवतीति । सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्व इत्यपि निगमो भवति । सोऽपि गोरित्युच्यते । अत्राह गोरमन्वतेति, (निरु. २।६) । मन्वते चैवं मैत्रायणीयाः—"असौ वा आदित्यस्तेजोभिर्व्याध्र्यत तत इदं सर्वं तमोऽभवत्, स प्रजापतिरेतान् दश ऋषभानपश्यदथो आहुरिन्द्रोऽपश्यदिति तानैन्द्रा-नालभत, तैरस्मिन्नादित्ये इन्द्रियाणि वीर्याण्याप्त्वादधात्" (मै. २।५।१०) । अमवन्त मनु अवबोधने । अपीच्यम् । अपिपूर्वात् चिनोतेः 'अघ्न्यादयश्च' (उ. सू. ४।५५१) इति निपातनात् यत् ।

इति पञ्चमेऽनुवाके चतुर्थं सूक्तम् ।

द्विचत्वारिंशं सूक्तम्

तृचस्यास्य सूक्तस्य कुरुसुतिर्ऋषिः । इन्द्रो देवता । गायत्री छन्दः ।

'वाचमष्टापदीमहम्' इत्यस्य विनियोगः 'आ याहि सुषुमा हि ते' (अ० २०। ३८) इत्यनेन सह तत्रैवोक्तः ।

तथा अश्वमेधस्य त्र्यहस्य द्वितीयेऽहनि 'वाचमष्टापदीमहम्' (अ० २०।४२), 'स्वादोरित्था विषूवतः' (अ० २०।१०९) इत्येतौ आज्यपृष्ठस्तोत्रियौ भवतः । तदुक्तं वैताने 'अश्वमेधस्य वाचमष्टापदीमहम्', 'स्वादोरित्था विषूवतः' (वै. श्रौ. सू. ४१।६) इति ।

वाचमष्टापदीमहं नवस्रक्तिमृतस्पृशम् ।
इन्द्रात् परि तन्वं ममे ॥१॥ ऋ. ८।७६।१२

पदपाठः

वाचम् । अष्टाऽपदीम् । अहम् । नवऽस्रक्तिम् । ऋतऽस्पृशम् । इन्द्रात् । परि । तन्वम् । ममे ॥१॥

अष्टापदीम् अष्टाभिर्दिग्भिः साष्टापदी । **नवस्रक्तिम्** उपरि स्थितेना-दित्येन नवस्रक्तिम् । नवकोणयुक्ताम्, ऊर्ध्वदिग्युक्तासु अष्टासु आसु दिक्षु व्याप्ता-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मित्यर्थः। **ऋतस्पृशं** यज्ञस्पृशं **वाचं** स्तुतिम् **अहं** परिपूर्णात् **इन्द्रात् तन्वं** तनुं न्यूनां सतीं **परिममे**। अन्यूनेयत्तां करोमीत्यर्थः। कात्स्न्र्येन स्वरूपं स्तुत्या विषयीकर्त्तु-मशक्यमिति भावः। ऋतस्पृशम् ऋतीपपदे स्पृश संस्पर्शने (तुदा.) धातोः क्विप्। स्रक्तिशब्दः कोणवाची।

अनु त्वा रोदसी उभे क्रक्षमाणमकृपेताम्।
इन्द्र यद् दस्युहाऽभवः ॥२॥ ऋ. ८।७६।११

पदपाठः

अनु। त्वा। रोदसी इति। उभे इति। ऋक्षमाणम्। अक्रृपेताम्। इन्द्र। यत्। दस्युऽहा। अभवः ॥२॥

हे **इन्द्र**! **ऋक्षमाणं** शत्रून् विलिखन्तं **त्वा** त्वाम् **उभे रोदसी** उभे अपि द्यावापृथिव्यौ **अनु अकृपेताम्** अनुकल्पयेताम्। **यत्** यदा **दस्युहा अभवः** भवसि तदा। रोदसी द्यावापृथिव्योर्नामेति (निघ० ३।३०)। रुधिर् आवरणे (रुधा०) धातोरौणा-दिकः असुन् प्रत्ययः। वर्णव्यत्ययेन धकारस्य दकारः।

उत्तिष्ठन्नोजसा सह पीत्वी शिप्रे अवेपयः।
सोममिन्द्र चमू सुतम् ॥३॥ ऋ. ८।७६।१०

पदपाठः

उत्ऽतिष्ठम्। ओजसा। सह। पीत्वी। शिप्रे इति। अवेपयः। सोमम्। इन्द्र। चमू इति। सुतम् ॥३॥

हे इन्द्र! ऐश्वर्यादिगुणविशिष्ट! त्वं **पीत्वी** पीत्वा **ओजसा** बलेन **सह उत्तिष्ठन् शिप्रे** हनू **अवेपयः** अकम्पयः। मदावेशादिति भावः। किं पीत्वा? **चमू** चम्वोरधिषवण-फलकयोः **सुतं सोमम्**। पीत्वी पा पाने (भ्वा.) धातोः क्त्वा प्रत्यये 'स्नात्व्यादयश्च' (पा. ७।१।४९) सूत्रेणेकारादेश अवेपयः। टुवेपृकम्पने धातोर्णिचि लङ्।

इति पञ्चमेऽनुवाके पञ्चमं सूक्तम्।

त्रिचत्वारिंशं सूक्तम्

तृचस्यास्य सूक्तस्य त्रिशोक ऋषिः। इन्द्रो देवता। गायत्री छन्दः।

'भिन्धि विश्वा अपद्विषः' इत्यस्य विनियोग. 'आ याहि' (अ० २०।३८) इत्यत्र उक्तः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथा आप्तोर्याम्णि क्रतौ उपरिष्टान्माध्यन्दिनवचनात् प्रातःसवने 'भिन्धि विश्वा अप द्विषः' (अ० २०।४३) इत्यनुरूपम् अभितः 'आ नो याहि' (अ० २०।४०) इत्यनुरूपो भवति । तदुक्तं वैतानश्रौतसूत्रे—" 'भिन्धि विश्वा अप द्विषः' इत्यनुरूपमभितः 'आ नो याहि' इति" (वै. श्रौ. सू. २७।२०) इति ।

भिन्धि विश्वा अप द्विषः परि बाधो जही मृधः ।
वसु स्पार्हं तदा भर ॥१॥ ऋ. ८।४५।४०

पदपाठः

भिन्धि । विश्वाः । अप । द्विषः । परि । बाधः । जहि । मृधः । वसु । स्पार्हम् । तत् । आ । भर ॥१॥

हे इन्द्र ! त्वं **विश्वाः** सर्वाः **द्विषः** द्वेष्ट्रीः शत्रुसेनाः **अपभिन्धि** विदारय । **बाधः** बाधकारिणीः हिंसित्रीः इत्यर्थः । **मृधः** संग्रामान् 'स्पृधः मृधः' इति (निघ. २.१७) संग्रामनामसु पाठात् शत्रूनित्यर्थः । **परिजहि** परितो नाशय । **स्पार्हं** स्पृहणीयं च तत् प्रसिद्धं **वसु आभर** अस्मभ्यमाहर । स्पार्हम्, स्पृहा तस्या इदम् । 'तस्येदम्' इत्यर्थेऽण् । मृधः । मृधु उन्दने (भ्वा.) धातोरधिकरणे क्विप् । 'पाप्मा वै मृधः' इति याज्ञवल्क्यः (श. ब्रा. ६।३।३।८) ।

यद् वीलाविन्द्र यत् स्थिरे यत् पर्शाने पराभृतम् ।
वसु स्पार्हं तदा भर ॥२॥ ऋ. ८।४५।४१

पदपाठः

यत् । वीलौ । इन्द्र । यत् । स्थिरे । यत् । पर्शाने । पराऽभृतम् । वसु । स्पार्हम् । तत् । आ । भर ॥२॥

इन्द्र परमैश्वर्यगुणसम्पन्न हे **इन्द्र !** त्वया च **वीलौ** दृढे परैः प्रच्यावयितुमशक्ये **यत्** यद्धनं **पराभृतं** संभृतं वर्तने **यच्च स्थिरे** स्वयं निश्चले पराभृतमस्ति **यत्** यच्चापि **पर्शाने** विमर्शनक्षमे पराभृतं विद्यते **तत् स्पार्हं** स्पृहणीयं प्रसिद्धं **वसु** धनम् **आभर** अस्मभ्यमाहर । वीलु-इति बलम् (निघं. २।९) ।

यस्य ते विश्वमानुषो भूरेर्दत्तस्य वेदति ।
वसु स्पार्हं तदा भर ॥३॥ ऋ. ८।४५।४२

पदपाठः

यस्य । ते । विश्वऽमानुषः । भूरेः । दत्तस्य । वेदति । वसु । स्पार्हम् । तत् । आ । भर ॥३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे इन्द्र ! **ते** त्वया । अत्र विभक्तिव्यत्ययश्छान्दसः । **दत्तस्य** दत्तं **भूरेः** प्रभूतं **यस्य** यद्धनम् । कर्मणि षष्ठी । **विश्वमानुषः** सर्वो हि जनो **वेदति** जानाति, **तत् स्पार्हं** स्पृहणीयं **वसु** धनम् **आ भर** अस्मभ्यं प्रयच्छ ।

इति पञ्चमेऽनुवाके षष्ठं सूक्तम् ।

चतुश्चत्वारिंशं सूक्तम्

तृचस्यास्य सूक्तस्य इरिम्बिठिर्ऋषिः । इन्द्रो देवता । गायत्री छन्दः ।

प्र सम्राजं चर्षणीनामिन्द्रं स्तोता नव्यं गीर्भिः ।
नरं नृषाहं मंहिष्ठम् ॥१॥ ऋ ८।१६।१

पदपाठः

प्र । सम्ऽराजम् । चर्षणीनाम् । इन्द्रम् । स्तोत । नव्यम् । गीःऽभिः । नरम् । नृऽसहम् । मंहिष्ठम् ॥१॥

चर्षणीनां मनुष्याणां मध्ये **सम्राजं** सम्यग् राजमानं यद्वा मनुष्याणां महाराजम् । **इन्द्रं** हे स्तोतृजनाः ! **प्रस्तोत** प्रकर्षेण स्तुत । कीदृशम् ! **गीर्भिः** स्तुतिरूपाभिर्वाग्भिः **नव्यं** स्तुत्यं **नरं** नेतारं **नृषाहं** नृणां शत्रुजनानाम् अभिभवितारं **मंहिष्ठं** परमं दातारञ्च । चर्षणीनाम् कृष विलेखने धातोर्बाहुलकादौणादिकः अनिः प्रत्ययः । आदेश्च धातोश्चकारादेशः । मंहिष्ठम् । मंहतिः दानकर्मा (निघं. ३।२०) । महि वृद्धौ (भ्वा.) धातोः कर्त्तरि तृजन्तादतिशायन इष्ठन् ।

यस्मिन्नुक्थानि रण्यन्ति विश्वानि च श्रवस्या ।
अपामवो न समुद्रे ॥२॥ ऋ. ८।१६।२

पदपाठः

यस्मिन् । उक्थानि । रण्यन्ति । विश्वानि । च । श्रवस्या । अपाम् । अवः । न । समुद्रे ॥२॥

यस्मिन् इन्द्रे राजनि **उक्थानि** शस्त्राणि **रण्यन्ति** रमन्ते । **विश्वानि** सर्वाणि **च श्रवस्या** श्रवस्यानि श्रवणयोग्यानि हविर्लक्षणान्यन्नानि रमन्ते । तत्र दृष्टान्तः । **समुद्रे** उदधौ **अपाम्** जलानाम् **अवो न** । अवति गच्छतीत्यवः तरङ्गसमूहः । स यथा समुद्रेऽन्तर्भवति तथा तानि इन्द्रे रमन्ते इत्यर्थः । रण्यन्ति रण शब्दे (भ्वा.) धातोर्लट् । विकरणव्यत्ययेन शपः श्यन् । श्रवस्या श्रवसपदात् अर्हत्यर्थे यत् प्रत्ययः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तं सुष्टुत्या विवासे ज्येष्ठराजं भरे कृत्नुम् ।
महो वाजिनं सनिभ्यः ॥३॥ ऋ. ८।१६।३

पदपाठः

तम् । सुऽस्तुत्या । आ । विवासे । ज्येष्ठऽराजम् । भरे । कृत्नुम् । महः । वाजिनम् । सनिऽभ्यः ॥३॥

तम् इन्द्रं परमैश्वर्यसम्पन्नम्, **सुष्टुत्या** शोभनया स्तुत्या **आ विवासे** सम्यक् परिचरामि । कीदृशम् ? **ज्येष्ठराजं** ज्येष्ठेषु प्रशंसनीयेषु देवेषु राजमानं शोभमानम्, राजतेः 'सत्सूद्विषः' इति क्विप् । **भरे** संग्रामे **महः** महतो वृत्रहननादेः **कृत्नुं** कर्त्तारं वृत्राद्यसुरसंहारकारिणमित्यर्थः । **वाजिनम्** अन्नवन्तं बलवन्तं वा । किमर्थम् ? **सनिभ्यो** धनेभ्यः । धनसम्पत्तिप्राप्तये—इत्यर्थः । विवासतिः परिचरणकर्मा (निघं. ३।५) ।'कृत्नुम् डुकृञ् करणे धातोः औणादिकः क्त्नुः प्रत्ययः ।

इति पञ्चमेऽनुवाके सप्तमं सूक्तम् ।

पञ्चचत्वारिंशं सूक्तम्

तृचस्यास्य सूक्तस्य शुनःशेपः (देवरातापरनामा) ऋषिः । इन्द्रो देवता । गायत्री छन्दः ।

तीव्रसुदुपशदोपहव्याख्येषु त्रिषु एकाहेषु 'अयमु ते समतसि' (अथ० २०।४५) 'इमा उ त्वा पुरूवसो' (अथ० २०।१०४) एतौ आज्यपृष्ठस्तोत्रियौ यथाक्रमं भवतः । तथा व्युष्टिद्वयहे एतौ आज्यपृष्ठस्तोत्रियौ भवतः । तदुक्तं वैताने "तीव्रसुदुपशदोपहव्येषु' 'अयमु ते समतसि' 'इमा उ त्वा पुरूवसो' इति व्युष्टिदयहे च" (वै. श्रौ. ३६।६) इति ।

तथा संसर्पचतुर्वीरयोश्चतुरहयोः सर्वेष्वहःसु एतौ आज्यपृष्ठस्तोत्रियौ भवतः । तदुक्तं वैताने—"संसर्पचतुर्वीरयोः 'अयमु ते समतसि' 'इमा उ त्वा पुरूवसो' इति" (वै. श्रौ. ४१।१३) इति ।

अयमु ते समतसि कपोत इव गर्भधिम् ।
वचस्तच्चिन्न ओहसे ॥१॥ ऋ. १।३०।४

पदपाठः

अयम् । ऊ इति । ते । सम् । अतसि । कपोतःऽइव । गर्भऽधिम् । वचः । तत् । चित् । नः । ओहसे ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे इन्द्र ! **अयमु** अयमपि लोचनगोचरीभूतः सोमः **ते** त्वत्कृते सम्पादितः। यं सोमं **सम् अतसि** सम्यक् सातत्येन प्राप्नोषि। तत्र दृष्टान्तः। **कपोत इव**। यथा पारावतः पक्षी **गर्भधिं** गर्भधारिणीं पारावतीं प्राप्नोति तद्वत्। **तत् चित्**। तस्मादेव कारणात् **नः** अस्माकं **वचो** वचनम् **ओहसे** लभसे। गर्भधि गर्भोऽस्यां धीयते इति गर्भधिः। 'कर्मण्यधिकरणे च' (पा. ३.३.३९) इति किप्रत्ययः।

स्तोत्रं राधानां पते गिर्वाहो वीर यस्य ते।
विभूतिरस्तु सूनृता ॥२॥ ऋ. १।३०।५

पदपाठः

स्तोत्रम्। राधानाम्। पते। गिर्वाहः। वीर। यस्य। ते। विऽभूतिः। अस्तु। सूनृता ॥२॥

हे इन्द्र ! **राधानां पते** धनवैभवानां पालक ! **गिर्वाहः** गीर्भिरुह्यमान **वीर** सामर्थ्योपेत **यस्य ते** तव इन्द्रस्य **स्तोत्रम्** ईदृशं भवति तस्य तव **विभूतिः** ऐश्वर्यलक्ष्मीः **सूनृता** प्रियसत्यरूपा **अस्तु** भवतु। राधानां पते, राध्नुवन्ति एभिरिति राधानि धनानि विभूतिः।

ऊर्ध्वस्तिष्ठा न ऊतयेऽस्मिन् वाजे शतक्रतो।
समन्येषु ब्रवावहै ॥३॥ ऋ. १।३०।६

पदपाठः

ऊर्ध्वः। तिष्ठ। नः। ऊतये। अस्मिन्। वाजे। शतक्रतो इति शतऽक्रतो। सम्। अन्येषु। ब्रवावहै ॥३॥

शतक्रतो असङ्ख्यातकर्मोपेत असङ्ख्यप्रज्ञ वा हे इन्द्र ! **अस्मिन्** प्रवर्त्तमाने **वाजे** संग्रामे **नः** अस्माकम् **ऊतये** रक्षणार्थम् **ऊर्ध्वः** समुन्नतः समुत्सुकः **तिष्ठ** भव। त्वं चाहं संमिलय **अन्येषु** कार्यान्तरेषु **सं ब्रवावहै** सम्यग् विचारयावः।

इति पञ्चमेऽनुवाके अष्टमं सूक्तम्।

षट्चत्वारिंशं सूक्तम्

तृचस्यास्य सूक्तस्य इरिम्बिठिर्ऋषिः। इन्द्रो देवता। गायत्री छन्दः।

स्वरसामाख्येषु त्रिष्वहःसु अभिप्लवे च 'सं चोदय चित्रमर्वाक्' (अ० २०।७१।११) 'प्रणेतारं वस्यो अच्छा' (अ० २०।४६) एतौ आज्यपृष्ठस्तोत्रियौ पर्यायेण भवतः। तद् उक्तं वैताने--"स्वरसामसु 'सं चोदय चित्रमर्वाक्', 'प्रणेतारं वस्यो अच्छ' इति पर्यायेण अभिप्लवे च" (वै. श्रौ. ४२।८) इति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रणेतारं वस्यो अच्छा कर्तारं ज्योतिः समत्सु ।
सासह्वांसं युधाऽमित्रान् ॥१॥ ऋ. ८।१६।१०

पदपाठः

प्रऽनेतारम् । वस्यः । अच्छ । कर्तारम् । ज्योति. । समत्ऽसु । ससह्वांसम् । युधा । अमित्रान् ॥१॥

वस्यः वसीयः प्रशस्तं वसु स्पृहणीयं धनमित्यर्थः । **अच्छ** आभिमुख्येन **प्रणेतारं** लम्भयितारं **समत्सु** संग्रामेषु शत्रुजननिरसनेन **ज्योतिः** प्रकाशं जयप्राप्तिलक्षणं **कर्त्तारम्** करणशीलम् । करोतेस्ताच्छीलिकस्तृन् । कुत इत्यत आह । **युधा** युद्धेन **अमित्रान्** शत्रून् **ससह्वांसम्** अभिभूतवन्तम् । एवं गुणवन्तमिन्द्रमस्माकं स्तुतिवाचो वर्धयन्तीति शेषः ।

स नः पप्रिः पारयाति स्वस्ति नावा पुरुहूतः ।
इन्द्रो विश्वा अति द्विषः ॥२॥ ऋ. ८।१६।११

पदपाठः

सः । नः । पप्रिः । पारयाति । स्वस्ति । नावा । पुरुऽहूतः । इन्द्रः । विश्वाः । अति । द्विषः ॥२॥

पप्रिः प्राता पूरयिता, **पुरुहूतः** प्रभूतैर्यजमानैराहूतः **स इन्द्रः विश्वाः** समस्ताः **द्विषः** द्वेष्ट्रीः प्रजाः **नः** अस्मान् **नावा** तरणसाधनेन उडुपेन **स्वस्ति** क्षेमेण सकुशलम् **अति पारयाति** अति पारयतु । पप्रिः प्रा पूरणे (अदा.) धातोः किः प्रत्ययः । पारयाति, पार कर्मसमाप्तौ (चुरा.) धातोः रूपम् । पुरुहूतः । पुरु-हूतपदयोः समासः । पुरु इति बहुनाम (निघं. ३।१) हूत, ह्वेञ् स्पर्धायां शब्दे चेति धातोः क्तः । यजादित्वात् संप्रसारणम् ।

स त्वं न इन्द्र वाजेभिर्दशस्या च गातुया च ।
अच्छा च नः सुम्नं नेषि ॥३॥ ऋ. ८।१६।१२

पदपाठः

सः । त्वम् । नः । इन्द्र । वाजेभिः । दशस्य । च । गातुऽया । च । अच्छ । च । नः । सुम्नम् । नेषि ॥३॥

हे परमैश्वर्यशालिन् **इन्द्र ! सः** तादृग्गुणोपेतः **त्वम् नः** अस्मभ्यं **वाजेभिः** बलैः **दशस्य च** धनं प्रयच्छ च । दशस्यतिर्दानकर्मा । **गातुय च,** गातु मार्गम-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्मभ्यमिच्छ च । गातुशब्दात् 'छन्दसि परेच्छायां०' इति क्यच् । 'न छन्दस्यपुत्रस्य' (पा. ७।४।३५) इति दीर्घनिषेधः । तथा **नः** अस्मान् **सुम्नं** सुखं **च अच्छ नेषि** अभिप्रापय ।

इति पञ्चमानुवाके नवमं सूक्तम् ।

सप्तचत्वारिंशं सूक्तम्

एकविंशत्यृचस्यास्य सूक्तस्य प्रथमादितृचस्य सुकक्षः, चतुर्थ्यादितृचस्य च मधुच्छन्दाः, सप्तम्यादितृचस्य इरिम्बिठिः, त्रयोदश्यादिनवानाञ्च प्रस्कण्व ऋषयः । प्रथमादिद्वादशर्चामिन्द्रः, त्रयोदश्यादिनवानाञ्च सूर्यो देवते । गायत्री छन्दः ।

अतिरात्रे अतिरिक्तोक्थेषु 'तमिन्द्रं वाजयामसि' (अ. २०।४७) 'महाँ इन्द्रो य ओजसा' (अ. २०।१३८) इत्येतौ स्तोत्रियानुरूपौ भवतः । तदुक्तं वैताने– "तमिन्द्रं वाजयामसि', 'महाँ इन्द्रो य ओजसा' इति स्तोत्रियानुरूपौ" (वै. श्रौ. २७।२८) इति ।

तथा छन्दोमाख्येषु त्रिष्वहःसु प्रातःसवने 'इन्द्रा याहि चित्रभानो' (अ. २०।८४) 'तमिन्द्रं वाजयामसि' (अ. २०।४७) महाँ इन्द्रो य ओजसा' (अ. २०।१३८) इत्येते आज्यस्तोत्रिया भवन्ति । तद्उक्तं वैताने "छन्दोमेषु 'इन्द्रा याहि चित्रभानो' 'तमिन्द्रं वाजयामसि, महाँ इन्द्रो य ओजसा" इत्याज्यस्तोत्रियाः (वैता० श्रौ. (३३।१४) इति ।

तथा वैश्वदेवादीनां त्र्यहाणां द्वितीयेष्वहःसु यथाक्रमम् 'तमिन्द्रं वाजयामसि' (अ. २०।४७) 'अस्तावि मन्म पूर्व्यम्' (अ. २०।११९) त ते मदं गृणीमसि' (अ. २०।६१) एते आज्यपृष्ठोक्तस्तोत्रिया भवन्ति । तदुक्तं वैताने–"द्वितीयेषु 'तमिन्द्रं वाजयामासि' 'अस्तावि मन्म पूर्व्यम्, 'तं ते मदं गृणीमसि' (वैता. श्रौत. ४१।५) इति ।

तथा साकमेधत्र्यहस्य तृतीयेऽहनि 'तमिन्द्रं वाजयामसि' (अ. २०।४७) 'आयन्त इव सूर्यम्' (अ. २०।५८) इत्येतौ आज्यपृष्ठस्तोत्रियौ भवतः । तदुक्तं वैताने––"साकमेधस्य 'तमिन्द्रं वाजयामसि', 'आयन्त इव सूर्यम्" (वै. श्रौ. ४१।९) इति ।

तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे ।
स वृषा वृषभो भुवत् ॥१॥ ऋ. ८।९३।७

पदपाठः

तम् । इन्द्रम् । वाजयामसि । महे । वृत्राय । हन्तवे । सः । वृषा । वृषभः । भुवत् ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तम् तथाविधगुणयुक्तम् **इन्द्रं वाजयामसि** वाजयामः सोमेन स्तुतिभिर्वा वाजवन्तं वलोपेतं कुर्मः । अथवा वाजयामसि गमयामः, भक्त्या प्रेरयाम इत्यर्थः । किमर्थम् **महे** महते **वृत्राय** अपामावारकं वृत्रासुरं, पापरूपं वैरिणं वा **हन्तवे** हन्तुम् । स चेन्द्रो **वृषा** अस्माकं कामानां सेक्ता वर्षयिता वा सन् **वृषभः** श्रेष्ठः स्तोतृजनानां धनादिसेचको दाता इत्यर्थः, **भुवत्** भवतु ।

इन्द्रः स दामने कृत ओजिष्ठः स मदे हितः ।
द्युम्नी श्लोकी स सोम्यः ॥२॥ ऋ. ८।९३।८

पदपाठः

इन्द्रः । सः । दामने । कृतः । ओजिष्ठः । सः । मदे । हितः । द्युम्नी । श्लोकी । सः । सोम्यः ॥२॥

सः इन्द्रः तादृशगुणविशिष्टं इन्द्रः **दामने** स्तोतृभ्यो धनादिदानायैव **कृतः** प्रजापतिना सृष्टः । अथवा दामने दामकृत्ये वन्धने कृतः, सोमपानादिना वशीकृत इत्यर्थः । किंच **ओजिष्ठः** ओजस्वितमः **स** एवेन्द्रः **मदे** माद्यन्ति अनेनेति मदः सोमः । तस्मिंश्च प्रजापतिना सृष्टिकाले हितः । सोमपानार्थं च निहित इत्यर्थः । अथवा मदे वैरिनाशनरूपमदकृत्ये अस्माभिर्भक्त्या प्रेरितः । **द्युम्नी** 'द्युम्नं द्योततेर्यशो वाऽन्नं वा' इति । यशस्वी अन्नवान् वा अथवा धनवान् । अत एव **श्लोकी** श्लोकः स्तवः, तद्वान् । **स** इन्द्रः सोम्यः सोमार्हो भवति रमणीयो वा जायते ।

गिरा वज्रो न संभृतः सबलो अनपच्युतः ।
ववक्ष ऋष्वो अस्तृतः ॥३॥ ऋ. ८।९३।९

पदपाठः

गिरा । वज्रः । न । सम्ऽभृतः । सऽबलः । अनपऽच्युतः । ववक्षे । ऋष्वः । अस्तृतः ॥३॥

सोऽयमिन्द्रः **गिरा** अस्मदीयया स्तुतिरूपया वाचा स्तोतृभिः **संभृतः** उत्पादितः तीक्ष्णीकृतः । अथवा संभृतः सम्यग् अस्माभिर्वशीकृतः । तत्र दृष्टान्तः । **वज्रः न** । तत्कर्तृभिर्निशितधारो यथा भवति तीक्ष्णीक्रियते तद्वत् स्तोतृभिः स्तुत्या संभृतोऽत एव **सबलो** बलसहितस्तस्मात् **अनपच्युतः** परैरप्रच्युतः कदाचिदप्यपलायितो वा । शत्रुभिरनभिगत इत्यर्थः । तादृशः **ऋष्वः** महान् दीप्यमानो वा, **अस्तृतो** युद्धे शत्रुभिरहिंसित इन्द्रो **ववक्षे** स्तोतृभ्यो धनादिकं वोढुमिच्छति ।

इन्द्रमिद् गाथिनो बृहदिन्द्रमर्केभिरर्किणः ।
इन्द्रं वाणीरनूषत ॥४॥ ऋ. १।७।१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

इन्द्रम् । इत् । गाथिनः । बृहत् । इन्द्रम् । अर्केभिः । अर्किणः । इन्द्रम् । वाणीः । अनूषत ॥४॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व. २०।३८।४) ।

इन्द्र इद्धर्योः सचा संमिश्ल आ वचोयुजा ।
इन्द्रो वज्री हिरण्ययः ॥५॥ ऋ. १।७।२

पदपाठः

इन्द्रः । इत् । हर्योः । सचा । सम्ऽमिश्लः । आ । वचःऽयुजा । इन्द्रः । वज्री । हिरण्ययः ॥५॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व. २०।३८।५) ।

इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद् दिवि ।
वि गोभिरद्रिमैरयत् ॥६॥ ऋ. १।७।३

पदपाठः

इन्द्रः । दीर्घाय । चक्षसे । आ । सूर्यम् । रोहयत् । दिवि । वि । गोभिः । अद्रिम् । ऐरयत् ॥६॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व. २०।३८।६) ।

आ याहि सुषुमा हि त इन्द्र सोमं पिबा इमम् ।
एदं बर्हिः सदो मम ॥७॥ ऋ. ८।१७।१

पदपाठः

आ । याहि । सुसुम । हि । ते । इन्द्र । सोमम् । पिब । इमम् । आ । इदम् । बर्हिः । सदः । मम ॥७॥

व्याख्यातोऽयं मन्त्रः (अथर्व. २०।३८।१) ।

आ त्वा ब्रह्मयुजा हरी वहतामिन्द्र केशिना ।
उप ब्रह्माणि नः शृणु ॥८॥ ऋ. ८।१७।२

पदपाठः

आ । त्वा । ब्रह्मऽयुजा । हरी इति । वहताम् । इन्द्र । केशिना । उप । ब्रह्माणि । नः शृणु ॥८॥

सायणेन व्याख्यातोऽयं मन्त्रः (अथर्व. २०।३।२) ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्रह्माणस्त्वा वयं युजा सोमपामिन्द्र सोमिनः ।
सुतावन्तो हवामहे ॥९॥ ऋ. ८।१७।३

पदपाठः

ब्रह्माणः । त्वा । वयम् । युजा । सोमऽपाम् । इन्द्र । सोमिनः । सुतऽवन्तः । हवामहे ॥९॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व. २०।३८।३), (अ० २०।३।३)।

युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः ।
रोचन्ते रोचना दिवि ॥१०॥ ऋ. १।६।१

पदपाठः

युञ्जन्ति । ब्रध्नम् । अरुषम् । चरन्तम् । परि । तस्थुषः । रोचन्ते । रोचना । दिवि ॥१०॥

ब्रध्नम् । 'असौ वा आदित्यो ब्रध्नः' इत्युक्तदिशा आदित्यरूपेणावस्थितम् । **अरुषं** हिंसकरहिताग्निरूपेणावस्थितम् । 'अग्निर्वा अरुषः' इति तैत्तिरीयब्राह्मणम् (३।९।४।१) । **चरन्तं** वायुरूपेण सर्वतः प्रसरन्तम् इन्द्रं **परि तस्थुषः** परितोऽवस्थिता लोकत्रयवर्त्तिनः प्राणिनो **युञ्जन्ति** स्वकीये कर्मणि देवतात्वेन सम्बद्धं कुर्वन्ति । तस्यैवेन्द्रस्य मूर्त्तिविशेषभूतानि **रोचना** रोचनानि नक्षत्राणि **दिवि** द्युलोके **रोचन्ते** प्रकाशन्ते । अथवा ब्रध्नमादित्यस्वरूपमरुषम् अग्निरूपं चरन्तं वायुरूपमिममश्वं तथा परितस्थुषः परितोऽवस्थितान् त्रीन् लोकान् एतदश्वस्वरूपान् युञ्जन्ति देवाः सर्वे रथे योजयन्ति । तथा दिवि द्युलोके विद्यमानानि प्रकाशरूपाणि नक्षत्राणि अश्वमेतं प्रकाशयन्ति । अयमर्थः सर्वोऽपि तैत्तिरीये ब्राह्मणे (३।९।४।१-२) स्पष्टमुच्यते--"असौ वा आदित्यो ब्रध्नः । अग्निर्वा अरुषः वायुर्वै चरन् । इमे वै लोकाः परितस्थुषः । नक्षत्राणि वै रोचना दिवि" इति । अरुषम् । उष रुष रिष हिंसार्थाः । रोषन्तीति रुषाः हिंसकाः । 'इगुपधज्ञाप्रीकिरः कः' (पा. ३।१।१३५) इति कः । अथर्ववेदस्येव २०।२६।४ स्थले सायणो मन्त्रमिममेवं व्याचख्यौ--**ब्रध्नम्** महान्तम् । महन्नामैतत् । **अरुषम्** आरोचमानं **तस्थुषः** स्थावरान् **परि** । एतज्जङ्गमान् अपि उपलक्षणम् । स्थावरजङ्गमानामुपरि **चरन्तम्**, स्वर्गावस्थान् सूर्यात्मना वा परिचरन्तम् एनं महानुभावम् इन्द्रं **युञ्जन्ति** रथे योजयन्ति । अत्र सामर्थ्यात् हरिनामकानश्वान् इति गम्यते । **रोचना** रोचनानि रथयुक्तानामश्वानां रथस्य च रश्मयो दिवि रोचन्ते दीप्यन्ते । अयं मन्त्रः उत्तरमन्त्रे 'युञ्जन्त्यस्य काम्या०" इति हर्यो रथयोजनाभिधानात्तदनुसारेण केवलेन्द्रपरतया व्याख्यातः । तदनन्तरमन्त्रे 'केतुं कृण्वन्नकेतवे' इति केतूपाधिकस्येन्द्रस्याभिधानात्तदनुसारेणायं सूर्यात्मकेन्द्रपरतयाऽपि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्याख्येयः । ब्रध्नशब्दः सूर्यपर्यायः । बध्नाति नियमयति सर्वं जगदिति ब्रध्नः सूर्यः । तं रथे युञ्जन्ति हरितोऽश्वाः । अरुषं चरन्तं परि तस्थुषः इत्येतत् समानम् । तस्य रोचना रोचनानि रश्मिजालानि **दिवि रोचन्त** इति ।

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे ।
शोणा धृष्णू नृवाहसा ॥११॥ ऋ. १।६।२

पदपाठः

युञ्जन्ति । अस्य । काम्या । हरी इति । विऽपक्षसा । रथे । शोणा । धृष्णू इति । नृऽवाहसा ॥११॥

व्याख्यातोऽयं मन्त्रः सायणेन (अथर्व. २०।२६।५) ।

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे ।
समुषद्भिरजायथाः ॥१२॥ ऋ. १।६।३

पदपाठः

केतुम् । कृण्वन् । अकेतवे । पेशः । मर्याः । अपेशसे । सम् । उषत्ऽभिः । अजायथाः ॥१२॥

मर्याः हे मनुष्याः ! इदं महदाश्चर्यम् अवलोकयतेत्यध्याहारः । किं तदाश्चर्यमित्युच्यते । आदित्यरूपोऽयम् इन्द्रः **उषद्भिः** दाहकैः रश्मिभिः प्रतिदिवसमुषःकालैर्वा सम्भूय **समजायथा.** समुदपद्यत । अथवा सूर्यस्यैवास्तमने समये मरणमुपचर्य व्यत्ययेन बहुवचनं कृत्वा सम्बोधनं क्रियते । हे मर्य ! प्रतिदिनं त्वमजायथा इति योज्यम् । किं कुर्वन् ! **अकेतवे** रात्रौ निद्राभिभूततया प्रज्ञानरहिताय प्राणिने **केतुं कृण्वन्** प्रातः प्रज्ञानं कुर्वन् । **अपेशसे** रात्रौ अन्धकारावृतत्वेन अनभिव्यक्तत्वात् रूपरहिताय पदार्थाय प्रातरन्धकारनिवारणेन **पेशः** रूपमभिव्यज्यमानं कुर्वन् । "पेश इति रूपनाम पिंशतेः" (निरु. ८।११) इति यास्कः । अकेतवे अपेशवे उभयत्राऽप्यत्र चतुर्थ्यौ षष्ठचर्थे द्रष्टव्यौ । अथ तैत्तिरीयास्तु मन्त्रमेतमश्वमेधीये रथे ध्वजोपगूहने पठन्ति । तत्रायमर्थः—मर्याः मनुष्या अकेतवे पूर्वं ध्वजरहिताय रथाय केतुं कृण्वन् ध्वजं कुर्वन्तु । अपेशसे सुवर्णालङ्काररहिताय रथाय पेशः सुवर्णालङ्कारं कुर्वन्तु । हे रथ ! त्वम् उषद्भिर्ज्वालासदृशैः सुवणरश्मिभिः समजायथाः सङ्गतो जातोऽसि । मन्त्रोऽयं सायणेनापि व्याख्यातः (अथर्व. २०।२६।६) ।

उदुत्यं जातवेदसं देवं वहन्ति केतवः ।
दृशे विश्वाय सूर्यम् ॥१३॥ ऋ. १।५०।१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

उत् । ऊं इति । त्यम् । जातऽवेदसम् । देवम् । वहन्ति । केतवः । दृशे । विश्वाय । सूर्यम् ॥१३॥

केतवः प्रज्ञापकाः सूर्यरश्मयः सूर्याश्वा वा **त्यं** तं प्रसिद्धं **जातवेदसं** समुत्पन्नस्य निखिलस्य संसारस्य वेत्तारम्, जातप्रज्ञं सञ्जातधनं वा **देवं** द्योतमानं सूर्यम् **उद्वहन्ति** । ऊर्ध्वप्रदेशं प्रापयन्ति । उ इति पादपूरणः । किमर्थम् ? **विश्वाय दृशे** सर्वस्य जगतो दर्शनार्थम् । तथा सर्वे लोकाः सूर्यमवलोकयन्ति तथोर्ध्वं प्रापयन्तीत्यर्थः । अत्र निरुक्तम् 'उद्वहन्ति तं जातवेदसं देवमश्वाः केतवो रश्मयो वा सर्वेषां भूतानां संदर्शनाय सूर्यम्' (निरु. १२।१५) । पूर्वं व्याख्यातोऽयं मन्त्रः सायणेनापि (अथर्व. १३।२।१६) ।

अप त्ये तायवो यथा नक्षत्रा यन्त्यक्तुभिः ।
सूराय विश्वचक्षसे ॥१४॥ ऋ. १।५०।२

पदपाठः

अप । त्ये । तायवः । यथा । नक्षत्रा । यन्ति । अक्तुऽभिः । सूराय । विश्वऽचक्षसे ॥१४॥

त्ये तायवः यथा ते प्रसिद्धास्तस्करा इव **नक्षत्रा** देवगृहाणि नक्षत्राणि । उक्तमन्यत्र "देवग्रहा वै नक्षत्राणि" (तै. ब्रा. १।५।२।६) अथवा लोकेऽत्र कर्मानुष्ठाय ये स्वर्गं लभन्ते ते नक्षत्ररूपेण दृश्यन्ते । यथोक्तं तत्रैव 'यो वा इह यजतेऽमुं स लोकं नक्षते, तन्नक्षत्राणां नक्षत्रत्वम्' (तै. ब्रा. १।५।२-५) । यद्वा तेषां सुकृतिनां ज्योतींषि नक्षत्राण्युच्यन्ते । मन्यन्ते चैवं तैत्तिरीयाः—'सुकृतां वा एतानि ज्योतींषि यन्नक्षत्राणि' (तै. सं. ५।४।१।३) यास्कस्त्वेवं मनुते 'नक्षत्राणि नक्षतेर्गतिकर्मणो नेमानि क्षत्राणीति च ब्राह्मणम्' (निरु. ३।२०) इति । तथाविधानि नक्षत्राणि **अक्तुभिः** रात्रिभिः सह **अपयन्ति** अपयान्ति । **विश्वचक्षसे** सर्वस्य जगतः प्रकाशकस्य **सूराय** सूर्यस्यागमनं दृष्ट्वेति शेषः । चौराः नक्षत्राणि च सूर्यं विलोक्य रात्रिभिः सह तद्भीत्या पलायन्ते इत्यर्थः । तायुरिति चौरनाम । तायुस्तस्करः—इति निरुक्तम् (नि. ३।२४।७) । पूर्वमपि व्याख्यातोऽयं मन्त्रः (अथर्व० १३।२।१७) ।

अदृश्रन्नस्य केतवो वि रश्मयो जनाँ अनु ।
भ्राजन्तो अग्नयो यथा ॥१५॥ ऋ. १।५०।३

पदपाठः

अदृश्रन् । अस्य । केतवः । वि । रश्मयः । जनान् । अनु । भ्राजन्तः । अग्नयः । यथा ॥१५॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्य सूर्यस्य **केतवः** प्रज्ञापकाः रश्मयो दीप्तयः किरणाः **जनान् अनु वि अदृश्रन्** सर्वान् जातान् अनुक्रमेण पश्यन्ति । तत्र दृष्टान्तः । **भ्राजन्तो** दीप्यमानाः **अग्नयो यथा** । अग्नय इव सर्वान् प्रेक्षन्ते इत्यर्थः । अदृश्रन् दृशिर प्रेक्षणे । वर्त्तमाने लुङ् । शाखान्तरेऽथ 'अदृश्रमस्य केतवः' इत्यपि पाठः श्रूयते । तत्र तु 'तिङां तिङो भवन्ति' इति प्रथमपुरुषबहुवचनस्योत्तमपुरुषैकवचनादेशः । पूर्वमपि व्याख्यातोऽयं मन्त्रः (अथर्व० १३।२।१८) ।

तरणिर्विश्वदर्शतो ज्योतिष्कृदसि सूर्य ।
विश्वमा भासि रोचन ॥१६॥ ऋ. १।५०।४

पदपाठः

तरणिः । विश्वऽदर्शतः । ज्योतिःऽकृत् । असि । सूर्य । विश्वम् । आ । भासि । रोचन ॥१६॥

हे **सूर्य रोचन** ! हे दीप्यमान ! त्वं **तरणिः** तरिता नान्येन गन्तुं शक्यस्य विस्तृतस्याध्वनो गन्ता वर्त्तसे । अथवा सेवकानां रोगात् तारयितासि । तथा **विश्वदर्शतः** । सर्वैर्लोकैर्दर्शनीयोऽसि । यद्वा विश्वं संपूर्णं भूतजातं दर्शतं द्रष्टव्यं प्रकाश्यं येन स विश्वदर्शतः । सर्वप्रकाशक इत्यर्थः । तथा **ज्योतिष्कृत्** । ज्योतिषः प्रकाशस्य कारकः । निखिलस्य जगतः प्रकाशयितेत्यर्थः । अथवा रात्रौ चन्द्रादीनां प्रकाशकर्त्ता । रात्रौ हि अम्मयेषु चन्द्रादिबिम्बेषु सूर्यरश्मयः प्रतिफलिताः सन्तोऽन्धकारमपसारयन्ति, यथा द्वारस्थदर्पणोपरि निपतिताः सूर्यकिरणा गृहान्तर्गतं तमो निवारयन्ति तद्वत् इत्यर्थः । अतो **विश्वं** व्याप्तमन्तरिक्षम् **आ** समन्ताद् **भासि** प्रकाशयसि । यद्वा हे सूर्य ! अन्तर्यामितया सर्वस्य प्रेरक ! परमात्मन् ! त्वं तरणिः संसाराब्धेस्तारकोऽसि । यस्मात् त्वं विश्वदर्शतो विश्वैः समस्तैर्मुमुक्षुभिर्दर्शतो द्रष्टव्यः साक्षात् करणीय इत्यर्थः । अधिष्ठानसाक्षात्कारे ह्यारोपितं निवर्त्तते । ज्योतिष्कृत् ज्योतिषः सूर्यादेः कर्त्ता । स्मर्यते च 'चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत' (तै. आ. ३।१२।६) इति । ईदृशस्त्वं चिद्रूपतया विश्वं सर्वं दृश्यजातम् आ भासि प्रकाशयसि । चैतन्यस्फुरणे हि सर्वं जगत् दृश्यते । तथा चाम्नायते कठोपनिषदि 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' (क. उ. ५।१५) इति । ऋग्वेदे 'रोचनम्' इति पाठः पठ्यते ।

प्रत्यङ् देवानां विशः प्रत्यङ्ङुदेषि मानुषीः ।
प्रत्यङ् विश्वं स्वर्दृशे ॥१७॥ ऋ. १।५०।५

पदपाठः

प्रत्यङ् । देवानाम् । विशः । प्रत्यङ् । उत् । एषि । मानुषीः । प्रत्यङ् । विश्वम् । स्वः । दृशे ॥१७॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे सूर्य ! त्वं **देवानां विशो** मरुत्संज्ञकान् देवान् **प्रत्यङ् उदेषि** तान् प्रति-गच्छन्नुदयं प्राप्नोषि । तेषामभिमुखं यथा भवसि तथेत्यर्थः । 'मरुतो वै देवानां विशः' (तै. सं. २।२।५।७) इति तैत्तिरीयाः । तथा **मानुषीः** मानवीः प्रजाः । मनुष्यान् **प्रत्यङ्** उदेषि । तेऽपि तथा अस्मदभिमुख एव सूर्यः समुदेतीति मन्यन्ते । तथा **विश्वं** व्याप्तं **स्वः** स्वर्गलोकं **दृशे** द्रष्टुं **प्रत्यङ्** उदेषि । यथा स्वर्गनिवासिनो देवाः स्व-स्वाभिमुख्येन पश्यन्ति तथा उदेषीत्यर्थः । एतदुक्तं भवति यत् लोकत्रय-वर्तिनो लोकाः सर्वेऽपि सूर्यं स्वस्वाभिमुख्येन पश्यन्तीति । स्वः, सुपूर्वादर्त्तेः विच् । गुणे यणादेशः ।

येना पावक चक्षसा भुरण्यन्तं जनाँ अनु ।
त्वं वरुण पश्यसि ॥१८॥ ऋ. १।५०।६

पदपाठः

येन । पावक । चक्षसा । भुरण्यन्तम् । जनान् । अनु । त्वम् । वरुण । पश्यसि ॥१८॥

हे **पावक** ! सर्वस्य जगतः संशोधनकर्त्तः ! वरुण ! अनिष्टविनाशकारिन् सूर्यदेव ! **जनान्** जातान् प्राणिनो **भुरण्यन्तं** धारयन्तं पोषयन्तं वेमं लोकं **येन चक्षसा** ज्योतिषा **अनुपश्यसि** अनुक्रमेण प्रकाशयसि तं प्रकाशं वयं स्तुमः इति शेषः । यद्वा उत्तरस्यामृचि सम्बन्धः । तेन चक्षसा व्येषीति । मन्यते च यास्क एवम् 'तत्ते वयं स्तुम इति वाक्यशेषोऽपि वोत्तरस्यामन्वयस्तेन व्येषि' (निरु. १२।२२) इति । भुरण्यन्तम् । 'भुरणधारणपोषणयोः' कण्ड्वादित्वात् यक् । ततः शतरि कर्त्तरि शप् ।

विद्यामेषि रजस्पृथ्वहर्मिमानो अक्तुभिः ।
पश्यं जन्मानि सूर्य ॥१९॥ ऋ. १।५०।७

पदपाठः

वि । द्याम् । एषि । रजः । पृथु । अहः । मिमानः । अक्तुऽभिः । पश्यन् । जन्मानि । सूर्य ॥१९॥

हे **सूर्य** ! त्वं **पृथु** विस्तृतं **रजः** लोकं **द्याम्** अन्तरिक्षलोकं च **वि एषि** विशेषेण यासि । किं कुर्वन् ? **अहः** अहानि दिवसान् **अक्तुभिः** रात्रिभिः साकं **मिमानः** उत्पादयन् । सूर्यगत्यधीनत्वादहोरात्रविभागस्य । तथा **जन्मानि** जननवन्ति भूतजातानि **पश्यन्** प्रकाशयन् । रजस्पृथु इत्यत्र 'छन्दसि वाऽप्राम्रेडितयोः' (पा. ८।३।४९) इति विसर्जनीयस्य सत्वम् । 'रजस्पृथ्वहा'—इति ऋक्पाठः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सप्त त्वा हरितो रथे वहन्ति देव सूर्य ।
शोचिष्केशं विचक्षणम् ॥२०॥ ऋ. १।५०।८

पदपाठः

सप्त । त्वा । हरितः । रथे । वहन्ति । देव । सूर्य । शोचिःऽकेशम् । विऽचक्षणम् ॥२०॥

हे **सूर्य देव** ! द्योतमान ! **सप्त** सप्त सङ्ख्याकाः **हरितः** अश्वाः रसहरणशीलाः किरणा वा **त्वा** त्वां **वहन्ति** प्रापयन्ति । कीदृशम् ? **रथे** अवस्थितम् इति शेषः । **शोचिष्केशम्** शोचींषि तेजांस्येव यस्मिन् केशा इव दृश्यन्ते स तथोक्तः तम् । तथा **विचक्षणम्** सर्वस्य प्रकाशकम् इति । 'विचक्षण' इति ऋक्पाठः ।

अयुक्त सप्त शुन्ध्युवः सूरो रथस्य नप्त्यः ।
ताभिर्याति स्वयुक्तिभिः ॥२१॥ ऋ. १।५०।९

पदपाठः

अयुक्त । सप्त । शुन्ध्युवः । सूरः । रथस्य । नप्त्यः । ताभिः । याति । स्वयुक्तिऽभिः ॥२१॥

सूरः सर्वस्य प्रेरकः सूर्यः **शुन्ध्युवः** शोधिका अश्वस्त्रियः तादृशीः **सप्त**-सङ्ख्याकाः **अयुक्त** स्वरथे योजितवान् । कीदृश्यः ? **रथस्य नप्त्यः** न पातयित्र्यः । याभिर्युक्ताभिः रथो याति न पतति तादृशीभिरित्यर्थः । एवं भूताभिस्ताभिः अश्वस्त्रीभिः, **स्वयुक्तिभिः** स्वकीययोजनेन रथे सम्बद्धाभिः **याति** यज्ञगृहं प्रत्यागच्छति । अतस्तस्मै हविर्दातव्यमिति वाक्यशेषः ।

इति पञ्चमेऽनुवाके दशमं सूक्तम् ।

अष्टचत्वारिंशं सूक्तम्

षड्चस्यास्य खिलसूक्तस्य चतुर्थ्यादितृचस्य सार्पराज्ञी ऋषिका । चतुर्थ्यादितृचस्यात्मा सूर्यो वा देवता । प्रथमादिषड्चां गायत्री छन्दः ।

विषुवति सौर्यपृष्ठे ' अभि त्वा वर्चसा गिरः' इति चतुर्थः स्तोत्रियः ।

अभि त्वा वर्चसा गिरः सिञ्चन्तीराचरण्यवः ।
अभि वत्सं न धेनवः ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

अभि । त्वा । वर्चसा । गिरः । सिञ्चन्तीः । आ । चरण्यवः । अभि । वत्सम् । न । धेनवः ।।१।।

सूर्य देव ! **त्वा** त्वाम्, **आचरण्यवः** समन्तात् गतिशीलाः **गिरः** अस्मदीयाः स्तुतयः **अभि** उपसर्गेण योगक्रियाया अध्याहारः, अभिधावन्ति । कीदृशं त्वाम् ? **वर्चसा** तेजसा युक्तं तेजस्विनम् । अभीष्टफलप्रदातृत्वमेव तेजस्वित्वम् । अपि वा वर्चसा तेजसा तदविनाभूतेन बलेन, त्वरया वेगेन इति यावत् । तत्र दृष्टान्तः । **धेनवः न** यथा दोग्ध्र्यः **वत्सं** स्वशिशुम् अभिधावन्ति तद्वत् । किं कुर्वाणाः ? **सिञ्चन्तीः** सिञ्चन्त्यः, वर्धयन्त्यः । स्तुताः हि देवताः समृद्धयन्ति । धेनुपक्षे— वात्सल्यातिरेकात् स्वपयोधरमण्डलात् पयः क्षरन्त्यः, भूमौ निक्षिपन्त्यः । आङ्पूर्वात् चर गतौ (भ्वा०) । इत्यस्मात् 'यजिमनिशुन्धि०' (उ. सू. ३।२०) इत्यादिना युच् ।

ता अर्षन्ति शुभ्रियः पृञ्चन्तीर्वर्चसा प्रियः ।
जातं जात्रीर्यथा हृदा ।।२।।

पदपाठः

ताः । अर्षन्ति । शुभ्रियः । पृञ्चन्तीः । वर्चसा । प्रियः । जातम् । जात्रीः । यथा । हृदा ।।२।।

ताः पूर्वोक्ताः गिरः स्तुतयः । **शुभ्रियः** शुद्धाः भासमानाः दीप्त्या शोभमानाः वा अर्षन्ति प्राप्नुवन्ति स्तुत्यं सूर्यदेवं व्रजन्ति । **पृञ्चन्तीः** पृञ्चन्त्यः सम्पर्कं कुर्वाणाः, **वर्चसा** तेजसा तदविनाभूतेन बलेन गाढं समालिङ्गन्त्य इत्यर्थः । तत्र दृष्टान्तः । **जात्रीः** जात्र्यः जनयन्त्यः जनन्यः मातरः **जातम्** उत्पन्नं स्वात्मजं **प्रियः** विभक्तिव्यत्यासेन प्रियं प्रीतिभाजनं **हृदा** वक्षसा पृञ्चन्त्यः अतिशयेन स्पृशन्त्यः तद्वत् । स्तुतिपक्षे हृदा हृदयेन तात्पर्येण स्तुतीनां तात्पर्यद्वारा स्तुत्यदेवे पर्यवसानमेव गाढालिङ्गनम् । **अर्षन्ति** गच्छन्ति । शुभ्रियः 'शुभ भासने' (भ्वा०), 'शुभ दीप्तौ' (भ्वा.) 'शुभ शोभार्थे' (तुदा०) वा धातोः 'अदिशदिशुभिभ्यः क्रिन्' इति (उ. सू. ४।६५) सूत्रेण क्रिणि, ङीप्, इयङादेशश्छान्दसः । अपि वा प्रियः 'प्रीञ् तर्पणे कान्तौ च' (क्र्या:) धातोः क्विप्, जसि रूपम् । जात्रीः 'जन जनने' (जुहो०) धातोः—'सर्वधातुभ्यः ष्ट्रन्' (उ. सू. ४।१५६) इति सूत्रेण ष्ट्रनि, ङीष्, बाहुलकात् ष्ट्रन्, कित्वेन 'जनसनखनांसञ्झलोः (पा. सू. ६।४।४२) इति सूत्रेण नकारस्य आत्वम् ।

वज्रापवसाध्यः कीर्तिर्म्रियमाणमावहन् ।
मह्यमायुर्घृतं पयः ।।३।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सायणेन पदपाठोऽपि न दत्तः ।

अत्र मन्त्रे लिङ्गोक्ता देवतेन्द्रः । **वज्रेण** स्वकरधृतदिव्यायुधविशेषेण **आपवः** आपवनं संशोध्नम् अधार्मिक-भूभार-दैत्य-निकर-विनाशनात् भुवः पवित्रीकरणम् । तस्य **साध्यः** साधको निष्पादकः, तत्कार्यसिद्धिकर्ता वज्रपाणिरिन्द्रः । यद्वा वज्रस्य तदुपलक्षितस्य दिव्यास्त्रसन्दोहस्य आपवः संशोधनं गवेषणा, अनुसन्धानं, तस्य साध्यः साधकः, दिव्यास्त्रविद्योपदेष्टा, महाभारते वनपर्वणि इन्द्रेण पार्थाय दिव्यशस्त्रास्त्रविद्योपदेष्टेति स्फुटमुपवर्णितम् । **कीर्तिः** कीर्तेर्लब्धा लब्धव्यस्य लब्धरि लक्षणा । किं कुर्वन् ? **म्रियमाणं** वृत्रेण स्वर्गात् प्रसह्य निष्कासितं नष्टवैभवं मरणोन्मुखं देवगणं **आवहन्** आ समन्तात् यथा पूर्वं स्वस्थाने दिवि धारयन् व्यवस्थापयन् विविधसम्पद्भाजनतां निष्पादयन् 'लक्षणहेत्वोः क्रियायाः' (पा. ३।२।१२६) इति सूत्रेण हेतौ शतृप्रत्ययः । मरणोन्मुखानां देवानां वृत्रवधेन यथा पूर्वं स्वस्थ-जीवनप्रदानात् इन्द्रेण लोकोत्तरा कीर्तिर्लब्धेति भावः । तस्मादिन्द्रो भवान् देवगणवत् वृत्रतुल्यदुःखदायि-पाप-पुञ्जं विनाश्य **मह्यं** स्वभक्ताय **आयुः** दीर्घजीवनं, तत्साधनं **घृतम्** आज्यं **पयः** दुग्धम् । कारकेण योगक्रियाया आक्षेपात् दद्यात् इति शेषः । आङ् पूर्वात् 'पूञ् पवने' (क्र्या०) धातोः 'ऋदोरप्' (पा. ३।३।५७) इत्यप् प्रत्ययः । आपवनम् आपवः, वज्रशब्देन षष्ठीसमासे वज्रस्य आपवः वज्रापवः, तस्य साध्यः । साध संसिद्धौ (स्वा०) धातोः 'ऋहलोर्ण्यत्' (पा० ३।१।१२४) इति सूत्रेण बाहुलकत् कर्तरि ण्यत् ।

सात्वतपक्षे— वज्रस्य अविद्यावधसाधनस्य आत्मदर्शनस्य आपवः संशोधनम् असम्भावनाविपरीतभावनाख्यप्रतिबन्धनिरासः तस्य साध्यः गीतोपदेशेन साधकः कृष्णः । अकस्मात् प्रज्वलितदावदहनेन दन्दह्यमानम् अत एव म्रियमाणं मरणोन्मुखं गोगोपालादिकं तदनलपानात् आवहन् धारयन् तदीयजीवनरक्षां कुर्वन् । अत्र म्रियमाणपदं मृतस्यापि उपलक्षणम् । मृतं गुरुपुत्रं, मृतान् द्वारिकायां ब्राह्मणकुमारांश्च आवहन् यमालयात् महाविष्णुलोकाच्च प्रत्यावर्तयन् पुनर्भुवमानयन्, कीर्तिः कीर्तेर्लब्धा, कीर्तिरूपो वा । गीतायां दशमाध्याये विभूतियोगे 'कीर्तिः शरीरवाक् च नारीणाम्' (गी. १०।३४) इति गीतावचनात् । तस्मात् स्वभक्तसमीहितसम्पादकः स कृष्णः मह्यं तदुपासकाय आयुः घृतं पयः दद्यात् इति शेषः ।

आयं गौः पृश्निरक्रमीदसदन्मातरं पुरः ।
पितरं च प्रयन्त्स्वः ॥४॥ ऋ. १०।१८९।१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

आ। अयम्। गौः। पृश्निः। अक्रमीत्। असदत्। मातरम्। पुरः। पितरम्। च। प्रऽयन्। स्वः ॥४॥

अयं गौः गमनशीलः **पृश्निः** प्राष्टवर्णः प्राप्ततेजाः इत्यर्थः। सूर्यः **आ अक्रमीत्** जगदाक्रान्तवान्। उदयाचलं प्राप्तवान्। आक्रम्य च **पुरः** पुरस्तात् पूर्वस्यां दिशि **मातरं** पृथिवीम् **असदत्** आसीदति प्राप्नोति व्याप्नोद्वा। सदेश्छान्दसो लुङ्। ततः **पितरं** स्वर्गलोकं **च**शब्दात् अन्तरिक्षञ्च **प्रयन्** प्रकर्षेण गच्छन् **स्वः** स्वरणः शोभन-गमनो भवति। यद्वा पितरं स्वर्गलोकं प्रयन् वर्त्तते। द्यौः पिता पृथ्वीमातेति श्रुत्यन्तरेषु प्रतिपादितमेव। सायणेनाप्ययं मन्त्रो व्याख्यातः किञ्चित्परिवर्तनपूर्वकम्। (अथर्व० ६।३१।१)।

अन्तश्चरति रोचना अस्य प्राणादपानतः।
व्यख्यन् महिषः स्वः ॥५॥ ऋ. १०।१८९।२

पदपाठः

अन्तः। चरति। रोचना। अस्य। प्राणात्। अपानतः। वि। अख्यन्। महिषः। स्वः ॥५॥

सायणेनैव स्वाख्यातः (अथर्व. ६।३१।२)।

त्रिंशद् धामा विराजति वाक् पतङ्गो अशिश्रियत्।
प्रति वस्तोरहद्युभिः ॥६॥ ऋ. १०।१८९।३

पदपाठः

त्रिंशत्। धाम। वि। राजति। वाक्। पतङ्गः। अशिश्रियत्। प्रति। वस्तोः। अह। द्युऽभिः ॥६॥

सायणेनैव व्याख्यातः (अथर्व. ६।३१।३)।

एकोनपञ्चाशं सूक्तम्

सप्तर्चस्यास्य खिलसूक्तस्य चतुर्थ्यादिद्वचृचस्य नोधा, षष्ठ्यादिद्वचृचस्य च मेध्यातिथिर्ऋषी। चतुर्थ्यादिचतसृणामिन्द्रो देवता। प्रथमादितृचस्य गायत्री, चतुर्थ्यादिचतसृणाञ्च प्रगाथश्छन्दसी। खिलसूक्तमिदम्।

विषुवति सौर्यपृष्ठे 'यच्छक्रावाचमारुहन्' इति षष्ठः स्तोत्रियः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यच्छक्रा वाचमारुहन्नन्तरिक्षं सिषासथः ।
सं देवा अमदन् वृषा ॥१॥

अस्य सायणेनापि पदपाठो न दत्तः ।

यत् यदा **वृषा** अभिमतफलवर्षकः **शक्राः** शक्रः, भूत्वं छान्दसम्, शत्रुवधे शक्तः इन्द्रः **वाचं** वाणीं, "व्यापादयत दैत्यान् सैनिकाः!" इति युद्धादेशरूपाम् **आरुहन्** आरूढवान् । अत्रापि वहुवचनं छान्दसम् । स्वसैनिकेभ्यो दैत्यहननाय युद्धादेशं ददौ । किञ्च स इन्द्रः **अन्तरिक्षम्** अन्तरिक्षोपलक्षितं स्वर्गं **सिषासथः** सम्भक्तुम् आत्मसात्कर्तुम् इच्छुकः आसीदिति शेषः । दैत्यापहृतस्वर्गप्रत्यावर्तनेच्छया युद्धादेशं दत्तवान् इति भावः । यत्-तदोर्नित्यसम्बन्धः इति यच्छब्देन तच्छब्दाध्याहारः । तदा **देवाः** स्वर्गसुखोपभोगलिप्सया **सम्** सम्यक् **अमदन्** प्रसन्ना बभूवुः । सिषासथः 'षण सम्भक्तौ' (भ्वा०) धातोः सनि द्विवचने नकारस्य आत्वे 'शीङ्शपिरुगमिव०' (उ. ३।११३) इति सूत्रेणाथप्रत्ययः । सम्भजनेच्छुरिति तदर्थः । अपि वा सिषासथः छान्दसत्वात् भूते लटि मध्यमपुरुषबहुवचने रूपम्, सिषासति स्मेति तदर्थः । अपि वा वृषा कामानां वर्षकः परमात्मा सिषासथः सिषासति स्म, दातुम् इच्छति स्म । **'षणु दाने'** । शिष्टं समानम् । अपि वा सिषासथः दानेच्छुरासीदिति शेषः । तदनन्तरम् अन्तरिक्षं सप्तम्यर्थे द्वितीया, अन्तरिक्षे हृदयाकाशे वाचं वेदवाणीम् आरुहन्, बहुवचनं छान्दसम्, बीजवत् स्थापयामास, देवानां हृदि वेदवाणीं प्रादुर्भावयामास । भगवत्प्रसादात् देवानां हृदयाकाशे वेदवाक् प्रादुर्भूता इत्यर्थः । तदा लब्धवेदवाचो देवाः द्योतमानाः ऋषयः सम् सम्यक् अमदन् माद्यन्ति स्म । वेदवाचो लाभेन ऋषीणां महान् हर्षः संवृत्तः इति भावः ।

शक्रो वाचमधृष्टायोरुवाचो अधृष्णुहि ।
मंहिष्ठ आ मर्दादवि ॥२॥

अस्य सायणेऽनापि पदपाठो न दत्तः ।

शक्रः समर्थः बलवान् **अधृष्टाय** शालीनाय सभ्याय धृष्टतावर्जिताय सर्वं सत्कुर्वते शिष्टजनाय विनीताय नम्राय **वाचं** विशिष्टां वाणीं माधुर्यादिगुणयुक्ताम् कारकेण योगक्रियाक्षेपात् ब्रुवीतेति शेषः । वाक्-इति शब्दोऽत्र सामान्यवचनोऽपि विशिष्टवाचि प्रयुक्तः । बलवता बलगर्वेण विनीतो जनः न तिरस्करणीयः, अपितु मधुरभाषणादिना सत्करणीयः इत्यर्थः । अपि वा शक्रः इन्द्रः अधृष्टाय धृष्टतावर्जिताय प्रपन्नाय स्वभक्ताय वाक्कौशलरहिताय वाचं वाक्शक्तिं लोकोत्तरवक्तृत्वशक्तिं ददीत । कारकेण योगक्रियाक्षेपः । वक्तुमकुशलः पुरुषः वाग्मिताम् इन्द्रेण

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्राप्नोतु इत्यर्थः । 'मूकं करोति वाचालम्' इति आप्तवाक्योक्तेः । शक्र-प्रसादात् मूककल्पो जनः वाग्मितां व्रजेदिति भावः । शक्र हे इन्द्र ! **उरुवाचः** वाचालान् महत्या वाचा सम्पन्नान् पुरुषान् अनर्गलवहुभाषिणो जनान् **अधृष्णुहि** प्रगल्भतां नय । येन ते स्वानर्गलभाषणेन सभ्यान् जनान् न क्लिश्नीयुः इति भावः । अपि वा, अधृष्णुहि धृष प्रसहने (चुरा.) धातोः विकरणव्यत्ययः । किञ्च **मंहिष्ठः** स्वभक्तेभ्यस्तत्-समीहितस्य दाता पूज्यो वा त्वं **दिवि** स्वर्गे **आमदः** आ समन्तात् मदः आनन्दय स्वोपासकान् प्रमोदभाजनान् कुरु । 'मदी हर्षे' (दिवा०) दिवाद्यन्तर्गतपुषादिः, छान्दसः लिङर्थे लुङ्-लकारः । 'छन्दसि लङ्लुङ्लिटः' (पा. सू. ३।४।६) इति सूत्रेण । लुङि मध्यमपुरुषैकवचने सिपि पुषादित्वादङि छान्दसत्वादडभावे रूपसिद्धिः । अधृष्णुहि 'नञ्' (पा. सू. २।२।६) इति सूत्रात् धृष्णुहि इति तिङन्तेन समासः । नञो न लोपस्तिङि० (पा. वा. २।२।६) इति नञो नकारलोपः । 'ञिधृषा प्रागल्भ्ये (स्वा०) धातोः ।

सात्वतपक्षे—अर्जुनाय दिव्यास्त्रविद्यां दत्वेन्द्रो ब्रूते शक्र इति । शक्रः इन्द्र अधृष्टाय यथाविधि प्रणमते पार्थाय वाचं दिव्यास्त्रविद्याम् अददात् उपदिदेश च—वत्स ! उरुवाचः उरुर्महती वाक् सदुपदेशलक्षणा यस्य स उरुवाक् गुरुजनस्तस्य अधीताखिल-वेदस्य गुरुजनस्य सकाशे न धृष्णुहि, कदापि धृष्टतां मा कार्षीः । विद्वान् गुरुजनः सदा सत्करणीयः, स्वप्नेऽपि नोपेक्षणीयः, कदापि च न तिरस्करणीयः इति रहस्यम् । किञ्च मंहिष्ठः तपश्चरणादिना सत्करणीयस्त्वं दिवि स्वर्गे मदाह्वानेन समागत आ समन्तात् मदः आत्मानं हर्षय, देवैः समं स्वर्गीयसुखसन्दोहमनुभव ।

शक्रो वाचमधृष्णुहि धामधर्मन् वि राजति ।
विमदन् बर्हिरासरन् ॥३॥

सायणेनास्यापि पदपाठो न दत्तः ।

महतः समीपे कठोरभाषण-चाञ्चल्यादिधार्ष्ट्यं नाचरणीयं यथा राज्ञः समीपे भयात् धृष्टोऽपि लोकः कठोरभाषणचाञ्चल्यादिकं नाचरति, अन्यथा तदाचरणेन कुपितो राजा तं दण्डयति । अतो होतस्त्वयापि तथा नाचरणीयम् अन्यथा त्वदीयं धार्ष्ट्यम् अवगत्य शक्रः कुप्येत् । नैवं मन्तव्यं सोऽत्र नास्ति इत्यतः नानर्गलं व्यवहरणीयमिति । यतः सः सर्वत्र सर्वदा सर्वेषु कर्तव्येषु सततं तिष्ठत्येव इत्यभिप्रायेण आह ब्रह्माध्वर्युर्वा शक्र इति । होतस्त्वं **वाचम् अधृष्णुहि** धृष्टां वाचं मा वद । कठोर-भाषणादिचाञ्चल्यं न कुरु । यतः **शक्रः** इन्द्रः **धाम** धाम्नि धाम्नि सर्वेषु स्थानेषु सर्वासु यज्ञशालासु **धर्मन्** धर्मणि धर्मणि सर्वेषु सवनत्रयादिकर्तव्येषु **विराजति** विशेषेण शोभते, व्यापकत्वात् सततं तिष्ठति, स नास्ति इति कदापि न सम्भाव्यम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh. BY SSMV

किं कुर्वन् ? आह्वानेन **विमदन्** विशेषेण प्रसीदन् **बर्हिः** कुशासनं **आसरन्** स्वीकुर्वन् आहूतः यजमानदत्ते कुशासने उपविश्य सततं यज्ञवेलायां तिष्ठत्येव, नेतस्ततोऽपसरति । तस्मात् सावधानेन व्यवहरणीयम् अन्यथा सः सञ्जातकोपस्त्वाम् अपराधिनं दण्डयेदिति निष्कर्षः ।

तं वो दस्ममृतीषहं वसोर्मन्दानमन्धसः ।
अभि वत्सं न स्वसरेषु धेनव इन्द्रं गीर्भिर्नवामहे ॥४॥

ऋ. ८।८८।१

पदपाठः

तम् । वः । दस्मम् । ऋतिऽसहम् । वसोः । मन्दानम् । अन्धसः । अभि । वत्सम् । न । स्वसरेषु । धेनवः । इन्द्रम् । गीःऽभिः । नवामहे ॥४॥

मन्त्रोऽयं सायणेनैव व्याख्यातः (अथर्व० २०।९।१) ।

द्युक्षं सुदानुं तविषीभिरावृतं गिरिं न पुरुभोजसम् ।
क्षुमन्तं वाजं शतिनं सहस्त्रिणं मक्षू गोमन्तमीमहे ॥५॥

ऋ. ८।८८।२

पदपाठः

द्युक्षम् । सुऽदानुम् । तविषीभिः । आऽवृतम् । गिरिम् । न । पुरुऽभोजसम् । क्षुऽमन्तम् । वाजम् । शतिनम् । सहस्त्रिणम् । मक्षु । गोऽमन्तम् । ईमहे ॥५॥

मन्त्रोऽयं सायणेन व्याख्यातः (अथर्व० २०।९।२) ।

तत् त्वा यामि सुवीर्यं तद् ब्रह्म पूर्वचित्तये ।
येना यतिभ्यो भृगवे धने हिते येन प्रस्कण्वमाविथ ॥६॥

ऋ. ८।३।९

तत् । त्वा । यामि । सुऽवीर्यम् । तत् । ब्रह्म । पूर्वऽचित्तये । येन । यतिभ्यः । भृगवे । धने । हिते । येन । प्रस्कण्वम् । आविथ ॥६॥

मन्त्रोऽयं सायणेन व्याख्यातः (अथर्व० २०।९।३) ।

येना समुद्रमसृजो महीरपस्तदिन्द्र वृष्णि ते शवः ।
सद्यः सो अस्य महिमा न संनशे यं क्षोणीरनुचक्रदे ॥७॥

ऋ. ८।३।१०

1054

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

येन । समुद्रम् । असृजः । मही: । अपः । तत् । इन्द्र । वृष्णि । ते । शवः । सद्यः । सः । अस्य । महिमा । न । सम्ऽनशे । यम् । क्षोणीः । अनुऽचक्रदे ॥७॥

सायणेन व्याख्यातोऽयं मन्त्रः (अथर्व० २०।९।४) ।

इति पञ्चमेऽनुवाके द्वादशं सूक्तम् ।

पञ्चाशं सूक्तम्

द्वयृचस्यास्य सूक्तस्य मेध्यातिथिर्ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः ।

वाजपेये क्रतौ 'कन्नस्य अतसीनाम्' इति सामप्रगाथो भवति । तदुक्तं वैताने--"कन्नव्यो अतसीनाम्" इति सामप्रगाथः । (वै० २७।१३), तथा गवामयनादौ संवत्सरे माध्यन्दिने सवने 'कन्नव्यो अतसीनाम्' इति कद्वान् सामप्रगाथो भवति । तदुक्तं वैताने "माध्यन्दिने कन्नव्यो अतसीनाम्" इति कद्वान् सामप्रगाथः (वै० श्रौ० ३५।१२) इति ।

कन्नव्यो अतसीनां तुरो गृणीत मर्त्यः ।
नही न्वस्य महिमानमिन्द्रियं स्वर्गृणन्त आनशुः ॥१॥

ऋ. ८।३।१३

पदपाठः

कत् । नव्यः । अतसीनाम् । तुरः । गृणीत । मर्त्यः । नहि । नु । अस्य । महिमानम् । इन्द्रियम् । स्वः । गृणन्तः । आनशुः ॥१॥

अतसीनाम् अतन्तीनां सततगामिनीनां स्तुतीनां **तुरः** प्रेरकः **मर्त्यः** मरणशीलो **नव्यः** अभिनवः इदानीन्तम इत्यर्थः । **कत्** को नाम स्तोता **गृणीत** इन्द्रं स्तुयात् ? स्वल्पबुद्धिभिरभिनवैर्नायमिन्द्रः स्तोतुं शक्यत इत्यर्थः । **नु** पुरा पूर्वस्मिन्नपि समये विद्यमानाः **स्वः** सर्वे गृणन्तः स्तोतारः यद्वा स्वः सुष्ठु अरणीयं प्राप्तव्यमिन्द्रं **गृणन्तः** स्तुवन्तो जनाः । **इन्द्रियम्** इन्द्रस्य लिङ्गम् इन्द्रस्यैव असाधारणम् । **अस्य** इन्द्रस्य महिमानं महत्त्वं **नहि आनशुः** न खलु प्राप्नुवन् ।

कदु स्तुवन्त ऋतयन्त देवत ऋषिः को विप्र ओहते ।
कदा हवं मघवन्निन्द्र सुन्वतः कदु स्तुवत आ गमः ॥२॥

ऋ. ८।३।१४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

कत् । ऊं इति । स्तुवन्तः । ऋतऽयन्त । देवता । ऋषिः । कः । विप्रः । ओहते । कदा । हवम् । मघऽवन् । इन्द्र । सुन्वतः । कत् । ऊं इति । स्तुवतः । आ । गमः ॥२॥

हे **इन्द्र ! स्तुवन्तः** स्तवनं कुर्वन्तः **कद्** के खलु जनाः **देवता** व्यत्ययेन प्रथमा । देवं त्वाम् उद्दिश्य **ऋतयन्त** ऋतं यज्ञम् ऐच्छन् । त्वदीय-यागेच्छापि दुर्लभा दूरे तावद् यागकथा त्वदीया । **ऋषिः** द्रष्टा **विप्रो** मेधावी कः स्तोता **ओहते** वहति । त्वां स्तुतीः प्रापयति । न कश्चन अपि त्वां स्तोतुं शक्नोतीत्यर्थः । यत एवमतः कारणाद् **मघवन्** हे धनवन् इन्द्र ! अनुग्रहीत्रा त्वया एव आगन्तव्यम् । स त्वं **कदा** कस्मिन् काले **सुन्वतः** सोमाभिषवं विदधतो यजमानस्य **हवम्** आह्वानं प्रति **आगमः** आगच्छः । **कद्** कदा च कस्मिंश्च काले **स्तुवतः** केवलं स्तोत्रं कुर्वतो यजमानस्य हवम् आह्वानम् आगमः अभ्यगच्छः ।

इति पञ्चमेऽनुवाके त्रयोदशं सूक्तम् ।

एकपञ्चाशं सूक्तम्

चतुर्ऋचस्यास्य 'सूक्तस्य' प्रथमाद्वितीययोर्ऋचोः प्रस्कण्वः, तृतीयाचतुर्थ्योश्च पुष्टिगुर्ऋषी । इन्द्रो देवता । प्रगाथश्छन्दः ।

चतुर्विंशे माध्यन्दिने सवने 'अभि प्र वः सुराधसम्', 'प्र सु श्रुतं सुराधसम्' इति बार्हतौ प्रगाथौ पृष्ठस्तोत्रियानुरूपौ भवतः । तदुक्तं वैताने—"अभि प्र वः सुराधसम्" इति युग्मेषु (वै. श्रौ. ३१।२४) इति ।

तथा व्यहाणां तृतीयेषु अहःसु यथासम्भवम् 'महाँ इन्द्रो य ओजसा' (अ० २०।१३८), 'अभि प्र वः सुराधसम्' (अ० २०।५१) 'एवा ह्यसि वीरयुः' (अ० २०।६०), इति आज्यपृष्ठोक्थस्तोत्रिया भवन्ति । तदुक्तं वैताने—"तृतीयेषु 'महाँ इन्द्रो य ओजसा' 'अभि प्र वः सुराधसम्' 'एवा ह्यसि वीरयुः" (वै. श्रौ. ४१।८) इति ।

अभि प्र वः सुराधसमिन्द्रमर्च यथाविदे ।
यो जरितृभ्यो मघवा पुरूवसुः सहस्रेणेव शिक्षति ॥१॥

ऋ. ८।४९।१

पदपाठः

अभि । प्र । वः । सुराधसम् । इन्द्रम् । अर्च । यथा । विदे । यः । जरितृऽभ्यः । मघऽवा । पुरुऽवसुः । सहस्रेणऽइव । शिक्षति ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऋषिरात्मानं सम्बोध्य ब्रूते—हे प्रस्कण्व ! **वो** युष्माकं बहुवचनमत्र पुत्र-पौत्राभिप्रायेण आदरार्थे वा । **अभि** युष्मत्स्वामिभूतमिन्द्रमभिलक्ष्य **प्रार्च** प्रकर्षेण अर्च । तत्र दृष्टान्तः । **यथा विदे** विद्वांसं स्वगुरुं यथा पूजयसि तद्वत् । कीदृशम् ? **सुराधसम्** शोभनं राधो धनं यस्य तम् । कोऽसाविन्द्र इत्युच्यते । **य** इन्द्रो **मघवा** धनवान् । **पुरुवसुः** बहूनां वासयिता । **जरितृभ्यः** स्तोतृजनेभ्यः **सहस्रेणेव** अपरिमितमेव **शिक्षति** ददाति । अत्र 'यः' अवधारणार्थः । इवोऽपि अवधारणार्थ एव ।

शतानीकेव प्रजिगाति धृष्णुया हन्ति वृत्राणि दाशुषे ।
गिरेरिव प्र रसा अस्य पिन्विरे दत्राणि पुरुभोजसः ॥२॥

ऋ. ८।४९।२

पदपाठः

शतानीकाऽइव । प्र । जिगाति । धृष्णुऽया । हन्ति । वृत्राणि । दाशुषे । गिरेःऽइव । प्र । रसाः । अस्य । पिन्विरे । दत्राणि । पुरुऽभोजसः ॥२॥

धृष्णुया रिपुधर्षणकारी इन्द्रः **शतानीकेव** असङ्ख्यातानीव शत्रुसैन्यानि **प्रजिगाति** प्रकर्षेण गच्छति । स्ववशीकरोतीत्यर्थः । किञ्च यः इन्द्रो **दाशुषे** हविर्दत्तवतो याजकस्य **वृत्राणि** पापानि शत्रून् वा **हन्ति** तस्य **अस्य पुरुभोजसः** प्रभूतपालकस्येन्द्रस्य **दत्राणि** हिरण्यादीनि धनानि । दत्रमिति हिरण्यम्, हिरण्यनामसु पाठात् । **प्र पिन्विरे** प्रकर्षेण प्रीणयन्ति जगत् । अत्र दृष्टान्तः । **गिरेरिव** पर्वतस्य मेघस्य वा सम्बन्धिनो यथा **रसाः** जलानि जगत् प्रीणयन्ति तद्वत् ।

प्र सु श्रुतं सुराधसमर्चा शक्रमभिष्टये ।
यः सुन्वते स्तुवते काम्यं वसु सहस्रेणेव मंहते ॥३॥

ऋ. ८।५०।१

पदपाठः

प्र । सु । श्रुतम् । सुऽराधसम् । अर्च । शक्रम् । अभिष्टये । यः । सुन्वते । स्तुवते । काम्यम् । वसु । सहस्रेणऽइव । मंहते ॥३॥

ऋषिरात्मानं ब्रूते । त्वम् **अभिष्टये** अभीप्सितफललब्धये **तं शक्रं सु** सुष्ठु **प्रार्च** प्रकर्षेण पूजय । कीदृशम् ? **श्रुतं** प्रसिद्धम् । **सुराधसं** शोभनधनवन्तम् । तं कम् ? **यः** इन्द्रः **सुन्वते** सोमाभिषवं कुर्वते, **स्तुवते** स्तवनं कुर्वते च यजमानाय **काम्यं** कमनीयं **वसु** धनं **सहस्रेणेव** असङ्ख्यातमेव **मंहते** ददाति । मंहतिर्दानार्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शतानीका हेतयो अस्य दुष्टरा इन्द्रस्य समिषो महीः ।
गिरिर्न भुज्मा मघवत्सु पिन्वते यदीं सुता अमन्दिषुः ॥४॥

ऋ. ८।५०।२

पदपाठः

शतऽअनीकाः । हेतयः । अस्य । दुस्तराः । इन्द्रस्य । सम्ऽइषः । महीः । गिरिः । न । भुज्मा । मघवत्ऽसु । पिन्वते । यत् । ईम् । सुताः । अमन्दिषुः ॥४॥

सुताः अभिषुताः सोमाः, **यत्** यदा **ईम्** एनमिन्द्रम् **अमन्दिषुः** अमादयन् तदा **अस्य** इन्द्रस्य हेतयो हननसाधनानि आयुधानि **मघवत्सु** हवीरूपधनवत्सु यजमानेषु **पिन्वते** तदीयशत्रुधनानि तेषु समर्प्य तान् प्रीणयन्तीत्यर्थः । कः इव ? **भुज्मा गिरिः न** पालको मेघ इव । स यथा भूम्यां जलानि समर्प्य तां प्रीणयति तद्वत् । कीदृश्यो हेतयः ? **शतानीकाः** शतपरिमितानि अनीकानि मुखानि यासां ताः सर्वतोमुखाः इत्यर्थः । अत एव **दुस्तराः** दुर्निवार्याः । **समिषः** सम्यक् इट् अन्नं याभ्यस्ताः **महीः** महत्यः ।

इति पञ्चमेऽनुवाके चतुर्दशं सूक्तम् ।

द्विपञ्चाशं सूक्तम्

तृचस्यास्य सूक्तस्य मेध्यातिथिर्ऋषिः । इन्द्रो देवता । बृहती छन्दः ।

'वयं घ त्वा सुतावन्तः' इत्यस्य विनियोगः 'इन्द्रेण सं हि दृक्षसे' (अ० २०।४०) इत्यत्रोक्तः ।

तथा पृष्ठ्यस्य तृतीयचतुर्थपञ्चमषष्ठानां चतुर्णामह्नाम् 'वयं घ त्वा सुतावन्तः' इत्यादीनामष्टानां तृचानां द्वौ द्वौ यथाक्रमं स्तोत्रियानुरूपौ भवतः । तत्र 'वयं घ त्वा' (अ० २०।५२) 'क ईं वेद' (अ० २०।५३) इति तृतीयेऽह्नि स्तोत्रियानुरूपौ भवतः । 'विश्वाः पृतनाः' (अ० २०।५४) 'तमिन्द्रम्' (अ० २०।५५) इति चतुर्थे । 'इन्द्रो मदाय' (अ० २०।५६) 'मदे मदे हि' (अ० २०।५६।४) इति पञ्चमे । 'सुरूपकृत्नुम्' (अ० २०।५७) 'शुष्मिन्तमं नः' (अ० २०।५७।४) इति षष्ठे । तदुक्तं वैताने—"तृतीयादीनाम् 'वयं घ त्वा सुतावन्तः' इति पृष्ठस्तोत्रियानुरूपाः" (वै. श्रौ. ३२।६) इति ।

तथा छन्दोमाख्येषु त्रिषु अहःसु 'वयं घ त्वा सुतावन्तः' 'क ईं वेद सुते सचा' इति प्रथमेऽहनि माध्यन्दिने स्तोत्रियानुरूपौ भवतः । 'क ईं वेद सुते सचा' वयं घ त्वा सुतावन्तः' इति द्वितीये । 'श्रायन्त इव सूर्यम्' (अ० २०।५८) 'बण्महाँ असि सूर्य' (अ० २०।५८।३) इति तृतीये । तदुक्तं वैताने 'वयं घ त्वा सुतावन्तः' इत्यादि "बण्महाँ असि सूर्य" इत्यन्ताः पृष्ठस्तोत्रियानुरूपाः' (वै. ३३।१६) इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।
पवित्रस्य प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते ॥१॥

ऋ. ८।३३।१

पदपाठः

वयम् । घ । त्वा । सुतऽवन्तः । आपः । न । वृक्तऽबर्हिषः । पवि-त्रस्य । प्रऽस्रवणेषु । वृत्रऽहन् । परि । स्तोतारः । आसते ॥१॥

वृत्रहन् हे इन्द्र ! **त्वा** त्वां **वयं घ** वयं खलु **सुतवन्तः** सोममभिषुतवन्तः । **आपो न** जलानीव प्रवणमभिगच्छामः । **पवित्रस्य** सोमानां **प्रस्रवणेषु वृक्तबर्हिषः** स्तीर्णदर्भाः **स्तोतारः** च त्वां **परि आसते** पर्युपासते ।

स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वंसगः ॥२॥

ऋ. ८।३३।२

पदपाठः

स्वरन्ति । त्वा । सुते । नरः । वसो इति । निरेके । उक्थिनः । कदा । सुतम् । तृषाणः । ओकः । आ । गमः । इन्द्र । स्वब्दीऽइव । वंसगः ॥२॥

वसो हे वासयितः **इन्द्र** ! **त्वा** त्वां **सुते** सोमाभिषवकर्मणि सम्पन्ने **निरेके** निर्गमने **उक्थिनो नरो** नेतारः **स्वरन्ति** शब्दायन्ते । अपि चेन्द्रः **सुतं** सोमं प्रति **तृषाणः** तृष्यन् **स्वब्दीव** आत्मभूतशब्द इव **वंसगः** वननीयगमनो वृषभः शब्दं कुर्वन् **कदा ओकः** स्थानमागमत् । स्वरतिः गतिकर्मेति निघण्टुः (२।१४) ।

कण्वेभिर्धृष्णवा धृषद् वाजं दर्षि सहस्रिणम् ।
पिशङ्गरूपं मघवन् विचर्षणे मक्षू गोमन्तमीमहे ॥३॥

ऋ. ८।३३।३

पदपाठः

कण्वेभिः । धृष्णो इति । आ । धृषत् । वाजम् । दर्षि । सहस्रिणम् । पिशङ्गऽरूपम् । मघऽवन् । विऽचर्षणे । मक्षु । गोऽमन्तम् । ईमहे ॥३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

धृष्णो हे धर्षक इन्द्र ! **कण्वेभिः** कण्वान् उद्दिश्य । अत्र विभक्तिव्यत्ययश्छान्दसः । **सहस्रिण** सहस्रसङ्ख्याकं **वाजम्** बलमन्नं वा **आ दर्षि** देहि । **हे मघवन्** धनवन् इन्द्र ! **विचर्षणे** हे विद्रष्टः ? **धृषत्** धृष्टं **पिशङ्गरूपं गोमन्त च वाजं मक्षु** त्वरितम् अन्नम् **ईमहे** याचामहे । त्वामिति शेषः । "अन्नं वै वाजाः" इति श. ब्रा. १।४।१।९ । बल नामेति (निघं. २।९) ।

इति पञ्चमेऽनुवाके पञ्चदशं सूक्तम् ।

त्रिपञ्चाशं सूक्तम्

तृचस्यास्य सूक्तस्य मेध्यातिथिर्ऋषिः । इन्द्रो देवता । बृहती छन्दः ।

त्रिककुद्दशाहस्य अहीनस्य नवसु अहःसु 'शग्ध्यूषु शचीपते' (अ० २०।११८) 'अभि प्र गोपतिं गिरा' (अ० २०।९२), 'तं वो दस्ममृतीषहम्' (अ० २०।४९।४) 'वयमेनमिदा ह्यः' (अ० २०।९७) 'इन्द्रमिद् गाथिनो बृहत्' (२०।३८।४) 'आयन्त इव सूर्यम्' (अ० २०।५८) 'क ईं वेद सुते सचा' (अ० २०।५३) विश्वाः पृतना अभिभूतरं नरम् (अ० २०।५४) 'यदिन्द्र प्रागपागुदक्' (अ० २०।१२०) इत्येते नव पृष्ठस्तोत्रिया यथाक्रमं भवन्ति । तदुक्तं वैताने—"त्रिककुद् दशाहस्य नवसु 'शग्ध्यूषु शचीपते' 'अभि प्रगोपतिं गिरा' 'तं वो दस्म मृतीषहम्' 'वयमेनमिदा ह्यः' 'इन्द्रमिद् गाथिनो बृहत्', 'आयन्त इव सूर्यम्' 'क ईं वेद सुते सचा' 'विश्वाः पृतना अभिभूतरं नरम्' 'यदिन्द्र प्रागपागुदक्' (वै. ४२।५) इति ।

क ईं वेद सुते सचा पिबन्तं कद् वयो दधे ।
अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः ॥१॥

ऋ. ८।३३।७

पदपाठः

कः । ईम् । वेद । सुते । सचा । पिबन्तम् । कत् । वयः । दधे । अयम् । यः । पुरः । विऽभिनत्ति । ओजसा । मन्दानः । शिप्री । अन्धसः ॥१॥

सुते अभिषुते सोमे सति **सचा** ऋत्विजा सह सोमं **पिबन्तम् ईम्** एनमिन्द्रं **को वेद** को जानाति ? न कश्चन वेत्तीत्यर्थः । **कत्** किं वा **वयः** अन्नं **दधे** धारयति ? **यः** अयमिन्द्रः **शिप्री** शोभनहनूमान् **अन्धसः** सोमेन अन्नेन **मन्दानो** मन्दमानः **ओजसा** सामर्थ्येन **पुरो विभिनत्ति** शत्रुपुराणि ध्वंसयतीत्यर्थः । यद्वा सर्वप्रथमं शत्रून् नाशयति । मन्दानः, मदि स्तुतिमोदमदादिषु (भ्वा०) धातोः शानच् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दाना मृगो न वारणः पुरुत्रा चरथं दधे ।
नकिष्ट्वा नि यमदा सुते गमो महांश्चरस्योजसा ॥२॥

ऋ. ८।३३।८

पदपाठः

दाना । मृगः । न । वारणः । पुरुऽत्रा । चरथम् । दधे । नकिः । त्वा । नि । यमत् । आ । सुते । गमः । महान् । चरसि । ओजसा ॥२॥

मृगः शत्रुजनान्वेषकः **वारणो** गजः **दाना न** मदजलानीव **पुरुत्रा** प्रभूतेषु यज्ञेषु **चरथं** चरणशीलं मदं **दधे** इन्द्रो धारयति । अथ प्रत्यक्षस्तुतिः । हे इन्द्र ! **त्वा** त्वां **नकिः नि यमत्** न कोऽपि नियच्छति । न त्वं केनापि बद्धुं शक्नोषि इत्यर्थः । **सुते** अभिषुते सोमेऽत्र **आ गमः** आगच्छ । त्वं **महान्** असि, **ओजसा** बलेन च सर्वत्र **चरसि** विचरणं करोषि ।

य उग्रः सन्ननिष्टृत स्थिरो रणाय संस्कृतः ।
यदि स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्या गमत् ॥३॥

ऋ. ८।३३।९

पदपाठः

यः । उग्रः । सन् । अनिःऽस्तृतः । स्थिरः । रणाय । संस्कृतः । यदि । स्तोतुः । मघऽवा । शृणवत् । हवम् । न । इन्द्रः । योषति । आ । गमत् ॥३॥

यः उग्रः उद्गूर्णबलः ओजस्वी वा **सन्** भवन् **अनिष्टृतः** शत्रुजनैरनिस्तीर्णः **स्थिरः** शत्रुभिः प्रच्यावयितुमशक्यः, **रणाय** युद्धार्थं **संस्कृतः** शस्त्रैरलङ्कृतः सोमैर्वा सुसंस्कृतः स इन्द्रो **मघवा** धनी यदि **स्तोतुः हवम्** आह्वानं **शृणवत्** शृणोति तर्ह्य-न्यत्र **न योषति** न गच्छति । किन्तु **आ गमत्**, तत्रैव समायातीति ।

इति पञ्चमेऽनुवाके षोडशं सूक्तम् ।

चतुष्पञ्चाशं सूक्तम्

तृचस्यास्य सूक्तस्य रेभ ऋषिः । इन्द्रो देवता । प्रथमर्चोऽतिजगती, द्वितीया-तृतीययोश्चोपरिष्टाद्बृहती छन्दसी ।

पृष्ठ्यषडहस्य एकविंशस्तोमके चतुर्थेऽहनि एकाहैकीभूते 'इन्द्रो दधीचो अस्थिभिः' (अ० २०।४१) 'विश्वाः पृतना अभिभूतरं नरम्' (अ० २०।५४) 'एवा ह्यसि वीरयुः' (अ० २०।६०) इति आज्यपृष्ठोक्तस्तोत्रिया भवन्ति । तदुक्तं वैताने—

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"पृष्ठस्यैकविंशे 'इन्द्रो दधीचो अस्थिभिः' 'विश्वाः पृतना अभिभूतरं नरम्' 'एवा ह्यसि वीरयुः' (वै. श्रौ. ४०।१४) इति ।"

तथा व्युष्टयाङ्गिरसकापिवनचैत्ररथद्वयहानां द्वितीयेषु अहःसु 'विश्वाः पृतना अभिभूतरं नरम्' इति स्तोत्रियो भवति । तदुक्तं वैताने—"द्वितीयेषु विश्वाः पृतना अभिभूतरं नरम्" (वै. श्रौ. ४१।१) इति ।

तथा त्रिककुद्दशाहस्याहीनस्य अष्टमेऽहनि एष पृष्ठस्तोत्रियो भवति । सूत्रं पूर्वसूक्ते उक्तमेव ।

विश्वाः पृतना अभिभूतरं नरं
सजूस्ततक्षुरिन्द्रं जजनुश्च राजसे ।
क्रत्वा वरिष्ठं वर आमुरिमुतोग्रमोजिष्ठं
तवसं तरस्विनम् ॥१॥ ऋ. ८।९७।१०

पदपाठः

विश्वाः । पृतनाः । अभिऽभूतरम् । नरम् । सऽजूः । ततक्षुः । इन्द्रम् । जजनुः । च । राजसे । क्रत्वा । वरिष्ठम् । वरे । आऽमुरिम् । उत । उग्रम् । ओजिष्ठम् । तवसम् । तरस्विनम् ॥१॥

विश्वाः समस्ता व्याप्ता वा **पृतनाः** सेनाः **सजूः** परस्परं सङ्गताः सत्यः **अभिभूतरं** शत्रूणामत्यन्तमेवाभिभवितारं **नरं** सर्वस्य जगतो नेतारम् **इन्द्रं** **ततक्षुः** शस्त्रादिभिस्तीक्ष्णी कुर्वन्ति । आयुधवन्तमश्ववन्तं च चक्रुरित्यर्थः । यद्वा पृतनेति सङ्ग्रामः । समस्तसङ्ग्रामाभिभावुकमिन्द्रं स्तोतारोऽयोन्यं सङ्गताः स्तुतिभिः तीक्ष्णमकुर्वन् । यतः स्तुते सति बलवान् भवतीति । यद्वा यष्टारो हविष्प्रदानेन वीर्यवन्तं कुर्वन्तीति । किञ्च स्तोतारो **राजसे** राजतेस्तुमर्थेऽसेप्रत्ययः । आत्मनो विराजनार्थं प्रकाशनार्थं सूर्यात्मानमिन्द्रं **जजनुः** जनयामासुः । स्तोत्रं यज्ञे प्रादुरभावयन्नित्यर्थः । **उत** अपिच **क्रत्वा** वृत्रवधादिकर्मणैव **वरिष्ठम्** उरुतरम् **आमुरिं** शत्रूणामाभिमुख्येन मारयितारमिन्द्रं **वरे** वरणीये धने स्तोतारश्चक्रुः । आत्मनो धनलाभाय स्तुवन्तीत्यर्थः । कीदृशम् ? **उग्रम्** उद्गूर्णबलम् अत एव **ओजिष्ठम्** ओजस्वितमम्, **तवसं** प्रवृद्धं, तरस्विनं सङ्ग्रामे शत्रुवधार्थं वेगवन्तमिन्द्रं धनार्थं स्तुवन्ति ।

समीं रेभासो अस्वरन्निन्द्रं सोमस्य पीतये ।
स्वर्पतिं यदीं वृधे धृतव्रतो ह्योजसा समूतिभिः ॥२॥
ऋ. ८।९७।११

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

सम् । ईम् । रेभासः । अस्वरन् । इन्द्रम् । सोमस्य । पीतये । स्वः ऽ पतिम् । तत् । ईम् । वृधे । धृतऽव्रतः । हि । ओजसा । सम् । ऊतिऽभिः ॥२॥

रेभासः शब्दयितारः स्तोतृजनाः, यद्वा एतन्नामका महर्षयः, **ईम्** एनमिन्द्रं **समस्वरन्** सम्यगस्तुवन् । किमर्थम् ? **सोमस्य पीतये** सोमपानार्थम् । किञ्च **स्वर्पतिं** स्वर्गपालकं धनस्वामिनं वा **ईम्** एनमिन्द्रं **यत्** यद्वा **वृधे** हविर्भिर्वर्धनाय संस्तुवन्ति तदा **धृतव्रतः** धृतकर्मेन्द्रः **ओजसा** सामर्थ्येन स्तोतृभिः **ऊतिभिः** मरुद्भिः पालनैश्च सह सङ्गच्छते । स्तुतिभिर्बलं मरुद्भिः पालनञ्चेन्द्रस्य भवतीत्यर्थः ।

नेमिं नमन्ति चक्षसा मेषं विप्रा अभिस्वरा ।
सुदीतयो वो अद्रुहोऽपि कर्णे तरस्विनः समृक्वभिः ॥३॥

ऋ. ८।९७।१२

पदपाठः

नेमिम् । नमन्ति । चक्षसा । मेषम् । विप्राः । अभिऽस्वरा । सुऽदीतयः । वः । अद्रुहः । अपि । कर्णे । तरस्विनः । सम् । ऋक्वऽभिः ॥३॥

नेमिं नमनशीलमिन्द्रं **चक्षसा** दर्शनमात्रेणैव **नमन्ति** काश्यपा रेभाः स्तोतारो वा नमस्कुर्वन्ति । ततो **विप्राः** मेधाविनो **मेषम्** इन्द्रो मेषो भूत्वा मेधातिथिं स्वर्गमनयत् । तस्माद् मेधातिथेर्मेषभूतमिन्द्रम् **अभिस्वरा** अभिस्वरेण स्तोत्रेण नमन्ति । इदानीं यजमानः स्तोस्तृजनानाह—अपि च **सुदीतयः** शोभनदीप्तयः **अद्रुहः** कस्यापि अद्रोग्धारः **वः** यूयम् । प्रथमाबहुवचने छान्दसो वसादेशः । **तरस्विनः** कर्मसु त्वरायुक्ताः सन्तः इन्द्रस्य **कर्णे** श्रोत्रसमीपे **ऋक्वभिः** अर्चनायुक्तैर्मन्त्रैः । यद्वा ऋचो बह्वचो येषु भवन्ति तैः शस्त्रादिभिः **सम्** संस्तुत । इन्द्रो यथा युष्मदीयानि स्तोत्रशस्त्रादीनि शृणोति तथा सम्यग् अभिष्टुतेत्यर्थः ।

इति पञ्चमेऽनुवाके सप्तदशं सूक्तम् ।

पञ्चपञ्चाशं सूक्तम्

तृचस्यास्य सूक्तस्य रेभ ऋषिः । इन्द्रो देवता प्रथमर्चोऽतिजगती, द्वितीयातृतीययोश्च बृहती छन्दसी ।

'तमिन्द्रं जोहवीमि' इत्यस्य विनियोगः "वयं घ त्वा सुतावन्तः" (अ० २०। ५२) इति सूक्ते उक्तः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तमिन्द्रं जोहवीमि मघवानमुग्रं
सत्रा दधानमप्रतिष्कुतं शवांसि ।
मंहिष्ठो गीर्भिरा च यज्ञियो ववर्तद्
राये नो विश्वा सुपथा कृणोतु वज्री ॥१॥

ऋ. ८।९७।१३

पदपाठः

तम् । इन्द्रम् । जोहवीमि । मघऽवानम् । उग्रम् । सत्रा । दधानम् । अप्रतिऽस्कुतम् । शवांसि । मंहिष्ठः । गीःऽभिः । आ । च । यज्ञियः । ववर्तत् । राये । नः । विश्वा । सुऽपथा । कृणोतु । वज्री ॥१॥

तं प्रसिद्धम् **इन्द्रं जोहवीमि** पुनः पुनः आह्वयामि, यजमानोऽहमिति शेषः । कीदृशम् ? **मघवानं** धनवन्तम् **उग्रम्** उद्गूर्णबलं **सत्रा** यथार्थमेव **शवांसि** बलानि दधानम्, अत एव **अप्रतिष्कुतं** शत्रुजनैरप्रतिरोधनीयम्, **जोहवीमि** आह्वयामि । किञ्च **मंहिष्ठो** दातृतमः पूजनीयो वा **यज्ञियो** यज्ञार्ह इन्द्रो **गीर्भिः** अस्मदीयाभिः स्तुतिवाग्भिः **आववर्तत् च** यज्ञेष्वाभिमुख्येन वर्त्ततां च । ततः स **वज्री** इन्द्रो **नः** अस्माकं **राये** धनाय **विश्वा** सर्वाण्येव **सुपथा** सुमार्गान् **कृणोतु** च करोतु । सर्वदिक्स्थं धनमस्मान् लम्भयतु इत्यर्थः ।

या इन्द्र भुज आभरः स्वर्वाँ असुरेभ्यः ।
स्तोतारमिन्मघवन्नस्य वर्धय ये च त्वे वृक्तबर्हिषः ॥२॥

ऋ. ८।९७।१

पदपाठः

याः । इन्द्र । भुजः । आ । अभरः । स्वःऽवान् । असुरेभ्यः । स्तोतारम् । इत् । मघऽवन् । अस्य । वर्धय । ये । च । त्वे इति । वृक्तऽबर्हिषः ॥२॥

ऋषिरिन्द्रं प्रार्थयते । हे **इन्द्र** ! स्वर्वान् सुखवान् स्वर्गवान् वा । अथवा स्वः सर्वपर्यायः । सर्वं भूतजातम्, आत्मन एवोत्पन्नत्वात् तद्वान् । एवंगुणस्त्वं **याः** यानि **भुजो** भोक्तव्यानि धनानि **असुरेभ्यो** बलवद्भ्यो राक्षसेभ्य **आभरः** आहरः, तान् निहत्य हृतवानसि । अत एव हे **मघवन्** ! **अस्य** एतस्याहृतस्य धनस्य दानेन **स्तोतारमित्** तव स्तोत्रकारिणमेव **वर्धय** समृद्धं कुरु । ये **च** अन्ये यष्टारः **त्वे** त्वदर्थं **वृक्तबर्हिषः** स्तीर्णदर्भा भवन्ति तानपि धनेन वर्धय । आभरः, 'हृग्रहोः०' इति भकारादेशः ।

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

**यमिन्द्र दधिषे त्वमश्वं गां भागमव्ययम् ।
यजमाने सुन्वति दक्षिणावति तस्मिन् तं
धेहि मा पणौ ॥३॥** ऋ. १।६७।२

पदपाठः

यम् । इन्द्र । दधिषे । त्वम् । अश्वम् । गाम् । भागम् । अव्ययम् । यजमाने । सुन्वति । दक्षिणाऽवति । तस्मिन् । तम् । धेहि । मा । पणौ ॥३॥

हे इन्द्र ! त्वं **यमश्वं** गमनसाधनान् हरीन् **गाम्** अग्निहोमकर्मणि पयः-प्रदानेन उपकारिकाः गाः, **अव्ययं** व्ययशून्यम् अविनश्वरं **भागं** भजनीय धनम्, सर्वत्रैकत्वमविवक्षितम् । एतान् शत्रुभ्य आहृत्य **दधिषे** विभर्षि **तं** सर्वं **सुन्वति** सोमाभिषवं कर्म कुर्वति **दक्षिणावति** यज्ञे ऋत्विग्भ्यो दक्षिणादेयत्वेन तद्वति **यजमाने तस्मिन्** त्वं **धेहि**, अन्यत्र सर्वत्रैव धनादिदानं मा कुरु इत्यर्थः। **मा पणौ** । पण-व्यवहारे, द्रव्यव्यवहारात् अयष्टा जनः पणिः, तस्मिन्नं तत् सर्वं मा धेहि ।

इति पञ्चमेऽनुवाकेऽष्टादशं सूक्तम् ।

षट्पञ्चाशं सूक्तम्

षड्चस्यास्य सूक्तस्य गोतम ऋषिः । इन्द्रो देवता । [पङ्क्तिश्छन्दः] ।

पृष्ठ्यपञ्चाहस्य पञ्चमेऽहनि 'उत्तिष्ठन्नोजसा सह' (अ० २०।४२।३) 'इन्द्रो मदाय वावृधे' (अ० २०।५६), 'इन्द्राय साम गायत' (अ० २०।६२।५-७) इत्येते आज्यपृष्ठोक्थस्तोत्रिया भवन्ति । तदुक्तं वैताने–"पञ्चमे 'उत्तिष्ठन्नोजसा सह' 'इन्द्रो मदाय वावृधे' 'इन्द्राय साम गायत" (वै० ४१।१७) इति ।

**इन्द्रो मदाय वावृधे शवसे वृत्रहा नृभिः ।
तमिन्महत्स्वाजिषूतेमर्भे हवामहे स वाजेषु
प्र नोऽविषत् ॥१॥** ऋ. १।८१।१

पदपाठः

इन्द्रः । मदाय । ववृधे । शवसे । वृत्रऽहा । नृऽभिः । तम् । इत् । महत्ऽसु । आजिषु । उत । ईम् । अर्भे । हवामहे । सः । वाजेषु । प्र । नः । अविषत् ॥१॥

वृत्रहा मेघस्य असुरस्य वा हन्ता **इन्द्रो मदाय** हर्षाय **शवसे** बलाय च **नृभिः** यज्ञनेतृभिः ऋत्विग्भिः **ववृधे** स्तुतिभिः प्रवर्धितो बभूव । **तमित्** तमेवेन्द्रं **महत्सु**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रचुरेषु **आजिषु** रणेषु **हवामहे** आह्वयामः। **उत** अपि च **ईम्** एनम् **अर्भे** स्वल्पे सङ्ग्रामेऽपि हवामहे। अस्माभिराहूतः **स** इन्द्रो **वाजेषु** युद्धेषु नः अस्मान् **प्राविषत्** प्ररक्षतु। ववृधे वृधेः कर्मणि लिट्। अविषत् अव रक्षणे लेटि अडागमः। "इतश्च लोपः०" इति इकारलोपः।

असि हि वीर सेन्योऽसि भूरि परादिदः।
असि दभ्रस्य चिद् वृधो यजमानाय शिक्षसि सुन्वते
भूरि ते वसु ॥२॥ ऋ. १।८१।२

पदपाठः

असि। हि। वीर। सेन्यः। असि। भूरि। पराऽददिः। असि। दभ्रस्य। चित्। वृधः। यजमानाय। शिक्षसि। सुन्वते। भूरि। ते। वसु ॥२॥

हे **वीर**! शत्रुक्षेपणनिपुणेन्द्र! त्वं **सेन्योऽसि** सेनार्हो भवसि त्वमेकलोऽपि सेनासदृशोऽसीत्यर्थः। **हि** यस्मादेवं तस्माद् **भूरि** प्रभूतं शत्रूणां धनं **परादिदः** परादाता, शत्रूणां पराङ्मुखं यथा स्यात् तथा आदाता भवसि। **दभ्रस्य चित्** अल्पस्यापि तव स्तोतुः **वृधो** वर्धयिता असि। तथा **यजमानाय** यागं कुर्वते **सुन्वते** सोमाभिषवं कुरुते पुरुषाय **शिक्षसि** आवश्यकं धनं ददासि। यतः **ते** तव धनं **भूरि** अतुलं विद्यते। तस्मात् त्वं ददासीति भावः। परादिदः डुदाञ् दाने 'आदृगमहनजनः०' इति किप्रत्ययः।

यदुदीरत आजयो धृष्णवे धीयते धना।
युक्ष्वा मदच्युता हरी कं हनः कं वसौ दधोऽस्माँ इन्द्र
वसौ दधः ॥३॥ ऋ. १।८१।३

पदपाठः

यत्। उत्ऽईरते। आजयः धृष्णवे। धीयते। धना। युक्ष्व। मदऽच्युता। हरी इति। कम्। हनः। कम्। वसौ। दधः। अस्मान्। इन्द्र। वसौ। दधः ॥३॥

अत्रेदमाख्यानमाख्यायते। रहूगणतनयो गोतमः कुरुसृञ्जयानां पुरोहित आसीत्। तेषां परैः सह सङ्ग्रामे सञ्जाते स ऋषिरनेन सूक्तेनेन्द्रं स्तुत्वा स्वकीयानां जयं प्रार्थयामासेति। स्मर्यते चैवं शतपथे—"गोतमो ह वै राहूगण उभयेषां कुरुसृञ्जयानां पुरोहित आसीत्" इति। **यत्** यदा **आजयः** सङ्ग्रामा **उदीरते** उद्गच्छन्ति उत्पद्यन्ते तदानीं **धना** धनं **धृष्णवे** शत्रुधर्षयित्रे **धीयते** निधीयते। जयतो धनं भवती-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्यर्थः। हे इन्द्र ! त्वं तादृशेषु युद्धेषु प्रवृत्तेषु **मदच्युता** शत्रूणां मदस्य च्यावयितारौ **हरी** त्वदीयौ हयौ **युक्ष्व** रथे योजय। योजयित्वा च **कं** कञ्चित् राजानं तव परिचरणमकुर्वन्तं **हनः** हन्याः! कञ्चन त्वां परिचरन्तं **वसौ** वसुनि धने **दधः** स्थापयसि। अतो जयपराजययोस्त्वमेव कारयितासि। तस्मात् हे **इन्द्र** ! **अस्मान्** अस्मदीयान् राज्ञः **वसौ** धने **दधः** स्थापय।

मदे मदे हि नो ददिर्यूथा गवामृजुक्रतुः।
सं गृभाय पुरु शतोभयाहस्त्या वसु
शिशीहि राय आ भर ॥४॥ ऋ. १।८१।७

पदपाठः

मदेऽमदे। हि। नः। ददिः। यूथा। गवाम्। ऋजुऽक्रतुः। सम्। गृभाय। पुरु। शता। उभयाहस्त्या। वसु। शिशीहि। रायः। आ। भर ॥४॥

मदे मदे सोमपानेन हर्षे हर्षे सति **ऋजुक्रतुः** ऋजुकर्मा स इन्द्रः **नः** अस्मभ्यं **गवां यूथा** यूथानि **ददिः हि** गोयूथानां दाता खलु। हे इन्द्र ! स त्वं **पुरु** प्रचुराणि **शता** शतसङ्ख्याकानि **वसु** वसूनि धनानि **उभयाहस्त्या** उभाभ्यां हस्ताभ्यां **संगृभाय** अस्मभ्यं दातुं सम्यग् गृहाण। **शिशीहि** अस्माँस्तीक्ष्णीकुरु। निशितवुद्धियुक्तान् कुरु इत्यर्थः। **रायो** धनानि हस्तयोः विद्यमानानि **आ भर** आहर प्रयच्छेत्यर्थः। ददिः डुदाञ् दाने 'आदृगमहनजनः०' इति किप्रत्ययः।

मादयस्व सुते सचा शवसे शूर राधसे।
विद्मा हि त्वा पुरूवसुमुप कामान्त्ससृज्महेऽथा
नोऽविता भव ॥५॥ ऋ. १।८१।८

पदपाठः

मादयस्व। सुते। सचा। शवसे। शूर। राधसे। विद्म। हि। त्वा। पुरुऽवसुम्। उप। कामान्। ससृज्महे। अथ। नः। अविता। भव ॥५॥

हे **शूर** शौर्यशालिन्निन्द्र ! **सुते** सोमाभिषवे सञ्जाते आगत्य **सचा** अस्माकं सखा सन् **मादयस्व**, तेन सोमेन तृप्तिं लभस्व। किमर्थम्? **शवसे** बलाय, **राधसे** अस्माकं धनाय च। **त्वा** त्वां **पुरुवसुं** बहुधनं **विद्म हि** वयं जानीमः खलु। अतोऽस्मदीयान् **कामान्** मात्रा गवा वत्सानिव त्वया **उप ससृज्महे हि** त्वया खलु एकीकुर्मः। **अथ** अनन्तरं **नः** अस्माकम् **अविता** अभीष्टफलदानेन रक्षको भव।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एते त इन्द्र जन्तवो विश्वं पुष्यन्ति वार्यम् ।
अन्तर्हि ख्यो जनानामर्यो वेदो अदाशुषां
तेषां नो वेद आ भर ॥६॥ ऋ. १।८१।९

पदपाठः

एते । ते । इन्द्र । जन्तवः । विश्वम् । पुष्यन्ति । वार्यम् । अन्तः । हि । ख्यः । जनानाम् । अर्यः । वेदः । अदाशुषाम् । तेषाम् । नः । वेदः । आ । भर ॥६॥

हे इन्द्र ! **ते** स्वभूताः **एते** जन्तवो यजमानलक्षणा जनाः **विश्वं** समस्तं **वार्यं** सर्वैः वरणीयं हविः पुष्यन्ति वर्धयन्ति । **अदाशुषां** हविषामदातृ-जनानाम् **अन्तः** मध्ये विद्यमानं **वेदः** धनम्, **अर्यः** सर्वेषां स्वामी त्वं **ख्यः हि** पश्यसि खलु जानासीत्यर्थः । **तेषाम्** अयाजकानां **वेदो** धनं **नः** अस्मभ्यम् **आभर** आहर प्रयच्छेत्यर्थः । अयाजकेषु विद्यमानं धनं यागानुपयुक्तत्वात् व्यर्थमेव भवेत् । अतस्तस्य धनस्य सार्थकत्वाय तदीयं धनमपहृत्य यजमानेभ्यः प्रयच्छेति तात्पर्यम् ।

इति सप्तमेऽनुवाके एकोनविंशं सूक्तम् ।

सप्तपञ्चाशं सूक्तम्

षोडशर्चस्यास्य सूक्तस्य प्रथमादितृचस्य मधुच्छन्दाः, चतुर्थ्यादिचतसृणामृचां विश्वामित्रः, अष्टम्यादितृचस्य गृत्समदः, एकादश्यादिषण्णाञ्च मेध्यातिथिर्ऋषयः । इन्द्रो देवता । प्रथमादितृचद्वयस्याष्टम्यादितृचस्य च गायत्री, [सप्तम्या अनुष्टुप्], एकादश्यादिषण्णाञ्च बृहती छन्दांसि ।

अप्तोर्याम्णि क्रतौ तृतीयसवने 'सुरूपकृत्नुमूतये' (अ० २०।५७) 'शुष्मिन्तमं न ऊतये (अ० २०।५७।४) इति स्तोत्रियानुरूपौ भवतः । तत्र 'सुरूपकृत्नुमूतये' इति स्तोत्रियमभितः प्राकृतः स्तोत्रियो भवति । 'शुष्मिन्तमं न ऊतये' इत्यनुरूपमभितः प्राकृतोऽनुरूपो भवति । तदुक्तं वैताने--"तृतीयसवने 'सुरूपकृत्नुमूतये' 'शुष्मिन्तमं न ऊतये' इति स्तोत्रियानुरूपावभितः स्तोत्रियानुरूपौ" (वै. श्रौ. २७।२५) इति ।

तथा महाव्रते प्रातःसवने 'सुरूपकृत्नुमूतये' इत्याज्यस्तोत्रियो भवति । तदुक्तं वैताने--"महाव्रते 'सुरूपकृत्नुमूतये' इत्याज्यस्तोत्रियः" (वै. श्रौ. ३४।६) इति ।

तथा श्येनसंदंशाजिरवज्रेषु एकाहेषु 'सुरूपकृत्नुमूतये' 'उत्त्वा मन्दन्तु स्तोमाः' "(अ० २०।९३) एतौ आज्यस्तोत्रियौ विकल्पितौ भवतः । 'त्वामिद्धि हवामहे' (अ० २०।९८) इति पृष्ठस्तोत्रियो भवति । तदुक्तं वैताने "श्येनसंदंशा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जिरवज्रेषु" 'सुरूपकृत्नुमूतये', 'उत्त्वा मन्दन्तु', 'त्वामिद्धि हवामहे' (वै. श्रौ. ३६।५) इति ।

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे ।

जुहूमसि द्यवि द्यवि ॥१॥ ऋ. १।४।१

पदपाठः

सुरूपऽकृत्नुम् । ऊतये । सुदुघाम्ऽइव । गोऽदुहे । जुहूमसि । द्यविऽद्यवि ॥१॥

सुरूपकृत्नुम् । शोभनरूपवतः कर्मणः कर्त्तारम् इन्द्रम् **ऊतये** अस्मद्रक्षणाय **द्यविद्यवि** प्रत्यहं **जुहूमसि** आह्वयामः । तत्र दृष्टान्तः **गोदुहे** गोधुगर्थं **सुदुघाम् इव** सुष्ठु दोग्ध्रीं गामिव । अर्थात् यथा लोके गोः यो दोग्धा तदर्थं तस्याभिमुख्येन दोहनीयां गामाह्वयति तद्वत् । सुरूपकृत्नुम् । करोतीति कृत्नुः । 'कृहनिभ्यां क्त्नुः' (उ. सू. ३।३१०) । कित्वाद् गुणाभावः । तकारोपजनश्छान्दसः ।

उप नः सवना गहि सोमस्य सोमपाः पिब ।

गोदा इद् रेवतो मदः ॥२॥ ऋ. १।४।२

पदपाठः

उप । नः । सवना । आ । गहि । सोमस्य । सोमऽपाः । पिब । गोऽदाः । इत् । रेवतः । मदः ॥२॥

सोमपाः ! सोमस्य पातः ! हे इन्द्र ! त्वं सोमपानार्थं **नः** अस्माकं **सवना** त्रीणि सवनानि प्रति **उप** समीपे **आगहि** आगच्छ । आगत्य च **सोमस्य** सोमं **पिब** । **रेवतः** धनवतस्तव **मदो** हर्षो **गोदा इत्** गोप्रद एव । त्वयि प्रसन्ने सञ्जाते वयं धेनुधनं लभामहे-इत्यर्थः । सवना सूयते सोम एष्विति सवनानि । अधिकरणे ल्युट् ।

अथा ते अन्तमानां विद्याम सुमतीनाम् ।

मा नो अति ख्य आ गहि ॥३॥ ऋ. १।४।३

पदपाठः

अथ । ते । अन्तमानाम् । विद्याम । सुऽमतीनाम् । मा । नः । अति । ख्यः । आ । गहि ॥३॥

अथ सोमपानानन्तरं हे इन्द्र ! **ते** तव **अन्तमानाम्** अत्यन्तमेव निकटवर्त्तिनामात्मीयानां **सुमतीनां** शोभनबुद्धिमतां पुरुषाणां मध्ये स्थित्वा **विद्याम** वयं त्वां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जानीयाम । यद्वा सुमतीनां शोभनप्रज्ञानां कर्मानुष्ठानविषयाणां लाभार्थमित्यध्याहारः । बुद्धिलाभार्थं त्वां स्मरेमेत्यर्थः । त्वमपि **नः अति मा ख्यः,** अस्मानतिक्रम्य अन्येषां त्वत्स्वरूपं मा प्रकथय । किन्तु **आगहि** अस्मानेवागच्छ । अथेत्यत्र 'निपातस्य च' (पा. ६।३।१३६) इति दीर्घत्वम् । अन्तमानाम् अतिशयेनान्तिका इत्यतिशायने तमप् । अन्तोऽस्यास्तीति अन्तिकः समीपः । 'अत इनि ठनौ' (पा. ५।३। ११५) इति ठन् ।

शुष्मिन्तमं न ऊतये द्युम्निनं पाहि जागृविम् ।
इन्द्र सोमं शतक्रतो ॥४॥ ऋ. ३।३७।८

पदपाठः

शुष्मिन्ऽतमम् । नः । ऊतये । द्युम्निनम् । पाहि । जागृविम् । इन्द्र । सोमम् । शतक्रतो इति शतऽक्रतो ॥४॥

व्याख्यातोऽयं मन्त्रः सायणेन (अथर्व० २०।२०।१) ।

इन्द्रियाणि शतक्रतो या ते जनेषु पञ्चसु ।
इन्द्र तानि त आ वृणे ॥५॥ ऋ. ३।३७।९

पदपाठः

इन्द्रियाणि । शतक्रतो इति शतऽक्रतो । या । ते । जनेषु । पञ्चऽसु । इन्द्र । तानि । ते । आ । वृणे ॥५॥

व्याख्यातोऽयं मन्त्रः सायणेन (अथर्व० २०।२०।२) ।

अगन्निन्द्र श्रवो बृहद् द्युम्नं दधिष्व दुष्टरम् ।
उत् ते शुष्मं तिरामसि ॥६॥ ऋ. ३।३७।१०

पदपाठः

अगन् । इन्द्र । श्रवः । बृहत् । द्युम्नम् । दधिष्व । दुस्तरम् । उत् । ते । शुष्मम् । तिरामसि ॥६॥

व्याख्यातोऽयं मन्त्रः सायणेन (अथर्व० २०।२०।३) ।

अर्वावतो न आ गह्यथो शक्र परावतः ।
उ लोको यस्ते अद्रिव इन्द्रेह तत आगहि ॥७॥
ऋ. ३।३७।११

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

अर्वाऽवतः । नः । आ । गहि । अथो इति । शक्र । पराऽवतः । ऊं इति । लोकः । यः । ते । अद्रिऽवः । इन्द्र । इह । ततः । आ । गहि ॥७॥

मन्त्रोऽयं सायणेन व्याख्यातः (अथर्व० २०।२०।४)।

इन्द्रो अङ्ग महद् भयमभी षदप चुच्यवत् ।

स हि स्थिरो विचर्षणिः ॥८॥ ऋ. २।४१।१०

पदपाठः

इन्द्रः । अङ्ग । महत् । भयम् । अभि । सत् । अप । चुच्यवत् । सः । हि । स्थिरः । विचऽर्षणिः ॥८॥

व्याख्यातोऽयं मन्त्रः सायणेन (अथर्व० २०।२०।५)।

इन्द्रश्च मृलयाति नो न नः पश्चादघं नशत् ।

भद्रं भवाति नः पुरः ॥९॥ ऋ. २।४१।११

पदपाठः

इन्द्रः । च । मृलयाति । नः । न । नः । पश्चात् । अघम् । नशत् । भद्रम् । भवाति । नः । पुरः ॥९॥

सायणेनैव व्याख्यातोऽयं मन्त्रः (अथर्व० २०।२०।६)।

इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत् ।

जेता शत्रून् विचर्षणिः ॥१०॥ ऋ. २।४१।१२

पदपाठः

इन्द्रः । आशाभ्यः । परि । सर्वाभ्यः । अभयम् । करत् । जेता । शत्रून् । विऽचर्षणिः ॥१०॥

व्याख्यातोऽयं मन्त्रः सायणेनैव (अथर्व० २०।२०।७)।

क ईं वेद सुते सचा पिबन्तं कद् वयो दधे ।

अयं यः पुरो विभिनत्त्योजसा मन्दानः शिप्र्यन्धसः ॥११॥

ऋ. ८।३३।७

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

कः । ईम् । वेद । सुते । सचा । पिबन्तम् । कत् । वयः । दधे । अयम् । यः । पुरः । विऽभिनत्ति । ओजसा । मन्दानः । शिप्री । अन्धसः ॥११॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।५३।१)।

दाना मृगो न वारणः पुरुत्रा चरथं दधे ।

नकिष्ट्वा नि यमदा सुते गमो महांश्चरस्योजसा ॥१२॥

ऋ. ८।३३।८

पदपाठः

दाना । मृगः । न । वारणः । पुरुऽत्रा । चरथम् । दधे । नकिः । त्वा । नि । यमत् । आ । सुते । गमः । महान् । चरसि । ओजसा ॥१२॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।५३।२)।

य उग्रः सन्ननिष्टृत स्थिरो रणाय संस्कृतः ।

यदि स्तोतुर्मघवा शृणवद्धवं नेन्द्रो योषत्यागमत् ॥१३॥

ऋ. ८।३३।९

पदपाठः

यः । उग्रः । सन् । अनिःऽस्तृतः । स्थिरः । रणाय । संस्कृतः । यदि । स्तोतुः । मघऽवा । शृणवत् । हवम् । न । इन्द्रः । योषति । आ । गमत् ॥१३॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।५३।३)।

वयं घ त्वा सुतावन्त आपो न वृक्तबर्हिषः ।

पवित्रस्य प्रस्रवणेषु वृत्रहन् परि स्तोतार आसते ॥१४॥

ऋ. ८।३३।१

पदपाठः

वयम् । घ । त्वा । सुतऽवन्तः । आपः । न । वृक्तऽबर्हिषः । पवित्रस्य । प्रऽस्रवणेषु । वृत्रऽहन् । परि । स्तोतारः । आसते ॥१४॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।५२।१)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वरन्ति त्वा सुते नरो वसो निरेक उक्थिनः ।
कदा सुतं तृषाण ओक आ गम इन्द्र स्वब्दीव वंसगः ॥१५॥

ऋ. ८।३३।२

पदपाठः

स्वरन्ति । त्वा । सुते । नरः । वसो इति । निरेके । उक्थिनः । कदा । सुतम् । तृषाणः । ओकः । आ । गमः । इन्द्र । स्वब्दीऽइव । वंसगः ॥१५॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।५२।२) ।

कण्वेभिर्धृष्णवा धृषद् वाजं दर्षि सहस्रिणम् ।
पिशङ्गरूपं मघवन् विचर्षणे मक्षू गोमन्तमीमहे ॥१६॥

ऋ. ८।३३।३

पदपाठः

कण्वेभिः । धृष्णो इति । आ । धृषत् । वाजम् । दर्षि । सहस्रिणम् । पिशङ्गऽरूपम् । मघऽवन् । विऽचर्षणे । मक्षु । गोऽमन्तम् । ईमहे ॥१६॥

इति पञ्चमेऽनुवाके विंशं सूक्तम् ।

अष्टपञ्चाशं सूक्तम्

चतुर्ऋचस्यास्य सूक्तस्य प्रथमाद्वितीययोर्ऋचोर्नृमेधः, तृतीयाचतुर्थ्योश्च भरद्वाज ऋषी । प्रथमा-द्वितीययोरिन्द्रः, तृतीयाचतुर्थ्योश्च सूर्यो देवते । प्रगाथश्छन्दः ।

विषुवति सौर्यपृष्ठे 'बण्महाँ असि सूर्य' (अ० २०।५८।३), 'श्रायन्त इव सूर्यम्' (अ० २०।५८।१) इति विकल्पितौ पृष्ठस्तोत्रियानुरूपौ भवतः । तदुक्तं वैताने— "बण्महाँ असि सूर्य', 'श्रायन्त इव सूर्यम्' इति वा" (वैता. ३३।६) इति ।

तथा तीव्रसुच्चतुःपर्याययोः साहस्रान्त्ययोर्दशपेये विभ्रंशयज्ञे "श्रायन्त इव सूर्यम्" इत्येष पृष्ठस्तोत्रियो भवति ।

तथा साद्यःक्राभिधानेषु एकाहेषु श्येनयागवर्जितेषु 'अहमिद्धि पितुष्परि' (अ० २०।११५) इत्याज्यस्तोत्रियो भवति । चकारात् 'श्रायन्त इव सूर्यम्' इत्याज्यस्तोत्रियो भवति । तदुक्तं वैताने "तीव्रसुच्चतुःपर्याययोः साहस्रान्त्ययोर्दशपेये विभ्रंशयज्ञे 'श्रायन्त इव सूर्यम्' इति । साद्यःक्रेषु श्येनवर्जम् 'अहमिद्धि पितुष्परि' इति च" (वै. ४०।५।६) इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथा साकमेधस्य तृतीयेऽहन्यस्य सूक्तस्य विनियोग उक्तः । स च 'तमिन्द्रं वाजयामसि' (अ० २०।४७) इति सूक्तेऽवलोकनीयः ।

तथा चतुरहाणां तृतीयेषु अहःसु 'आयन्त इव सूर्यम्' (अ० २०।५८) 'त्वं न इन्द्रा भर' (अ० २०।१०८) एतौ पृष्ठोक्तस्तोत्रियौ भवतः । तदुक्तं वैताने-- "चतुरहाणां 'आयन्त इव सूर्यम्' 'त्वं न इन्द्रा भर इति" (वैता० श्रौ० ४१।१०) । इति ।

तथा त्रिककुद्दशाहेऽस्य विनियोग 'क ईं वेद०' इति सूक्ते (अ. २०।५३) उक्तः ।

आयन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत ।
वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम ॥१॥

ऋ. ८।९९।३

पदपाठः

आयन्तःऽइव । सूर्यम् । विश्वा । इत् । इन्द्रस्य । भक्षत । वसूनि । जाते । जनमाने । ओजसा । प्रति । भागम् । न । दीधिम ॥१॥

हे अस्मदीया जनाः ! **आयन्त इव सूर्यं** यथा समाश्रिताः किरणाः **सूर्यं** भजन्ते तथा **इन्द्रस्य विश्वेत्** विश्वान्येव धनानि **भक्षत** भजत । स च यानि **वसूनि** धनानि **जाते** समुत्पन्ने **जनमाने** जनिष्यमाणे च **ओजसा** बलेन करोति **भागं न** पैतृकं भागमिव तानि धनानि **प्रति दीधिम** प्रतिधारयामेति । यद्वा यथा सूर्यरश्मयः सूर्यमुपतिष्ठन्ते तथेन्द्रस्य विश्वा विश्वानि विभक्तुमिच्छन्तः समाश्रिता मरुत इन्द्रमुपतिष्ठन्ते इति शेषः । उपस्थाय च मरुतो वसूनि जलरूपाणि धनानि जाते जाताय जनमाने जनिष्यमाणाय च मनुष्याय च ओजसा बलेन भक्षत विभजन्ते । तत्र चास्माकं यो भागस्तं भागम् । नेति सम्प्रत्यर्थे प्रयुक्तोऽत्र । अनुदीधिम वयमनुध्यायाम ।

अनर्शरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः ।
सो अस्य कामं विधतो न रोषति
मनो दानाय चोदयन् ॥२॥ ऋ. ८।९९।४

पदपाठः

अनर्शऽरातिम् । वसुऽदाम् । उप । स्तुहि । भद्राः । इन्द्रस्य । रातयः । सः । अस्य । कामम् । विधतः । न । रोषति । मनः । दानाय । चोदयन् ॥२॥

हे स्तोतः ! **अनर्शरातिम्** अपापकदानम् अपापिष्ठस्य दातारमित्यर्थः । **वसुदां** धनदातारमिन्द्रम् **उपस्तुहि** । यतः **इन्द्रस्य रातयो** दानानि **भद्राः** कल्याणानि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रभूतैश्वर्यकारीणीत्यर्थः । यतश्च **स** इन्द्रः स्वकीयं **मनो दानाय** अभीष्टफलप्रदानाय **चोदयन्** प्रेरयन् **विधतः** परिचरतः **अस्य** स्तोतुः **कामम्** अभिलाषं **न रोषति** न हिनस्ति ।

बण्महाँ असि सूर्य बडादित्य महाँ असि ।
महस्ते सतो महिमा पनस्यतेऽद्धा देव महाँ असि ।।३।।

ऋ. ८।१०१।११

पदपाठः

बट् । महान् । असि । सूर्य । बट् । आदित्य । महान् । असि । महः । ते । सतः । महिमा । पनस्यते । अद्धा । देव । महान् । असि ।।३।।

हे **सूर्य** ? त्वं तेजसा **महान् असि** । **बट्** सत्यमेतत्, 'बट् सत्रा अद्धा' इति सत्यनामसु पाठात् । हे **आदित्य** ? त्वं बलेनापि **महान् असि** । **बट्** इदमपि सत्यम् । **महो** महतः **सतो** भवतो **महिमा पनस्यते** स्तोतृजनैः स्तूयते । हे **देव** ? त्वं वीर्येणापि **महान् असि** । **अद्धा** इदमपि सत्यमेवेति ।

बट् सूर्य श्रवसा महाँ असि सत्रा देव महाँ असि ।
मह्ना देवानामसुर्यः पुरोहितो विभु ज्योतिरदाभ्यम् ।।४।।

ऋ. ८।१०१।१२

पदपाठः

बट् । सूर्य । श्रवसा । महान् । असि । सत्रा । देव । महान् । असि । मह्ना । देवानाम् । असुर्यः । पुरःऽहितः । विऽभु । ज्योतिः । अदाभ्यम् ।।४।।

हे **सूर्य** ! त्वं **श्रवसा** श्रवणेन श्रवणीयेन यशसेत्यर्थः, **महान् असि, बट्** सत्यमिदम् । हे **देव** ! त्वं देवानां मध्ये **मह्ना** महत्त्वेनापि **महान् असि, सत्रा** इदमपि सत्यमेव । **असुर्यः** असुराणां हननकारी चासि । किं च त्वं **देवानां पुरोहितो** हितोपदेष्टासि । किञ्च ते **ज्योतिः** तेजो **विभु** महत् **अदाभ्यं** केनाप्यहिंस्यञ्च वर्त्तते ।

इति पञ्चमेऽनुवाके एकविंशं सूक्तम् ।

एकोनषष्टितमं सूक्तम्

चतुर्ऋचस्यास्य सूक्तस्य प्रथमाद्वितीययोर्ऋचोर्मेध्यातिथिः, तृतीयाचतुर्थ्योश्च वसिष्ठ ऋषी । इन्द्रो देवता । प्रगाथश्छन्दः ।

दशरात्रस्य दशमेऽह्नि माध्यन्दिने सवने 'उदु त्ये मधुमत्तमाः' । (अ० २०। ५९।१) 'उदिन्न्वस्य रिच्यते' (अ० २०।५९।३) इति पृष्ठस्तोत्रियानुरूपौ भवतः । तदुक्तं वैताने—"उदु त्ये मधुमत्तमाः । 'उदिन्न्वस्य रिच्यते' इति पृष्ठस्तोत्रियानुरूपौ" (वै० ३३।२४) इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उदु त्ये मधुमत्तमा गिर स्तोमास ईरते ।
सत्राजितो धनसा अक्षितोतयो वाजयन्तो रथा इव ॥१॥

ऋ. ८।३।१५

पदपाठः

उत् । ऊं इति । त्ये । मधुमत्ऽतमाः । गिरः । स्तोमासः । ईरते । सत्राऽजितः । धनऽसाः । अक्षितऽऊतयः । वाजऽयन्तः । रथाःऽइव ॥१॥

व्याख्यातोऽयं मन्त्रः सायणेन (अथर्व० २०।१०।१) ।

कण्वा इव भृगवः सूर्या इव विश्वमिद्धीतमानशुः ।
इन्द्रं स्तोमेभिर्महयन्त आयवः प्रियमेधासो अस्वरन् ॥२॥

ऋ. ८।३।१६

पदपाठः

कण्वाःऽइव । भृगवः । सूर्याःऽइव । विश्वम् । इत् । धीतम् । आनशुः । इन्द्रम् । स्तोमेभिः । महयन्तः । आयवः । प्रियऽमेधासः । अस्वरन् ॥२॥

सायणेनैव व्याख्यातोऽयं मन्त्रः (अथर्व० २०।१०।२) ।

उदिन्न्वस्य रिच्यतेंऽशो धनं न जिग्युषः ।
य इन्द्रो हरिवान्न दभन्ति तं रिपो
दक्षं दधाति सोमिनि ॥३॥ ऋ. ७।३२।१२

पदपाठः

उत् । इत् । नु । अस्य । रिच्यते । अंशः । धनम् । न । जिग्युषः । यः । इन्द्रः । हरिऽवान् । न । दभन्ति । तम् । रिपः । दक्षम् । दधाति । सोमिनि ॥३॥

अस्य इन्द्रस्य **अंशो** यज्ञे सोमभागोऽतिरिच्यतेऽन्येभ्योऽपि देवेभ्यः । यतः इन्द्रस्य त्रिष्वपि सवनेषु सोमपानमस्ति, माध्यन्दिनं हि सर्वमैन्द्रम् । **जिग्युषो** जितवतो **धनं न** धनमिव । **उदिन्नु** इति त्रयः पूरणाः । अपि च **यो हरिवान् इन्द्रः सोमिनि** यजमाने **दक्षं** बलं **दधाति** संदधाति **तं रिपो** रिपवो **न दभन्ति** न हिंसन्ति ।

मन्त्रमखर्वं सुधितं सुपेशसं दधात यज्ञियेष्वा ।
पूर्वीश्चन प्रसितयस्तरन्ति तं य इन्द्रे कर्मणा भुवत् ॥४॥

ऋ. ७।३२।१३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

मन्त्रम् । अखर्वम् । सुऽधितम् । सुऽपेशसम् । दधात । यज्ञियेषु । आ । पूर्वीः । चन । प्रऽसितयः । तरन्ति । तम् । यः । इन्द्रे । कर्मणा । भुवत् ॥४॥

हे जनाः ! **अखर्वं** महान्तं **सुधितं** सुविहितं **सुपेशसं** शोभनरूपं **मन्त्रं** स्तोत्रं **यज्ञियेषु** यजनीयेषु **देवेषु** मध्ये इन्द्राय **दधात** विधत्त । **यो** जनः **कर्मणा** स्तुत्यादिरूपेण **इन्द्रे** इन्द्रस्य चित्ते **भुवत्** भवेत् **तं** जनं **पूर्वीः** प्रभूताः **प्रसितयः** पाशादीनि बन्धनानि । **चन** इति समुदायो नेत्यर्थे वर्त्तते । **न तरन्ति** । न व्याप्नुवन्तीत्यर्थः ।

इति पञ्चमेऽनुवाके द्वाविंशं सूक्तम् ।

षष्टितमं सूक्तम्

षड्चस्यास्य सूक्तस्य प्रथमादितृचस्य सुतकक्षः सुकक्षो वा, चतुर्थ्यादितृचस्य च मधुच्छन्दा ऋषी । इन्द्रो देवता । गायत्री छन्दः ।

अभिप्लवमध्यमेषु अहःसु द्वितीय-तृतीय-चतुर्थ-पञ्चमेषु 'एवाह्यसि वीरयुः' इत्यादयोऽष्टौ तृचास्तृतीयसवने उक्थस्तोत्रियानुरूपा यथाक्रमं भवन्ति । एवञ्च 'एवाह्यसि वीरयुः' (अ० २०।६०) 'एवा ह्यस्य सूनृता' (अ० ३०।६०।४-६) इति स्तोत्रियानुरूपौ द्वितीये । 'तं ते मदं गृणीमसि' (अ० २०।६१) 'तम्वभि प्र गायत' (अ० २०।६१।४-६) इति तृतीये । 'वयमु त्वामपूर्व्य' (अ० २०।६२।१) 'यो न इदमिदं पुरा' (२०।६२।३) इति चतुर्थे । 'इन्द्राय साम गायत' (२०।६२।५-७), 'तम्वभि प्र गायत' (२०।६१।४-६) इति पञ्चमे । तदुक्तं वैताने—"मध्यमेषु 'एवा ह्यसि वीरयुः' इत्युक्थस्तोत्रियानुरूपाः ।" (वै. श्रौ. ३१।२६) इति ।

तथा वैकृतस्य पृष्ठ्यत्र्यहस्य द्वितीयेऽहनि 'एवा ह्यसि वीरयुः' इति उक्थस्तोत्रियो भवति । तदुक्तं वैताने—"पृष्ठ्यत्र्यहस्य 'एवा ह्यसि वीरयुः' इत्युक्थे" (वै० श्रौ० ४१।७) इति ।

तथा तस्यैव तृतीयेऽहनि अस्य विनियोगः 'अभि प्र वः सुराधसम्' (अ० २०।२१) इति सूक्ते उक्तः ।

तथा पृष्ठ्यपञ्चाहस्य द्वितीयेऽहनि 'एवा ह्यसि वीरयुः' इति पृष्ठोक्तस्तोत्रियो भवति । तदुक्तं वैताने—"पृष्ठ्यपञ्चाहस्य 'एवा ह्यसि वीरयुः' इति" (वै० श्रौ० ४१।१६) इति ।

तथा पृष्ठ्यषडहस्य द्वितीयेऽहनि एष उक्थस्तोत्रियो भवति । तदुक्तं वैताने—"पृष्ठ्यस्य द्वितीये 'एवा ह्यसि वीरयुः' इति" (वै० श्रौ० ४२।१) इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवा ह्यसि वीरयुरेवा शूर उत स्थिरः ।
एवा ते राध्यं मनः ॥१॥ ऋ. ८।९२।२८

पदपाठः

एव । हि । असि । वीरऽयुः । एव । शूरः । उत । स्थिरः । एव । ते । राध्यम् । मनः ॥१॥

हे इन्द्र ! त्वं **वीरयुः** वीरान् युद्धकर्मणि समर्थान् हन्तुं कामयमानः **एवासि** भवसि । **हि** इति प्रसिद्धौ । अत एव त्वं **शूरः** सामर्थ्यशाली **एव** भवसि । **उत** अपि च **स्थिरो** युद्धे धैर्यवानप्यसि । एकत्रैव स्थितः सन् सर्वान् शत्रुजनान् संप्रहरसीत्यर्थः । एवं सति **ते मनः राध्यं** स्तुतिभिराराधनीयम् । यतोऽनेन मनसा त्वं शत्रुवधं सङ्ग्रामे धैर्यादिकं च करोषि इति । ते मन एव सर्वैः स्तुत्यम् ।

एवा रातिस्तुवीमघ विश्वेभिर्धायि धातृभिः ।
अधा चिदिन्द्र मे सचा ॥२॥ ऋ. ८।९२।२९

पदपाठः

एव । रातिः । तुविऽमघ । विश्वेभिः । धायि । धातृऽभिः । अध । चित् । इन्द्र । मे । सचा ॥२॥

हे **तुवीमघ** ! बहुधनवन् इन्द्र ! **विश्वेभिः** समस्तैः **धातृभिः** कर्माधारकैः । यद्वा देवानां हविर्दानेन पोषयितृभिः । सर्वैर्याजकैः तव **रातिः** दानं **धायि** धार्यते एव । **अध** अत एव अत्र चिदेवार्थे । हे **इन्द्र** ! त्वं **मे** यष्टुः **सचा** धनादिदानेन कर्मसहायको भव ।

मो षु ब्रह्मेव तन्द्रयुर्भुवो वाजानां पते ।
मत्स्वा सुतस्य गोमतः ॥३॥ ऋ. ८।९२।३०

पदपाठः

मो इति । सु । ब्रह्माऽइव । तन्द्रयुः । भुवः । वाजानाम् । पते । मत्स्व । सुतस्य । गोऽमतः ॥३॥

हे **वाजानाम्** अन्नानां **पते** बलानां वा पते इन्द्र ! **तन्द्रयुः** निष्कारणं निवृत्तकर्मवत्त्वादालस्ययुक्तः ब्रह्मेव ब्राह्मण इव । अथवा यागादिकर्मपरित्यागेनालस्यमिच्छन्नास्तिको ब्राह्मण इव त्वं **मो सु भुवः** सुष्ठु मा भव । सर्वदास्मत्कर्मान्वितो भवेत्याशासनम् । तदेवाह । **सुतस्य** अभिषुतस्य ततो **गोमतो** गव्येन क्षीरेण दध्ना वा **मिश्रणवतः** सोमस्य पानेन **मत्स्व** हृष्टो भव ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवा ह्यस्य सूनृता विरप्शी गोमती मही ।
पक्वा शाखा न दाशुषे ॥४॥ ऋ. १।८।८

पदपाठः

एव । हि । अस्य । सूनृता । विऽरप्शी । गोऽमती । मही । पक्वा । शाखा । न । दाशुषे ॥४॥

अस्य इन्द्रस्य **सूनृता** प्रियसत्यरूपा वाक् **दाशुषे** हविर्दत्तवते यजमानाय तदर्थम् **एवा हि** एवं खलु अनन्तरपदवक्ष्यमाणगुणोपेता भवतीत्यर्थः । कीदृशी ? **विरप्शी** विविधरपणोपेतवाक्ययुक्ता बहुविधोपचारवादिनीत्यर्थः । **गोमती** बह्वीभिर्गोभिरुपेता गोप्रदेत्यर्थः । अत एव **मही** महती पूज्या । यथोक्तवाचो दृष्टान्तः । **पक्वा शाखा न** यथा बहुभिः पक्वैः फलैरुपेता पनसवृक्षादिशाखा प्रीतिहेतुस्तद्वत् । यद्यपि महन्नामसु 'ग्राधन् विरप्शी' (नि० ३।३।२२) इति पठितं तथाप्यत्र मही इत्यनेन पुनरुक्तिप्रसङ्गात् अवयवार्थो गृहीतः ।

एवा हि ते विभूतय ऊतय इन्द्र मावते ।
सद्यश्चित् सन्ति दाशुषे ॥५॥ ऋ. १।८।९

पदपाठः

एव । हि । ते । विऽभूतयः । ऊतयः । इन्द्र । माऽवते । सद्यः । चित् । सन्ति । दाशुषे ॥५॥

हे **इन्द्र** ! **ते विभूतयः** ऐश्वर्यविशेषाः **एवा हि** एवं विधाः खलु । किंविधास्तदुच्यते । **मावते** मत्सदृशाय **दाशुषे** हविर्दत्तवते यजमानाय **ऊतयः** त्वदीयरक्षारूपाः **सद्यश्चित्** सन्ति । यदा कर्मानुष्ठितं तदैव भवन्ति ।

एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या ।
इन्द्राय सोमपीतये ॥६॥ ऋ. १।८।१०

पदपाठः

एव । हि । अस्य । काम्या । स्तोमः । उक्थम् । च । शंस्या । इन्द्राय । सोमऽपीतये ॥६॥

अस्य इन्द्रस्य **स्तोमः** सामसाध्यं स्तोत्रम् **उक्थं च** ऋक्साध्यं शस्त्रमपि **एवा हि** एते उभे एवंविधे खलु । किं विधे इति ? तदुच्यते । **काम्या** कामयितव्ये । **शंस्या** ऋत्विग्भिः शंसनीये । किमर्थं शंसनमिति ? तदुच्यते । **इन्द्राय सोमपीतये** । इन्द्रस्य सोमपानार्थम् । स्तोमः 'अर्तिस्तुसु०' (उ. सू. १।१३७) इत्यादिना मन्प्रत्ययः ।

इति पञ्चमेऽनुवाके त्रयोविंशं सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकषष्टितमं सूक्तम्

षड्चस्यास्य सूक्तस्य गोपूक्त्यश्वसूक्तिनावृषी । इन्द्रो देवता । उष्णिक् छन्दः ।

अभिप्लवे 'तं ते मद गृणीमसि' इत्यस्य विनियोगः पूर्वेण (अ० २०।६०) सहोक्तः ।

तथा व्युष्टाङ्गिरस-कापिवन-चैत्ररथद्व्यहानां प्रथमेऽहनि 'तं ते मदं गृणीमसि' इति उक्थस्तोत्रियो भवति । तदुक्तं वैताने—"व्युष्टाङ्गिरसकापिवनचैत्ररथद्व्यहानां 'तं ते मदं गृणीमसि' इति" (वै. श्रौ. ४१।१) इति !

तथा वैश्वदेवादीनां त्र्यहाणां द्वितीयेषु अहःसु अस्य विनियोगः 'तमिन्द्रं वाजयामसि' (अ० २०।४७) इति सूक्ते उक्तः ।

तं ते मदं गृणीमसि वृषणं पृत्सु सासहिम् ।
उ लोककृत्नुमद्रिवो हरिश्रियम् ॥१॥ ऋ. ८।१५।४

पदपाठः

तम् । ते । मदम् । गृणीमसि । वृषणम् । पृत्ऽसु । ससहिम् । ऊं इति । लोकऽकृत्नुम् । अद्रिऽवः । हरिऽश्रियम् ॥१॥

अद्रिवः हे वज्रवन् इन्द्र ! **ते** तव **तं मदं** सोमपानेन समुत्पन्नं हर्षं **गृणीमसि** प्रशंसामः । कीदृशम् ? **वृषणं** कामानां वर्षकम् । **पृत्सु** रणेषु **सासहिं** शत्रूणामभिभवितारं **लोककृत्नुं** लोकस्य स्थानस्य कर्त्तारम् ! **हरिश्रियं** हरिभ्यां हयाभ्यां श्रयणीयं सेव्यम् । **उशब्दः** समुच्चये पादपूरणे वा ।

येन ज्योतींष्यायवे मनवे च विवेदिथ ।
मन्दानो अस्य बर्हिषो वि राजसि ॥२॥ ऋ. ८।१५।५

पदपाठः

येन । ज्योतींषि । आयवे । मनवे । च । विवेदिथ । मन्दानः । अस्य । बर्हिषः । वि । राजसि ॥२॥

हे इन्द्र ! **येन** आत्ममदेन **आयवे** और्वशेयाय **मनवे** विवस्वतः पुत्राय **च ज्योतींषि** सूर्यादीनि वृत्रादिभिरावृतानि तद्धरणेनोपायेन **विवेदिथ** अलम्भयः । प्रकाशितवानसीत्यर्थः । तेन मदेन **मन्दानो** मोदमानस्त्वम् अस्य **बर्हिषो** वृद्धस्य यज्ञस्य **विराजसि** विशेषेणेशिषे । यद्वा अस्येति तृतीयार्थे षष्ठी । अनेन बर्हिषा वृद्धेन हृष्यन् विराजसि विशेषेण दीप्यसे ।

तदद्या चित्त उक्थिनोऽनु ष्टुवन्ति पूर्वथा ।
वृषपत्नीरपो जया दिवे दिवे ॥३॥ ऋ. ८।१५।६

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

तत्। अद्य। चित्। ते। उक्थिनः। अनु। स्तुवन्ति। पूर्वऽथा। वृषऽपत्नीः। अपः। जय। दिवेऽदिवे ॥३॥

हे इन्द्र ! **ते तत्** प्रसिद्धं बलम् **अद्यचित्** अद्यापि **पूर्वथा** पूर्वस्मिन् काल इव **उक्थिनः** स्तोतारः **अनुष्टुवन्ति** क्रमेण प्रशंसन्ति। स त्वं **वृषपत्नीः** वृषा वर्षिता पर्जन्यः पतिर्यासां तास्तादृशीः **अपः दिवे दिवे** प्रतिदिनं **जय** स्वायत्तं कुरु।

तम्वभि प्र गायत पुरुहूतं पुरुष्टुतम्।
इन्द्रं गीर्भिस्तविषमा विवासत ॥४॥ ऋ. ८।१५।१

पदपाठः

तम्। ऊं इति। अभि। प्र। गायत। पुरुऽहूतम्। पुरुऽस्तुतम्। इन्द्रम्। गीःऽभिः। तविषम्। आ। विवासत ॥४॥

पुरुहूत बहुभिराहूतं **पुरुष्टुतं** बहुभिः संस्तुतं **तमु** तमेवेन्द्रं हे स्तोतारः ! **अभि-प्रगायत** अभिमुखं प्रकर्षेण स्तुध्वम्। एतदेव स्पष्टयति **तविषं** महान्तम् **इन्द्रं गीर्भिः** वाग्भिः **आविवासत** परिचरत।

यस्य द्विबर्हसो बृहत् सहो दाधार रोदसी।
गिरीँरज्राँ अपः स्ववृंषत्वना ॥५॥ ऋ. ८।१५।२

पदपाठः

यस्य। द्विऽबर्हसः। बृहत्। सहः। दाधार। रोदसी इति। गिरीन्। अज्रान्। अपः। स्वः। वृषऽत्वना ॥५॥

द्विबर्हसः द्वयोः स्थानयोः परिवृढस्य **यस्य** इन्द्रस्य **बृहत्** महत् **सहो** बलं **रोदसी** द्यावापृथिव्यौ **दाधार** धारयति। छान्दसो लिट्। तथा **अज्रान्** क्षिप्रगमनान् **गिरीन्** पर्वतान् मेघान् वा **स्वः** सरणशीलाः **अपो** जलानि च **वृषत्वना** वृषत्वेन वीर्येण यस्येन्द्रस्य बलं धारयति तत्रावस्थापयति। तम्वभीति पूर्वया सम्बन्धः, स त्वमित्युत्तरया वा।

स राजसि पुरुष्टुतँ एको वृत्राणि जिघ्नसे।
इन्द्र जैत्रा श्रवस्या च यन्तवे ॥६॥ ऋ. ८।१५।३

पदपाठः

सः। राजसि। पुरुऽस्तुत। एकः। वृत्राणि। जिघ्नसे। इन्द्र। जैत्रा। श्रवस्या। च। यन्तवे ॥६॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे **पुरुष्टुत** ! बहुजनैः संस्तुत **इन्द्र** ! **सः** पूर्वोक्तगुणोपेतस्त्वं **राजसि** दीप्यसे ईशिषे वा । अपि च त्वम् **एकः** सहायरहितः केवल एव सन् **वृत्राणि** आवरकाणि शत्रुजातानि **जिघ्नसे** हतवानसि । किमर्थम् ? **जैत्राणि** जेतव्यानि धनानि **श्रवस्या** श्रवस्यानि श्रवणीयानि अन्नानि यद्वा श्रवणार्हाणि यशांसि च **यन्तवे** यन्तुं नियन्तुं स्वाधीनं कर्त्तुम् ।

इति पञ्चमेऽनुवाके चतुर्विंशं सूक्तम् ।

द्विषष्टितमं सूक्तम्

दशर्चस्यास्य सूक्तस्य प्रथमादिचतुर्ऋचां सौभरिः, पञ्चम्यादितृचस्य नृमेधः, अष्टम्यादितृचस्य च गोषूक्त्यश्वसूक्तिनावृषयः । इन्द्रो देवता । प्रथमादिचतसृणां प्रगाथः, पञ्चम्यादिषण्णाञ्चोष्णिक् छन्दांसि ।

'वयमु त्वामपूर्व्य' इत्याद्यतृचस्य विनियोगः पूर्वत्र (अ० २०।१४) उक्तः । तथा 'इन्द्राय साम गायत' (२०।६२।५) इत्यस्य विनियोगः "इन्द्रो मदाय वावृधे" (अ० २०।५६) इत्यनेन सह उक्तः ।

वयमु त्वामपूर्व्य स्थूरं न कच्चिद् भरन्तोऽवस्यवः ।
वाजे चित्रं हवामहे ॥१॥ ऋ. ८।२१।१

पदपाठः

वयम् । ऊं इति । त्वाम् । अपूर्व्य । स्थूरम् । न । कत् । चित् । भरन्तः । अवस्यवः । वाजे । चित्रम् । हवामहे ॥१॥

मन्त्रोऽयं सायणेन व्याख्यातः (अथर्व० २०।१४।१) ।

उप त्वा कर्मन्नूतये स नो युवोग्रश्चक्राम यो धृषत् ।
त्वामिद्ध्यवितारं ववृमहे सखाय इन्द्र सानसिम् ॥२॥
ऋ. ८।२१।२

पदपाठः

उप । त्वा । कर्मन् । ऊतये । सः । नः । युवा । उग्रः । चक्राम । यः । धृषत् । त्वाम् । इत् । हि । अवितारम् । ववृमहे । सखायः । इन्द्र । सानसिम् ॥२॥

मन्त्रस्य 'प्रथमपादः' प्रत्यक्षकृतः । हे **इन्द्र** ! **कर्मन्** अग्निष्टोमादिकर्मणि **ऊतये** रक्षणाय **त्वा** त्वामुपगच्छामः । द्वितीयपादः परोक्षकृतः । **यः** इन्द्रो **धृषत्** धृष्णोति शत्रूनभिभवति । 'ञिधृषा प्रागल्भ्ये । "बहुलं छन्दसि" इति शप्रत्ययः । **युवा** तरुणः, **उग्रः** उद्गूर्णबलः **सः** इन्द्रः **नः** अस्मान् प्रति **चक्राम** आगच्छतु ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यद्वा चक्राम अस्मान् सोत्साहान् करोतु । परोऽर्धर्चः प्रत्यक्षकृतः । **सखायः** समानख्याना बन्धुभूता वा वयं सानसिं सम्भजनीयम् **अवितारं** सर्वस्य रक्षकं **त्वामित्** त्वामेव **ववृमहे** वृणीमहे संभजामहे इत्यर्थः । **हि**ः प्रसिद्धौ ।

यो न इदमिदं पुरा प्र वस्य आनिनाय तमु व स्तुषे ।
सखाय इन्द्रमूतये ॥३॥ ऋ. ८।२१।९

पदपाठः

यः । नः । इदम्ऽइदम् । पुरा । प्र । वस्यः । आऽनिनाय । तम् । ऊ इति । वः । स्तुषे । सखायः । इन्द्रम् । ऊतये ॥३॥

व्याख्यातोऽयं मन्त्रः पूर्वम् (अथर्व० २०।१४।३) ।

हर्यश्वं सत्पतिं चर्षणीसहं स हि ष्मा यो अमन्दत ।
आ तु नः स वयति गव्यमश्व्यं
स्तोतृभ्यो मघवा शतम् ॥४॥ ऋ. ८।२१।१०

पदपाठः

हरिऽअश्वम् । सत्ऽपतिम् । चर्षणिऽसहम् । सः । हि । स्म । यः । अमन्दत । आ । तु । नः । सः । वयति । गव्यम् । अश्व्यम् । स्तोतृऽभ्यः । मघऽवा । शतम् ॥४॥

मन्त्रोऽयं पूर्वं व्याख्यातः (अथर्व० २०।१४।४) ।

इन्द्राय साम गायत विप्राय बृहते बृहत् ।
धर्मकृते विपश्चिते पनस्यवे ॥५॥ ऋ. ८।९८।१

पदपाठः

इन्द्राय । साम । गायत । विप्राय । बृहते । बृहत् । धर्मऽकृते । विपःऽचिते । पनस्यवे ॥५॥

हे सामगाः ! **विप्राय** मेधाविने **बृहते** महते **धर्मकृते** कर्मणः कर्त्रे **विपश्चिते** विदुषे **पनस्यवे** स्तुतिकामाय **इन्द्राय बृहत्** बृहन्नामकं **साम गायत** पठत ।

त्वमिन्द्राभिभूरसि त्वं सूर्यमरोचयः ।
विश्वकर्मा विश्वदेवो महाँ असि ॥६॥ ऋ. ८।९८।२

पदपाठः

त्वम् । इन्द्रं । अभिऽभूः । असि । त्वम् । सूर्यम् । अरोचयः । विश्वकर्मा । विश्वऽदेवः । महान् । असि ॥६॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे **इन्द्र ! त्वम् अभिभूः** शत्रूणामभिभविता **असि**। किञ्च **त्वं सूर्यं** सवितारम् **अरोचयः** तेजोभिरदीपयः। किञ्च **विश्वकर्मा** विश्वस्य कर्त्ता **असि, विश्वदेवः** सर्व-देवश्चासि। अतो **महान्** सर्वाधिकोऽसि। तथा च कृष्णयजुर्ब्राह्मणम् "अग्निं वा अन्वन्या देवता इन्द्रमन्वन्याः" (तै० ब्रा० ३।७।१।८) इति।

विभ्राजं ज्योतिषा स्वरगच्छो रोचनं दिवः।
देवास्त इन्द्र सख्याय येमिरे ॥७॥ ऋ. ८।९८।३

पदपाठः

विऽभ्राजन्। ज्योतिषा। स्वः। अगच्छः। रोचनम्। दिवः। देवाः। ते। इन्द्र। सख्याय। येमिरे ॥७॥

इन्द्र हे परमैश्वर्यशालिन्निन्द्र ! त्वं **ज्योतिषा** तेजसा **दिवः** आदित्यस्य **रोचनं** प्रकाशकमधिकरणत्वेन **स्वः** स्वर्गं **विभ्राजन्** प्रकाशयन् **अगच्छः** प्राप्नोः। किञ्च **देवाः** सर्वे **ते** तव **सख्याय** मित्रत्वाय **येमिरे** स्वं स्वमात्मानं नियमितवन्तः। इन्द्रोऽस्मत्सखा यथा स्यादिति सर्वे देवाः प्रयत्नमकार्षुरित्यर्थः।

तम्वभि प्र गायत पुरुहूतं पुरुष्टुतम्।
इन्द्रं गीर्भिस्तविषमा विवासत ॥८॥ ऋ. ८।१५।१

पदपाठः

तम्। ऊं इति। अभि। प्र। गायत। पुरुऽहूतम्। पुरुऽस्तुतम्। इन्द्रम्। गीःऽभिः। तविषम्। आ। विवासत ॥८॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।६१।४)।

यस्य द्विबर्हसो बृहत् सहो दाधार रोदसी।
गिरीँरज्राँ अपः स्वर्वृषत्वना ॥९॥ ऋ. ८।१५।२

पदपाठः

यस्य। द्विऽबर्हसः। बृहत्। सहः। दाधार। रोदसी इति। गिरीन्। अज्रान्। अपः। स्वः। वृषत्वना ॥९॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।६१।५)।

स राजसि पुरुष्टुतँ एको वृत्राणि जिघ्नसे।
इन्द्र जैत्रा श्रवस्या च यन्तवे ॥१०॥ ऋ. ८।१५।३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

सः । राजसि । पुरुऽस्तुत । एकः । वृत्राणि । जिघ्नसे । इन्द्र । जैत्रा । श्रवस्या । च । यन्तवे ॥१०॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।६१।६)।

इति पञ्चमेऽनुवाके पञ्चविंशं सूक्तम् ।

त्रिषष्टितमं सूक्तम्

नवर्चस्यास्य सूक्तस्य प्रथमाद्वितीययोर्ऋचोस्तृतीयापूर्वार्धस्य च भुवनः साधनो वा, तृतीयोत्तरार्धस्य भरद्वाजः, चतुर्थ्यादितृचस्य गोतमः, सप्तम्यादितृचस्य च पर्वत ऋषयः । इन्द्रो देवता । प्रथमादितृचस्य त्रिष्टुप्, चतुर्थ्यादिषण्णाञ्चोष्णिक् छन्दसी ।

पृष्ठ्यस्य षष्ठेऽहनि 'इमा नु कं भुवना सीषधाम' (अ० २०।६३।१) 'हत्वाय देवा असुरान् यदायन्' (२०।६३।२) इति द्वैपदौ पच्छः शंसति । तदुक्तं वैताने—"षष्ठे 'इमा नु कं भुवना सीषधाम', हत्वाय देवा असुरान् यदायन्' इति द्वैपदौ पच्छः ।" (वै० ३२।१२) इति ।

वाजपेये तृतीयसवने प्राकृतयोः स्तोत्रियानुरूपयोः प्रत्याम्नायकौ 'य एक इद् विदयते' (२०।६३।४) 'य इन्द्र सोमपातमः' (२०।६३।७) एतौ उक्थस्तोत्रियानुरूपौ भवतः । तदुक्तं वैताने—"तृतीयसवने 'य एक इद् विदयते' 'य इन्द्रः सोमपातमः ।' इत्युक्थस्तोत्रियानुरूपौ" (वै० २७।१५) इति ।

तथा अभिजिति विषुवति विश्वजिति महाव्रते च तृतीयसवने एतौ उक्थस्तोत्रियानुरूपौ भवतः । तदुक्तं वैताने—"अभिजिति विषुवति विश्वजिति महाव्रते च 'य एक इद् विदयते, 'य इन्द्र सोमपातमः" इत्युक्थस्तोत्रियानुरूपौ (वै० ३१।२०) इति ।

तथा विश्वजिति एकाहीभूते 'य एक इद् विदयते' इत्येष उक्थस्तोत्रियो भवति । तदुक्तं वैताने––"विश्वजिति 'य एक विदयते' इति" (वै० ४०।१२) इति ।

तथा चतुरहाणां चतुर्थेषु अहःसु 'महाँ इन्द्रो य ओजसा' (२०।१३८) 'य एक इद् विदयते' (२०।६३।४) एतावाज्योक्थस्तोत्रियौ भवतः । तदुक्तं वैताने––चतुर्थेषु 'महाँ इन्द्रो य ओजसा, 'य एक इद् विदयते' इति" (वै० ४१।११) इति ।

तथा अभिप्लवपञ्चाहस्य 'य एक इद् विदयते' इत्युक्थस्तोत्रियो भवति । तदुक्तं वैताने––अभिप्लवपञ्चाहस्य 'य एक इद् विदयते' इति (वै० ४१।१८) इति ।

तथा अभिप्लवस्य षष्ठमहः उक्थसंस्थं भवति तदा 'य एक इद् विदयते' (२५।६३।४) 'यत् सोममिन्द्र विष्णवि' (२०।१११) एतौ उक्थस्तोत्रियौ विकल्पितौ भवतः । तद् उक्तं वैताने––"षष्ठमुक्थ्यं चेद् 'य एक इद् विदयते' 'यत् सोममिन्द्र विष्णवि' इति" (वै० ४१।२२) इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथा द्वादशाहस्य छन्दोमव्यहस्य प्रथमान्त्ययोरह्नोः 'त्वं न इन्द्रा भर' (२०।१०८) 'य एक इद् विदयते' एतौ उक्थस्तोत्रियौ यथाक्रमं भवतः। तदुक्तं वैताने—"द्वादशाहस्य छन्दोमप्रथमान्त्ययोः 'त्वं न इन्द्रा भर' 'य एक इद् विदयते' इति" (वै० ४२।७) इति।

इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः।
यज्ञं च नस्तन्वं च प्रजां चादित्यैरिन्द्रः
सह चीक्लृपाति ॥१॥ ऋ. १०।१५७।१-२

पदपाठः

इमा। नु। कम्। भुवना। सीसधाम। इन्द्रः। च। देवाः। यज्ञम्। च। नः। तन्वऽम्। च। प्रऽजाम्। च। आदित्यैः। इन्द्रः। सह। चीक्लृपाति ॥१॥

इमा इमानि दृश्यमानानि **भुवना** भुवनानि **नु** क्षिप्रं **सीषधाम** साधयामो वशीकुर्मः। **कमिति** पूरकः। यद्वा इमानि भूतजातान्यस्यभ्यं कं सुखं सीषधाम साधयन्तु। पुरुषव्यत्ययश्छान्दसः। **इन्द्रश्च विश्वे** सर्वे अन्ये **देवाश्च** स्तुत्या प्रीता इममर्थं साधयन्तु। तथा **नः** अस्माकं **यज्ञं तन्वं** शरीरञ्च **प्रजां** पुत्रादिकान् च **आदित्यैः** अदितिपुत्रैरन्यैर्देवैः **सह** वर्त्तमानः **इन्द्रः चीक्लृपाति** कल्पयतु। यज्ञादिकं स्वव्यापारसमर्थं करोतु।

आदित्यैरिन्द्रः सगणो मरुद्भिरस्माकं
भूत्ववितां तनूनाम्।
हत्वाय देवा असुरान् यदायन् देवा
देवत्वमभिरक्षमाणाः ॥२॥ ऋ. १०।१५७।३-४

पदपाठः

आदित्यैः। इन्द्रः। सऽगणः। मरुत्ऽभिः। अस्माकम्। भूतु। अविता। तनूनाम्। हत्वाय। देवाः। असुरान्। यत्। आयन्। देवाः। देवऽत्वम्। अभिऽरक्षमाणाः ॥२॥

आदित्यैः अदितितनयैर्मित्रादिभिः **मरुद्भिः** च **सगणः** गणैः सहितः **इन्द्रो-ऽस्माकं तनूनां** शरीराणां तनयानां वा **अविता** रक्षिता **भूतु** भवतु। **देवा** इन्द्रादयश्च **असुरान्** वृत्रादीन् **हत्वाय** हत्वा विनाश्य **यद्** यदा **आयन्** आगच्छन् स्वकीयं स्थानं प्राप्नुवन् तदानीं ते **देवाः** देवत्वम् आत्मीयममृतत्वम् **अभिरक्षमाणाः** अभितो रक्षन्तोऽभूवन्। बाधकाभावात् सर्वत्र प्रख्यापितवन्त इत्यर्थः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रत्यञ्चमर्कमनयं छचीभिरादित्
स्वधामिषिरां पर्यपश्यन् ।
अया वाजं देवहितं सनेम मदेम शतहिमाः सुवीराः ।।३।।

ऋ. १०।१५७।५

पदपाठः

प्रत्यञ्चम् । अर्कम् । अनयन् । शचीभिः । आत् । इत् । स्वधाम् । इषिराम् । परि । अपश्यन् । अया । वाजम् । देवऽहितम् । सनेम । मदेम । शतऽहिमाः । सुऽवीराः ।।३।।

शचीभिः कर्मभिः परिचरणात्मकैः, यद्वा बुद्धिभिः **सार्धम् अर्कम्** अर्चनसाधनं स्तोत्रं **प्रत्यञ्चम्** इन्द्रादीन् प्रत्यञ्चत् **अनयन्** स्तोतारः प्रापयन् । यदैवम् **आदित्** अनन्तरमेव **इषिरां** गमनशीलां **स्वधां** वृष्टचुदकं **पर्यपश्यन्** सर्वे जनाः परितः पश्यन्ति यद्वा इषिराम् एषणीयां स्वधाम् । अन्ननामैतत् । हविर्लक्षणमन्नं सर्वे देवाः परिपश्यन्ति । वयम् **अया** अनया **शच्या** अर्थात् बुद्धचा कर्मणा वा **दवहितं** देवेभ्यो हितं हितकरं **वाजम्** अन्नं वलं वा **सनेम** भजेम तथा **सुवीराः** शोभनपुत्रवन्तः सन्तः **शतहिमाः** शत हेमन्तान् शतवर्षपर्यन्तं **मदेम** आनन्दं करवाम । अस्य मन्त्रस्योत्तरार्धः ऋग्वेदे न प्राप्यते ।

य एक इद् विदयते वसु मर्ताय दाशुषे ।
ईशानो अप्रतिष्कुत इन्द्रो अङ्ग ।।४।। ऋ. १।८४।७

पदपाठः

यः । एकः । इत् । विऽदयते । वसु । मर्ताय । दाशुषे । ईशानः । अप्रतिऽस्कुतः । इन्द्रः । अङ्ग ।।४।।

यः इन्द्रः **एक इत्** एक एव **दाशुषे** हविर्दत्तवते **मर्ताय** यजमानमानवाय **वसु** धनं **विदयते** विशेषेण ददाति । **अङ्ग** इति क्षिप्रनाम । **अप्रतिष्कुतः** परैरप्रतिशब्दितः । एवं भूतः स इन्द्रः क्षिप्रम् **ईशानः** सर्वस्य जगतः स्वामी भवति । विदयते । दय दानगतिरक्षणहिंसादानेषु धातोः रूपम् ।

कदा मर्तमराधसं पदा क्षुम्पमिव स्फुरत् ।
कदा नः शुश्रवद् गिर इन्द्रो अङ्ग ।।५।। ऋ. १.८४.८

पदपाठः

कदा । मर्तम् । अराधसम् । पदा । क्षुम्पम्ऽइव । स्फुरत् । कदा । नः । शुश्रवत् । गिरः । इन्द्रः । अङ्ग ।।५।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अराधसं हविर्लक्षणेन राधसा धनेन शून्यम्, अयाजकमित्यर्थः। **मर्तं** मनुष्यम् **इन्द्रः पदा** चरणेन **क्षुम्पम् इव** अहिच्छत्रकमिव **कदा स्फुरन्** स्फुरिष्यति नाशयिष्यतीत्यर्थः। अर्थात् मण्डलाकारेण शयानम् अहिच्छत्रकं यथा कश्चन सहसा हन्ति तथेन्द्रः कदाऽस्मच्छत्रून् **हनिष्यतीति**। स्फुरतिर्वधकर्मा (नि. २।१९।१५) इत्यत्र वधकर्मसु पठितत्वात्। **नः** अस्माकं याजकानां **गिरः** स्तुतिरूपा वाचः **इन्द्रः कदा अङ्ग** क्षिप्रं **शुश्रवत्** श्रोष्यतीति। पदा पादशब्दस्य 'पद्दन्नो०' इत्यादिना पदादेशः।

यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आविवासति।
उग्रं तत् पत्यते शव इन्द्रो अङ्ग ॥६॥ ऋ. १।८४।९

पदपाठः

यः। चित्। हि। त्वा। बहुऽभ्यः। आ। सुतऽवान्। आऽविवासति। उग्रम्। तत्। पत्यते। शवः। इन्द्रः। अङ्ग ॥६॥

बहुभ्यः मनुष्येभ्यः सकाशात् **यश्चिद्धि** य एव खलु यजमानः सुतवान् अभिषुतसोमयुक्तः सन् हे इन्द्र! **त्वा** त्वाम् **आविवासति** परिचरति। **तत्** तस्मै यजमानाय **उग्रम्** उद्गूर्णं **शवो** बलम् इन्द्रः भवान् **अङ्ग** क्षिप्रं **पत्यते** पातयति प्रापयति।

य इन्द्र सोमपातमो मदः शविष्ठ चेतति।
येना हंसि न्यत्त्रिणं तमीमहे ॥७॥ ऋ. ८।१२।१

पदपाठः

यः। इन्द्र। सोमऽपातमः। मदः। शविष्ठ। चेतति। येन। हंसि। नि। अत्त्रिणम्। तम्। ईमहे ॥४॥

हे इन्द्र! **यः** त्वं **सोमपातमः** अत्यन्तं सोमस्य पाता। **शविष्ठ** हे बलवत्तम! इन्द्र! ईदृशस्य तव सोमपानजनितो यो **मदश्चेतति** सम्यग् जानाति वृत्रवधादीनि कार्याणि कर्तुम्। य इत्यस्य चेततीत्यनेनापि सम्बन्धात् 'यद्वृत्तान्नित्यम्' इति तिङ् न निहन्यते। अथवैतदेवं वाक्यम्। हे बलवत्तमेन्द्र! सोमपातमः सोमस्य पातृतमो यस्त्वं मदः सोमैः मादयितव्यस्तर्पणीयः संश्चेतति। पुरुषव्यत्ययः, चेतसि सम्यग् जानासि **येन** सोमपानजनितेन **मदेन अत्त्रिणम्** अत्तारं राक्षसादिकं **नि हंसि** निकृष्टां हिंसां प्रापयसि **तं** मदं तादृङ्मदोपेतं त्वां वा **ईमहे** याचामहे। यद्वा ईयामहे उपगच्छामः। स्तुतिभिः संभजामहे इत्यर्थः। ईयामहे, ई गतौ दैवादिकः। छान्दसो विकरणस्य लुक्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

येना दशग्वमध्रिगुं वेपयन्तं स्वर्णरम् ।
येना समुद्रमाविथा तमीमहे ॥८॥ ऋ. ८।१२।२

पदपाठः

येन । दशऽग्वम् । अध्रिऽगुम् । वेपयन्तम् । स्वःऽनरम् । येन । समुद्रम् । आविथ । तम् । ईमहे ॥८॥

हे इन्द्र ! **येन** सोमपानसमुत्पन्नेन मदेन **दशग्वं** ये दशभिर्मासैः सत्रासनं समाप्य निरगमन् ते दशग्वा अङ्गिरसः, तेषामन्यतमम्, **अध्रिगुम्** अधृतगमनम् अनिवारितगतिम् एतत्संज्ञकं चर्षिं **वेपयन्तं** तमांसि वर्जयन्तं **स्वर्णरं** सर्वस्य नेतारं सूर्यञ्च **आविथ** वृत्रादेरपनयनेन ररक्षिथ । **येन** च मदेन **समुद्रम्** उदधिमन्तरिक्षं वा **आविथ** ररक्षिथ । **तं** मदं तद्वन्तं वा त्वाम् **ईमहे** याचामहे । मदे सति हि संहृष्टः सन्निन्द्रो वहुधनं प्रयच्छति । अतस्तत्कारणस्य मदस्य याच्ञोपपन्ना ।

येन सिन्धुं महीरपो रथाँ इव प्रचोदयः ।
पन्थामृतस्य यातवे तमीमहे ॥९॥ ऋ. ८।१२।३

पदपाठः

येन । सिन्धुम् । महीः । अपः । रथान्ऽइव । प्रऽचोदयः । पन्थाम् । ऋतस्य । यातवे । तम् । ईमहे ॥९॥

हे इन्द्र ! **महीः** महतीः **अपः** वृष्टिजलानि **सिन्धुं** स्यन्दनशीलां नदीं समुद्रं वा प्रति **येन** सोमपानजनितेन **प्रचोदयः** प्रेरयसि । तत्र दृष्टान्तः । **रथानिव** यथा रथिनो रथान् स्वाभिलषितदेशगमनाय प्रेरयन्ति तद्वत् । **ऋतस्य** यज्ञस्य **पन्थां** पन्थानं **यातवे** यातुं प्राप्तुं तं मदम् **ईमहे** याचामहे ।

इति पञ्चमेऽनुवाके षड्विंशं सूक्तम् ।

चतुःषष्टितमं सूक्तम्

षड़ृचस्यास्य सूक्तस्य प्रथमादितृचस्य नृमेधः, चतुर्थ्यादितृचस्य च विश्वमना ऋषी । इन्द्रो देवता । उष्णिक् छन्दः ।

अभिप्लवस्य पञ्चमेऽहनि 'एन्द्र नो गधि प्रियः' इति उक्थस्तोत्रियो भवति । तदुक्तं वैताने—"पञ्चमे 'एन्द्र नो गधि प्रियः' इति" (वै. श्रौ. ४१।२१) इति ।

एन्द्र नो गधि प्रियः सत्राजिदगोह्यः ।
गिरिर्न विश्वतस्पृथुः पतिर्दिवः ॥१॥ ऋ. ८।९८।४

पदपाठः

आ । इन्द्र । नः । गधि । प्रियः । सत्राऽजित् । अगोह्यः । गिरिः । न । विश्वतः । पृथुः । पतिः । दिवः ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे **इन्द्र** ! **प्रियः** प्रियतमः **सत्राजित्** महतां जेता **अगोह्यः** केनापि गूहितुमशक्यः **गिरिर्न** पर्वत इव **विश्वतः** सर्वतः **पृथुः** पृथुतमः **दिवः** स्वर्गस्य **पतिः** ईश्वरस्त्वं नः अस्मान् **आगधि** आगच्छ।

अभि हि सत्य सोमपा उभे बभूथ रोदसी ।
इन्द्रासि सुन्वतो वृधः पतिर्दिवः ॥२॥ ऋ. ८।९८।५॥

पदपाठः

अभि । हि । सत्य । सोमऽपाः । उभे इति । बभूथ । रोदसी इति । इन्द्र । असि । सुन्वतः । वृधः । पतिः । दिवः ॥२॥

हे **सत्य** ! **सोमपाः** सोमस्य पातः ! **इन्द्र** ! यस्त्वम् **उभे रोदसी** द्यावापृथिव्यौ **अभिबभूथ** सामर्थ्येन अभिभवसि । सः त्वं **सुन्वतः** सोमाभिषवं कुर्वतो यजमानस्य **वृधो** वर्धकः **असि** तथा त्वं **दिवः** स्वर्गस्यापि **पतिः** ईश्वरः असि ।

त्वं हि शश्वतीनामिन्द्र दर्ता पुरामसि ।
हन्ता दस्योर्मनोर्वृधः पतिर्दिवः ॥३॥ ऋ. ८।९८।६

पदपाठः

त्वम् । हि । शश्वतीनाम् । इन्द्र । दर्ता । पुराम् । असि । हन्ता । दस्योः । मनोः । वृधः । पतिः । दिवः ॥३॥

हे **इन्द्र** ! **त्वं हि शश्वतीनां** बह्वीनां **पुरां** शत्रुनगरीणां **दर्त्ता असि** दारयिता भवसि । किञ्च **दस्योः** उपक्षयितुरसुरस्य **हन्ता** असि घातकोऽसि । **मनोः** मनुष्यस्य यागादिकं कुर्वतो **वृधो** वर्धकश्चासि । **दिवः** स्वर्गस्यापि **पतिः** ईश्वरोऽसि ।

एदु मध्वो मदिन्तरं सिञ्च वाध्वर्यो अन्धसः ।
एवा हि वीर स्तवते सदावृधः ॥४॥ ऋ. ८।२४।१६

पदपाठः

आ । ईत् । ऊं इति । मध्वः । मदिन्ऽतरम् । सिञ्च । वा । अध्वर्यो इति । अन्धसः । एव । हि । वीरः । स्तवते । सदावृधः ॥४॥

हे **अध्वर्यो** ! अध्वरस्य नेतर्ऋत्विक् ! **मध्वो** मदकरस्य **अन्धसः** सोमलक्षण-स्यान्नस्य **मदिन्तरम्** अत्यर्थं मादयितृतमं सोमरसमेव **आ सिञ्च** इन्द्रायाभिषुणु । **इत् उ** इत्यवधारणे । **वीरः** समर्थः **सदावृधः** सर्वदा हविर्भिर्वर्धनीयः । यद्वा सदा स्वबलस्य वर्धकोऽयम् एव इन्द्रः स्तवते स्तोत्रशस्त्रादिभिः स्तूयते हि । स्तुतायेन्द्राय सोमो दातव्यः । तस्मादासिञ्चेत्यन्वयः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इन्द्र स्थातर्हरीणां नकिष्टे पूर्व्यस्तुतिम् ।
उदानंश शवसा न भन्दना ॥५॥ ऋ. ८।२४।१७

पदपाठः

इन्द्र । स्थातः । हरीणाम् । नकिः । ते । पूर्व्यऽस्तुतिम् । उत् । आनंश । शवसा । न । भन्दना ॥५॥

हे **हरीणां स्थातः**, अश्वानामधिष्ठातः ! **इन्द्र ! ते** त्वदीयां **पूर्व्यस्तुतिं** पूर्वैः ऋषिभिः कृताम्, उपलक्षणमेतत् । इदानीन्तनैः क्रियमाणामपि स्तुतिं **नकिः** न कश्चित् **शवसा** बलेन **उदानंश** व्याप्नोति । कश्चिन्नातिक्रामतीत्यर्थः । किञ्च **भन्दना** सर्वैः प्रार्थनीयत्वात् पूजनीयेन धनेन स्तुत्या वा त्वदीयां स्तुतिं **न** कश्चिदतिक्रामति । त्वत्तो बलवान् धनी स्तुत्यो वान्यो नास्तीत्यर्थः । उदानंश, अशू व्याप्तौ धातोः लिटि 'अश्नोतेश्च' इति नुट् । छान्दसो मुम् ।

तं वो वाजानां पतिमहूमहि श्रवस्यवः ।
अप्रायुभिर्यज्ञेभिर्वावृधेन्यम् ॥६॥ ऋ. ८।२४।१८॥

पदपाठः

तम् । वः । वाजानाम् । पतिम् । अहूमहि । श्रवस्यवः । अप्रायुऽभिः । यज्ञेभिः । ववृधेन्यम् ॥६॥

अप्रायुभिः कर्मसु अप्रमाद्यन्मनुष्ययुक्तैः । अथवा अप्रमत्ता एकत्र स्थित्वैव कर्म कुर्वन्ति, कर्म प्रारभ्य नान्यत्र गच्छन्तीत्यर्थः, एवंविधमनुष्ययुक्तैः **यज्ञेभिः** यज्ञैः एतादृशमनुष्यैः यज्ञैर्वा **वावृधेन्यं** वर्धनीयं **वाजानाम्** अन्नानां **पतिं वः** यष्टृ-यष्टव्य-सम्बन्धेन युष्मदीयं **तं** तादृशमिन्द्रं **श्रवस्यवः** वयमन्नकामाः सन्तः **अहूमहि** आह्वयामः । ह्वयतेर्लुङि 'बहुलं छन्दसि' इति संप्रसारणम् ।

इति पञ्चमेऽनुवाके सप्तविंशं सूक्तम् ।

पञ्चषष्टितमं सूक्तम्

तृचस्यास्य सूक्तस्य विश्वमना ऋषिः । इन्द्रो देवता । उष्णिक् छन्दः ।

दशाहस्य नवमेऽहनि 'एतो न्विन्द्रं स्तवाम' इति उक्थस्तोत्रियो भवति । उक्तञ्च वैताने—"नवमे 'एतो न्विन्द्रं स्तवाम' इति" (वै० ४२।४) इति ।

एतो न्विन्द्रं स्तवाम सखाय स्तोम्यं नरम् ।
कृष्टीर्यो विश्वा अभ्यस्त्येक इत् ॥१॥ ऋ. ८।२४।१९

पदपाठः

एतो इति । नु । इन्द्रम् । स्तवाम । सखायः । स्तोम्यम् । नरम् । कृष्टीः । यः । विश्वा । अभि । अस्ति । एकः । इत् ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सखायः ! हे समानख्याना ऋत्विजः ! **नु** क्षिप्रम् **एतो** आगच्छतैव । किमर्थम् ? **स्तोम्यं** स्तोमार्हं **नरं** सर्वस्य नेतारं तमिन्द्रं **स्तवाम** तत्स्तोत्रं करवाम । **यः** इन्द्रः **एक इत्** एकोऽसहाय एव **विश्वाः** सर्वाः **कृष्टीः** शत्रुसेनाः **अभ्यस्ति** अभिभवति, तं संस्तवाम इति शेषः ।

अगोरुधाय गविषे द्युक्षाय दस्म्यं वचः ।
घृतात् स्वादीयो मधुनश्च वोचत ॥२॥ ऋ. ८।२४।२०

पदपाठः

अगोऽरुधाय । गोऽइषे । द्युक्षाय । दस्म्यम् । वचः । घृतात् । स्वादीयः । मधुनः । च । वोचत ॥२॥

हे ऋत्विजः ! **अगोरुधाय** गाः स्तुतीः रुणद्धि इति गोरुधः, ताः न विनाशयति, आदरेण शृणोति तादृशाय । अत एव **गविषे** स्तोत्राणीच्छते **द्युक्षाय** दीप्यमानायेन्द्राय **दस्म्यं** दर्शनीयं **घृतात्** स्वादुतरात् आज्यात् **मधुनश्च** **स्वादीयः** अतिशयेन स्वादुभूतं **वचः** स्तोत्ररूपं वाक्यं **वोचत** ब्रूत । ऋत्विग्भिः कृतं कर्म यजमानोऽपि कृतवान् भवतीति तदुक्तमिन्द्रविषयं वचनं घृतात् मधुनश्च स्वादुतरं भवतु इत्याशास्ते ।

यस्यामितानि वीर्या न राधः पर्येतवे ।
ज्योतिर्न विश्वमभ्यस्ति दक्षिणा ॥३॥ ऋ. ८।२४।२१

पदपाठः

यस्य । अमितानि । वीर्या । न । राधः । परिऽएतवे । ज्योतिः । न । विश्वम् । अभि । अस्ति । दक्षिणा ॥३॥

यस्य इन्द्रस्य **वीर्या** वीर्याणि वृत्रहननादिलक्षणानि सामर्थ्यानि **अमितानि** अस्य 'इयन्ति सामर्थ्यानि नान्यानीति परिमितानि' न भवन्ति । यद्वा मीङ् हिंसायाम् । छान्दसो ह्रस्वः । शत्रुभिर्हिंसितानि भवन्ति । तथा यस्येन्द्रस्य **राधो** धनं **पर्येतवे** शत्रुभिः परिगन्तुं प्राप्तुं शक्यं **न** भवति । अत एवास्य **दक्षिणा** धनदानं **विश्वम्** **अभ्यस्ति** सर्वं स्तोतृजनम् अभिभवति । तत्र दृष्टान्तः । **ज्योतिर्न** ज्योतिषामयनत्वात् ज्योतिरन्तरिक्षम् । यथान्तरिक्षं सर्वलोकं पिधाय तिष्ठति तद्वत्, स्तोतृजनं धनदानेन पिधत्ते इत्यर्थः ।

इति पञ्चमेऽनुवाके अष्टाविंश सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षट्षष्टितमं सूक्तम्

तृचस्यास्य सूक्तस्य विश्वमना ऋषिः । इन्द्रो देवता । उष्णिक् छन्दः ।

स्तुहीन्द्रं व्यश्ववदनूर्मिं वाजिनं यमम् ।
अर्यो गयं मंहमानं वि दाशुषे ॥१॥ ऋ. ८।२४।२२

पदपाठः

स्तुहि । इन्द्रम् । व्यश्वऽवत् । अनूर्मिम् । वाजिनम् । यमम् । अर्यः । गयम् । मंहमानम् । वि । दाशुषे ॥१॥

व्यश्वसुत हे विश्वमनः ! **अनूर्मिम्** ऊर्मिर्हिंसाकर्मा । कैश्चिदप्यहिंस्यम् । अथवा शत्रुभिरगन्तव्यम् । अत एव **वाजिनं** वलशालिनम् । **यमं** स्तोतृभिः सुनियतम् एतादृशम् **इन्द्रं स्तुहि** । स्तोत्रे दृष्टान्तः । **व्यश्ववत्** यथा व्यश्वो विश्वमनसः पिता इन्द्रमस्तौत् तद्वत् स्तुहीत्यर्थः । स्तुतश्चेत् **अर्यः** स्वामीन्द्रः **दाशुषे** हविर्दत्तवते यजमानाय **मंहमानं** पूज्यमानं **गयं** धनं, यद्वा देवानां पूजायै गयं गृहम् । गृहमस्ति चेत् देवा हविर्भिः पूज्यन्ते, तादृशं गृहं वितरति सः । तस्मात् त्वं धनगृहलाभाय तं स्तुहीत्यर्थः ।

एवा नूनमुप स्तुहि वैयश्व दशमं नवम् ।
सुविद्वांसं चर्कृत्यं चरणीनाम् ॥२॥ ऋ. ८।२४।२३

पदपाठः

एव । नूनम् । उप । स्तुहि । वैयश्व । दशमम् । नवम् । सुऽविद्वांसम् । चर्कृत्यम् । चरणीनाम् ॥२॥

हे **वैयश्व** व्यश्वपुत्र विश्वमनः ! **चरणीनां** मनुष्याणां देहे स्थितानां नवानां प्राणानां **दशमं** दशसङ्ख्यापूरकम् । तत्र मन्त्रः । "नव वै पुरुषे प्राणा मनुष्येषु वर्त्तमाना इन्द्रस्तेषां दशधा भवतीन्द्रस्यात्मानं दशधा चरन्तम्" इति । एतादृशमत एव **नवं** स्तुत्यं **सुविद्वांसम्** अन्तर्यामित्वात् सर्वं जानन्तं **चर्कृत्यं** भूयो भूयः कार्येषु सर्वैः नमस्कर्त्तव्यमेवंविधमिन्द्रमेव नूनमिदानीम् **उपस्तुहि** ।

वेत्था हि निर्ऋतीनां वज्रहस्त परिवृजम् ।
अहरहः शुन्ध्युः परिपदामिव ॥३॥ ऋ. ८।२४।२४

पदपाठः

वेत्थ । हि । निःऽऋतीनाम् । वज्रऽहस्त । परिऽवृजम् । अहःऽअहः । शुन्ध्युः । परिपदाम्ऽइव ॥३॥

हे **वज्रहस्त**, हस्ते वज्रधारिन् इन्द्र ! **निर्ऋतीनाम्** उपद्रवकारिणां रक्षसां **परिवृजं** परिवर्जनम् । हीत्यवधारणे । त्वमेव **वेत्थ** जानीषे । तत्र दृष्टान्तः । **अहरहः शुन्ध्युः** । अस्मिन्नुदिते सति ब्राह्मणा आत्मीयं कर्म सम्पाद्य शुद्धा भवन्तीति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शोधनहेतुत्वात् शुन्ध्युः आदित्यः। **परिपदामिव** परितो यजमानानामिव। यद्वा परिपदां समानाधिकरणः। परितः पततां पक्षिणां वर्जनं स्वस्थानत्यागम् **अहरहः** प्रतिदिवसं यथा वेत्ति। उदिते सूर्ये पक्षिणः स्वस्थानं त्यक्त्वा सर्वतः प्रसरन्ति खलु। एवं त्वयीन्द्रे स्ववलेन प्रकाशमाने सति शत्रवः स्वपुरादिकं त्यक्त्वा पलायन्त इत्यर्थः।

इति पञ्चमेऽनुवाके एकोनत्रिंशं सूक्तम्।

इति पञ्चमोऽनुवाकः।

सप्तषष्टितमं सूक्तम्

सप्तर्चस्यास्य सूक्तस्य प्रथमादितृचस्य परुच्छेपः, चतुर्थ्यादिचतसृणामृचाञ्च गृत्समद ऋषी। प्रथमाया इन्द्रः, द्वितीयाया मरुतः, तृतीयाया अग्निः [चतुर्थ्या मरुतः, पञ्चम्या अग्निः, षष्ठ्या इन्द्रः, सप्तम्याश्च द्रविणोदा] देवताः। प्रथमादितृचस्यात्यष्टिः, चतुर्थ्यादिचतसृणाञ्च जगती छन्दसी।

पृष्ठ्यषडहस्य षष्ठेऽहनि प्रातःसवनमाध्यन्दिनयोर्द्वयोः सवनयोः प्राक्तीनां प्रस्थितयाज्यानां पुरस्तात् 'वनोति हि' इत्यादचाः पारुच्छेप्याख्या ऋचः सम्वध्नाति। तदुक्तं वैताने—"पृष्ठ्यषष्ठे 'वनोति हि सुन्वन् क्षयं परीणसः' (अ० २०।६७) 'विश्वेषु हि त्वा सवनेषु तुञ्जते' (अ० २०।६२) इति पारुच्छेपीरुपदधाति द्वयोः सवनयोः पुरस्तात् प्रस्थितयाज्यानाम्" (वै० ३१।२७) इति।

वनोति हि सुन्वन् क्षयं परीणसः सुन्वानो हि ष्मा
यजत्यव द्विषो देवानामव द्विषः।
सुन्वान इत् सिषासति सहस्रा वाज्यवृतः।
सुन्वानायेन्द्रो ददात्याभुवं रयिं ददात्याभुवम् ॥१॥

ऋ. १।१३३।७

पदपाठः

वनोति। हि। सुन्वन्। क्षयम्। परीणसः। सुन्वानः। हि। स्म। यजति। अव। द्विषः। देवानाम्। अव। द्विषः। सुन्वानः। इत्। सिसासति। सहस्रा। वाजी। अवृतः। सुन्वानाय। इन्द्रः। ददाति। आऽभुवम्। रयिम्। ददाति। आऽभुवम् ॥१॥

हे इन्द्र! **सुन्वन्** अभिषवं कुर्वन् यजमानः क्षयं वस्तव्यं गृहं **वनोति** त्वत्कृपया संभजते। 'हिः' प्रसिद्धचर्थः। किञ्च **सुन्वानो हि** सोमयागं कुर्वाणः एव **परीणसः** परितः सम्बद्धान् **द्विषः** शत्रून् **अव यजति** नाशयति। न केवलं यागद्वेषिणो, **देवानां द्विषः** अपि **अव यजति**। किञ्च **सुन्वान इत्** अभिषवोपलक्षितं यागं कुर्वाण एव हे इन्द्र! त्वत्प्रसादात् **वाजी** अन्नवान् **अवृतः** परैरनाक्रान्तः सन् **सहस्रा** सहस्राणि गवादिधनानि **सिषासति** साधयितुं सम्भक्तुं वा इच्छति। केनेदं लभ्यते? तत्राह

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुन्वानाय इन्द्रमुद्दिश्य सोमयागं कुर्वाणाय यजमानाय, अथवा अयम् **इन्द्रः आभुवं** समन्ताद् भवनशीलं तथा **आभुव** पुनर्भवनशीलम् अतिसमृद्धं **रयिं** गवादिरूपं धनं **ददाति** प्रयच्छति तस्मात् सुन्वानः सिषासतीत्यर्थः ।

मो षु वो अस्मदभि तानि पौंस्या सना भूवन्
द्युम्नानि मोत जारिषुरस्मत् पुरोत जारिषुः ।
यद् वश्चित्रं युगे युगे नव्यं घोषादमर्त्यम्
अस्मासु तन्मरुतो यच्च दुष्टरं दिधृता
यच्च दुष्टरम् ।।२।। ऋ. १।१३९।८

पदपाठः

मो इति । सु । वः । अस्मत् । अभि । तानि । पौंस्या । सना । भूवन् । द्युम्नानि । मा । उत । जारिषुः । अस्मत् । पुरा । उत । जारिषुः । यत् । वः । चित्रम् । युगेऽयुगे । नव्यम् । घोषात् । अमर्त्यम् । अस्मासु । तत् । मरुतः । यत् । च । दुस्तरम् । दिधृत । यत् । च । दुस्तरम् ।।२।।

हे मरुतः ! वः युष्माकं **तानि पौंस्या** पौंस्यानि बलानि **सना** सदातनानि नित्यानि **द्युम्नानि** प्रकाशवन्ति । यद्वा सना सम्भजनीयानि द्युम्नानि धनवन्ति यशोवन्ति वा । **अस्मत्** अस्मान् **मो षु अभिभूवन्** सुष्ठु मैवाभिभवन् । यद्वा अस्मत्तोऽपगतानि मा भूवन् । मो इति निपातद्वयसमुदाये उशब्दोऽवधारणे । **उतापि च** । यद्वा द्युम्नानि इत्येतदुत्तरत्र सम्बध्यते । द्युम्नानि धनानि यशांसि वा अस्मदीयानि **मा जारिषुः** क्षीणानि मा भूवन् । उतापि चास्माकं **पुरा** पुराणि लक्षणया तत्रस्थाः प्राणिनः **मा जारिषुः** जीर्णा नष्टा मा भूवन् । किञ्च **वो** युष्मत्सम्बन्धि **चित्रं** चायनीयं नानाविध **नव्यं** नूतनं स्तोतव्यं वा **अमर्त्यम्** अमरधर्माणं मर्त्त्येषु दुर्लभं वा यदस्ति **घोषात्** घोषाः व्यत्यये पञ्चमी । शब्दोपेता गवादयो घोषोपलक्षिता ग्रामनगरादयो वा ये सन्ति **तत्** सर्वं **युगे युगे** युगशब्दोपलक्षिते तत्तत्काले **अस्मासु** अस्मासु एव भवतु इति शेषः, नान्यस्य । किञ्च हे **मरुतो यच्च दुस्तर** दुःखेन तरणीय सम्पादनीयं धन **दिधृत** धारयत तदस्मासु । किञ्च **दुस्तरं** शत्रुभिरहिंसितं तत्सर्वमपि विशेषेण अस्मासु स्थापयत ।

अग्निं होतारं मन्ये दास्वन्तं वसुं सूनुं सहसो
जातवेदसं विप्रं न जातवेदसम् ।
य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा ।
घृतस्य विभ्राष्टिमनु वष्टि
शोचिषाजुह्वानस्य सर्पिषः ।।३।। ऋ. १।१२७।१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

अग्निम् । होतारम् । मन्ये । दास्वन्तम् । वसुम् । सूनुम् । सहसः । जातऽवेदसम् । विप्रम् । न । जातऽवेदसम् । यः । ऊर्ध्वया । सुऽअध्वरः । देवः । देवाच्या । कृपा । घृतस्य । विऽभ्राष्टिम् । अनु । वष्टि । शोचिषा । आऽजुह्वानस्य । सर्पिषः ॥३॥

अग्नि सर्वासां देवसेनानामग्रगण्यं यज्ञेष्वग्रं नीयमानं वा **होतारम्** देवानामाह्वातारम् । यद्वा होमनिष्पादकं होतारम्, अग्नि होतारं मन्ये । एवं प्रतिविशेषणं मन्ये इति सम्बन्धः । यद्वा यागनिष्पत्तेरेवापेक्षितत्वात् एतदेव विधेयविशेषणम् । इतराणि वक्ष्यमाणविशेषणानि स्तुतिपराणि । **दास्वन्तम्** अत्यन्तं दानवन्तं **वसुं** सर्वेषां निवासहेतुं **सहसः सूनुं** अग्निमन्थने बलादुत्पन्नत्वाद् बलस्य पुत्रम् । **जातवेदसं** जातानां वेदितारं जातप्रज्ञं जातबलं वा । तत्र दृष्टान्तः । **विप्रं न जातवेदसं** जातविद्यं मेधाविनं ब्राह्मणमिव । सर्वे तं यथा बहु मन्यन्ते तथा त्वामपि **मन्ये** स्तौमीत्यर्थः । उक्तगुणविशिष्टो **यो देवः स्वध्वरः** शोभनयज्ञवान् यज्ञं सम्यक् निर्वहन् **ऊर्ध्वया** उन्नतयोत्कृष्टया **देवाच्या** देवान् पूजयन्त्या देवान् प्रत्यक्तया वा **कृपा** कृपया सामर्थ्यलक्षणया । तेभ्यो हविर्वहनबुद्ध्या युक्तः सन् **आजुह्वानस्य** आ समन्तात् हूयमानस्य **सर्पिषः घृतस्य** विलापनेन दीप्तस्य आज्यस्य **विभ्राष्टिं** विशेषेण भ्राजमानम् **अनु** स्वयमपि तदाज्यं, **शोचिषा** ज्वालया **वष्टि** कामयते, स्वीकरोतीत्यर्थः ।

यज्ञैः संमिश्लाः पृषतीभिर्ऋष्टिभिर्यामं-
छुभ्रासो अञ्जिषु प्रिया उत ।
आसद्या बर्हिर्भरतस्य सूनवः
पोत्रादा सोमं पिबता दिवो नरः ॥४॥ ऋ. २।३६।२

पदपाठः

यज्ञैः । सम्ऽमिश्लाः । पृषतीभिः । ऋष्टिऽभिः । यामन् । शुभ्रासः । अञ्जिषु । प्रियाः । उत । आऽसद्य । बर्हिः । भरतस्य । सूनवः । पोत्रात् । आ । सोमम् । पिबत । दिवः । नरः ॥४॥

हे मरुतः ! **यज्ञैः** यागैः **संमिश्लाः** संयुक्ताः **पृषतीभिः** स्ववाहनभूताभिः पृषद्वतीभिर्वडवाभिर्युक्ते **यामन्** यामनि गमनसाधने रथेऽवस्थिताः **ऋष्टिभिः** स्वकीयैरायुधैः **शुभ्रासः** शुभ्राः शोभमानाः । उतशब्दश्चार्थे । **अञ्जिषु** आभरणेषु **प्रियाः** च हे **भरतस्य सूनवः** ! सर्वस्य जगतो भर्तुः रुद्रस्य पुत्राः ! **दिवो नरः** अन्तरिक्षस्य नेतारः, एवंभूता हे मरुतः ! ते यूयं **बर्हिः** आस्तीर्णे बर्हिषि **आसद्य** उपविश्य **पोत्रात्** पोतुर्यागात् **सोमम् आपिबत** ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आ वक्षि देवाँ इह विप्र यक्षि चोशन्
होतर्नि षदा योनिषु त्रिषु ।
प्रति वीहि प्रस्थितं सोम्यं मधु
पिबाग्नीध्रात् तव भागस्य तृष्णुहि ॥५॥ ऋ. २।३६।४

पदपाठः

आ । वक्षि । देवान् । इह । विप्र । यक्षि । च । उशन् । होतः । नि । सद । योनिषु । त्रिषु । प्रति । वीहि । प्रऽस्थितम् । सोम्यम् । मधु । पिब । आग्नीध्रात् । तव । भागस्य । तृष्णुहि ॥५॥

हे **विप्र** मेधाविन् अग्ने ! **देवान्** इन्द्रादीन् **आवक्षि** आवह । **यक्षि च** यज च तान् । हे **होतः** देवानामाह्वातः ! त्वं च **उशन्** अस्मदीयं यज्ञं कामयमानः सन् **त्रिषु योनिषु** स्थानेषु **निसद** उपविश । उपविश्य च **प्रस्थितं** होमार्थमुत्तरवेदिं प्रत्यानीतं **सोम्यं** सोममयं **मधु** **प्रतिवीहि** प्रतिकामयस्व । कामयित्वा च **आग्नीध्रात्** अग्नीध्रयागात् सोमं **पिब**, पीत्वा च **तव** **भागस्य** त्वदीयेन भागेन **तृष्णुहि** तृप्तिं लभस्व ।

एष स्य ते तन्वो नृम्णवर्धनः
सह ओजः प्रदिवि बाह्वोर्हितः ।
तुभ्यं सुतो मघवन् तुभ्यमाभृतस्त्वमस्य
ब्राह्मणादा तृपत् पिब ॥६॥ ऋ. २।३६।५

पदपाठः

एषः । स्यः । ते । तन्वः । नृम्णऽवर्धनः । सहः । ओजः । प्रऽदिवि । बाह्वोः । हितः । तुभ्यम् । सुतः । मघऽवन् । तुभ्यम् । आऽभृतः । त्वम् । अस्य । ब्राह्मणात् । आ । तृपत् । पिब ॥६॥

हे इन्द्र ! **स्यः** स **एषः** सोमः **ते** तव **तन्वः** शरीरस्य **नृम्णवर्धनः** बलवर्धकः । येन सोमेन **प्रदिवि** पुराणे त्वयि **बाह्वोः** हस्तयोः **सहः** परेषामभिभवकारि सामर्थ्यम् **ओजः** तत्कारणभूतं बलञ्च **हितः** निहितं भवति । लिङ्गव्यत्ययश्छान्दसः । हे **मघवन्** धनिन् इन्द्र ! **तुभ्यं** त्वदर्थं तादृशः सोमः **सुतः** अभिषुतः । **तुभ्यं** होतुम् **आभृतः** उत्तरवेद्यां प्रत्याहृतश्च । **अस्य** इमं सोमं **ब्राह्मणात्** ब्राह्मणाच्छंसिनो यागात् **तृपत्** तृप्यन् **त्वम्** **आ पिब** आभिमुख्येन पिब ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यमु पूर्वमहुवे तमिदं हुवे
सेदु हव्यो ददिर्यो नाम पत्यते ।
अध्वर्युभिः प्रस्थितं सोम्यं मधु
पोत्रात् सोमं द्रविणोदः पिब ऋतुभिः ॥७॥

ऋ. २।३७।२

पदपाठः

यम् । ऊं इति । पूर्वम् । अहुवे । तम् । इदम् । हुवे । सः । इत् । ऊं इति । हव्यः । ददिः । यः । नाम । पत्यते । अध्वर्युऽभिः । प्रऽस्थितम् । सोम्यम् । मधु । पोत्रात् । सोमम् । द्रविणोःऽदः । पिब । ऋतुऽभिः ॥७॥

हे **द्रविणोदः** ! **यमु** यं त्वामेव **पूर्वं** होतृकर्तृके सोमयागे **अहुवे** आहूतवानस्मि । इदं सम्प्रति **तं** तमेव पोतृकर्तृके सोमयागे **हुवे** आह्वयामि । **स इत्** स एव द्रविणोदाः **हव्यः** ह्वातव्यः । **उ** इति पूरणे । **ददिः** अभीष्टफलस्य दाता **यो नाम** यः खलु **पत्यते** देवतात्वेनेष्टे तस्मै द्रविणोदसे **सोम्यं** सोमात्मकं **मधु** **अध्वर्युभिः** **प्रस्थितं** प्रणीतमासीत् । हे द्रविणोदः ! **पोत्रात्** पोतुर्यागात् **ऋतुभिः** ऊर्जसंज्ञकैः सह **सोमं पिब** ।

इति षष्ठेऽनुवाके प्रथमं सूक्तम् ।

अष्टषष्टितमं सूक्तम्

द्वादशर्चस्यास्य सूक्तस्य मधुच्छन्दा ऋषिः । इन्द्रो देवता । गायत्री छन्दः ।

छन्दोमानां प्रथमेऽहनि प्रातःसवने 'सुरूपकृत्नुमूतये' इति द्वादश ऋच आवापस्थाने आवपते । तदुक्तं वैताने—''सुरूपकृत्नुमूतये' इति द्वादशर्चः'' (वै. श्रौ. ३३।१५) इति ।

सुरूपकृत्नुमूतये सुदुघामिव गोदुहे ।
जुहूमसि द्यवि द्यवि ॥१॥ ऋ. १।४।१।

पदपाठः

सुरूपकृत्नुम् । ऊतये । सुदुघाम्ऽइव । गोऽदुहे । जुहूमसि । द्यविऽद्यवि ॥१॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अर्थ० २०।५७।१) ।

उप नः सवना गहि सोमस्य सोमपाः पिब ।
गोदा इद् रेवतो मदः ॥२॥ ऋ. १।४।२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

उप । नः । सवना । गहि । सोमस्य । सोमऽपाः । पिब । गोऽदाः । इत् । रेवतः । मदः ॥२॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।५७।२)।

अथा ते अन्तमानां विद्याम सुमतीनाम् ।

मा नो अति ख्य आ गहि ॥३॥ ऋ. १।४।३।

पदपाठः

अथ । ते । अन्तमानाम् । विद्याम । सुऽमतीनाम् । मा । नः । अति । ख्यः । आ । गहि ॥३॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।५७।३)।

परेहि विग्रमस्तृतमिन्द्रं पृच्छा विपश्चितम् ।

यस्ते सखिभ्य आ वरम् ॥४॥ ऋ. १।४।४

पदपाठः

परा । इहि । विग्रम् । अस्तृतम् । इन्द्रम् । पृच्छ । विपःऽचितम् । यः । ते । सखिऽभ्यः । आ । वरम् ॥४॥

यजमानं होता ब्रवीति । हे यजमान ! त्वम् **इन्द्रं परेहि** इन्द्रसमीपे गच्छ । गत्वा च **विपश्चितं** मेधाविनं होतारं मां **पृच्छ** । असौ होता सम्यक् स्तुतवान् न वा इत्येवं प्रश्नं कुरु । **यः** इन्द्रः **ते** तव यजमानस्य **सखिभ्यः** ऋत्विग्भ्यः **वरं** श्रेष्ठं धनपुत्रादिकम् **आ** समन्तात् प्रयच्छतीति शेषः । तादृशमिन्द्रमिति पूर्वत्रान्वयः । पुनरपि कीदृशम् ? **विग्रं** मेधाविनम्, तथा **अस्तृतम्** अहिंसितम् । व्रियते इति वरः । 'ग्रहवृदृनिश्चिगमश्च' (पा. ३।३।५८) इति अप् ।

उत ब्रुवन्तु नो निदो निरन्यतश्चिदारत ।

दधाना इन्द्र इद् दुवः ॥५॥ ऋ. १।४।५

पदपाठः

उत । ब्रुवन्तु । नः । निदः । निः । अन्यतः । चित् । आरत । दधानाः । इन्द्रे । इत् । दुवः ।

नः अस्माकं सम्बन्धिन ऋत्विज इति शेषः । ते **ब्रुवन्तु** इन्द्रं स्तुवन्तु । **उत** अपि च हे **निदः** निन्दितारः पुरुषाः ! **निः आरत** इतो देशान्निर्गच्छत यूयम् । **अन्यतश्चित्** अन्यस्मादपि देशात् निर्गच्छत । कीदृशा ऋत्विजः ? **इन्द्रे दुवः** परिचर्यां **दधानाः** कुर्वाणाः । इच्छब्दोऽवधारणे । सर्वदा परिचर्यां कुर्वन्त एव तिष्ठन्तु इत्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उत न सुभगाँ अरिर्वोचेयुर्दस्म कृष्टयः ।
स्यामेदिन्द्रस्य शर्मणि ॥६॥ ऋ. १।४।६

पदपाठः

उत । नः । सुऽभगान् । अरिः । वोचेयुः । दस्म । कृष्टयः । स्याम । इत् । इन्द्रस्य । शर्मणि ॥६॥

हे **दस्म** शत्रूणामुपक्षयितः इन्द्र ! त्वत्कृपया **अरिः उत** शत्रवोऽपि **नः** अस्मान् **सुभगान्** शोभनधनोपेतान् **वोचेयुः** उच्यासुः । **कृष्टयो** मानवा अस्मन्मित्रभूता वदन्तीति किमु वक्तव्यम् इति शेषः । ततो धनसम्पन्ना वयम् **इन्द्रस्य शर्मणि** इन्द्र-प्रसादलब्धे सुखे **स्यामेत्** भवेमैव । शर्मणि शृ हिंसायाम् । हिनस्ति दुःखम् इति शर्म । 'अन्येभ्योऽपि दृश्यन्ते' (पा. ३।२।७५) इति मनिन् ।

एमाशुमाशवे भर यज्ञश्रियं नृमादनम् ।
पतयन्मन्दयत्सखम् ॥७॥ ऋ. १।४।७

पदपाठः

आ । ईम् । आशुम् । आशवे । भर । यज्ञऽश्रियम् । नृऽमादनम् । पतयत् । मन्दयत्ऽसखम् ॥७॥

हे यजमान ! **आशवे** कृत्स्नसोमयागव्याप्तायेन्द्राय **ईम् आभर** ईमिति निपातः इदंशब्दार्थे, इमं सोमम् आहर । कीदृशं सोमम् ? **आशुं** सवनत्रयव्याप्तं **यज्ञश्रियं** यज्ञसम्पद्रूपं **नृमादनं** नराणाम् ऋत्विजां यजमानानां च हर्षहेतुं, **पतयत्** पतयन्तं, कर्माणि प्राप्नुवन्तं **मन्दयत्सखम्** य इन्द्रो मन्दयति यजमानान् हर्षयति तस्मिन्निन्द्रे सखिभूतोऽयं सोमः, तत्प्रीतिहेतुत्वात्, तृप्तिहेतुत्वाद्वा ।

अस्य पीत्वा शतक्रतो घनो वृत्राणामभवः ।
प्रावो वाजेषु वाजिनम् ॥८॥ ऋ. १।४।८

पदपाठः

अस्य । पीत्वा । शतक्रतो इति शतऽक्रतो । घनः । वृत्राणाम् । अभवः । प्र । आवः । वाजेषु । वाजिनम् ॥८॥

हे **शतक्रतो** बहुकर्मयुक्त इन्द्र ! त्वम् **अस्य** सोमस्य सम्बन्धिनमंशं **पीत्वा** निपीय **वृत्राणां** वृत्रासुरप्रमुखाणां शत्रूणां **घनः अभवः** हन्ता अभूः । ततो **वाजेषु** सङ्ग्रामेषु **वाजिनं** सङ्ग्रामवन्तं स्वभक्तं **प्रावः** प्रकर्षेण रक्षितवानसि । अस्येति इदंशब्देन प्रयोगसमये पुरोदेशस्थः सोमः निर्दिश्यते न तु पूर्वप्रकृतः सोमः परामृश्यते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तं त्वा वाजेषु वाजिनं वाजयामः शतक्रतो ।

धनानामिन्द्र सातये ॥९॥ ऋ. १।४।९

पदपाठः

तम् । त्वा । वाजेषु । वाजिनम् । वाजयामः । शतक्रतो इति शतऽक्रतो । धनानाम् । इन्द्र । सातये ॥९॥

हे **शतक्रतो** बहुकर्मयुक्त यद्वा बहुप्रज्ञ इन्द्र ! **धनानां** सर्वविधसम्पदां **सातये** सम्भजनार्थं वाजेषु युद्धेषु **वाजिनं** बलवन्तं तं त्वा त्वां **वाजयामः** अन्नवन्तं कुर्मः ।

यो रायोऽवनिर्महान्त्सुपारः सुन्वतः सखा ।

तस्मा इन्द्राय गायत ॥१०॥ ऋ. १।४।१०

पदपाठः

यः । रायः । अवनिः । महान् । सुऽपारः । सुन्वतः । सखा । तस्मै । इन्द्राय । गायत ॥१०॥

यः इन्द्रः **रायो** धनस्य **अवनिः** रक्षकः स्वामी वा **तस्मै इन्द्राय गायत** हे ऋत्विजः ! तस्य स्तुतिं कुरुत । कीदृश इन्द्रः ? **महान्** गुणैरधिकः । **सुपारः** सुष्ठुकर्मणः पूरयिता, **सुन्वतो** यजमानस्य **सखा** सखिवत् प्रियः ।

आ त्वेता नि षीदतेन्द्रमभि प्र गायत ।

सखाय स्तोमवाहसः ॥११॥ ऋ. १।५।१

पदपाठः

आ । तु । आ । इत । नि । सीदत । इन्द्रम् । अभि । प्र । गायत । सखायः । स्तोमऽवाहसः ॥११॥

तु-शब्दः क्षिप्रार्थो निपातः । द्वाभ्यामाङ्भ्यामन्वेतुम् इतशब्दोऽभ्यसनीयः । हे **सखायः** ऋत्विजः ! क्षिप्रमस्मिन् कर्मणि **आ आ** आगच्छतागच्छत । आदरार्थोऽभ्यासः । आगत्य च **नि षीदत** उपविशत । तत्पश्चात् **इन्द्रम् अभि प्रगायत** । सर्वतः प्रकर्षेण स्तुत । कीदृशाः सखायः ? **स्तोमवाहसः** त्रिवृत्पञ्चदशादिस्तोमान् अस्मिन् कर्मणि ये वहन्ति प्रापयन्ति तादृशाः । अत्र 'सखायः' इति ऋक्पाठः ।

पुरूतमं पुरूणामीशानं वार्याणाम् ।

इन्द्रं सोमे सचा सुते ॥१२॥ ऋ. १।५।२

पदपाठः

पुरुऽतमम् । पुरूणाम् । ईशानम् । वार्याणाम् । इन्द्रम् । सोमे । सचा । सुते ॥१२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'सखायोऽभिप्रगायत' इति पदद्वयमत्रानुवर्त्तते । हे सखायः ऋत्विजः ! **सचा** यूयं सर्वैः सह । यद्वा सचा परस्परं समवायेन **सुते** अभिषुते सोमे प्रवृत्ते सति **इन्द्रम्** अभिप्रगायत । कीदृशमिन्द्रम् ? **पुरुतमम्** । पुरून् बहून् शत्रून् तमयति ग्लापयतीति पुरुतमः । **पुरूणां** बहूनां **वार्याणां** वरणीयानां धनानाम् **ईशानं** स्वामिनम् ।

इति षष्ठेऽनुवाके द्वितीयं सूक्तम् ।

एकोनसप्ततितमं सूक्तम्

द्वादशर्चस्यास्य सूक्तस्य मधुच्छन्दा ऋषिः । प्रथमाद्येकादशर्चामिन्द्रः, द्वादश्याश्च मरुतो देवताः । गायत्री छन्दः ।

छन्दोमानां द्वितीयेऽहनि 'स घा नो योग आ भुवत्' इति द्वात्रिंशतमम् ऋच आवपते । तदुक्तं वैताने "स घा नो योग आ भुवत्" इति द्वात्रिंशतम् ।(वै. ३३।१५) इति ।

स घा नो योग आ भुवत् स राये स पुरंध्याम् ।
गमद् वाजेभिरा स नः ॥१॥ ऋ. १।५।३

पदपाठः

सः । घ । नः । योगे । आ । भुवत् । सः । राये । सः । पुरम्ऽध्याम् । गमत् । वाजेभिः । आ । सः । नः ॥१॥

घशब्दोऽवधारणार्थो निपातः । सर्वैस्तच्छब्दैः सम्बध्यते । **स घ** स एवेन्द्रः **नः** अस्माकं **योगे** पूर्वमप्राप्तस्य पुरुषार्थस्य सम्बन्धे **आ भुवत्** आभवतु । पुरुषार्थं साधयतु इत्यर्थः । **स** एव **राये** धनाय **आ भुवत्** आभवतु । **स** एव **पुरंध्यां** योषिति आभुवत् यद्वा बहुविधायां बुद्धौ आभुवत् । 'पुरंधिर्बहुधीः' इति निरुक्ते यास्कः (नि. ६।१३) । **स** एव **वाजेभिः** देयैरन्नैः सह **नः** अस्मान् **आगमत्** आगच्छतु ।

यस्य संस्थे न वृण्वते हरी समत्सु शत्रवः ।
तस्मा इन्द्राय गायत ॥२॥ ऋ. १।५।४

पदपाठः

यस्य । सम्ऽस्थे । न । वृण्वते । हरी इति । समत्ऽसु । शत्रवः । तस्मै । इन्द्राय । गायत ॥२॥

समत्सु युद्धेषु **यस्येन्द्रस्य संस्थे** रथे युक्तौ **हरी** द्वावश्वौ **शत्रवः न वृण्वते** न संभजन्ते । रथम् अश्वौ च दृष्ट्वा पलायन्ते इत्यर्थः । **तस्मा इन्द्राय** तत्सन्तोषार्थं हे ऋत्विजः ! **गायत** स्तुतिं कुरुत । संस्थे सम्यक् तिष्ठतीति संस्थो रथः । 'आतश्चोपसर्गे' (पा. ३।१।१३६) इति कप्रत्ययः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुतपाव्ने सुता इमे शुचयो यन्ति वीतये ।

सोमासो दध्याशिरः ॥३॥ ऋ. १।५।५

पदपाठः

सुतऽपाव्ने । सुताः । इमे । शुचयः । यन्ति । वीतये । सोमासः । दधिऽआशिरः ॥३॥

इमे सोमासः अस्मिम् कर्मणि सम्पादिताः सोमाः **सुतपाव्ने** अभिषुतसोमस्य पानकर्त्रे । षष्ठचर्थे चतुर्थी । तस्य पातुः **वीतये** भक्षणाय **यन्ति** तमेव प्राप्नुवन्ति । कीदृशाः सोमाः ? **सुताः** अभिषुताः । **शुचयः** दशापवित्रेण शोधितत्वात् शुद्धाः । **दध्याशिरः** अवनीयमानं दधि आशीर्दोषघातकं येषां सोमानां ते दध्याशिरः । सुतं पिवतीति सुतपावा, तस्मै ।

त्वं सुतस्य पीतये सद्यो वृद्धो अजायथाः ।

इन्द्र ज्यैष्ठ्याय सुक्रतो ॥४॥ ऋ. १।५।६

पदपाठः

त्वम् । सुतस्य । पीतये । सद्यः । वृद्धः । अजायथाः । इन्द्र । ज्यैष्ठ्याय । सुक्रतो इति सुऽक्रतो ॥४॥

सुक्रतो हे शोभनप्रज्ञ शोभनकर्मन् वा इन्द्र ! **त्वं सुतस्य** अभिषुतस्य सोमस्य **पीतये** पानार्थं **ज्यैष्ठ्याय** देवेषु ज्येष्ठत्वार्थं **सद्यः** तस्मिन्नेन क्षणे **वृद्धः अजायथाः** अभिवृद्ध्योत्साहेन युक्तोऽभूः । ज्यैष्ठ्याय । ज्येष्ठस्य भावो ज्यैष्ठ्यम् । 'गुणवचन-ब्राह्मणादिभ्यः कर्मणि च' (पा. ५।१।१२४) इति ष्यञ् ।

आ त्वा विशन्त्वाशवः सोमास इन्द्र गिर्वणः ।

शं ते सन्तु प्रचेतसे ॥५॥ ऋ. १।५।७

पदपाठः

आ । त्वा । विशन्तु । आशवः । सोमासः । इन्द्र । गिर्वणः । शम् । ते । सन्तु । प्रऽचेतसे ॥५॥

हे **इन्द्र** ! **त्वा** त्वां **सोमासः** सोमाः **आविशन्तु** आभिमुख्येन प्रविशन्तु । कीदृशाः सोमाः ? **आशवः** सवनत्रये व्याप्तिमन्तः । कीदृशेन्द्र ? **गिर्वणः** ! गीर्भिः स्तुतिभिः सम्भजनीयदेवविशेष ! तथाविध हे इन्द्र ? **ते** तव **प्रचेतसे** प्रकृष्टज्ञानाय **शं** सुखरूपाः सोमाः **सन्तु** । 'गिर्वणो देवो भवति गीर्भिरेनं वनयन्ति' इति यास्कः (निरु. ६।१४) ।

त्वां स्तोमा अवीवृधन् त्वामुक्था शतक्रतो ।

त्वां वर्धन्तु नो गिरः ॥६॥ ऋ. १।५।८

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

त्वाम् । स्तोमाः । अवीवृधन् । त्वाम् । उक्था । शतक्रतो इति शतऽक्रतो । त्वाम् । वर्धन्तु । नः । गिरः ॥६॥

हे **शतक्रतो** बहुकर्मन् बहुप्रज्ञ वा इन्द्र ! **त्वां स्तोमाः** सामगानां स्तोत्राणि **अवीवृधन्** वर्धितवन्ति । तथा बह्वृचानाम् **उक्था** शस्त्राणि **त्वाम् अवीवृधन्** । यस्मात् पूर्वमेवम् आसीत् तस्मादिदानीमपि अस्माकं **गिरः** स्तुतयः **त्वां वर्धन्तु** वर्धयन्तु अतिवृद्धं कुर्वन्तु । वर्धन्तु अन्तर्भावितण्यर्थात् वृधेः व्यत्ययेन परस्मैपदम् ।

अक्षितोतिः सनेदिमं वाजमिन्द्रः सहस्रिणम् ।

यस्मिन् विश्वानि पौंस्या ॥७॥ ऋ. १।५।९

पदपाठः

अक्षितऽऊतिः । सनेत् । इमम् । वाजम् । इन्द्रः । सहस्रिणम् । यस्मिन् । विश्वानि । पौंस्या ॥७॥

इन्द्रः इमं **वाजं** सोमरूपमन्नं **सनेत्** संभजेत् । कीदृश इन्द्रः ? **अक्षितोतिः** अहिंसितरक्षणः । कदाचिदपि हिंसां न विमुञ्चतीत्यर्थः । कीदृशं वाजं ? **सहस्रिणं** प्रकृतौ विकृतिषु च प्रवर्त्तमानत्वेन सहस्रसंख्यायुक्तम् । यस्मिन् वाजे **विश्वानि** सर्वाणि **पौंस्या** पौंस्यानि पुंस्त्वानि बलानि वर्त्तन्ते तादृशं वाजमिति पूर्वत्रान्वयः ।

मा नो मर्त्ता अभिद्रुहन् तनूनामिन्द्र गिर्वणः ।

ईशानो यवया वधम् ॥८॥ ऋ. १।५।१०

पदपाठः

मा । नः । मर्त्ताः । अभि । द्रुहन् । तनूनाम् । इन्द्र । गिर्वणः । ईशानः । यवय । वधम् ॥८॥

हे **गिर्वणः** इन्द्र ! **मर्त्ताः** विरोधिनो मनुष्याः **नः तनूनां** अस्माकं शरीराणां **मा अभिद्रुहन्** अभितो द्रोहं मा कुर्युः **ईशानः** समर्थस्त्वं वैरिभिः सम्पाद्यमानं **वधं यवय** अस्मत्तः पृथक् कुरु ।

युञ्जन्ति ब्रध्नमरुषं चरन्तं परि तस्थुषः ।

रोचन्ते रोचना दिवि ॥९॥ ऋ. १।६।१

पदपाठः

युञ्जन्ति । ब्रध्नम् । अरुषम् । चरन्तम् । परि । तस्थुषः । रोचन्ते । रोचना । दिवि ॥९॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।४७।१०) ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

युञ्जन्त्यस्य काम्या हरी विपक्षसा रथे ।
शोणा धृष्णू नृवाहसा ॥१०॥ ऋ. १।६।२

पदपाठः

युञ्जन्ति । अस्य । काम्या । हरी इति । विऽपक्षसा । रथे । शोणा । धृष्णू इति । नृऽवाहसा ॥१०॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।४७।११) ।

केतुं कृण्वन्नकेतवे पेशो मर्या अपेशसे ।
समुषद्भिरजायथाः ॥११॥ ऋ. १।६।३

पदपाठः

केतुम् । कृण्वन् । अकेतवे । पेशः । मर्याः । अपेशसे । सम् । उषत्ऽभिः । अजायथाः ॥११॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।४७।१२) ।

आदह स्वधामनु पुनर्गर्भत्वमेरिरे ।
दधाना नाम यज्ञियम् ॥१२॥ ऋ. १।६।४

पदपाठः

आत् । अह । स्वधाम् । अनु । पुनः । गर्भऽत्वम् । आऽईरिरे । दधानाः । नाम । यज्ञियम् ॥१२॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।४०।६) ।

इति षष्ठेऽनुवाके तृतीयं सूक्तम् ।

सप्ततितमं सूक्तम्

विंशत्यृचस्यास्य सूक्तस्य मधुच्छन्दा ऋषिः । प्रथमा-द्वितीययोर्ऋचोः षष्ठ्या-दिपञ्चदशानाञ्चेन्द्रामरुतः, तृतीयादितृचस्य च मरुतो देवताः । गायत्री छन्दः ।

छन्दोमानां तृतीयेऽहनि 'वीलु चिदारुजत्नुभिः' इति षट्त्रिंशतम् ऋचः आवापस्थाने आवपते । तदुक्तं वैताने—"वीलुचिदारुजत्नुभिः" इति षट्त्रिंशतम् आवपते" (वै. ३३।१५) इति ।

वीलु चिदारुजत्नुभिर्गुहा चिदिन्द्र वह्निभिः ।
अविन्द उस्रिया अनु ॥१॥ ऋ. १।६।५

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

वीलु । चित् । आरुजत्नुऽभिः । गुहा । चित् । इन्द्र । वह्निऽभिः । अविन्दः । उस्रियाः । अनु ॥१॥

अत्रेदमस्त्युपाख्यानम् । पूर्वं देवानां गावोऽपहृताः पणिभिः, प्रक्षिप्ताश्चान्धकारे। इन्द्रश्च ता मरुद्भिः सहाजयत् इति। तदेतदुपाख्यानमभिप्रेत्यैवोच्यते। हे **इन्द्र ! वीलुचित्** दृढमपि दुर्गस्थानम् **आरुजत्नुभिः** भञ्जद्भिः **वह्निभिः** वोढृभिरन्यत्र नेतुं समर्थैः मरुद्भिः सहितस्त्वं **गुहाचित्** गुहायामपि स्थापिता **उस्रियाः** गाः **अनु अविन्दः** अन्विष्य लब्धवानसि। सोऽयमितिहासः ऋक्संहितायां मन्त्रान्तरेऽपि सङ्केतरूपेण सूचितः "निरुद्धा आपः पणिनेव गावः" (ऋ. १।३२।११)!

देवयन्तो यथा मतिमच्छा विदद्वसुं गिरः ।
महामनूषत श्रुतम् ॥२॥ ऋ. १।६।६

पदपाठः

देवऽयन्तः । यथा । मतिम् । अच्छ। विदत्ऽवसुम् । गिरः । महाम् । अनूषत । श्रुतम् ॥२॥

देवयन्तो मरुतो देवानिच्छन्तो **गिरः** स्तोतारः ऋत्विजो **महां** प्रौढं मरुद्गणं **अच्छ अनूषत** प्राप्तुं स्तुतवन्तः। कीदृशं मरुद्गणम् ? **विदद्वसुं** वेदयद्भिः स्वमहिमप्रख्यापकैर्वसुभिः धनैर्युक्तं, **श्रुतं** प्रसिद्धम्। मरुद्गणस्य दृष्टान्तः। **यथा मतिम्**। मन्तारम् इन्द्रं यथा स्तुवन्ति तथेत्यर्थः। **देवयन्तः** देवान् आत्मन इच्छन्तः। 'सुप आत्मनः क्यच्' (पा. ३।१।८)। 'क्यचि च' (पा. ७।४।३३) इति ईत्वम्। 'अकृत्सार्वधातुकयोर्दीर्घः' (पा. ७।४।२५) इति दीर्घत्वं च न भवति। 'न च्छन्दस्यपुत्रस्य' (पा. ७।४।३५)। इत्यनेन क्यचि यत् प्राप्तम् ईत्वं दीर्घत्वं वा तस्य सर्वस्य प्रतिषेधात्। यद्यपीत्वमेव प्रकृतं तथापि व्यवहितस्यापि दीर्घत्वस्य स प्रतिषेध इति विज्ञायते। 'अश्वायन्तः' इत्यादौ 'अश्वाघस्यात्' (पा. ७।४।३७) इति आत्वविधानात् इति ह्युक्तम्। क्यजन्तात् शतृप्रत्ययः।

इन्द्रेण सं हि दृक्षसे संजग्मानो अबिभ्युषा ।
मन्दू समानवर्चसा ॥३॥ ऋ. १।६।७

पदपाठः

इन्द्रेण। सम्। हि। दृक्षसे। सम्ऽजग्मानः। अबिभ्युषा। मन्दू इति। समानऽवर्चसा ॥३॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।४०।१)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनवद्यैरभिद्युभिर्मखः सहस्वदर्चति ।

गणैरिन्द्रस्य काम्यैः ॥४॥ ऋ. १।६।८

पदपाठः

अनवद्यैः । अभिद्युऽभिः । मखः । सहस्वत् । अर्चति । गणैः । इन्द्रस्य । काम्यैः ॥४॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।४०।२) ।

अतः परिज्मन्ना गहि दिवो वा रोचनादधि ।

समस्मिन्नृञ्जते गिरः ॥५॥ ऋ. १।६।९

पदपाठः

अतः । परिऽज्मन् । आ । गहि । दिवः । वा । रोचनात् । अधि । सम् । अस्मिन् । ऋञ्जते । गिरः ॥५॥

हे **परिज्मन्** परितो व्यापिन् मरुद्गण ! **अतः** अस्मात् मरुद्गणस्थानात् अन्तरिक्षात् **आगहि** अस्मिन् कर्मणि आगच्छ । **दिवो वा** द्युलोकात् वा समागच्छ । **रोचनादधि** दीप्यमानात् आदित्यमण्डलात् वा समागच्छ । किमर्थमागमनमित्युच्यते । **अस्मिन्** कर्मणि वर्त्तमानः ऋत्विक् **गिरः** स्तुतीः **सम् ऋञ्जते** सम्यक् प्रसाधयति । ऋञ्जतिः प्रसाधनकर्मेति यास्कः (निरु. ६।२१) । एताः स्तुतीः श्रोतुमागच्छेत्यर्थः ।

इतो वा सातिमीमहे दिवो वा पार्थिवादधि ।

इन्द्रं महो वा रजसः ॥६॥ ऋ. १।६।१०

पदपाठः

इतः । वा । सातिम् । ईमहे । दिवः । वा । पार्थिवात् । अधि । इन्द्रम् । महः । वा । रजसः ॥६॥

इन्द्रं प्रति **सातिं** धनदानम् **ईमहे** आधिक्येन याचामहे । कस्मात् लोकादिति तदुच्यते । **इतः** अस्मादभिदृश्यमानात् **पार्थिवात्** पृथ्वीलोकाद्वा **दिवो वा** द्युलोकाद्वा **महो** महतः प्रौढात् **रजसः** वा पक्ष्यादीनां रञ्जकाद् अन्तरिक्षलोकाद्वा । अयमिन्द्रो यतः कुतश्चिद् आनीय अस्मभ्यं धनं प्रयच्छतु इत्यर्थः । महः, महतः इत्यस्य अकार-तकारयोर्लोपश्छान्दसः ।

इन्द्रमिद् गाथिनो बृहदिन्द्रमर्केभिरर्किणः ।

इन्द्रं वाणीरनूषत ॥७॥ ऋ. १।७।१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

इन्द्रम् । इत् । गाथिनः । बृहत् । इन्द्रम् । अर्केभिः । अर्किणः । इन्द्रम् । वाणीः । अनूषत ॥७॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।३८।४)।

इन्द्र इद्धर्योः सचा संमिश्ल आ वचोयुजा ।
इन्द्रो वज्री हिरण्ययः ॥८॥ ऋ. १।७।२

पदपाठः

इन्द्रः । इत् । हर्योः । सचा । सम्ऽमिश्लः । आ । वचःऽयुजा । इन्द्रः । वज्री । हिरण्ययः ॥८॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।३८।५)।

इन्द्रो दीर्घाय चक्षस आ सूर्यं रोहयद् दिवि ।
वि गोभिरद्रिमैरयत् ॥९॥ ऋ. १।७।३

पदपाठः

इन्द्रः । दीर्घाय । चक्षसे । आ । सूर्यम् । रोहयत् । दिवि । गोभिः । अद्रिम् । ऐरयत् ॥९॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।३८।६)।

इन्द्र वाजेषु नोऽव सहस्रप्रधनेषु च ।
उग्र उग्राभिरूतिभिः ॥१०॥ ऋ. १।७।४

पदपाठः

इन्द्र । वाजेषु । नः । अव । सहस्रऽप्रधनेषु । च । उग्रः । उग्राभिः । ऊतिऽभिः ॥१०॥

हे **इन्द्र** ! **उग्रः** शत्रुभिरप्रधृष्यस्त्वम् **उग्राभिः** अप्रधृष्याभिः **ऊतिभिः** अस्मद्विषयरक्षाभिः **वाजेषु** युद्धेषु **नः** अस्मान् **अव** रक्ष । तथा **सहस्रप्रधनेषु च** सहस्रसङ्ख्याकगजाश्वादिलाभयुक्तेषु महायुद्धेष्वपि रक्ष ।

इन्द्रं वयं महाधन इन्द्रमर्भे हवामहे ।
युजं वृत्रेषु वज्रिणम् ॥११॥ ऋ. १।७।५

पदपाठः

इन्द्रम् । वयम् । महाऽधने । इन्द्रम् । अर्भे । हवामहे । युजम् । वृत्रेषु । वज्रिणम् ॥११॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वयम् अनुष्ठातारो **महाधने** प्रभूतधननिमित्तम् **इन्द्रं हवामहे** आह्वयामः । **अर्भे** अर्भके स्वल्पेऽपि धने निमित्तभूते सति इन्द्रं हवामहे । कीदृशं ? **युजं** सहकारिणं समाहितं वा वृत्रेषु शत्रुषु धनलाभविरोधिषु प्राप्तेषु तन्निवारणाय **वज्रिणं** वज्रोपेतम् ।

स नो वृषन्नमुं चरुं सत्रादावन्नपा वृधि ।

अस्मभ्यमप्रतिष्कुतः ॥१२॥ ऋ. १।७।६

पदपाठः

सः । नः । वृषन् । अमुम् । चरुम् । सत्राऽदावन् । अप । वृधि । अस्मभ्यम् । अप्रतिऽस्कुतः ॥१२॥

हे **सत्रादावन्** अस्मदभीष्टानां सर्वेषां फलानां सहप्रदातः ! अतो व्रीह्यादिनिष्पत्त्यर्थं हे **वृषन्** वृष्टिप्रदेन्द्र ! **नः** अस्मदर्थम् **अमुं** दृश्यमानं **चरुं** मेघम् **अप वृधि** उद्घाटय । तथैव **अस्मभ्यम्** अस्मदर्थम् **अप्रतिष्कुतः** प्रतिशब्दरहितो भव । यदस्माभिर्याच्यते तत्र सर्वत्र नेति प्रतिशब्दं नोच्चारयेत्यर्थः । अतः कदाचिदपि अप्रतिस्खलितः त्वमसि । एतदेवाभिप्रेत्य यास्कः प्राह :—'अप्रतिष्कुतोऽप्रतिष्कृतोऽप्रतिस्खलितो वा' (निरु. ६।१६) इति ।

तुञ्जेतुञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः ।

न विन्धे अस्य सुष्टुतिम् ॥१३॥ ऋ. १।७।७

पदपाठः

तुञ्जेऽतुञ्जे । ये । उत्ऽतरे । स्तोमाः । इन्द्रस्य । वज्रिणः । न । विन्धे । अस्य । सुऽस्तुतिम् ॥१३॥

तुञ्जे तुञ्जे तस्मिन् तस्मिन् फलप्रदातरि देवान्तरे **ये स्तोमाः** स्तोत्रविशेषाः **उत्तरे** उत्कृष्टाः सन्ति तैः स्तोमैः सर्वैरपि **वज्रिणः** वज्रयुक्तस्य **इन्द्रस्य सुष्टुतिं** योग्यां शोभनस्तुतिं **न विन्धे** न विन्दामि । इन्द्रस्यात्यन्तगुणबाहुल्येन देवान्तरेषूत्तमत्वेन प्रसिद्धान्यपि स्तोत्राणि न पर्याप्तानीत्यर्थः । इमामृचं यास्क एवं व्याचष्टे— 'तुञ्जस्तुञ्जतेर्दानकर्मणः । दाने दाने य उत्तरे स्तोमा इन्द्रस्य वज्रिणो नास्य तैर्विन्दामि समाप्तिं स्तुतेः'' (निरु. ६।१७-१८) इति ।

वृषा यूथेव वंसगः कृष्टीरियर्त्योजसा ।

ईशानो अप्रतिष्कुतः ॥१४॥ ऋ. १।७।८

पदपाठः

वृषा । यूथाऽइव । वंसगः । कृष्टीः । इयर्ति । ओजसा । ईशानः । अप्रतिऽस्कुतः ॥१४॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृषा कामानां वर्षिता इन्द्रः **ओजसा** स्वकीयवलेन अनुग्रहीतुं **कृष्टीः** मानवान् **इयर्ति** प्राप्नोति । कीदृशः इन्द्रः ? **ईशानः** समर्थः । **अप्रतिष्कुतः** प्रतिशब्दरहितः । याच्यमानं न परिहरतीत्यर्थः । इन्द्रस्य दृष्टान्तः । **वंसगो** वननीयगतिर्वृषभो **यूथेव** गोयूथानि यथा प्राप्नोति तद्वत् । वृषा "कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः" (उ० सू० १।१५४) इति वर्षतेः कनिन् । कित्वाद् गुणाभावः ।

य एकश्चर्षणीनां वसूनामिरज्यति ।
इन्द्रः पञ्च क्षितीनाम् ॥१५॥ ऋ. १।७।९

पदपाठः

यः । इन्द्रः । चर्षणीनाम् । वसूनाम् । इरज्यति । इन्द्रः । पञ्च । क्षितीनाम् ॥१५॥

यः इन्द्रः स्वयम् **एक** एव **चर्षणीनां** मनुष्याणाम् **इरज्यति** ईष्टे तथा **वसूनां** धनानाम् इरज्यति । स **इन्द्रः पञ्च** निषादपञ्चमानां **क्षितीनां** निवासार्हाणां वर्णानामनुग्रहीतेति शेषः । एकः, इण गतौ 'इण् भीकापाशल्यतिमर्चिभ्यः कन्' (उ० सू० ३।३२३) इति कन् । बाहुलकात् कलोपाभावः ।

इन्द्रं वो विश्वतस्परि हवामहे जनेभ्यः ।
अस्माकमस्तु केवलः ॥१६॥ ऋ. १।७।१०

पदपाठः

इन्द्रम् । वः । विश्वतः । परि । हवामहे । जनेभ्यः । अस्माकम् । अस्तु । केवलः ॥१६॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।३९।१) ।

एन्द्र सानसिं रयिं सजित्वानं सदासहम् ।
वर्षिष्ठमूतये भर ॥१७॥ ऋ. १।८।१

पदपाठः

आ । इन्द्र । सानसिम् । रयिम् । सऽजित्वानम् । सदाऽसहम् । वर्षिष्ठम् । ऊतये । भर ॥१७॥

हे **इन्द्र** ! ऊतये अस्माकं रक्षायै **रयिं** धनम् **आभर** आहर । कीदृशं रयिम् ? **सानसिं** संभजनीयम् । **सजित्वानं** समानशत्रुजयशीलम् । धनेन हि शूरान् भृत्यान् सम्पाद्य शत्रवो जीयन्ते । **सदासहं** सर्वदा शत्रूणामभिभवहेतुम् । **वर्षिष्ठम्** अतिशयेन वृद्धं प्रभूतमित्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नि येन मुष्टिहत्यया नि वृत्रा रुणधामहै ।
त्वोतासो न्यर्वता ॥१८॥ ऋ. १।८।२

पदपाठः

नि । येन । मुष्टिऽहत्यया । नि । वृत्रा । रुणधामहै । त्वाऽऊतासः । नि । अर्वता ॥१८॥

हे इन्द्र ! **येन** धनेन सम्पादितानां भटानां **नि मुष्टिहत्यया** नितरां मुष्टिप्रहारेण **वृत्रा** शत्रून् **निरुणधामहै** निरुद्धान् करवाम, तादृशं धनमाहरेमेत्यर्थः । **त्वोतासः** त्वया रक्षिता वयम् **अर्वता** अस्मदीयेन अश्वेन निरुणधामहै इत्यनुषङ्गः । पदातियुद्धेन अश्वयुद्धेन च शत्रून् विनाशयाम इत्यर्थः । मुष्टिहत्यया, 'हनस्त च' (पा० सू० ३।१।१०८) इति सुवन्ते उपपदे क्यप्, तत्संनियोगेन नकारस्य तकारः ।

इन्द्र त्वोतास आ वयं वज्रं घना ददीमहि ।
जयेम सं युधि स्पृधः ॥१९॥ ऋ. १।८।३

पदपाठः

इन्द्र । त्वाऽऊतासः । आ । वयम् । वज्रम् । घना । ददीमहि । जयेम । सम् । युधि । स्पृधः ॥१९॥

हे **इन्द्र** ! **त्वोतासः** त्वया रक्षिताः **वयं घना** घनं शत्रुप्रहरणाय अत्यन्तदृढं **वज्रम् आददीमहि** स्वीकुर्मः । तेन च वज्रेण **युधि** युद्धे **स्पृधः** स्पर्धमानान् शत्रून् **संजयेम** । सम्यक् जयेम । घना घनः काठिन्यम् । तदस्यास्तीति अर्श-आदित्वात् 'अर्श आदिभ्योऽच्' । (पा० ५।२।१२७) इत्यच् । सुपां सुलुक् इति च डादेशः ।

वयं शूरेभिरस्तृभिरिन्द्र त्वया युजा वयम् ।
सासह्याम पृतन्यतः ॥२०॥ ऋ. १।८।४

पदपाठः

वयम् । शूरेभिः । अस्तृऽभिः । इन्द्र । त्वया । युजा । वयम् । ससह्याम । पृतन्यतः ॥२०॥

वयं कर्मानुष्ठातारः **शूरेभिः** शौर्ययुक्तैः **अस्तृभिः** आयुधानां प्रक्षेतृभिः भटैः संयुज्येमहीति शेषः । हे **इन्द्र** ! तादृशाः भटसहिताः वयं **युजा** सहायभूतेन त्वया **पृतन्यतः** सेनामिच्छतः शत्रून् **सासह्याम** अतिशयेन अभिभवेम ।

इति षष्ठेऽनुवाके चतुर्थं सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकसप्ततितमं सूक्तम्

षोडशर्चस्यास्य सूक्तस्य मधुच्छदा ऋषिः। इन्द्रो देवता। गायत्री छन्दः।

'सं चोदय चित्रमर्वाक्' (अ० २०।७१।११) इत्यस्य 'विनियोगः प्रणेतारं वस्यो अच्छा' (अ० २०।४६) इत्यनेन सहोक्तः।

महाँ इन्द्रः परश्च नु महित्वमस्तु वज्रिणे।

द्यौर्न प्रथिना शवः ॥१॥ ऋ. १।८।५

पदपाठः

महान्। इन्द्रः। परः। च। नु। महिऽत्वम्। अस्तु। वज्रिणे। द्यौः। न। प्रथिना। शवः ॥१॥

अयम् **इन्द्रो महान्** वपुषा प्रौढः, **परश्च** गुणैरुत्कृष्टोऽप्यस्ति। **नु** किञ्च **वज्रिणे** वज्रयुक्तायेन्द्राय **महित्वं** सर्वविधमाधिक्यं सर्वदा **अस्तु** भवतु। स्वभावसिद्धस्याप्येषा प्रार्थना भक्त्यैव। किञ्च **द्यौर्न** द्युलोक इव **शवः** बलमिन्द्रस्य सेनारूपं **प्रथिना** प्रथिम्ना पृथुत्वेन युज्यतामिति शेषः। यथा द्युलोकः प्रभूतः एवमस्य सेना प्रभूता। नु शब्दो यद्यपि क्षिप्रनामसु (निघं० २।१५।१) पठितस्तथाप्यत्र तस्यान्वयाभावात् निपातत्वेन अनेकार्थत्वसम्भवाच्च समुच्चयार्थोऽत्र गृहीतः।

समोहे वा य आशत नरस्तोकस्य सनितौ।

विप्रासो वा धियायवः ॥२॥ ऋ. १।८।६

पदपाठः

सम्ऽओहे। वा। ये। आशत। नरः। तोकस्य। सनितौ। विप्रासः। वा। धियाऽयवः ॥२॥

ये **नरः** पुरुषाः **समोहे** सङ्ग्रामे **तोकस्य** अपत्यस्य **सनितौ वा** लाभे वा **आशत** व्याप्तवन्तः, इन्द्रं स्तुत्वेति शेषः। **वा** अथवा **विप्रासः** मेधाविनो **धियायवः** प्रज्ञाकामाः सन्तः **आशत** ते सर्वे लभन्ते इत्यध्याहारः। धियायवः, धि धारणे। धीयते धार्यते अवबुध्यते श्रुतमर्थजातम् अनया इति धिया प्रज्ञा, तामात्मनः इच्छन्तीति क्यच् 'क्याच्छन्दसि' (पा० ३।२।१७०) इति उप्रत्ययः। अतो लोपः।

यः कुक्षिः सोमपातमः समुद्र इव पिन्वते।

उर्वीरापो न काकुदः ॥३॥ ऋ. १।८।७

पदपाठः

यः। कुक्षिः। सोमऽपातमः। समुद्रःऽइव। पिन्वते। उर्वीः। आपः। न। काकुदः ॥३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यः कुक्षिः अस्येन्द्रस्य जठरप्रदेशः **सोमपातमः** अतिशयेन सोमस्य पाता, स कुक्षिः **समुद्र इव पिन्वते** वर्धते । सेचनार्थो धातुरौचित्येन वृद्धिं लक्षयति । **काकुदो** मुखसम्वन्धिन्यः **उर्वीः** प्रभूताः **आपो न** जलानीव । जिह्वासम्वन्धमास्योदकं यथा कदाचिदपि न शुष्यति तथेन्द्रस्य कुक्षिः सोमपूरितो न शुष्यतीत्यर्थः । यद्यपि वाङ्नामसु 'काकुत् जिह्वा' (निघं. १।११।२८) इति पठितं तथाप्युदकसम्वन्धसिद्धयेऽत्र काकुच्छब्देन मुखमुपलक्ष्यते । सम्वन्धवाचिनस्तद्धितस्यात्र छान्दसो लोपो द्रष्टव्यः ।

एवा ह्यस्य सूनृता विरप्शी गोमती मही ।
पक्वा शाखा न दाशुषे ॥४॥ ऋ. १।८।८

पदपाठः

एव । हि । अस्य । सूनृता । विऽरप्शी । गोमती । मही । पक्वा । शाखा । न । दाशुषे ॥३॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।६०।४) ।

एवा हि ते विभूतय ऊतय इन्द्र मावते ।
सद्यश्चित् सन्ति दाशुषे ॥५॥ ऋ. १।८।९

पदपाठः

एव । हि । ते । विऽभूतयः । ऊतयः । इन्द्र । माऽवते । सद्यः । चित् । सन्ति । दाशुषे ॥५॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।६०।५) ।

एवा ह्यस्य काम्या स्तोम उक्थं च शंस्या ।
इन्द्राय सोमपीतये ॥५॥ ऋ. १।८।१०

पदपाठः

एव । हि । अस्य । काम्या । स्तोमः । उक्थम् । च । शंस्या । इन्द्राय । सोमऽपीतये ॥६॥

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० २०।६०।६) ।

इन्द्रेहि मत्स्यन्धसो विश्वेभिः सोमपर्वभिः ।
महाँ अभिष्टिरोजसा ॥७॥ ऋ. १।९।१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

इन्द्र । आ । इहि । मत्सि । अन्धसः । विश्वेभिः । सोमपर्वऽभिः । महान् । अभिष्टिः । ओजसा ॥७॥

हे **इन्द्र ! एहि** अस्मिन् कर्मण्यागच्छ । आगत्य च **विश्वेभिः** सर्वैः **सोमपर्वभिः** सोमरसरूपैः **अन्धसः** अन्धोभिः अन्नैः **मत्सि** प्रमत्तो भूत्वा हृष्टो भव । तत ऊर्ध्वम् **ओजसा** बलेन **महान्** भूत्वा **अभिष्टिः** शत्रूणामभिभविता भव इति शेषः । ओजसा 'उब्जेर्बलेबलोपश्च' (उ० ४।६३१) इति असुन् ।

एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने ।

चक्रिं विश्वानि चक्रये ॥८॥ ऋ. १।९।२

पदपाठः

आ । ईम् । एनम् । सृजत । सुते । मन्दिम् । इन्द्राय । मन्दिने । चक्रिम् । विश्वानि । चक्रये ॥८॥

ईम् इत्यनर्थकः पादपूरणाय प्रयुक्तः । हे अध्वर्यवः ! **सुते** अभिषुते चमसस्थे सोमे **एनं** सोमम् **इन्द्राय** इन्द्रार्थम् **आ सृजत** पुनरभ्युन्नयत । कीदृशमेनम् ? **मन्दिं** हर्षहेतुं **चक्रिं** साधुकरणशीलम् । कीदृशाय इन्द्राय ? **मन्दिने** हर्षयुक्ताय, **विश्वानि** सर्वाणि कर्माणि **चक्रये** कृतवते । सर्वकर्मसम्पादकायेत्यर्थः । ईम् इत्यस्य पादपूरणार्थत्वं यास्कः प्राह—'अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पादपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति" (निरु. १।९) इति ।

मत्स्वा सुशिप्र मन्दिभिः स्तोमेभिर्विश्वचर्षणे ।

सचैषु सवनेष्वा ॥९॥ ऋ. १।९।३

पदपाठः

मत्स्व । सुऽशिप्र । मन्दिभिः । स्तोमेभिः । विश्वऽचर्षणे । सचा । एषु । सवनेषु । आ ॥९॥

हे **सुशिप्र !** शोभनहनो ! शोभननासिक ! वा । 'शिप्रे हनू नासिके वा' इति निरुक्तम् (६।१७) तादृश हे इन्द्र ! **मन्दिभिः** हर्षहेतुभिः **स्तोमेभिः** स्तोत्रैः **मत्स्व** हृष्टो भव । हे **विश्वचर्षणे** सर्वमनुष्ययुक्त ! सर्वैः यजमानैः पूज्य इत्यर्थः । तादृशेन्द्र ! त्वम् एषु यागगतेषु त्रिषु **सवनेषु सचा** देवैरन्यैः सह आगच्छेति शेषः ।

असृग्रमिन्द्र ते गिरः प्रति त्वामुदहासत ।

अजोषा वृषभं पतिम् ॥१०॥ ऋ. १।९।४

पदपाठः

असृग्रम् । इन्द्र । ते । गिरः । प्रति । त्वाम् । उत् । अहासत । अजोषाः । वृषभम् । पतिम् ॥१०॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे **इन्द्र ! ते गिरः** त्वदीयाः स्तुतीः **असृग्रं** सृष्टवानस्मि । ताश्च गिरः स्वर्गेऽवस्थितं **त्वां प्रति उदहासत** उद्गत्य प्राप्नुवन् । तादृशीर्गिरः त्वम् **अजोषाः** सेवितवानसि । कीदृशं त्वाम् ? **वृषभं** कामानां वर्षितारम् । **पतिं** सोमस्य पातारं, यजमानानां पालयितारं वा । 'पाता वा पालयिता वा' (इति निरुक्ते (४।२६) यास्केनोक्तत्वात् । पतिम् पा रक्षणे 'पातेर्डतिः' (उ० ४।४६७), डित्वात् टिलोपः ।

सं चोदय चित्रमर्वाग् राध इन्द्र वरेण्यम् ।
असदित् ते विभु प्रभु ॥११॥ ऋ. १।९।५

पदपाठः

सम् । चोदय । चित्रम् । अर्वाक् । राधः । इन्द्र । वरेण्यम् । असत् । इत् । ते । विऽभु । प्रऽभु ॥११॥

हे **इन्द्र ! वरेण्यं** श्रेष्ठं **राधो** धनं **चित्रं** मणिमुक्तादिरूपेण बहुविधम् **अर्वाक्** अस्मदभिमुखं यथा भवति तथा **सं चोदय** सम्यक् प्रेरय । भोगाय यावत् पर्याप्तं तावत् **विभु**शब्देनोच्यते । ततोऽप्यधिकं **प्रभु**शब्देन । तादृशं धनं **ते** तवैव **असदित्** अस्त्येव । तस्मादस्मभ्यं प्रयच्छेत्यर्थः । राधः राध्नुवन्ति अनेनेति राधो धनम् । 'सर्वधातुभ्योऽसुन्' (उ० ४।६२८) । वरेण्यम्, वृञ एण्यः ।

अस्मान्त्सु तत्र चोदयेन्द्र राये रभस्वतः ।
तुविद्युम्न यशस्वतः ॥१२॥ ऋ १।९।६

पदपाठः

अस्मान् । सु । तत्र । चोदय । इन्द्र । राये । रभस्वतः । तुविऽद्युम्न । यशस्वतः ॥१२॥

हे **तुविद्युम्न** प्रचुरधन इन्द्र ! **राये** धनाय **अस्मान्** अनुष्ठातृजनान् **तत्र** कर्मणि **सु चोदय** सुष्ठु प्रेरय । कीदृशानस्मान् ? **रभस्वतः** उद्योगवतः **यशस्वतः** कीर्तिमतश्च ।

सं गोमदिन्द्र वाजवदस्मे पृथुश्रवो बृहत् ।
विश्वायुर्धेह्यक्षितम् ॥१३॥ ऋ. १।९।७

पदपाठः

सम् । गोऽमत् । इन्द्र । वाजऽवत् । अस्मे इति । पृथु । श्रवः । बृहत् । विश्वऽआयुः । धेहि । अक्षितम् ॥१३॥

हे **इन्द्र ! श्रवो** धनम् **अस्मे सं धेहि** अस्मभ्यं सम्यक् प्रयच्छ । कीदृशं श्रवः ? **गोमत्** बह्वीभिर्गोभिरुपेतं, **वाजवत्** प्रभूतेनान्नेनोपेतं, **पृथु** परिमाणेनाधिकं, **बृहत्** गुणैरधिकं, **विश्वायुः** कृत्स्नायुष्कारणम् **अक्षितं** विनाशरहितञ्च ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्मे धेहि श्रवो बृहद् द्युम्नं सहस्रसातमम् ।
इन्द्र ता रथिनीरिषः ॥१४॥ ऋ. १।९।८

पदपाठः

अस्मे इति । धेहि । श्रवः । बृहत् । द्युम्नम् । सहस्रऽसातमम् । इन्द्र । ताः । रथिनीः । इषः ॥१४॥

हे **इन्द्र** ! **बृहत् श्रवः** महतीं कीर्तिम् **अस्मे** अस्मभ्यं **धेहि** प्रयच्छ तथा **सहस्रसातमम्** अतिशयेन सहस्रसङ्ख्यादानोपेतं **द्युम्नं** धनम् अस्मे धेहि तथा **ताः** व्रीहियवादिरूपेण प्रसिद्धाः **रथिनीः** बहुरथोपेताः **इषः** अन्नानि अस्मे धेहि। अस्मे 'सुपो सुलुक्' इत्यादिना शे आदेशः ।

वसोरिन्द्रं वसुपतिं गीर्भिर्गृणन्त ऋग्मियम् ।
होम गन्तारमूतये ॥१५॥ ऋ. १।९।९

पदपाठः

वसोः । इन्द्रम् । वसुऽपतिम् । गीःऽभिः । गृणन्तः । ऋग्मियम् । होम । गन्तारम् । ऊतये ॥१५॥

वसोः अस्मदीयस्य धनस्य **ऊतये** रक्षायै **इन्द्रं होम** वयम् आह्वयामः । किं कुर्वन्तः ? **गीर्भिः** स्तुतिभिः **गृणन्तः** स्तुवन्तः । कीदृशमिन्द्रम् ? **वसुपतिम्** धनपालकं **ऋग्मियम्** ऋचां मातारं **गन्तारं** यागदेशे गमनशीलम् । होम ह्वेञ् स्पर्धायां शब्दे च धातोर्लट् ।

सुतेसुते न्योकसे बृहद् बृहत एदरिः ।
इन्द्राय शूषमर्चति ॥१६॥ ऋ. १।९।१०

पदपाठः

सुतेऽसुते । निऽओकसे । बृहत् । बृहते । आ । इत् । अरिः । इन्द्राय । शूषम् । अर्चति ॥१६॥

आकार इच्छब्दश्च पादपूरणौ, यद्वा व्याप्तिवचन आकारः । इच्छब्दोऽपिशब्दार्थः । **आ इत् अरिः**, गच्छति अनुष्ठेयं कर्म प्राप्नोति इति अरिर्यजमानः । सर्वोऽपि यजमानः **इन्द्राय सुते सुते** इन्द्रार्थमभिषुते तत्तत्सोमे शूषं बलम् **अर्चति** स्तौति । इन्द्रस्य पराक्रमं प्रशंसतीत्यर्थः । कीदृशं शूषम् ? बृहत् प्रौढम्, कीदृशायेन्द्राय ? **न्योकसे** नियतस्थानाय, **बृहते** प्रौढाय च । इन्द्राय 'ऋज्रेन्द्र०' (उ० २।१८६) इत्यादिना रन् प्रत्ययः ।

इति षष्ठेऽनुवाके पञ्चमं सूक्तम् ।

इति षष्ठोऽनुवाकः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्विसप्ततितमं सूक्तम्

तृचस्यास्य सूक्तस्य परुच्छेप ऋषिः। इन्द्रो देवता। अत्यष्टिश्छन्दः।

पृष्ठचषडहस्य षष्ठेऽहनि 'विश्वेषु हि त्वा सवनेषु तुञ्जते' इत्यस्य विनियोगः 'वनेति हि सुन्वन् क्षयं परीणसः (अ० २०।६७) इत्यनेन सहोक्तः।

विश्वेषु हि त्वा सवनेषु तुञ्जते समानमेकं
वृषमण्यवः पृथक् स्वः सनिष्यवः पृथक्।
तं त्वा नावं न पर्षणिं शूषस्य धुरि धीमहि।
इन्द्रं न यज्ञैश्चितयन्त आयव स्तोमेभिरिन्द्रमायवः ॥१॥

ऋ. १।१३१।२

पदपाठः

विश्वेषु। हि त्वा। सवनेषु। तुञ्जते। समानम्। एकम्। वृषऽमन्यवः। पृथक्। स्वरिति स्वः। सनिष्यवः। पृथक्। तम्। त्वा। नावम्। न। पर्षणिम्। शूषस्य। धुरि। धीमहि। इन्द्रम्। न। यज्ञैः। चितयन्तः। आयवः। स्तोमेभिः। इन्द्रम्। आयवः ॥१॥

हे इन्द्र! **त्वा** त्वामेकमेव सन्तं **विश्वेषु** सर्वेषु **सवनेषु** तद्वत्सु एकाहाहीन-सत्ररूपेषु सर्वेषु सोमयागेषु यजमानाः **तुञ्जते** त्वरयन्ति हविरादीनि ददते। कीदृशं त्वाम्? **समानं** सर्वेषामेकरूपम्। कीदृशा यजमानाः? **वृषमण्यवः**, अभिमतवर्षणाय त्वामेव मन्यमानाः, **पृथक्** विविच्य स्वस्वयागे। किमिच्छन्तः? **स्वः** स्वर्गं सुखविशेषं वा, **सनिष्यवः** सम्भक्तुकामाः **पृथक्** तुञ्जते पृथगेव त्वरयन्ति। तुञ्जतिर्दानार्थः। 'शिक्षति तुञ्जते'' (नि० ३।२०।८) इति तन्नामसु पाठात्। **तं** तादृशं **त्वा** त्वां **शूषस्य** बलस्य सेनारूपस्य **धुरि** वहने तज्जयाय **धीमहि** स्थापयामः। यद्वा शूषस्य अस्मदीयशारीरबलस्य धुरि धीमहि। तत्र दृष्टान्तः, **पर्षणि नावं न** पारस्य सम्भक्त्रीं पूरयित्रीं वा फलस्य नावमिव। तां यथा भारवहने स्थापयन्ति। कीदृशा वयम्? **आयवः** मनुष्याः यजमानाः। **यज्ञैः** साधनैः **इन्द्रं न चितयन्तः** परमेश्वरमिव त्वां चेतयन्तः, परमेश्वरबुद्धया भावयन्तः इत्यर्थः। यद्वा नशब्दः एवकारार्थः। इन्द्रमेव त्वां जानन्तः तथा **स्तोमेभिः** स्तोत्रैः **इन्द्रम्** इन्द्रमेव **आयवः** गच्छन्तो वयं धीमहि। 'आयवः स्तोमेभिः' इति ऋक्पाठः'।

वि त्वा ततस्रे मिथुना अवस्यवो व्रजस्य साता
गव्यस्य निःसृजः सक्षन्त इन्द्र निःसृजः।
यद् गव्यन्ता द्वा जना स्वर्यन्ता समूहसि।
आविष्करिक्रद् वृषणं सचाभुवं वज्रमिन्द्र सचाभुवम् ॥२॥

ऋ. १।१३१।३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

वि । त्वा । ततस्रे । मिथुनाः । अवस्यवः । व्रजस्य । साता । गव्यस्य । निःऽसृजः । सक्षन्तः । इन्द्र । निःऽसृजः । यत् । गव्यन्ता । द्वा । जना । स्वः । यन्ता । सम्ऽऊहसि । आविः । करिक्रत् । वृषणम् । सचाऽभुवम् । वज्रम् । इन्द्र । सचाऽभुवम् ॥२॥

हे **इन्द्र ! त्वा** त्वामुद्दिश्य **मिथुनाः** सपत्नीकाः यजमानाः **विततस्रे** यज्ञं वितन्वते । यद्वा यज्ञे पयोव्रतादिना आत्मानम् उपक्षयन्ति । तसु उपक्षये, छान्दसे लिटि । 'इरयो रे' इति रेभावः । किमर्थम् ? **गव्यस्य व्रजस्य साता** गवां सम्बन्धिनो यूथस्य लाभे निमित्तभूते सति । न च सर्वत्र अग्निहोत्रादिनित्यवाक्येषु कारीरी-चित्रादिकाम्यवाक्येषु यस्योदयं यस्य गृहान् इत्यादिनैमित्तिकवाक्येषु पुरुषस्यैव अर्थित्वादेः सद्भावात् तस्यैवाधिकारः, स्त्रियास्तु सत्यप्यर्थित्वे अध्ययनाभावेन विद्वत्ताया अभावात् । अत एव सामर्थ्याभावाच्च नास्त्यधिकार इति वाच्यम् । यद्यपि स्त्रियाः नास्ति पृथगधिकारस्तथापि पूर्वमीमांसायां षष्ठेऽधिकाराध्याये तृतीय-चतुर्थाभ्यामधिकरणाभ्याम् अस्त्येव स्त्रिया अधिकारः, स च पत्या सहेति प्रपञ्चित-त्वात् 'जायापती अग्निमादधीयाताम्' इत्याधानविधानात्, स्मृतिषु च 'नास्ति स्त्रीणां पृथग् यज्ञो न व्रतम्' (मनु. ५।१५५) इति पृथगधिकारस्यैव निवारितत्वात् अस्त्येव स्त्रियाः पत्या सह अधिकारः । अध्ययनाभावेऽपि 'वेदं पत्न्यै प्रदाय वाचयेत्' (आश्व० श्रौ० १।११) इति सूत्रकारवचनात् 'पत्न्यन्वास्ते' इत्यादिविधिषु 'सुप्रजसस्त्वा वयम्' (तै. सं. १।१।१०।१) इत्यादिमन्त्रविधानात् यत्र वचनमस्ति तत्र अस्त्येव मन्त्रेऽधिकारः किं हि वचनेन कुर्यात्, नास्ति वचनस्यातिभारः इति न्यायात् । तस्मात् 'मिथुना यज्ञं ततस्रे' इत्येतद् युक्तम् । कीदृशास्ते ? **अवस्यवः** इन्द्राय आत्मने वा तृप्तिमिच्छन्तः, **निःसृजः** विशेषेण हविस्त्यजन्तः, **सक्षन्तः** सक्षतिर्गत्यर्थः । त्वां सम्भजमानाः । पुनस्त एव विशेष्यन्ते । **निःसृजः** फलप्रतिबन्धकं पापं निर्गमयन्तः । कस्तव विशेष इति तदुच्यते । **यत्** यस्माद्धेतोः **गव्यन्ता** गामात्मनः इच्छन्तौ, **स्वर्यन्ता** स्वर्गं गन्तुमुद्युक्तौ **द्वा जना** द्वौ जायापतिरूपौ जनौ **समूहसि** संयुक्तयोः एव अभिमतं स्वर्गादिकं प्रापयसि । यद्वा सम्यग् अनुष्ठितवन्तौ इत्यूहषि निश्चिनोषि । अतः पत्नीसहिता अनुतिष्ठन्तीत्यर्थः । किं च हे **इन्द्र** ! त्वं **वृषणं** वर्षकं कामानां, **सचाभुवं** सहैव उत्पन्नं त्वया अविनाभूतं तथा **सचाभुवं** शत्रुवधादि-व्यापारसामर्थ्येन सहैवोत्पन्नं **वज्रम् आविष्करिक्रत्** आविष्कुर्वन् वर्त्तसे इति शेषः ।

उतो नो अस्या उषसो जुषेत ह्यर्कस्य
बोधि हविषो हवीमभिः स्वर्षाता हवीमभिः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदिन्द्र हन्तवे मृधो वृषा वज्रिं चिकेतसि ।

आ मे अस्य वेधसो नवीयसो मन्म श्रुधि नवीयसः ॥३॥

ऋ. १।१३१।६

पदपाठः

उतो इति । नः । अस्याः । उषसः । जुषेत । हि । अर्कस्य । बोधि । हविषः । हवीमऽभिः । स्वःऽसाता । हवीमऽभिः । यत् । इन्द्र । हन्तवे । मृधः । वृषा । वज्रिन् । चिकेतसि । आ । मे । अस्य । वेधसः । नवीयसः । मन्म । श्रुधि । नवीयसः ॥३॥

अयमिन्द्रः **नः** अस्माकं सम्बन्धिनीम् **अस्याः उषसः** कर्मणि षष्ठी । एतामुषसं, सुत्याहःसम्बन्धिनमुषःकालम्, **उतो जुषेत** अपि नाम सेवेत ? उषस्येव अस्माकमयमिन्द्रो यज्ञं गच्छेदित्यर्थः । **हिः** पूरणार्थः । गत्वा च **अर्कस्य हविषः** । पूर्ववत् कर्मणि षष्ठी । अर्चनसाधनं हविः **हवीमभिः** हवनप्रकारविशेषैः दतं हविः उतो **बोधि** अपि नाम जानीहि । किञ्च **स्वर्षाता** स्वर्गस्यान्यस्य सुखविशेषस्य वा सम्भजनस्थाने यज्ञे **हवीमभिः** आह्वानैः आहूतो भवेति शेषः । अस्माभिराहूतः सन् उषस्येवागत्य हविः स्वीकरोषीत्यर्थः । कस्मादिदमुच्यते । **यत्** यस्मात् कारणात् हे **वज्रिन्** वज्रयुक्त इन्द्र ! **मृधः** हिंसकान् शत्रून् **हन्तवे** हन्तुं **वृषा** वर्षिता सन् कामानां, **चिकेतसि** अवबुध्यसे । तस्माद् ब्रूमः, हे **इन्द्र** ! **मे मन्म** मम मननीयं स्तोत्रं **आ श्रुधि** सर्वतः शृणु । कीदृशस्य मे ? **वेधसो** मेधाविनो **नवीयसः** नवतरस्य । दीक्षितसंस्कारैः संस्कृतत्वात् नवीयस्त्वम् । पुनर्विशेष्यते **नवीयसः** अतिशयेन नवनवतः असाधारणस्तुतिमतः । अत्र यजमानविशेषणैस्तत्कर्तृकं स्तोत्रमेव विशिष्टं भवति ।

इति सप्तमेऽनुवाके प्रथमं सूक्तम् ।

त्रिसप्ततितमं सूक्तम्

षड्ऋचस्यास्य सूक्तस्य प्रथमादितृचस्य वसिष्ठः, चतुर्थ्यादितृचस्य च वसुक्र ऋषी । इन्द्रो देवता । प्रथमादितृचस्य त्रिपदा विराडनुष्टुप्, चतुर्थी-पञ्चम्योर्ऋचोर्जगती, षष्ठ्याश्चाभिसारिणी त्रिष्टुप् छन्दांसि ।

पृष्ठ्यस्य चतुर्थेऽहनि 'तुभ्येदिमा सवना शूर विश्वा' इति पुरस्तात् सम्पातसूक्तात् षड् ऋच आवपते । तासां प्रथमास्तिस्र ऋच ऊर्धर्चशः शंसति । तदुक्तं वैताने—"चतुर्थे 'तुभ्येदिमा सवना शूर विश्वा' इति षट् पुरस्तात् संपाताः । 'तिस्रोऽर्धर्चशः" (वै० ३२।७) इति ।

तुभ्येदिमा सवना शूर विश्वा तुभ्यं

ब्रह्माणि वर्धना कृणोमि ।

त्वं नृभिर्हव्यो विश्वधाऽसि ॥१॥ ऋ. ७।२२।७

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

तुभ्य । इत् । इमा । सवना । शूर । विश्वा । तुभ्यम् । ब्रह्माणि । वर्धना । कृणोमि । त्वम् । नृऽभिः । हव्यः । विश्वधा । असि ॥१॥

हे **शूर** ! **तुभ्येत्** तुभ्यमेव **इमा** इमानि **विश्वा** विश्वानि **सवना** सोमाभिषवणानि, मया क्रियन्ते इति शेषः । **तुभ्यं** त्वदर्थमेव **वर्धना** वर्धनानि **ब्रह्माणि** स्तोत्राणि **कृणोमि** करोमि । **त्वमेव नृभिः** यज्ञनेतृभिः **विश्वधा** सर्वप्रकारैः **हव्यः** ह्वातव्यः स्तुत्यो वा **असि** ।

नू चिन्नु ते मन्यमानस्य दस्मोदश्नुवन्ति महिमानमुग्र ।
न वीर्यमिन्द्र ते न राधः ॥२॥ ऋ. ७।२२।८

पदपाठः

नु । चित् । नु । ते । मन्यमानस्य । दस्म । उत् अश्नुवन्ति । महिमानम् । उग्र । न । वीर्यम् । इन्द्र । ते । न । राधः ॥२॥

हे **दस्म** दर्शनीय ! **मन्यमानस्य** स्तूयमानस्य **ते** तव **महिमानम्** नु चित् इति प्रतिषेधार्थः । **नु** क्षिप्रं नु **चिद् उदश्नुवन्ति,** केचन न प्राप्नुवन्ति । हे **उग्र** उद्गूर्णबल ! **ते राधो** धनमपि **न उदश्नुवन्ति** ।

प्र वो महे महिवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् ।
विशः पूर्वीः प्र चरा चर्षणिप्राः ॥३॥ ऋ. ७।३१।१०

पदपाठः

प्र । वः । महे । महिऽवृधे । भरध्वम् । प्रचेऽतसे । प्र । सुमतिम् । कृणुध्वम् । विशः । पूर्वीः । प्र । चर । चर्षणिऽप्राः ॥३॥

हे मदीया जनाः ! **वः** यूयं **महिवृधे** महतां धनानां वर्धयित्रे **महे** महते इन्द्राय **प्र भरध्वं** सोमान् प्रणयत । **प्रचेतसे** प्रकृष्टमतये इन्द्राय **सुमतिं** सुष्ठुतिं च **प्रकृणुध्वं** प्रकुरुत । अथ प्रत्यक्षस्तुतिः । हे इन्द्र ! **चर्षणिप्राः** कामैः प्रजानां पूरयिता त्वं **पूर्वीः** हविषां पूरयित्रीः **विशः** प्रजाः **प्रचर** अभिगच्छ ।

यदा वज्रं हिरण्यमिदथा रथं
हरी यमस्य वहतो वि सूरिभिः ।
आ तिष्ठति मघवा सनश्रुत
इन्द्रो वाजस्य दीर्घश्रवसस्पतिः ॥४॥

पदपाठः

यदा । वज्रम् । हिरण्यम् । इत् । अथ । रथम् । हरी इति । यम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्य । वहतः । वि । सूरिऽभिः । आ । तिष्ठति । मघऽवा । सनऽश्रुतः । इन्द्रः । वाजस्य । दीर्घऽश्रवसः । पतिः ॥४॥

यदा इन्द्रो हिरण्यं हितरमणीयं वज्रं शत्रुहननाय गृण्हाति इति शेषः । इदिति पूरणः । अथ तदा अस्य इन्द्रस्य हरी अश्वौ यं रथं वहतः गन्तृप्रदेशं विशेषेण प्रापयतः मघवा धनी इन्द्रः सूरिभिः स्तोतृभिः सह तं रथम् आतिष्ठति आरोहति । कीदृशः ? सनश्रुतः चिरप्रख्यातः । दीर्घश्रवसः बहुकीर्त्तेः वाजस्य अन्नस्य पतिः स्वामी । एवम्भूतः इन्द्रस्तं रथमारोहति इत्यर्थः ।

सो चिन्नु वृष्टिर्यूथ्या स्वा सचाँ
इन्द्रः श्मश्रूणि हरिताभि प्रुष्णुते ।
अव वेति सुक्षयं सुते मधूदिद्
धूनोति वातो यथा वनम् ॥५॥ ऋ. १०।२३।४

पदपाठः

सो इति । चित् । नु । वृष्टिः । यूथ्या । स्वा । सचा । इन्द्रः । श्मश्रूणि । हरिता । अभि । प्रुष्णुते । अव । वेति । सुऽक्षयम् । सुते । मधु । उत् । इत् । धूनोति । वातः । यथा । वनम् ॥५॥

तच्छब्दश्रुतेर्यच्छब्दोऽध्याहर्त्तव्यः । या महती वृष्टिरस्ति सो सा वृष्टिः नु क्षिप्रम् । चित् इत्युपमार्थे । यथा सर्वं सिञ्चति तथा इन्द्रः स्वा स्वानि यूथ्या यूथानि मरुदादिगणलक्षणानि सचा सह स्वानि श्मश्रूणि च हरिता हरिद्वर्णेन सोमेन अभि प्रुष्णुते । अभिमुखं स्थित्वा क्षिप्रं सिञ्चति । सोमं पाययति पिबति चेत्यर्थः । अपि च सुक्षयं सुन्दरं यज्ञगृहम् अव वेति अभिगच्छति । गत्वा च सुते सोमे अभिषुते सति मधु मधुररसोपेतं सोमं पीत्वा, मत्तः सन् इति शेषः । उदिद् धूनोति स्वशरीरम् उत्कम्पयति । तत्र दृष्टान्तः । वातो वायुः यथा वनं वृक्षसमूहमुत्कम्पयति तद्वत् ।

यो वाचा विवाचो मृध्रवाचः
पुरू सहस्राऽशिवा जघान ।
तत्तदिदस्य पौंस्यं गृणीमसि
पितेव यस्तविषीं वावृधे शवः ॥६॥ ऋ. १०।२३।५

पदपाठः

यः । वाचा । विऽवाचः । मृध्रऽवाचः । पुरु । [सहस्रा । अशिवा । जघान । तत्ऽतत् । इत् । अस्य । पौंस्यम् । गृणीमसि । पिताऽइव । यः । तविषीम् । ववृधे । शवः ॥६॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यः इन्द्रो **वाचा** वाङ्मात्रेणैव **विवाचो** विविधवाचः स्वशत्रून् **मृध्रवाचः** हिंसितवाचः, कृत्वेति शेषः। पुरु बहूनि **अशिवा** असुखकराणि **सहस्रा** शत्रूणां सहस्राणि **जघान** हन्ति। अपि च **यः** इन्द्रः **पितेव** यथा पिता पुत्रस्य **तविषीं** बलमन्नप्रदानैः वर्धयति तथा वृष्टिद्वारा सर्वजगतो **शवो** वलं **वबृधे** वर्धयति। **अस्येन्द्रस्य तत्तदित्** तत्तदेव **पौंस्यं** वलं **गृणीमसि** स्तुमः। इन्द्रो येन वलेन शत्रून् हन्ति, तस्य तद्वलं वयं स्तुमः इत्यर्थः।

इति सप्तमेऽनुवाके द्वितीयं सूक्तम्।

चतुःसप्ततितमं सूक्तम्

सप्तर्चस्यास्य सूक्तस्य शुनःशेप ऋषिः। इन्द्रो देवता। पङ्क्तिश्छन्दः।

पृष्ठ्यस्य पञ्चमेऽहनि पुरस्तात् संपातात् पङ्क्तिश्छन्दस्कम् 'यच्चिद्धि सत्य सोमपाः' इति सूक्तम् आवपते। तस्य शंसनधर्ममपि सूत्रकार आह। तदुक्तं वैताने— 'पञ्चमे यच्चिद्धि सत्य सोमपाः' इति पाङ्क्तं सप्तर्चम्। द्वौ द्वाववसाय पञ्चमं सन्तनोति। त्रयं वावसाय द्वयम्" (वै० ३२।८)। अस्यार्थः—पाङ्क्तस्य एकैकस्य द्वौ द्वौ पादौ संहतौ अवसाय अर्धर्चशस्यवत् पञ्चमं पादं प्रणवेनोपसन्ततोति सम्बध्नाति। पादत्रयं संहतं वा अवसाय अन्त्यपादद्वयं संहतं प्रणवेनोपसन्तनोति इति।

यच्चिद्धि सत्य सोमपा
अनाशस्ता इव स्मसि।
आ तू न इन्द्र शंसय
गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥१॥ ऋ. १।२९।१

पदपाठः

यत्। चित्। हि। सत्य। सोमऽपाः। अनाशस्ताःऽइव। स्मसि। आ। तु। नः। इन्द्र। शंसय। गोषु। अश्वेषु। शुभ्रिषु। सहस्रेषु। तुविऽमघ ॥१॥

हे **सोमपाः** सोमस्य पातः इन्द्र! **सत्य** सत्यवादिन्! **यच्चिद्धि** यद्यपि वयम् **अनाशस्ता इव स्मसि** अप्रशस्ता इव भवामः, तथापि हे **तुवीमघ** वहुधन इन्द्र! त्वं **गोषु अश्वेषु शुभ्रिषु** शोभनेषु **सहस्रेषु** सहस्रसङ्ख्याकेषु च निमित्तभूतेषु नः अस्मान् **आ शंसय** सर्वतः प्रशस्तान् कुरु। अस्मद्दोषमनपेक्ष्य गवादीन् प्रयच्छेत्यर्थः।

शिप्रिन् वाजानां पते शचीवस्तव दंसना।
आ तू न इन्द्र शंसय
गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥२॥ ऋ. १।२९।२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

शिप्रिन् । वाजानाम् । पते । शचीऽवः । तव । दंसना । आ । तु । नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥२॥

हे **शचीवः** शक्तिमन्! **शिप्रिन्** शोभनहनूयुक्त! **वाजानां पते** अन्नानां पालक! **तव दंसना** कर्मविशेषोऽनुग्रहरूपः सर्वदा वर्त्तते। अन्यत् पूर्वमन्त्रवत्। 'शिप्रे हनू नासिके वा' इति निरुक्तम् (६।१७)।

नि ष्वापया मिथूदृशा सस्तामबुध्यमाने ।
आ तू न इन्द्र शंसय
गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥३॥ ऋ. १।२९।३

पदपाठः

नि । स्वापय । मिथुऽदृशा । सस्ताम् । अबुध्यमाने इति । आ । तु । नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥३॥

मिथुदृशा परस्परं सङ्गतत्वेन दृश्यमाने यमदूत्यौ **नि ष्वापय** नितरां सुप्ते कुरु। ते चास्मान् हन्तुम् **अबुध्यमाने** सत्यौ **सस्तां** निद्रां प्राप्नुताम्। शेषं पूर्ववत्।

ससन्तु त्या अरातयो बोधन्तु शूर रातयः ।
आ तू न इन्द्र शंसय
गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥४॥ ऋ. १।२९।४

पदपाठः

ससन्तु । त्याः । अरातयः । बोधन्तु । शूर । रातयः । आ । तु । नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥४॥

त्याः अस्माभिरदृश्यमानाः परोक्षास्ताः **अरातयः** अदानशीलाः शत्रवः **ससन्तु** निद्रां कुर्वन्तु। हे **शूर** शौर्ययुक्त **इन्द्र**! **रातयः** दानिनो बन्धवः **बोधन्तु** अस्मान् बुध्यन्ताम्। अन्यत् पूर्ववत्।

समिन्द्र गर्दभं मृण नुवन्तं पापयाऽमुया ।
आ तू न इन्द्र शंसय
गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥५॥ ऋ. १।२९।५

पदपाठः

सम् । इन्द्र । गर्दभम् । मृण । नुवन्तम् । पापया । अमुया । आ । तु । नः । इन्द्र । शंसय । गोषु । अश्वेषु । शुभ्रिषु । सहस्रेषु । तुविऽमघ ॥५॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे इन्द्र ! **अमुया** अनया अस्माभिः श्रूयमाणया **पापया** निन्दारूपया वाचा **नुवन्तं** स्तुवन्तम् अपकीर्त्तिं प्रकटयन्तमित्यर्थः। तादृशं **गर्दभं** गर्दभसमानवैरिणं **संमृण** सम्यक् मारय। यथा गर्दभः श्रोतुमशक्यं परुषं शब्दं करोति तथा शत्रुरपि। अन्यत् पूर्ववत्। गर्दभान्, नर्द गर्द शब्दे। 'कॄ गॄ शॄ शलिगर्दिभ्योऽभच्' (उ० ३।४०२) इत्यभच्।

पताति कुण्डृणाच्या दूरं वातो वनादधि।
आ तू न इन्द्र शंसय
गोष्वश्वेषु शुभ्रिसु सहस्रेषु तुवीमघ ॥६॥ ऋ. १।२६।६

पदपाठः

पताति। कुण्डृणाच्या। दूरम्। वातः। वनात्। अधि। आ। तु। नः। इन्द्र। शंसय। गोषु। अश्वेषु। शुभ्रिषु। सहस्रेषु। तुविऽमघ ॥६॥

वातः अस्मत्प्रतिकूलो वायुः **कुण्डृणाच्या** कुटिलगत्या स त्वस्मान् परित्यज्य **वनादधि** अरण्यादप्यधिकं दूरं देशं **पताति** पततु। अन्यत् पूर्ववत्। कुण्डृणाच्या, कुडि दाहे, अस्मात् ल्युडन्ते कुण्डनशब्दे डकारात् परस्य अकारस्य ऋकारश्छान्दसः। "ऋवर्णाच्चे'ति वक्तव्यम्' इति णत्वम्। तत् अञ्चति इति कुण्डृणाची। 'ऋत्विक्०' इत्यादिना क्विन्। 'अनिदिताम्०' इति न लोपे 'अञ्चतेश्चेति वक्तव्यम्' (पा. ४।१। ६२) इति ङीप्। 'अचः' (पा. ६।४।१३८) इत्यकारलोपः। 'चौ' (पा. ६।३।१३८) इत्यनेन च पूर्वपदस्य दीर्घत्वम्।

सर्वं परिक्रोशं जहि जम्भया कृकदाश्वम्।
आ तू न इन्द्र शंसय
गोष्वश्वेषु शुभ्रिषु सहस्रेषु तुवीमघ ॥७॥ ऋ. १।२६।७

पदपाठः

सर्वम्। परिऽक्रोशम्। जहि। जम्भय। कृकदाश्वऽम्। आ। तु। नः। इन्द्र। शंसय। गोषु। अश्वेषु। शुभ्रिषु। सहस्रेषु। तुविऽमघ ॥७॥

परिक्रोशम् अस्मद्विषये सर्वतः आक्रोशकर्त्तारं **सर्वं** जनं **जहि** मारय। **कृकदाश्वम्** अस्मद्विषये हिंसाप्रदं शत्रुं **जम्भय** मारय। अन्यत् पूर्ववत्। परिक्रोशम्, क्रुश आह्वाने। परितः क्रोशयतीति परिक्रोशः। पचाद्यच्।

इति सप्तमेऽनुवाके तृतीयं सूक्तम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पञ्चसप्ततितमं सूक्तम्

तृचस्यास्य सूक्तस्य परुच्छेप ऋषिः । इन्द्रो देवता । अत्यष्टिश्छन्दः ।

पृष्ठ्यस्य षष्ठेऽहनि पुरस्तात् सम्पातात् 'वि त्वा ततस्रे मिथुना अवस्यवः' इति तिस्रः सप्तपदा आवपते, सूत्रोक्तप्रकारेण प्रणवेनोपसन्तनोति च । यथोक्तं वैताने—"षष्ठे वि त्वा ततस्रे मिथुना अवस्यवः' इति सप्तपदानामेकैकमवसाय द्वयं सन्तनोति । द्वयमवसाय द्वयम्" (वै. ३२।६) अस्यायमर्थः–सप्तपदानां तिसृणामृचाम् एकैकस्यामृचि एकैकं पदम् अवसाय पदत्रयं प्रणवेनोपसन्तनोति । ततः परं पादद्वयमवसाय अपरं पादद्वयं प्रणवेन उपसन्तनोति ।

वि त्वा ततस्रे मिथुना अवस्यवो व्रजस्य
साता गव्यस्य निःसृजः सक्षन्त इन्द्र निःसृजः
यद् गव्यन्ता द्वा जना स्वऽर्यन्ता समूहसि ।
आविष्करिक्रद् वृषणं सचाभुवं
वज्रमिन्द्र सचाभुवम् ॥१॥ ऋ. १।१३१।३

पदपाठः

वि । त्वा । ततस्रे । मिथुनाः । अवस्यवः । व्रजस्य । साता । गव्यस्य । निःऽसृजः । सक्षन्तः । इन्द्र । निःऽसृजः । यत् । गव्यन्ता । द्वा । जना । स्वः । यन्ता । सम्ऽऊहसि । आविः । करिक्रत् । वृषणम् । सचाऽभुवम् । वज्रम् । इन्द्र । सचाऽभुवम् ॥१॥

व्याख्यातोऽयं मन्त्रः (अथर्व. २०।७२।२) ।

विदुष्टे अस्य वीर्यस्य पूरवः पुरो यदिन्द्र
शारदीरवातिरः सासहानो अवातिरः ।
शासस्तमिन्द्र मर्त्यमयज्युं शवसस्पते ।
महीममुष्णाः पृथिवीमिमा
अपो मन्दसान इमा अपः ॥२॥ ऋ. १।१३१।४

पदपाठः

विदुः । ते । अस्य । वीर्यऽस्य । पूरवः । पुरः । यत् । इन्द्र । शारदीः । अवऽअतिरः । ससहानः । अवऽअतिरः । शासः । तम् । इन्द्र । मर्त्यम् । अयज्युम् । शवसः । पते । महीम् । अमुष्णाः । पृथिवीम् । इमाः । अपः । मन्दसानः । इमाः । अपः ॥२॥

हे इन्द्र ! ते **अस्य वीर्यस्य** तवास्य वीर्यस्य । कर्मणि षष्ठी । वक्ष्यमाणमेतद् वीर्यं विदुः । ये **पूरवः** मनुष्याः यजमानास्तव महत्त्वं जानानाः त्वामेव यजन्ति ते

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विदुः। यद्वा अस्य वीर्यस्य माहात्म्यमिति शेषः। वीर्यमेव विशेष्यते। हे इन्द्र! **यत्** यस्मात् हेतोः **शारदीः** संवत्सरसम्बन्धिनीः संवत्सरपर्यन्तं प्राकारपरिखादिभिः दृढीकृताः **पुरः** शत्रूणां नगराणि **अवातिरः** अनाशयः। किं कुर्वन्? **ससहानः**, तत्रत्यान् अभिभवन्। धनाद्यपहरणेन पीडयन् अवातिरः। किञ्च हे **इन्द्र! तं मर्त्यं** मरणधर्माणम् **अयज्युम्** अयष्टारं यज्ञविघातिनं, **शासः** निगृहीतवानसि। हे **शवसस्पते** बलपालकेन्द्र! त्वं **महीं** महतीं पृथ्वीम् **इमाः अपः** च **अमुष्णाः** बलात् अपहृतवानसि। असुरादिभिः आक्रान्तां भूमिं तत्सम्बन्धिनीरपः च तेषां पुराणि भित्वा अपहृतवानसीत्यर्थः? किं दुःखेन? नेत्याह। **मन्दसानः** हृष्यन्नेव **इमाः अपः** इमानि अप्कार्याणि व्रीह्याद्यन्नानि अमुष्णाः लब्धवानसीति।

आदित् ते अस्य वीर्यस्य चर्किरन्मदेषु
वृषन्नुशिजो यदाविथ सखीयतो यदाविथ।
चकर्थ कारमेभ्यः पृतनासु प्रवन्तवे।
ते अन्यामन्यां नद्यं सनिष्णत
श्रवस्यन्तः सनिष्णत ॥३॥ ऋ. १।१३१।५

पदपाठः

आत्। इत्। ते। अस्य। वीर्यऽस्य। चर्किरन्। मदेषु। वृषन्। उशिजः। यत्। आविथ। सखिऽयतः। यत्। आविथ। चकर्थ। कारम्। एभ्यः। पृतनासु। प्रऽवन्तवे। ते। अन्याम्ऽअन्याम्। नद्यम्। सनिष्णत। श्रवस्यन्तः। सनिष्णत ॥३॥

हे इन्द्र! **आत्** अत एव हेतोः **ते अस्य वीर्यस्य** तव सम्बन्धिने वीर्याय तदभिवृद्धये **चर्किरन्** पुनः पुनः सोमं विकिरन्ति। सर्वेषु सवनेषु वितरन्ति यजमानाः। अत इत्युक्तं कुत इत्याह। **मदेषु वृषन्** सोमजनितेषु मदेषु सत्सु हे कामानां वर्षितः! **उशिजः** त्वां कामयमानान् **यत्** यतः कारणात् **आविथ** रक्षसि। किञ्च **सखीयतः** तव सख्यमात्मन इच्छतोऽस्मान् **यत्** यस्मात् **आविथ** तर्पयसि अभिमतेन अतश्चर्किरन्। किञ्च हे इन्द्र! **एभ्यो** यजमानेभ्यः **कारं** शब्दं सिंहनादलक्षणम् कारं करोतेः कर्मणि घञ्। **चकर्थ** करोषि। कुत्रेति तदुच्यते। **पृतनासु** सङ्ग्रामेषु। किमर्थं? **प्रवन्तवे** प्रकर्षेण वनितुं सम्भक्तुम्। युद्धाय हि धीराः सम्भजन्ते। किञ्च **ते** तव सङ्ग्रामवासिनः त्वयि **अन्यामन्याम्** अन्यांश्चान्यांश्च अन्यमन्यं प्रति, कर्मव्यतिहारे सर्वनाम्नो द्विवचनम्। **नद्यं** सन्तोषं समृद्धिम् **सनिष्णत** सम्भजन्ते तथा **श्रवस्यन्तः** अन्नमिच्छन्तो जयाल्लब्धमन्नं काङ्क्षन्तः सनिष्णत सम्भजन्ते।

इति सप्तमेऽनुवाके चतुर्थं सूक्तम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षट्सप्ततितमं सूक्तम्

अष्टर्चस्यास्य सूक्तस्य वसुक्र ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ।

पृष्ठ्यस्य षष्ठेऽहन्येव पूर्वोक्तसप्तपदाभ्योऽनन्तरं पुरस्तात् सम्पातात् 'वने न वा' इत्यष्टर्चम् आवपते । उक्तं च वैताने--"वने न वा यो न्यधायि चाकन् इत्यष्टर्चम् च" (वै० ३२।१०) इति ।

तथा छन्दोमानां द्वितीयतृतीययोरह्नोः माध्यन्दिने सवने उपरिष्टात् सम्पातात् अष्टर्चम् (२०।७६) 'आ सत्यो यातु मघवाँ ऋजीषी' (२०।७७) इति सूक्तं चावपते । उक्तं हि वैताने--"उत्तरयोरष्टर्चम् 'आ सत्यो यातु मघवाँ ऋजीषी' इति चावपते" (वै० ३३।१७) इति । 'वने न वा यो न्यधायि चाकन्' इत्यस्य अष्टर्चम् इति संज्ञा ।

वने न वा यो न्यधायि चाकं-
छुचिर्वां स्तोमो भुरणावजीगः ।
यस्येदिन्द्रः पुरुदिनेषु होता
नृणां नर्यो नृतमः क्षपावान् ॥१॥ ऋ. १०।२९।१

पदपाठः

वने । न । वा । यः । नि । अधायि । चाकन् । शुचिः । वाम् । स्तोमः । भुरणौ । अजीगरिति । यस्य । इत् । इन्द्रः । पुरुऽदिनेषु । होता । नृणाम् । नर्यः । नृऽतमः । क्षपाऽवान् ॥१॥

वने न वायो न्यधायि वने इव वृक्षे इव शकुनिः स्वे नीडे वायमात्मीयं पुत्रं न्यधायि निदधाति शिशुकमजातपक्षम् । स यथा तत्र निहितः **चाकन्** पश्यन् भयाद् दिशो निरीक्षमाण आसीत् । अथवा कामयमानस्तदुत्सुकमना आसीत् । एवमयमस्मासु वृक्षस्य नीडभूतेषु शकुनिपुत्रभूतः **शुचिः** व्यपगतसर्वदोषो **वां** युवयोः स्वभूतः **स्तोमः** हे **भुरणौ** भर्त्तारौ अश्विनौ शीघ्रौ वा **अजीगः** गच्छति । किञ्च **यस्य** स्तोमस्य **पुरुदिनेषु** बहुषु दिवसेषु **इन्द्रः होता** इन्द्रोऽपि आह्वाता भवति ममायं स्तोमः स्यादिति । किंलक्षणः पुनरिन्द्र आह्वाता ? यो **नृणां** मनुष्याणां **नृतमः** मनुष्याणामपि मनुष्यतमः । शूराणामपि शूर इत्यर्थः । **नर्यः** च नृभ्यो हितो यः **क्षपावान्** च रात्रिपर्यायेषु सोमभागः । एवं गुणयुक्तेन यः स्तोम इन्द्रेणापि प्रार्थ्यते अस्मासु वर्त्तमानः स युवां प्रति **अजीगः** सदैव गच्छतीत्यर्थः । एवं तावदेतामृचम् आश्विनी इति कृत्वा व्याचक्षते तदसाधु । ऐन्द्रे हि सूक्ते प्रथमैवेयं भवति । तच्च पुनः पृष्ठ्यस्य षष्ठेऽहनि स्तोमे वर्धमाने माध्यन्दिने सवने ब्राह्मणाच्छंसिनः शस्त्रे विनियुज्यते । हे भुरणौ ! भर्त्तारौ देवानां पती य एष स्तोमोऽस्मासु निहितः शुचिर्व्यपगतदोषः शकुनिपुत्र इव वने वनावयवे वृक्षे चाकन् पश्यन्निव कामयमान इव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वेन्द्रमास्ते । यस्य स्तोमस्य किमिति । यस्येन्द्रः पुरुदिनेषु बहुषु अहःसु आह्वाताऽभूत् अपि नाम मामनेन स्तोमेन स्तुयुरिति । किंलक्षणः पुनराह्वाता ? यस्येदिन्द्र इति नृणां नृतमः नर्यश्च क्षपावांश्च समानमेतत् पूर्वेण अर्थेन । यमेवमिन्द्रः प्रार्थयते स एष स्तोमस्तं प्रत्यजीगः गच्छतीत्यर्थः । अथवा स एष स्तोमोऽस्माभिरुदीर्यमाण-स्तस्येन्द्रस्य गुणग्रहणं करोतीति स्यात् । जिगर्तिर्ग्रहणार्थ इति निरुक्तम् (६।८) इति ।

प्र ते अस्या उषसः प्रापरस्या
नृतौ स्याम नृतमस्य नृणाम् ।
अनु त्रिशोकः शतमावहन्नॄन्
कुत्सेन रथो यो असत् ससवान् ॥२॥ ऋ. १०।२९।२

पदपाठः

प्र । ते । अस्याः । उषसः । प्र । अपरस्याः । नृतौ । स्याम । नृऽतमस्य । नृणाम् । अनु । त्रिऽशोकः । शतम् । आ । अवहत् । नॄन् । कुत्सेन । रथः । यः । असत् । ससऽवान् ॥२॥

अस्या उषसः नृतौ 'नृ नये' नयने प्रापणे, उदयकाले इत्यर्थः । **नृणां** नेतृजनानां मध्ये **नृतमस्य** अतिशयेन नेतुः **ते** तवेन्द्रस्य स्तुत्या यागेन च **प्र स्याम** वयं प्रकृष्टा भवेम । तथा हे इन्द्र ! **अपरस्याः** आगामिन्याश्चोषसः नृतौ नयने प्रापणेऽपि तव स्तुत्या यागेन च वयं प्रकृष्टा भवेम । किञ्च **त्रिशोकः** नामर्षिः हे इन्द्र ! त्वामाराध्य **शतं** बहून् **अनु** अनुचरभूतान् **नॄन्** मनुष्यान् **आ अवहत्** लब्धवानित्यर्थः, तथा तव कुत्सस्य च **ससवान्** सनिता युगपदेव संभक्त्या **यो** रथः **असत्** अस्ति स **रथः कुत्सेन** लब्ध इति शेषः । यथा च मन्त्रान्तरे पठ्यते – 'यासि कुत्सेन सरथमवस्युः' (ऋ. ४।१६।११) इति । अतः त्वत्प्रसादाद्वयमपि प्रकृष्टा भवेमेत्यर्थः ।

कस्ते मद इन्द्र रन्त्यो भूद्-
दुरो गिरो अभ्युग्रो वि धाव ।
कद् वाहो अर्वागुप मा मनीषा
आ त्वा शक्यामुपमं राधो अन्नैः ॥३॥ ऋ. १०।२९।३

पदपाठः

कः । ते । मदः । इन्द्र । रन्त्यः । भूत् । दुरः । गिरः । अभि । उग्रः । वि । धाव । कत् । वाहः । अर्वाक् । उप । मा । मनीषा । आ । त्वा । शक्याम् । उपऽमम् । राधः । अन्नैः ॥३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षट्सप्ततितमं सूक्तम्

अष्टर्चस्यास्य सूक्तस्य वसुक्र ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ।

पृष्ठ्यस्य षष्ठेऽहन्येव पूर्वोक्तसप्तपदाभ्योऽनन्तरं पुरस्तात् सम्पातात् 'वने न वा' इत्यष्टर्चम् आवपते । उक्तं च वैताने--"वने न वा यो न्यधायि चाकन् इत्यष्टर्चम् च" (वै० ३२।१०) इति ।

तथा छन्दोमानां द्वितीयतृतीययोरह्नोः माध्यन्दिने सवने उपरिष्टात् सम्पातात् अष्टर्चम् (२०।७६) 'आ सत्यो यातु मघवाँ ऋजीषी' (२०।७७) इति सूक्तं चावपते । उक्तं हि वैताने--"उत्तरयोरष्टर्चम् 'आ सत्यो यातु मघवाँ ऋजीषी' इति चावपते" (वै० ३३।१७) इति । 'वने न वा यो न्यधायि चाकन्' इत्यस्य अष्टर्चम् इति संज्ञा ।

वने न वा यो न्यधायि चाकं-
छुचिर्वां स्तोमो भुरणावजीगः ।
यस्येदिन्द्रः पुरुदिनेषु होता
नृणां नर्यो नृतमः क्षपावान् ॥१॥ ऋ. १०।२९।१

पदपाठः

वने । न । वा । यः । नि । अधायि । चाकन् । शुचिः । वाम् । स्तोमः । भुरणौ । अजीगरिति । यस्य । इत् । इन्द्रः । पुरुऽदिनेषु । होता । नृणाम् । नर्यः । नृऽतमः । क्षपाऽवान् ॥१॥

वने न वायो न्यधायि वने इव वृक्षे इव शकुनिः स्वे नीडे वायमात्मीयं पुत्रं न्यधायि निदधाति शिशुकमजातपक्षम् । स यथा तत्र निहितः **चाकन्** पश्यन् भयाद् दिशो निरीक्षमाण आसीत् । अथवा कामयमानस्तदुत्सुकमना आसीत् । एवमयमस्मासु वृक्षस्य नीडभूतेषु शकुनिपुत्रभूतः **शुचिः** व्यपगतसर्वदोषो **वां** युवयोः स्वभूतः **स्तोमः** हे **भुरणौ** भर्त्तारौ अश्विनौ शीघ्रौ वा **अजीगः** गच्छति । किञ्च **यस्य** स्तोमस्य **पुरुदिनेषु** बहुषु दिवसेषु **इन्द्रः होता** इन्द्रोऽपि आह्वाता भवति ममायं स्तोमः स्यादिति । किंलक्षणः पुनरिन्द्र आह्वाता ? यो **नृणां** मनुष्याणां **नृतमः** मनुष्याणामपि मनुष्यतमः । शूराणामपि शूर इत्यर्थः । **नर्यः** च नृभ्यो हितो यः **क्षपावान्** च रात्रिपर्यायेषु सोमभागः । एवं गुणयुक्तेन यः स्तोम इन्द्रेणापि प्राथ्यते अस्मासु वर्त्तमानः स युवां प्रति **अजीगः** सदैव गच्छतीत्यर्थः । एवं तावदेतामृचम् आश्विनी इति कृत्वा व्याचक्षते तदसाधु । ऐन्द्रे हि सूक्ते प्रथमैवेयं भवति । तच्च पुनः पृष्ठ्यस्य षष्ठेऽहनि स्तोमे वर्धमाने माध्यन्दिने सवने ब्राह्मणाच्छंसिनः शस्त्रे विनियुज्यते । हे भुरणौ ! भर्त्तारौ देवानां पती य एष स्तोमोऽस्मासु निहितः शुचिर्व्यपगतदोषः शकुनिपुत्र इव वने वनावयवे वृक्षे चाकन् पश्यन्निव कामयमान इव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वेन्द्रमास्ते । यस्य स्तोमस्य किमिति । यस्येन्द्रः पुरुदिनेषु बहुषु अहःसु आह्वाताऽभूत् अपि नाम मामनेन स्तोमेन स्तुयुरिति । किंलक्षणः पुनराह्वाता ? यस्येदिन्द्र इति नृणां नृतमः नर्यश्च क्षपावांश्च समानमेतत् पूर्वेण अर्थेन । यमेवमिन्द्रः प्रार्थयते स एष स्तोमस्तं प्रत्यजीगः गच्छतीत्यर्थः । अथवा स एष स्तोमोऽस्माभिरुदीर्यमाण-स्तस्येन्द्रस्य गुणग्रहणं करोतीति स्यात् । जिगर्तिर्ग्रहणार्थ इति निरुक्तम् (६।८) इति ।

प्र ते अस्या उषसः प्रापरस्या
नृतौ स्याम नृतमस्य नृणाम् ।
अनु त्रिशोकः शतमावहन्नॄन्
कुत्सेन रथो यो असत् ससवान् ॥२॥ ऋ. १०।२९।२

पदपाठः

प्र । ते । अस्याः । उषसः । प्र । अपरस्याः । नृतौ । स्याम । नृऽतमस्य । नृणाम् । अनु । त्रिऽशोकः । शतम् । आ । अवहत् । नॄन् । कुत्सेन । रथः । यः । असत् । ससऽवान् ॥२॥

अस्या उषसः नृतौ 'नृ नये' नयने प्रापणे, उदयकाले इत्यर्थः । **नृणां** नेतृजनानां मध्ये **नृतमस्य** अतिशयेन नेतुः **ते** तवेन्द्रस्य स्तुत्या यागेन च **प्र स्याम** वयं प्रकृष्टा भवेम । तथा हे इन्द्र ! **अपरस्याः** आगामिन्याश्चोषसः नृतौ नयने प्रापणेऽपि तव स्तुत्या यागेन च वयं प्रकृष्टा भवेम । किञ्च **त्रिशोकः** नामर्षिः हे इन्द्र ! त्वामाराध्य **शतं** बहून् **अनु** अनुचरभूतान् **नॄन्** मनुष्यान् **आ अवहत्** लब्धवानित्यर्थः, तथा तव कुत्सस्य च **ससवान्** सनिता युगपदेव संभक्त्या **यो** रथः **असत्** अस्ति स **रथः कुत्सेन** लब्ध इति शेषः । यथा च मन्त्रान्तरे पठ्यते – 'यासि कुत्सेन सरथमवस्युः' (ऋ. ४।१६।११) इति । अतः त्वत्प्रसादाद्वयमपि प्रकृष्टा भवेमेत्यर्थः ।

कस्ते मद इन्द्र रन्त्यो भूद्-
दुरो गिरो अभ्युग्रो वि धाव ।
कद् वाहो अर्वागुप मा मनीषा
आ त्वा शक्यामुपमं राधो अन्नैः ॥३॥ ऋ. १०।२९।३

पदपाठः

कः । ते । मदः । इन्द्र । रन्त्यः । भूत् । दुरः । गिरः । अभि । उग्रः । वि । धाव । कत् । वाहः । अर्वाक् । उप । मा । मनीषा । आ । त्वा । शक्याम् । उपऽमम् । राधः । अन्नैः ॥३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे **इन्द्र** ! **ते** तवेषन्मध्यमोत्तमानां सोमजन्यमदानां मध्ये **कः** मदः **रन्त्यः** रमयिता प्रीतिकरः **भूत्** भवति ? त्वत्प्रीतिकरमदयोग्यसोमदानाभिप्रायेणायं प्रश्नः । **उग्रः** ओजस्वी त्वं **दुरो** यक्षगृहद्वाराणि **गिरः** स्तुतिलक्षणा वाचश्च **अभि वि धाव** अभ्यागच्छ । किञ्च **कत्** कदा **वाहः**, इन्द्रं प्रत्युह्यते इति वाहः सोम उच्यते । एवम्भूतः सः **अर्वाक्** त्वत्प्रसादात् फलदानाय अस्मदभिमुखो भविष्यति इति शेषः । अपि च कदा **मनीषा** सर्वार्थदर्शिनी प्रज्ञा सर्वगुणग्राहिणी स्तुतिर्वा **मा** मां त्वत्कृपया **उप** गमिष्यतीति शेषः । कदा हे इन्द्र ! **त्वा** त्वाम् **आ** इत्युपसर्गश्रुते-योग्यपदाध्याहारः । आराध्य वयम् **अन्नैः** सह **राधो** धनम् **उपमं** मत्समीपं **शक्याम्** । शकिरत्र गत्यर्थोऽन्तर्भावितण्यर्थः । सङ्गमयेयम् ।

कदु द्युम्नमिन्द्र त्वावतो नॄन्
कया धिया करसे कन्न आगन् ।
मित्रो न सत्य उरुगाय भृत्या
अन्ने समस्य यदसन् मनीषाः ॥४॥ ऋ. १०।२९।४

पदपाठः

कत् । ऊं इति । द्युम्नम् । इन्द्र । त्वाऽवतः । नॄन् । कया । धिया । करसे । कत् । नः । आ । अगन् । मित्रः । न । सत्यः । उरुऽगाय । भृत्यै । अन्ने । समस्य । यत् । असन् । मनीषाः ॥४॥

हे **इन्द्र** ! त्वं **कद् उ** कदा वा **द्युम्नं** हविर्लक्षणमन्नं भुक्त्वेति शेषः । **कया धिया** केन कर्मणा **नॄन्** नेतृजनान् **अस्मान् त्वावतः करसे** त्वत्सदृशान् करिष्यसि । **कत्** कदा **नः** अस्मान् प्रति **आगन्** आगमिष्यसि । **सत्यः** अनवद्यः इत्यर्थः । **मित्रो न** सखेव । तथा हे **उरुगाय** बहुकीर्त्त इन्द्र ! त्वं **भृत्यै** भरणाय पोषणाय भवसीति शेषः । **यत्** यदा **समस्य** अस्मदादिकस्य सर्वस्य जगतः **अन्ने** जगत्स्थितिनिमित्ते आहारे **मनीषाः** अन्नाभिलक्षणा बुद्धयः **असन्** भवेयुः तदा सर्वस्य पोषणाय त्वं भवसीत्यर्थः ।

प्रेरय सूरो अर्थं न पारं ये
अस्य कामं जनिधा इव ग्मन् ।
गिरश्च ये ते तुविजात पूर्वी-
र्नर इन्द्र प्रतिशिक्षन्त्यन्नैः ॥५॥ ऋ. १०।२९।५

पदपाठः

प्र । ईरय । सूरः । अर्थम् । न । पारम् । ये । अस्य । कामम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जनिधाःऽइव । ग्मन् । गिरः । च । ये । ते । तुविऽजात । पूर्वीः । नरः । इन्द्र । प्रतिऽशिक्षन्ति । अन्नैः ॥५॥

सूरः सूर्यः **अर्थं न** यथार्त्तारं गन्तारं योगिनमनुकम्पयन् **पारं** संसारस्यान्तमपवर्गं गमयति तथा हे इन्द्र ! त्वं यजमानान् संसारस्यान्तं प्रेरय । **ये** अस्मदादयो यजमाना **अस्य** तवेन्द्रस्य **कामं** सोमपानेच्छां **ग्मन्** । गमिरत्र विपूर्वोऽन्तर्भावितण्यर्थश्च द्रष्टव्यः । विगमयन्ति । महता सोमपानेनापनयन्ति । तत्र दृष्टान्तः । **जनिधा इव** जनीनां जायानां सम्भोगकाले शय्यासु धारयितारः पतयो यथा प्रभूतसम्भोगप्रदानेन मैथुनेच्छामपनयन्ति तद्वत् । किञ्च **नरो** नेतारोऽस्मदादयो **ये** यजमानाः हे **तुविजात** बहुरूप सर्वात्मन् **इन्द्र** ! **ते** तुभ्यं **पूर्वीः** अनादिकालप्रवृत्ता **गिरश्च** स्तुतिरूपा वाचश्च **अन्नैः** हविभिः सह **प्रतिशिक्षन्ति** प्रतिकालं प्रयच्छन्ति तानस्मदीयान् यजमानान् पारं गमयेति पूर्वेण सम्बन्धः ।

मात्रे नु ते सुमिते इन्द्र पूर्वी
द्यौर्मज्मना पृथिवी काव्येन ।
वराय ते घृतवन्तः सुतासः
स्वाद्मन् भवन्तु पीतये मधूनि ॥६॥ ऋ. १०।२६।६

पदपाठः

मात्रे इति । नु । ते । सुमिते इति सुऽमिते । इन्द्र । पूर्वी इति । द्यौः । मज्मना । पृथिवी । काव्येन । वराय । ते । घृतऽवन्तः । सुतासः । स्वाद्मन् । भवन्तु । पीतये । मधूनि ॥६॥

हे **इन्द्र** ! **ते** स्वभूतेन **मज्मना** शत्रूणां मज्जकेन **काव्येन** कर्मणा **द्यौः पृथिवी** द्यावापृथिव्यौ **इमे नु** क्षिप्रं **सुमिते** निर्मिते । कीदृश्यौ ? **मात्रे** निर्मात्र्यौ, **पूर्वी** पूर्व्यौ महत्यौ । यस्मादीदृशेन महत्त्वेन युक्तस्तस्मात् **घृतवन्तः** अग्निमुखत्वात् त्वां क्षरन्तो दीप्तिमन्तो वा सुसंस्कृतत्वात् यद्वाज्यसंयुक्ताः **सुतासः** अभिषुताः सोमाः **वराय** श्रेष्ठाय ते तुभ्यमिन्द्राय **स्वाद्मन्** भवन्तु, अस्माभिर्दत्ताः सन्तु । किमर्थम् ? **पीतये** पानाय । **मधूनि** मधुररसमयानि पुरोडाशादीनि हवींषि भक्षणार्थं दत्तानि भवन्तु ।

आ मध्वो अस्मा असिचन्नमत्र-
मिन्द्राय पूर्णं स हि सत्यराधाः ।
स वावृधे वरिमन्ना पृथिव्या
अभि क्रत्वा नर्यः पौंस्यैश्च ॥७॥ ऋ. १०।२६।७

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

आ । मध्वः । अस्मै । असिचन् । अमत्रम् । इन्द्राय । पूर्णम् । सः । हि । सत्यऽराधाः । सः । ववृधे । वरिमन् । आ । पृथिव्याः । अभि । क्रत्वा । नर्यः । पौंस्यैः । च ॥७॥

अस्मै इन्द्राय **मध्वः** मधुरस्य सोमस्य **पूर्णम् अमत्रं** ग्रहचमसादिकं पात्रम् **आ असिचन्** आभिमुख्येन स्थित्वा ऋत्विजः सिक्तवन्तः, अग्नौ प्रक्षिप्तवन्तः । **हि** यस्मात् कारणात् **सः** इन्द्रः **सत्यराधाः** सत्यधनः । तस्मादसिचन्निति सम्बन्धः । अग्नावासिक्तेन तेन पात्रेण तृप्तः **स** इन्द्रः **पृथिव्याः** अन्तरिक्षस्य **वरिमन्** अतिशयेन विस्तीर्णे स्थाने आगत्य **अभिववृधे** अभिवर्धते । कीदृश इन्द्रः ? **नर्यः** नृभ्यो हितः । **क्रत्वा** वृत्रवधादिकर्मणा प्रज्ञानेन वा **पौंस्यैश्च** वीर्यैश्च युक्त इति शेषः ।

व्यानलिन्द्रः पृतनाः स्वोजा आस्मै
यतन्ते सख्याय पूर्वीः ।
आ स्मा रथं न पृतनासु तिष्ठ
यं भद्रया सुमत्या चोदयासे ॥८॥ ऋ. १०।२९।८

पदपाठः

वि । आनट् । इन्द्रः । पृतनाः । सुऽओजाः । अस्मै । यतन्ते । सख्याय । पूर्वीः । आ । स्म । रथम् । न । पृतनासु । तिष्ठ । यम् । भद्रया । सुऽमत्या । चोदयासे ॥८॥

स्वोजाः शोभनबलः **इन्द्रः पृतनाः** शत्रुसेनाः **व्यानट्** व्याप्नोति । शत्रून् जयतीत्यर्थः । किञ्च **पूर्वीः** । अत्र पूर्वशब्दः उत्कृष्टवाची । उत्कृष्टाः शत्रुसेनाः अप्रभवन्त्यः सत्यः **अस्मै** अस्येन्द्रस्य **सख्याय** सन्धित्वलक्षणाय सखित्वाय **आ यतन्ते** । सन्धिं कर्त्तुम् इच्छन्तीत्यर्थः । अपरोऽर्धर्चः प्रत्यक्षकृतत्वाद् भिन्नं वाक्यम् । हे **इन्द्र** ! त्वं **य रथं भद्रया** कल्याण्या **सुमत्या** परानुग्रहया बुद्धया **चोदयासे** यज्ञान् प्रति प्रेरयसि तं रथम् अस्मद्यज्ञं प्रत्यागन्तुं महतादरेण **आतिष्ठ** आरोह । तत्र दृष्टान्तः । **पृतनासु** सङ्ग्रामेषु **रथं न** यथा स्वरथं महताऽऽदरेण आतिष्ठसि तद्वत् । स्म इति पदपूरणः ।

इति सप्तमेऽनुवाके पञ्चमं सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सप्तसप्ततितमं सूक्तम्

अष्टर्चस्यास्य सूक्तस्य वामदेव ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ।

छन्दोमानां द्वितीय-तृतीययोरह्नोः 'आ सत्यो यातु मघवाँ ऋजिषी' इत्यस्य विनियोगः पूर्वसूक्ते उक्तः ।

आ सत्यो यातु मघवाँ ऋजीषी
द्रवन्त्वस्य हरय उप नः ।
तस्मा इदन्धः सुषुमा सुदक्ष-
मिहाभिपित्वं करते गृणानः ॥१॥ ऋ. ४।१६।१

पदपाठः

आ । सत्यः । यातु । मघऽवान् । ऋजीषी । द्रवन्तु । अस्य । हरयः । उप । नः । तस्मै । इत् । अन्धः । सुसुम । सुऽदक्षम् । इह । अभिऽपित्वम् । करते । गृणानः ॥१॥

ऋजीषी, ऋजीषशब्देन निष्पिष्टो साररहितः सोमोऽभिधीयते तद्वान् । **सत्यः** सत्यवान्, **मघवान्** धनवान्, इन्द्रः **नः** अस्माकम् **उप** समीपे **आयातु** आगच्छतु । किञ्च **अस्य** इन्द्रस्य **हरयः** अश्वाः अस्माकम् उप समीपे **द्रवन्तु** आगच्छन्तु । वयं याजका **इह** यज्ञे **तस्मै इत्** इन्द्रायैव **सुदक्षं** शोभनबलं सारोपेतम् इत्यर्थः । तदिदं प्रत्यक्षेणोपलम्भमानम् **अन्धः** अन्नरूपं सोमं **सुसुम** अभिषुतं कुर्याम, **गृणानः** अस्माभिः स्तूयमान इन्द्रः **अभिपित्वम्** अस्मदभिमतप्राप्तिं **करते** करोतु ।

अव स्य शूराध्वनो नान्तेऽस्मिन्
नो अद्य सवने मन्दध्यै ।
शंसात्युक्थमुशनेव वेधा-
श्चिकितुषे असुर्याय मन्म ॥२॥ ऋ. ४।१६।२

पदपाठः

अव । स्य । शूर । अध्वनः । न । अन्ते । अस्मिन् । नः । अद्य । सवने । मन्दध्यै । शंसाति । उक्थम् । उशनाऽइव । वेधाः । चिकितुषे । असुर्याऽय । मन्म ॥२॥

हे **शूर** ! शत्रूणामभिभवसमर्थ इन्द्र ! **अद्य** इदानीं **सवनेस्मिन्** मध्यन्दिनाख्ये **मन्दध्यै** त्वां मादयितुं **नः** अस्मान् **अव स्य** विमुञ्च तत्र दृष्टान्तः । **अध्वनो** गन्तव्यस्य मार्गस्य **अन्ते** समीपे **न** अश्वान् मनुष्याः यथा मुञ्चन्ति तद्वत्, **उशनेव** काव्य इव

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वेधाः शंसिता यजमानः हे इन्द्र ! **चिकितुषे** सर्वं जानते **असुर्याय** असुराणां हिंसकाय तुभ्य **मन्म** मननीयम् **उक्थं** शस्त्ररूपं स्तोत्रं **शसाति** शंसनं करोति ॥२॥

ऋग्वेदे तु 'चिकितिषे' पठ्यते ।

कविर्न निण्यं विदथानि साधन्
वृषा यत् सेकं विपिपानो अर्चात् ।
दिव इत्था जीजनत् सप्त कारू-
नह्ना चिच्चक्रुर्वयुना गृणन्तः ॥३॥ ऋ. ४।१६।३

पदपाठः

कविः । न । निण्यम् । विदथानि । साधन् । वृषा । यत् । सेकम् । विऽपिपानः । अर्चात् । दिवः । इत्था । जीजनत् । सप्त । कारून् । अह्ना । चित् । चक्रुः । वयुना । गृणन्तः ॥३॥

कविः मेधावी **निण्यं न** अन्तर्हितं गूढमर्थमिव **विदथानि** वेदनीयानि कार्यजातानि **साधन्** साधयन् **वृषा** कामानां वर्षिता इन्द्रः **यत्** यदा **सेकं** सेचनीयं सोमं **विपिपानः** अत्यर्थं पिबन् **अर्चात्** विशेषेण अर्चति सोमपाने श्रद्धां कुरुते इत्यर्थः । तदानीं दिवः अमुष्मात् लोकात् **इत्था** सत्यमेव **सप्त** सप्तसङ्ख्याकान् **कारून्** रश्मीन् **जीजनत्** अजीजनत् जनयति । **गृणन्तः** स्तूयमाना रश्मयो **वयुना** वयुनानि मनुष्याणां ज्ञानानि **अह्ना चित्** दिवसेनापि **चक्रुः** कृतवन्तः ॥३॥

स्वर्यद् वेदि सुदृशीकमर्कैर्महि
ज्योती रुरुचुर्यद्ध वस्तोः ।
अन्धा तमांसि दुधिता विचक्षे
नृभ्यश्चकार नृतमो अभिष्टौ ॥४॥ ऋ. ४।१६।४

पदपाठः

स्वः । यत् । वेदि । सुऽदृशीकम् । अर्कैः । महि । ज्योतिः । रुरुचुः । यत् । ह । वस्तोः । अन्धा । तमांसि । दुधिता । विऽचक्षे । नृऽभ्यः । चकार । नृऽतमः । अभिष्टौ ॥४॥

यद्ध यदा खलु **महि** महत् प्रभूतं **ज्योतिः** तेजोरूपं **यत् स्वः** यो द्युलोकः **अर्कैः** किरणैः **सुदृशीकं** सुष्ठु दर्शनीयं **वेदि** अवेदि ज्ञायते तदानीं देवाः तस्मिन् स्वर्गे **वस्तोः** निवासाय **रुरुचुः** दीप्तियुक्ताः बभूवुः । **नृतमः** नेतृतमः सूर्यः **अभिष्टौ** अभ्यागमनं **नृभ्यो** नेतृजनानां **विचक्षे** विशेषेण दर्शनाय **अन्धा** अन्धकाररूपाणि निबिडानि **तमांसि दुधिता** दुधितानि नाशितानि **चकार** कृतवान् ॥४॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

**ववक्ष इन्द्रो अमितमृजीष्युभे
आ पप्रौ रोदसी महित्वा ।
अतश्चिदस्य महिमा वि
रेच्यभि यो विश्वा भुवना बभूव ॥५॥** ऋ. ४।१६।५

पदपाठः

ववक्ष । इन्द्रः । अमितम् । ऋजीषी । उभे इति । आ । पप्रौ । रोदसी इति । महिऽत्वा । अतः । चित् । अस्य । महिमा । वि । रेचि । अभि । यः । विश्वा । भुवना । बभूव ॥५॥

ऋजीषी विगतसारसोमवान् **इन्द्रः** परमैश्वर्यशाली **अमितम्** इयत्तं हितं महिमानं **ववक्षे** उवाह किञ्च **महित्वा** महत्त्वेन स्वेन महिम्ना **रोदसी** द्यावापृथिव्यौ **आपप्रे** समन्तादपूरयत् य इन्द्रः **विश्वा भुवना** सर्वाणि भुवनानि **अभि बभूव** तिरश्चकार । **अतश्चित्** एभ्योऽपि विश्वेभ्यो लोकेभ्यः **अस्य** इन्द्रस्य **महिमा विरेचि** अतिरिरिचे, अधिको बभूवेत्यर्थः ॥५॥

**विश्वानि शक्रो नर्याणि विद्वानपो
रिरेच सखिभिर्निकामैः ।
अश्मानं चिद् ये बिभिदुर्वचोभिर्व्रजं
गोमन्तमुशिजो वि वव्रुः ॥६॥** ऋ. ४।१६।६

पदपाठः

विश्वानि । शक्रः । नर्याणि । विद्वान् । अपः । रिरेच । सखिऽभिः । निऽकामैः । अश्मानम् । चित् । ये । बिभिदुः । वचःऽभिः । व्रजम् । गोऽमन्तम् । उशिजः । वि । वव्रुरिति वव्रुः ॥६॥

विश्वानि समस्तानि **नर्याणि** मनुष्याणां हितानि वृष्ट्यादीनि **विद्वान्** जानानः **शक्रः** समर्थः इन्द्रः **निकामैः** निकामयमानेभ्यः **सखिभिः** मित्रभूतेभ्यः मरुद्भ्यः । अत्र व्यत्ययेन चतुर्थ्यर्थे तृतीया । **अपः** वृष्टिलक्षणानि उदकानि **रिरेच** रिक्तीचकार । इन्द्रः सस्यादिसिद्ध्यर्थं मेघस्थानि जलानि मरुद्भ्यो दत्तवानित्यर्थः । यद्वा निकामैः निकामयमानैः सखिभिः मरुद्भिः सहितः सन् अपो नभसः सकाशात् । आ इत्यन्तरिक्षनामैतत् । अत्र विभक्तिव्यत्ययः । रिरेच व्यतिरिक्तो बभूव । **ये** मरुतो **वचोभिः** वाग्रूपैः ध्वनिभिः **अश्मानं चित्** पर्वतमपि मेघं वा । अश्मेति मेघनामैतत् । **बिभिदुः** अभैत्सुः, **उशिजः** कामयमानास्ते मरुतः **गोमन्तं** गोभिरुपेतं **व्रजम्** अङ्गिरसां सम्बन्धिगोस्थानं **विवव्रुः** आच्छादयामासुः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपो वृत्रं वव्रिवांसं पराहन्
प्रावत् ते वज्रं पृथिवी सचेताः ।
प्रार्णांसि समुद्रियाण्यैनोः
पतिर्भवं छवसा शूर धृष्णो ॥७॥ ऋ. ४।१६।७

पदपाठः

अपः । वृत्रम् । वव्रिऽवांसम् । परा । अहन् । प्र । आवत् । ते । वज्रम् । पृथिवी । सऽचेताः । प्र । अर्णांसि । समुद्रियाणि । ऐनोः । पतिः । भवन् । शवसा । शूर । धृष्णो इति ॥७॥

हे इन्द्र ! **प्रावत्** राक्षसादिभ्यः लोकान् पालयितृ **ते वज्रं अपो** वृष्टिलक्षणानि जलानि **वव्रिवांसं** आवरकं **वृत्रं** मेघं **पराहन्** प्रकर्षेण प्रेरयति स्म । **पृथ्वी** भूमिः **सचेताः** चेतनावती त्वया सङ्गता बभूव । **धृष्णो** धर्षणशील हे **शूर** ! विक्रान्तेन्द्र ! त्वं **शवसा** बलेन **पतिर्भवन्** लोकानां पालकः सन् **समुद्रियाणि** अर्णांसि नभसि स्थितानि उदकानि **प्रैणोः** प्रेरकोऽभूः ।

अपो यदद्रिं पुरुहूत दर्दराविर्भुवत्
सरमा पूर्व्यं ते ।
स नो नेता वाजमा दर्षि
भूरिं गोत्रा रुजन्नङ्गिरोभिर्गृणानः ॥८॥ ऋ. ४।१६।८

पदपाठः

अपः । यत् । अद्रिम् । पुरुऽहूत । दर्दः । आविः । भुवत् । सरमा । पूर्व्यम् । ते । सः । नः । नेता । वाजम् । आ । दर्षि । भूरिम् । गोत्रा । रुजन् । अङ्गिरःऽभिः । गृणानः ॥८॥

हे **पुरुहूत** बहूभिराहूतेन्द्र ! **यत्** यदा **अपः** प्रतिवृष्टिलक्षणानि उदकानि लक्षीकृत्य **अद्रिं** मेघं **दर्दः** विदारितवानसि **सरमा** देवशुनी **पूर्व्यं** पुरा **ते** तुभ्यं पणिभिरपहृतं गोधनम् **आविर्भुवत्** प्रकाशयामास । **अङ्गिरोभिः** ऋषिभिः **गृणानः** स्तूयमानः सन् **गोत्रा** गोत्राणि **रुजन्** **नः** अस्मान् **भूरि** प्रभूतं **वाजम्** अन्नं **नेता** प्रापयिता **स** त्वम् **आदर्षि** आदरं कृतवानसि ।

इति सप्तमेऽनुवाके षष्ठं सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अष्टसप्ततितमं सूक्तम्

तृचस्यास्य सूक्तस्य शंयुर्ऋषिः। इन्द्रो देवता। गायत्री छन्दः।

वाजपेये 'तद् वो गाय' इति स्तोत्रियो भवति। तदुक्तं वैताने—'तद् वो गाय' इति स्तोत्रियः (वै० २७।१०) इति।

तथा वृहस्पतिसवे 'तद् वो गाय सुते सचा' (२०।७८) 'वयमेनमिदा ह्यः' (अ० २०।९७) एतौ आज्यपृष्ठस्तोत्रियौ यथाक्रमं भवतः। उक्तं हि वैताने—'वृहस्पतिसवे 'तद् वो गाय सुते सचा' 'वयमेनमिदा ह्यः' इति (वै० ३९।३) इति।

तथा तत्रैव प्रातःसवनमाध्यन्दिनसवनयोः एतावेव उक्थमुखीयं तृचपर्यासश्च भवतो माध्यन्दिने पर्यासाद्यतृचवर्जम्। उक्तं हि वैताने—'सवनयोरुक्थमुखीयतृचपर्यासौ। माध्यन्दिने पर्यासाद्यतृचवर्जम्' (वै० ३९।३) इति।

तथा सर्वजित्यृषभे मरुत्स्तोमे सहस्रान्त्ये च चतुर्ष्वेकाहेषु 'तद् वो गाय सुते सचा' 'वयमेनमिदा ह्यः'। एतौ आज्यपृष्ठस्तोत्रियौ भवतः। तदुक्तं वैताने 'सर्वजित्यृषभे मरुत्स्तोमे सहस्रान्त्ये 'तद् वो गाय सुते सचा' 'वयमेनमिदा ह्यः' इति (वै० ३९।१८)।

तद् वो गाय सुते सचा पुरुहूताय सत्वने।
शं यद् गवे न शाकिने ॥१॥ ऋ. ६।४५।२२

पदपाठः

तत्। वः। गाय। सुते। सचा। पुरुऽहूताय। सत्वने। शम्। यत्। गवे। न। शाकिने ॥१॥

हे स्तोतारः! **वः** यूयं **सुते** अभिषुते सोमे सति **पुरुहूताय** प्रभूतैर्यजमानैराहूताय **सत्वने** शत्रूणां सादयित्रे धनानां वा सनित्रे दात्रे इन्द्राय **तत्** स्तोत्रं **सचा** सह संहता भूत्वा **गाय** गायत, **यत्** स्तोत्रं **शाकिने** शक्तिमते इन्द्राय **शं** **सुखकरं** भवति। **गवे न** यथा गवे यवसं सुखकरं भवति तद्वत् इत्यर्थः।

न घा वसुर्नि यमते दानं वाजस्य गोमतः।
यत् सीमुप श्रवद्गिरः ॥२॥ ऋ. ६।४५।२३

पदपाठः

न। घ। वसुः। नि। यमते। दानम्। वाजस्य। गोऽमतः। यत्। सीम्। उप। श्रवत्। गिरः ॥२॥

वसुः वासयिता स इन्द्रः **गोमतो** बहुभिर्गोभिर्युक्तस्य **वाजस्य** अन्नस्य बलस्य वा **दान** प्रदानं वा **न घ** न खलु **नियमते** नियच्छति उपरतं करोति। यद्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदि **सीं** सर्वतः इमाः **गिरः** अस्मत्स्तुतीः **उपश्रवत्** उपशृणुयात् । स्तोत्रश्रवणे सति सर्वदा ददातीत्यर्थः ।

कुवित्सस्य प्र हि व्रजं गोमन्तं दस्युहा गमत् ।
शचीभिरप नो वरत् ॥३॥ ऋ, ६।४५।२४

पदपाठः

कुवित्ऽसस्य । प्र । हि । व्रजम् । गोऽमन्तम् । दस्युऽहा । गमत् । शचीभिः । अप । नः । वरत् ॥३॥

कुवित्सस्य कुविद् बहुशः स्यति हिनस्तीति कुवित्सो नाम कश्चित्, तस्य स्वभूतं **गोमन्तं** बहुभिर्गोभिः युक्तं **व्रजं** गोष्ठं **दस्युहा** दस्यूनामुपक्षपयितृजनानां हन्ता इन्द्रः **प्रगमत्** प्रकर्षेण गच्छति । **हि** यस्मादेवं तस्मात् **शचीभिः** आत्मीयैः कर्मभिः प्रज्ञाभिर्वा **नः** अस्माकं ता गाः **अपवरत्** निगूढास्ता अपावृणोत् ।

इति सप्तमेऽनुवाके सप्तमं सूक्तम् ।

एकोनाशीतितमं सूक्तम्

द्व्यृचस्यास्य सूक्तस्य प्रथमर्चः पूर्वार्धस्य शक्तिः, प्रथमोत्तरार्धस्य द्वितीयायाश्च वसिष्ठः, द्वयोर्वसिष्ठो वा ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः ।

वाजपेये माध्यन्दिने सवने 'इन्द्र क्रतुं न आ भर' (२०।७९) 'इन्द्र ज्येष्ठम्' (२०।८०) 'उदुत्ये मधुमत्तमाः' (२०।५९) इत्येतेषामन्यतमो विकल्पेन स्तोत्रियो भवति । तदुक्तं वैताने--"गाध्यन्दिने 'इन्द्र क्रतुं न आ भर' इति स्तोत्रियः । 'इन्द्र ज्येष्ठम्' 'उदु त्ये मधुमत्तमः' इति वा । (वै० २७।१२) इति ।

तथा विषुवति सौर्यपृष्ठे 'इन्द्र क्रतुं न आ भर' 'इन्द्र ज्येष्ठं न आ भर' इति विकल्पेन स्तोत्रियानुरूपौ भवतः । तदुक्तं वैताने--'इन्द्र क्रतुं न आ भर, 'इन्द्र ज्येष्ठम् न आ भर' इति वा (वै० ३३।६) इति ।

तथा विश्वजिति वैराजपृष्ठे 'इन्द्र क्रतुं न आ भर' इति इमां पूर्व्यां तृतीयाम् अर्धर्चशः प्रग्रथनां शंसति । तदुक्तं वैताने--"इन्द्र क्रतुं न आ भर इति' तृतीयाम्" (वै० ३३।१०) ।

तथा इन्द्रस्तोमाख्ये एकाहे 'इन्द्र क्रतुं न आ भर' (२०।७९), 'तव त्यदिन्द्रियं बृहत्' (२०।१०६) इत्येतौ पृष्ठोक्थस्तोत्रियौ भवतः । तदुक्तं वैताने "इन्द्रस्तोमे 'इन्द्र क्रतुं न आ भर' 'तव त्यदिन्द्रियं बृहत्' इति" (वै० ३९।१४) इति ।

तथा विषुवति एकाहीभूते 'इन्द्र क्रतुं न आ भर' इति पृष्ठस्तोत्रियो भवति । तदुक्तं वैताने "विषुवति 'इन्द्र क्रतुं न आ भर" (वै० ४०।१३) इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इन्द्र क्रतुं न आभर पिता पुत्रेभ्यो यथा ।
शिक्षा णो अस्मिन् पुरुहूत यामनि
जीवा ज्योतिरशीमहि ॥१॥ ऋ. ७।३२।६

पदपाठः

इन्द्र । क्रतुम् । नः । आ । भर । पिता । पुत्रेभ्यः । यथा । शिक्ष । नः । अस्मिन् । पुरुऽहूत । यामनि । जीवाः । ज्योतिः । अशीमहि ॥१॥

व्याख्यातोऽयं मन्त्रः सायणेन (अथर्व० १८।३।६७) ।

मा नो अज्ञाता वृजना दुराध्यो
माऽशिवासो अव क्रमुः ।
त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि ॥२॥
ऋ. ७।३२।२७

पदपाठः

मा । नः । अज्ञाताः । वृजनाः । दुःऽआध्यः । मा । अशिवासः । अव । क्रमुः । त्वया । वयम् । प्रऽवतः । शश्वतीः । अपः । अति । शूर । तरामसि ॥१॥

हे इन्द्र ! **अज्ञाताः** अज्ञातगमनाः **वृजनाः** हिंसकाः **दुराध्यः अशिवासः नः** अस्मान् **मा अवक्रमुः** मा अवचक्रमुः । हे **शूर ! त्वया वयं** वसिष्ठाः **प्रवतः** प्रवणकाः सन्तः **शश्वतीः** बह्वीः **अपः अतितरामसि** अतितरामः ।

इति सप्तमेऽनुवाकेऽष्टमं सूक्तम् ।

अशीतितमं सूक्तम्

द्वयृचस्यास्य सूक्तस्य शंयुर्ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः ।

वाजपेये माध्यन्दिने सवने 'इन्द्र ज्येष्ठम्' इत्यस्य पूर्वसूक्तेन सह उक्तो विनियोगः ।

इन्द्र ज्येष्ठं न आ भरँ ओजिष्ठं पपुरि श्रवः ।
येनेमे चित्र वज्रहस्त रोदसी ओभे सुशिप्र प्राः ॥१॥
ऋ. ६।४६।५

पदपाठः

इन्द्र । ज्येष्ठम् । नः । आ । भर । ओजिष्ठम् । पपुरि । श्रवः । येन । इमे इति । चित्र । वज्रऽहस्त । रोदसी इति । आ । उभे इति । सुऽशिप्र । प्राः ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे **इन्द्र** ! **ज्येष्ठं** प्रशस्यतमम् **ओजिष्ठम्** ओजस्वितमम् अतिशयेन बलकरम् । **पपुरि** पूरकं **श्रवः** अन्नं **नः** अस्मभ्यम् **आभर** आहर । प्रयच्छेत्यर्थः । हे **चित्र** चायनीय ! **वज्रहस्त** वज्रबाहो ! **सुशिप्र** हे शोभनहनुक ! एवंभूत हे इन्द्र ! **येन** अन्नेन् **इमे** परिदृश्यमाने **उभे रोदसी** द्यावापृथिव्यौ **आप्राः** आपूरयसि तदन्नमाभरेत्यन्वयः ।

त्वामुग्रमवसे चर्षणीसहं राजन् देवेषु हूमहे ।
विश्वा सु नो विथुरा पिब्दना
वसोऽमित्रान् सुषहान् कृधि ॥२॥ ऋ. ६।४६।६

पदपाठः

त्वाम् । उग्रम् । अवसे । चर्षणिऽसहम् । राजन् । देवेषु । हूमहे । विश्वा । सु । नः । विथुरा । पिब्दना । वसो इति । अमित्रान् । सुऽसहान् । कृधि ॥२॥

हे **राजन्** राजमानेन्द्र ! **देवेषु** देवानां मध्ये **उग्रम्** उद्गूर्णबलं **चर्षणीसहं** चर्षणीनां शत्रुभूतानां प्रजानामभिभवितारं **त्वाम् अवसे** रक्षणाय **हूमहे** आह्वयामः । त्वं **विश्वा** सर्वाणि **पिब्दना** पिब्दनानि रक्षांसि । पिहितमव्यक्तं शब्दयन्तः इति पिब्दनानि पृषोदरादिः, तानि **सु** सुष्ठु **विथुरा** व्यथितानि बाधितानि कुरु । **वसो** हे वासक इन्द्र ! **नः** अस्माकम् **अमित्रान्** शत्रूंश्च **सुसहान्** सुखेनाभिभवितुं शक्यान् **कृधि** कुरु ।

इति सप्तमेऽनुवाके नवमं सूक्तम् ।

एकाशीतितमं सूक्तम

द्व्यृचस्यास्य सूक्तस्य पुरुहन्मा ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः ।

आप्तोर्यामॢणि क्रतौ माध्यन्दिने सवने 'यद् द्याव इन्द्र ते शतम्' (अ० २०।८१) इति स्तोत्रियम् अभितः प्राकृतः स्तोत्रियो भवति । 'यदिन्द्र यावतस्त्वम्' (अ० २०। ८२) इत्यनुरूपमभितः प्राकृतोऽनुरूपः । उक्तं हि वैताने "माध्यन्दिने 'यद् द्याव इन्द्र ते शतम्' 'यदिन्द्र यावतस्त्वम्' इति स्तोत्रियानुरूपौ अभितः स्तोत्रियानुरूपौ" (वै० २७।२२) इति ।

तथा विश्वजिति वैराजपृष्ठे 'यद् द्याव इन्द्र ते शतम्' 'यदिन्द्र यावतस्त्वम्' इति पृष्ठस्तोत्रियानुरूपौ बार्हतौ प्रगाथौ भवतः । तदुक्तं वैताने "विश्वजिति वैराजपृष्ठे 'यद् द्याव इन्द्र ते शतम्' 'यदिन्द्र यावतस्त्वम्' इति पृष्ठस्तोत्रियानुरूपौ बार्हतौ" (वै० ३३।९;१०) इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथा तनूपृष्ठे षडहे 'अभि त्वा शूर नोनुमः' (अ० २०।१२१) 'त्वामिद्धि हवामहे' (अ० २०।९८) 'यद् द्याव इन्द्र ते शतम्' (अ० २०।८१) 'पिबा सोममिन्द्र मन्दतु त्वा' (अ० २०।११७) 'कयानश्चित्र आ भुवत्' (अ० २०।१२४) 'रेवतीर्नः सधमादे'(अ० २०।१२२) इति पृष्ठस्तोत्रिया यथाक्रमं भवन्ति। तदुक्तं वैताने-- "तनूपृष्ठे 'अभि त्वा शूर नोनुमः', 'त्वामिद्धि हवामहे', 'यद् द्याव इन्द्र ते शतम्', 'पिबा सोममिन्द्र मन्दतु त्वा', 'कयानश्चित्र आ भुवत्' 'रेवतीर्नः सधमादे" इति (वै० ४२।९) इति।

यद् द्याव इन्द्र ते शतं शतं भूमीरुत स्युः।
न त्वा वज्रिन्त्सहस्रं सूर्या
अनु न जातमष्ट रोदसी ॥१॥ ऋ. ८।७०।५

पदपाठः

यत्। द्यावः। इन्द्र। ते। शतम्। शतम्। भूमीः। उत। स्युरिति स्युः। न। त्वा। वज्रिन्। सहस्रम्। सूर्याः। अनु। न। जातम्। अष्ट। रोदसी इति ॥१॥

हे इन्द्र! ते तव प्रतिमानार्थं **यद्** यदि **द्यावः** द्युलोकाः **शतं स्युः**, तथापि नाश्नुवन्ति। **उत** अपि च **भूमीः** भूम्यः **ते** तव मूर्त्तिप्रतिबिम्बाय **शतं स्युः** तथापि नाश्नुवन्ति। हे **वज्रिन्! त्वा** त्वां **सहस्रं सूर्या** असङ्ख्याताः अपि सूर्याः नानुश्नुवन्ति, न प्रकाशयन्तीत्यर्थः। 'न तत्र सूर्यो भाति०' इति श्रुतेः। (कठो०) किं बहुना। **जात** पूर्वमुत्पन्नं किञ्च **अनु न अष्ट** नाश्नुते। तथा **रोदसी** द्यावा पृथिव्यौ नाश्नुवाते। सर्वेभ्योऽतिरिच्यसे त्वमित्यर्थः। 'ज्यायान् पृथिव्या ज्यायान् अन्तरिक्षात्, ज्यायान् दिवो, ज्यायान् एभ्यो लोकेभ्यः' (छा. उ. १।१४।३) इति श्रुतेः।

आ पप्राथ महिना वृष्ण्या
वृषन् विश्वा शविष्ठ शवसा।
अस्माँ अव मघवन् गोमति
व्रजे वज्रिं चित्राभिरूतिभिः ॥२॥ ऋ. ८।७०।६

पदपाठः

आ। पप्राथ। महिना। वृष्ण्या। वृषन्। विश्वा। शविष्ठ। शवसा। अस्मान्। अव। मघऽवन। गोऽमति। व्रजे। वज्रिन्। चित्राभिः। ऊतिऽभिः ॥२॥

शविष्ठ मघवन् हे बलवन्निन्द्र! धनवन्निन्द्र! वा **वृषन्** हे अभिमतवर्षक! त्वम् **आ पप्राथ** आपूरयसि व्याप्नोषि। कानि **विश्वा** विश्वानि **वृष्ण्या** वर्षकाणि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बलानि शत्रुसम्बन्धीनि। केन साधनेन ? **महिना** महता **शवसा** स्वीयेन बलेन। अथवा वृष्ण्येत्येतच्छवोविशेषणम्। तथा सति अभिमत-वर्षकेण महता बलेन अस्मदीयानि बलानि पूरयसीत्यर्थः। अथ तथा कृत्वा **अस्मान् गोमति** गोभिर्युक्ते **व्रजे** शत्रुसम्बन्धिनि निमित्ते सति अस्मान् **अव**। **वज्रिन्** हे वज्रधारिन् इन्द्र! कैः साधनैः? **चित्राभिः** नानाविधैः **ऊतिभिः** रक्षणैरिति।

इति सप्तमेऽनुवाके दशमं सूक्तम्।

द्व्यशीतितमं सूक्तम्

द्व्यृचस्यास्य सूक्तस्य वसिष्ठ ऋषिः। इन्द्रो देवता। प्रगाथश्छन्दः।

आप्तोर्याम्णि क्रतौ 'यदिन्द्र यावतस्त्वम्' इति सूक्तस्य पूर्वसूक्तेन सह उक्तो विनियोगः।

तथा विश्वजिति वैराजपृष्ठेऽस्य सूक्तस्य पूर्वसूक्तेन सह उक्तो विनियोगः।

यदिन्द्र यावतस्त्वमेतावदहमीशीय।
स्तोतारमिद् दिधिषेय रदावसो
न पापत्वाय रासीय ॥१॥ ऋ. ७।३२।१८

पदपाठः

यत्। इन्द्र। यावतः। त्वम्। एतावत्। अहम्। ईशीय। स्तोतारम्। इत्। दिधिषेय। रदवसो इति रदऽवसो। न। पापऽत्वाय। रासीय ॥१॥

हे **इन्द्र! यत्** यतो **यावतः** धनस्य **त्वम्** ईशिषे एतावत् षष्ठ्या लुक्। एतावतो धनस्य अहमपि **ईशीय** ईश्वरो भूयासम्। हे **रदवसो**! रदति ददाति धनानीति रदवसुः तत्सम्बोधनरूपम्। ततोऽहमस्मदीयं स्तोतारम् **इद् दिधिषेय** धनप्रदानेन धारयेयम् एव। **पापत्वाय न रासीय**, न दद्याम्।

शिक्षेयमिन्महयते दिवे दिवे
राय आ कुहचिद्विदे।
नहि त्वदन्यन्मघवन् न आप्यं
वस्यो अस्ति पिता चन ॥२॥ ऋ. ७।३२।१९

पदपाठः

शिक्षेयम्। इत्। महऽयते। दिवेऽदिवे। रायः। आ। कुहचित्ऽविदे। नहि। त्वत्। अन्यत्। मघऽवन्। नः। आप्यम्। वस्यः। अस्ति। पिता। चन ॥२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कुहचिद्विदे कुत्रचिद् विद्यमानः कुहचिद्वित् तस्मै, यत्र क्वापि विद्यमानायेत्यर्थः । **महयते** पूजयते जनाय **दिवे दिवे** प्रत्यहं **रायः** धनानि **शिक्षेयम् इत्** दद्याम् एव । **आकारः** पूरणः । एवमिन्द्रस्य वाक्यं श्रुत्वा सन्तुष्टो महर्षिर्वदति हे **मघवन्** धनवन् ! **त्वदन्यत्** त्वत्तोऽन्यत् **नः** अस्माकम् **आप्यं** ज्ञातेयं **न** **ह्यस्ति** । **वस्यः** प्रशस्यः **पिता चन** पालयिता च त्वदन्यो नास्तीत्यर्थः ।

इति सप्तमेऽनुवाके एकादशं सूक्तम् ।

त्र्यशीतितमं सूक्तम्

द्व्यृचस्यास्य सूक्तस्य शंयुर्ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः ।

आप्तोर्याम्णि प्राकृतसामप्रगाथादनन्तरम् 'इन्द्र त्रिधातुशरणम्' इति सामप्रगाथो भवति । यथोक्तं वैताने "सामप्रगाथाद् 'इन्द्र त्रिधातु शरणम्' इति सामप्रगाथः" (वैं० २७।२२-२३) इति ।

तथा विश्वजिति वैराजपृष्ठे 'इन्द्र त्रिधातु शरणम्' इति सामप्रगाथो भवति । तदुक्तं वैताने—'इन्द्र त्रिधातु शरणम् इति' सामप्रगाथः" (वै. ३३।११) इति ।

इन्द्र त्रिधातु शरणं त्रिवरूथं स्वस्तिमत् ।

छर्दिर्यच्छ मघवद्भ्यश्च मह्यं

च यावया दिद्युमेभ्यः ॥१॥ ऋ. ६।४६।९

पदपाठः

इन्द्र । त्रिऽधातु । शरणम् । त्रिऽवरूथम् । स्वस्तिऽमत् । छर्दिः । यच्छ । मघवत्ऽभ्यः । च । मह्यम् । च । यवय । दिद्युम् । एभ्यः ॥१॥

हे **इन्द्र** ! **त्रिधातु** त्रिप्रकार त्रिभूमिकं **त्रिवरूथं** त्रयाणां शीतातपवर्षाणां निवारकं **स्वस्तिमत्** अविनाशयुक्तं **छर्दिः** छदिष्मत् आच्छादनयुक्तम् एवं गुणगणविशिष्टं **शरणं** गृहं **मघवद्भ्यश्च** मघ हविर्लक्षणं धनं तद्वद्भ्यश्च अस्मदीयेभ्यो **मह्यं** महर्षये यजमानाय वा **यच्छ** प्रयच्छ । अपि च **एभ्यः** सकाशात् **दिद्युं** शत्रुप्रेरितं प्रद्योतमानम् आयुधम् **यवय** पृथक् कुरु ।

ये गव्यता मनसा शत्रुमादभु-

रभि प्रघ्नन्ति धृष्णुया ।

अध स्मा नो मघवन्निन्द्र

गिर्वणस्तनूपा अन्तमो भव ॥२॥ ऋ. ६।४७।१०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

ये । गव्यता । मनसा । शत्रुम् । आऽदभुः । अभिऽप्रघ्नन्ति । धृष्णुऽया । अध । स्म । नः । मघऽवन् । इन्द्र । गिर्वणः । तनूऽपाः । अन्तमः । भव ॥१॥

ये जनाः **गव्यता** शत्रूणां गा इच्छता **मनसा** युक्ता सन्तः **शत्रुं** शातयितारं वैरिणम् **आदभुः** अहिंसिषुः, ये च **धृष्णया** धृष्णवः धृष्टाः सन्तः अस्मान् अभिलक्ष्य **प्रघ्नन्ति** प्रकर्षेण हिंसन्ति, हे **मघवन्** धनवन्निन्द्र ? **गिर्वणो** गिरां सम्भक्तः **अध स्म** अस्मिन् काले तेभ्यः सकाशात् **नः** अस्माकं **तनूपाः** तनूनां शरीराणां रक्षकः सन् **अन्तमः** अन्तिकतमो भव ।

इति सप्तमेऽनुवाके द्वादशं सूक्तम् ।

चतुरशीतितमं सूक्तम्

तृचस्यास्य सूक्तस्य मधुच्छन्दा ऋषिः । इन्द्रो देवता । गायत्री छन्दः ।

चतुर्विंशे द्वितीयेऽहनि प्रातः सवने 'इन्द्रा याहि चित्रभानो' इति विकल्पेन आज्यस्तोत्रियो भवति । उक्तं हि वैताने—'इन्द्रा याहि चित्रभानो' इति वा (वै० ३१। १६) इति ।

तथा छन्दोमाख्येषु त्रिष्वहःसु प्रातःसवनेऽस्य 'तमिन्द्रं वाजयामसि' (अ० २०। ४७) इत्यनेन सह विनियोग उक्तः ।

तथा चतुर्विंशे सांवत्सरिके एकाहीभूते 'इन्द्रा याहि चित्रभानो' (२०।८४) 'मा चिदन्यद् वि शंसत' (२०।८५) इत्याज्यपृष्ठस्तोत्रियौ भवतः । उक्तं च वैताने— "चतुर्विंशे 'इन्द्रा याहि चित्रभानो', 'मा चिदन्यद् वि शंसत' इति (वै० श्रौ० ४०।११) इति ।

इन्द्रा याहि चित्रभानो सुता इमे त्वायवः ।
अण्वीभिस्तना पूतासः ॥१॥ ऋ. १।३।४

पदपाठः

इन्द्र । आ । याहि । चित्रभानो इति चित्रऽभानो । सुताः । इमे । त्वाऽयवः । अण्वीभिः । तना । पूतासः ॥१॥

चित्रभानो चित्रप्रकाश हे **इन्द्र** ! अस्मिन् कर्मणि **आयाहि** आगच्छ । **सुताः** अभिषुताः इमे सोमाः **त्वायवः** त्वां कामयमानाः वर्त्तन्ते । **अण्वीभिः** ऋत्विजाम् अङ्गुलीभिः सुताः सोमाः इत्यन्वयः । किञ्चैते सोमाः **तना** नित्यं **पूतासः** दशापवित्रेण बहुधा शोधितत्वात् शुद्धाः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इन्द्रा याहि धियेषितो विप्रजूतः सुतावतः ।
उप ब्रह्माणि वाघतः ॥२॥ ऋ. १।३।५

पदपाठः

इन्द्र । आ । याहि । धिया । इषितः । विप्रऽजूतः । सुतऽवतः । उप । ब्रह्माणि । वाघत ॥२॥

हे **इन्द्र** ! त्वम् आ **याहि** अत्रागच्छ । किमर्थम् ? **वाघतः** ऋत्विजो ब्रह्माणि स्तोत्राणि उपैतुम् । कीदृशस्त्वम् ? **धिया** अस्मदीयया प्रज्ञया **इषितः** प्राप्तः अस्मद् भक्त्या प्रेरित इत्यर्थः । **विप्रजूतः** । यथा यजमानभक्त्या प्रेरितस्तथाऽन्यैरपि विप्रैः मेधाविभिः ऋत्विग्भिः प्रेरितः । कीदृशस्य वाघतः ? **सुतावतः** । अभिषुत-सोमयुक्तस्य ।

इन्द्रा याहि तूतुजान उप ब्रह्माणि हरिवः ।
सुते दधिष्व नश्चनः ॥३॥ ऋ. १।३।६

पदपाठः

इन्द्र । आ । याहि । तूतुजानः । उप । ब्रह्माणि । हरिऽवः । सुते । दधिष्व । नः । चनः ॥३॥

हे **हरिवः** अश्वयुक्त **इन्द्र** ! त्वं **ब्रह्माणि** स्तोत्राणि उपैतुम् **आयाहि** । कीदृशस्त्वम् ! **तूतुजानः** त्वरमाणः । आगत्य चास्मिन् **सुते** सोमाभिषवयुक्ते कर्मणि **नः** अस्मदीयं **चनः** अन्नं हविर्लक्षणं **दधिष्व** धारय स्वीकुरु इत्यर्थः ।

इति सप्तमेऽनुवाके त्रयोदशं सूक्तम् ।

पञ्चाशीतितमं सूक्तम्

चतुर्ऋचस्यास्य सूक्तस्य प्रथमाद्वितीययोर्ऋचोः प्रगाथः, तृतीयाचतुर्थ्योश्च मेध्यातिथिर्ऋषी । इन्द्रो देवता । प्रगाथश्छन्दः ।

चतुर्विंशे माध्यन्दिने सवने 'मा चिदन्यद् विशंसत' (२०।८५।१-२) 'यच्चिद्धि त्वा जना इमे' (२०।८५।३-४) इति विकल्पेन पृष्ठस्तोत्रियानुरूपौ बार्हतौ प्रगाथौ भवतः । तदुक्तं वैताने "मा चिदन्यद् विशंसत, 'यच्चिद्धि त्वा जना इमे' इति वा" (वै० ३१।१८) इति ।

तथा चतुर्विंशे सांवत्सरिके एकाहीभूते 'मा चिदन्यद् विशंसत' इत्यस्य विनियोगः पूर्वसूक्ते उक्तः ।

मा चिदन्यद् वि शंसत सखायो मा रिषण्यत ।
इन्द्रमित् स्तोता वृषणं सचा सुते
मुहुरुक्था च शंसत ॥१॥ ऋ. ८।१।१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

मा । चित् । अन्यत् । वि । शंसत । सखायः । मा । रिषण्यत । इन्द्रम् । इत् । स्तोत । वृषणम् । सचा । सुते । मुहुः । उक्था । च । शंसत ॥१॥

हे **सखायः** समानख्यानाः स्तोतारः ! इन्द्रस्तोत्राद् **अन्यत्** स्तोत्रं **मा चिद् विशंसत,** नैव उच्चारयत । **मा रिषण्यत** मा हिंसितारो भवत । अन्यदीयस्तोत्रोच्चारणेन वृथोपक्षीणा मा भवत । **सुते** अभिषुते सोमे **वृषणं** कामानां वर्षितारम् **इन्द्रमित्** इन्द्रमेव हे प्रस्तोत्रादयः ! **सचा** सह संघीभूय **स्तोत** स्तुत । हे प्रशस्त्रादयः ! **उक्था च** उक्थानि शस्त्राणि चेन्द्रविषयाणि यूयं मुहुर्मुहुः **शंसत** वदत ।

अवक्रक्षिणम् वृषभं यथाऽजुरं गां न चर्षणीसहम् ।
विद्वेषणं संवननोभयंकरं
मंहिष्ठमुभयाविनम् ॥१॥ ऋ. ८।१।२

पदपाठः

अवऽक्रक्षिणम् । वृषभम् । यथा । अजुरम् । गाम् । न । चर्षणिऽसहम् । विऽद्वेषणम् । सम्ऽवनना । उभयम्ऽकरम् । मंहिष्ठम् । उभयाविनम् ॥२॥

वृषभं यथा वृषभमिव **अवक्रक्षिणम्** अवकर्षणशीलं शत्रूणां हिंसकम् **अजुरं** जरारहितम् अहिंसितं वा **गां न** गाम् इव वृषभमिव **चर्षणीसहं** चर्षणीनां मनुष्याणां शत्रुभूतानाम् अभिभवितारं **विद्वेषणं** शत्रूणां विद्वेष्टारं **संवनना** संवननं सम्यक् सम्भजनीयं स्तोतृभिः **उभयङ्करं** निग्रहानुग्रहयोः उभयोः कर्त्तारम्, **मंहिष्ठं** दातृतमम् **उभयाविनं** दिव्य-पार्थिवलक्षणेन उभयविधधनेन उपेतम्, अथवा स्थावरजङ्गमरूपेण द्विप्रकारेण रक्षितव्येनोपेतम् अथवा उभयविधैः स्तोतृभिः यष्टृभिश्चोपेतम्, एवं विधम् इन्द्रमित् स्तोतेत्यन्वयः ।

यच्चिद्धि त्वा जना इमे नाना हवन्त ऊतये ।
अस्माकं ब्रह्मेदमिन्द्र
भूतु तेऽहा विश्वा च वर्धनम् ॥३॥ ऋ. ८।१।३

पदपाठः

यत् । चित् । हि । त्वा । जनाः । इमे । नाना । हवन्ते । ऊतये । अस्माकम । ब्रह्म । इदम् । इन्द्र । भूतु । ते । अहा । विश्वा । च । वधनम् ॥३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इमे परिदृश्यमानाः सर्वे **जनाः** हे **इन्द्र ! त्वा** त्वाम् **ऊतये** रक्षणाय तर्पणाय वा **नाना** पृथक् पृथक् **यच्चित्** यद्यपि **हवन्ते** स्तुवन्ति आह्वयन्ति वा, **हीति** पूरणः । तथापि **अस्माकम् इदं** ब्रह्म स्तोत्रमेव हे इन्द्र ! **ते** तव **वर्धनं** वर्धकं **भूतु** भवतु । न केवलमिदानीमेव अपितु **विश्वाहा** सर्वाण्यहानि सर्वेषु अहःसु च इदमेव स्तोत्रं त्वां वर्धयतु इत्यर्थः ।

वि तर्तूर्यन्ते मघवन्
विपश्चितोऽर्यो विपो जनानाम् ।
उप क्रमस्व पुरुरूपमा-
भर वाजं नेदिष्ठमूतये ॥४॥ ऋ. ८।१।४

पदपाठः

वि । तर्तूर्यन्ते । मघऽवन् । विपःऽचितः । अर्यः । विपः । जनानाम् । उप । क्रमस्व । पुरुऽरूपम् । आ । भर । वाजम् । नेदिष्ठम् । ऊतये ॥४॥

हे **मघवन्** धनवन् इन्द्र ! **विपश्चितो** विद्वांसस्त्वदीयाः स्तोतारः **अर्यः** अभिगन्तारो जनानां शत्रुभूतानां **विपः** वेपयितारः सन्तः **वितर्तूर्यन्ते** भृशम् आपदो वितरन्ति अतिक्रामन्ति । तादृशस्त्वं **उपक्रमस्व** उपगच्छास्मान् **पुरुरूपं** बहुरूपं **नेदिष्ठम्** अन्तिकतमं **वाजम्** अन्नम् **ऊतये** तर्पणाय **आभर** अस्मभ्यम् आहर ।

इति सप्तमेऽनुवाके चतुर्दशं सूक्तम् ।

षडशीतितमं सूक्तम्

एकर्चस्यास्य सूक्तस्य विश्वामित्र ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ।

संवत्सरे माध्यन्दिने सवने सामप्रगाथात् अनन्तरम् 'ब्रह्मणा ते ब्रह्मयुजा युनज्मि' इत्यारभ्मणीया भवति । तदुक्तं वैताने--"ब्रह्मणा ते ब्रह्मयुजा युनज्मि' इत्यारम्भणी" (वै० ३५।१३) इति ।

ब्रह्मणा ते ब्रह्मयुजा युनज्मि हरी
सखाया सधमाद आशू ।
स्थिरं रथं सुखमिन्द्राधितिष्ठन्
प्रजानन् विद्वाँ उप याहि सोमम् ॥१॥ ऋ. ३।३५।४

पदपाठः

ब्रह्मणा । ते । ब्रह्मऽयुजा । युनज्मि । हरी इति । सखाया । सधऽमादे । आशू इति । स्थिरम् । रथम् । सुऽखम् । इन्द्र । अधिऽतिष्ठन् । प्रऽजानन् । विद्वान् । उप । याहि । सोमम् ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे **इन्द्र** ! **ब्रह्मयुजा** ब्रह्मणा मन्त्रेण योक्तव्यौ **सधमादे** सह माद्यन्ति योद्धारोऽत्रेति सहमादो युद्धं, तस्मिन् युद्धे **सखाया** वेगबलयोः समानप्रसिद्धिभाजौ अत एव **आशू** क्षिप्रगमनावेतौ **ते** तव **हरी** अश्वौ **ब्रह्मणा** स्तोत्रेण **युनज्मि**, रथे संयोजयामि। **स्थिरं** सुदृढं, **सुखं** सुखकरं तादृशं **रथम्** **अधितिष्ठन्** आरूढस्त्वं **सोमं** सोमपानाय आयाहि। **प्रजानन्** जानानः, **विद्वांश्च** त्वम् **उपयाहि**।

इति सप्तमेऽनुवाके पञ्चदशं सूक्तम्।

सप्ताशीतितमं सूक्तम्

सप्तर्चस्यास्य सूक्तस्य वसिष्ठ ऋषिः। प्रथमादितृचद्वयस्येन्द्रः, सप्तम्या ऋचश्चेन्द्राबृहस्पती देवताः। त्रिष्टुप् छन्दः।

द्वितीये छन्दोमेऽहनि 'अध्वर्यवोऽरुणं दुग्धमंशुम्' (२०।८७) 'यस्तस्तम्भ सहसा वि ज्मो अन्तान्' (२०।८८) 'अस्तेव सु प्रतरं लायमस्यन्' (२०।८९) इत्यैकाहिकानि भवन्ति। तदुक्तं वैताने--'द्वितीये अध्वर्यवोऽरुणं दुग्धमंशुम्' यस्तस्तम्भ सहसा वि ज्मो अन्तान्' 'अस्तेव सु प्रतरं लायमस्यन्' इत्यैकाहिकानि (वै० ३३।१९) इति।

तथा तृतीये छन्दोमेऽहनि 'अध्वर्यवोऽरुणम्' (२०।८७) 'यो अद्रिमित् प्रथमजा ऋतावा' (२०।९०) 'आ यात्विन्द्रः स्वपतिर्मदाय' (२०।९४) इत्येतानि ऐकाहिकानि भवन्ति। तदुक्तं वैताने 'तृतीयेऽध्वर्यवोऽरुणम्' 'यो अद्रिमित् प्रथमजा ऋतावा' 'आ यात्विन्द्रः स्वपतिर्मदाय' इति (वै० ३३।२०) इति।

अध्वर्यवोऽरुणं दुग्धमंशुं
जुहोतन वृषभाय क्षितीनाम्।
गौराद् वेदीयाँ अवपानमिन्द्रो
विश्वाहेद्याति सुतसोममिच्छन्॥१॥ ऋ. ७।९८।१

पदपाठः

अध्वर्यवः। अरुणम्। दुग्धम्। अंशुम्। जुहोतन। वृषभाय। क्षितीनाम्। गौरात्। वेदीयान्। अवऽपानम्। इन्द्रः। विश्वाहा। इत्। याति। सुतऽसोमम्। इच्छन्॥१॥

हे **अध्वर्यवः** ऋत्विजः! **क्षितीनां** जनानां मध्ये **वृषभाय** श्रेष्ठायेन्द्राय **अरुणं** दीप्यमानं **दुग्धम् अंशुम्** अभिषुतं सोमं **जुहोतन** जुहुत। **अवपानम्** अवक्रम्य स्थितं दूरस्थं पातव्यं सोमं **गौरात्** गौरमृगादपि **वेदीयान्** अतिशयेन विद्वान् **इन्द्रः सुतसोमम्** अभिषुतं सोमं यजमानम् **इच्छन्** अन्विच्छन् **विश्वाहा** विश्वान्यहानि **इत्** एव सर्वदैवेत्यर्थः **याति** गच्छति अतस्तस्मै इन्द्राय सोमं जुहोतनेत्यन्वयः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यद् दधिषे प्रदिवि चार्वन्नं
दिवेदिवे पीतिमिदस्य वक्षि ।
उत हृदोत मनसा जुषाण
उशन्निन्द्र प्रस्थितान् पाहि सोमान् ॥२॥ ऋ. ७।९८।२

पदपाठः

यत् । दधिषे । प्रऽदिवि । चारु । अन्नम् । दिवेऽदिवे । पीतिम् । इत् । अस्य । वक्षि । उत । हृदा । उत । मनसा । जुषाणः । उशन् । इन्द्र । प्रऽस्थितान् । पाहि । सोमान् ॥२॥

हे इन्द्र ! **प्रदिवि** प्रगतेषु दिनेषु पूर्वस्मिन् काले **चारु** शोभनं **यत्** सोमलक्षण-मन्नं **दधिषे** पानेन उदरं धारयसि, **अस्य** सोमस्य **पीतिमित्** पानमेव **दिवे दिवे** प्रतिदिवसं इदानीमपि **वक्षि** कामयसे । **उत** अपि च हे इन्द्र ! तव **हृदा** हृदयेन **उत** शब्दश्चार्थे । **मनसा** च **जुषाणः** सेवमानः **उशन्** अस्मान् कामयमानस्त्वं **प्रस्थितान्** पुरस्तान्नीतान् उत्तरवेदिस्थान् **सोमान् पाहि** पिब । वक्षि, वश कान्तौ इत्यस्य सिपि शपो लुकि षत्वकत्वषत्वेष्वेतद्रूपम् ।

जज्ञानः सोमं सहसे पपाथ
प्र ते माता महिमानमुवाच ।
एन्द्र पप्राथोर्वन्तरिक्षं युधा
देवेभ्यो वरिवश्चकर्थ ॥३॥ ऋ. ७।९८।३

पदपाठः

जज्ञानः । सोमम् । सहसे । पपाथ । प्र । ते । माता । महिमानम् । उवाच । आ । इन्द्र । पप्राथ । उरु । अन्तरिक्षम् । युधा । देवेभ्यः । वरिवः । चकर्थ ॥३॥

हे इन्द्र ! त्वं **जज्ञानो** जायमान एव **सहसे** बलाय **सोमं पपाथ** पीतवानसि, **ते** तव **महिमानं** महत्त्वं **माता** त्वदीया जननी अदितिः **प्रोवाच** प्रोक्तवती संवाद-सूक्ते 'अयं पन्था' इत्यादिके । अतः कारणात् हे इन्द्र ! त्वम् **उरु** विस्तीर्णम् **अन्तरिक्षम् आ पप्राथ** स्वतेजसा आपूरितवानसि । अपि च **युधा** युद्धेन **देवेभ्यः** स्तोतृभ्यो देवेभ्य एव वा **वरिवः** धनं **चकर्थ** कृतवानसि ।

यद् योधया महतो मन्यमानान् साक्षाम
तान् बाहुभिः शाशदानान् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यद्वा नृभिर्वृत इन्द्राभियुध्यास्तं
त्वयाजिं सौश्रवसं जयेम ॥४॥ ऋ. ७।९८।४

पदपाठः

यत् । योधयाः । महतः । मन्यमानान् । साक्षाम । तान् । बाहुऽभिः । शाशदानान् । यत् । वा । नृऽभिः । वृतः । इन्द्र । अभिऽयुध्याः । तम् । त्वया । आजिम् । सौश्रवसम् । जयेम ॥४॥

हे **इन्द्र ! महतो** बहून् **मन्यमानान्** शत्रून् **यद्** यदा **योधयाः** अस्माभिः योधयेः । तैः सह योद्धुं बलं प्रयच्छेरित्यर्थः, तदानीं **शाशदानान्** हिंसतः **तान्** शत्रून् **बाहुभिः** हस्तैरेव केवलं त्वत्प्रसादात् **साक्षाम** सहेम अभिभवेम । **यद्वा** यदि वा **नृभिः** नेतृभिः मरुद्भिः **वृतः** परिवृतस्त्वमेव **अभियुध्याः**, अस्मदीयान् शत्रून् अभियुध्येश्च **सौश्रवसं**, श्रवोऽन्नं यशो वा शोभनस्य श्रवसो हेतुं **तम् आजिं** सङ्ग्रामं **त्वया** सहायेन वयं **जयेम** ।

प्रेन्द्रस्य वोचं प्रथमा कृतानि
प्र नूतना मघवा या चकार ।
यदेददेवीरसहिष्ट माया
अथाभवत् केवलः सोमो अस्य ॥५॥ ऋ. ७।९८।५

पदपाठः

प्र । इन्द्रस्य । वोचम् । प्रथमा । कृतानि । प्र । नूतना । मघऽवा । या । चकार । यदा । इत् । अदेवीः । असहिष्ट । मायाः । अथ । अभवत् । केवलः । सोमः । अस्य ॥५॥

इन्द्रस्य कृतानि वीर्यकर्माणि **प्रथमा** प्रथमानि पुरातनानि **प्रवोचं** प्रब्रवीमि । **मघवा** धनवानिन्द्रः **या** यानि **चकार** कृतवान् **नूतना** नूतनानि च तानि प्रवोचं **यदेत् अदेवीः** आसुरीः **मायाः** तैः कृतानि **असहिष्ट** अभ्यभूत् । **अथ** अनन्तरमेव । **अस्य** इन्द्रस्य **सोमः** केवलः असाधारणः **अभवत्** । तदा प्रभृत्येव सोमस्येन्द्रस्य चासाधारणः सम्बन्धो जात इत्यर्थः ।

तवेदं विश्वमभितः पशव्यं यत्
पश्यसि चक्षसा सूर्यस्य ।
गवामसि गोपतिरेक इन्द्र
भक्षीमहि ते प्रयतस्य वस्वः ॥६॥ ऋ. ७।९८।६

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

तव । इदम् । विश्वम् । अभितः । पशव्यम् । यत् । पश्यसि । चक्षसा । सूर्यस्य । गवाम् । असि । गोऽपतिः । एकः । इन्द्र । भक्षीमहि । ते । प्रऽयतस्य । वस्वः ।।६।।

हे **इन्द्र !** **पशव्यं** सर्वविधपशुभ्यो हितं **अभितः** सर्वतो विद्यमानम् **इदं विश्वं** सर्वं जगत् **तव** स्वभूतं, **सूर्यस्य** प्रेरकस्य सवितुः **चक्षसा** तेजसा **यद्विश्वं पश्यसि** त्वं प्रकाशयसि । अपि चेन्द्र ! **एक** एव त्वं **गोपतिरसि** । न केवलमेकस्या एव गोः पतिः अपितु सर्वासामित्याह **गवाम्** इति । अतः कारणात् **ते** त्वया **प्रयतस्य** प्रत्तस्य, द्वितीयार्थे षष्ठी, प्रत्तं वस्वः धनं **भक्षीमहि,** भजेमहि ।

बृहस्पते युवमिन्द्रश्च वस्वो
दिव्यस्येशाथे उत पार्थिवस्य ।
धत्तं रयिं स्तुवते कीरये
चिद् यूयं पात स्वस्तिभिः सदा नः ।।७।। ऋ. ७।६८।७

पदपाठः

बृहस्पते । युवम् । इन्द्रः । च । वस्वः । दिव्यस्य । ईशाथे इति । उत । पार्थिवस्य । धत्तम् । रयिम् । स्तुवते । कीरये । चित् । यूयम् । पात । स्वस्तिऽभिः । सदा । नः ।।७।।

सायणेन व्याख्यातोऽयं मन्त्रः (अथर्व० २०।१७।१२) ।

इति सप्तमेऽनुवाके षोडशं सूक्तम् ।

अष्टाशीतितमं सूक्तम्

पङ्ऋचस्यास्य सूक्तस्य वामदेव ऋषिः । बृहस्पतिर्देवता । त्रिष्टुप् छन्दः ।

द्वितीये छन्दोमेऽहनि 'यस्तस्तम्भ सहसा वि ज्मो अन्तान्' इत्यस्य विनियोगः पूर्वसूक्तेन सहोक्तः ।

यस्तस्तम्भ सहसा वि ज्मो
अन्तान् बृहस्पतिस्त्रिषधस्थो रवेण ।
तं प्रत्नास ऋषयो दीध्यानाः
पुरो विप्रा दधिरे मन्द्रजिह्वम् ।।१।। ऋ. ४।५०।१

पदपाठः

यः । तस्तम्भ । सहसा । वि । ज्मः । अन्तान । बृहस्पतिः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्रिऽसधस्थः । रवेण । तम् । प्रत्नासः । ऋषयः । दीध्यानाः । पुरः । विप्राः । दधिरे । मन्द्रऽजिह्वम् ॥१॥

यो बृहस्पतिः बृहतो देवस्य यज्ञस्य वा पालयिता देवः **सहसा** बलेन **ज्मः** पृथिव्याः **अन्तान्**, दश दिश इत्यर्थः तान् **वि तस्तम्भ** विविधं स्तम्भितवान् नियमितवान् । **त्रिसधस्थः** त्रिषु स्थानेषु वर्त्तमानः । **रवेण** एवं तिष्ठत इत्यनेन शब्देन **तं** देवं **प्रत्नासः** पुराणाः महर्षयो **दीध्यानाः** दीप्यमानाः **विप्राः** विद्वांसो यजमानादयः **पुरः दधिरे** पुरस्तात् स्थापितवन्तः स्तुत्यादिना, **मन्द्रजिह्वं** मादनजिह्वं मोदनजिह्वम् ।

धुनेतयः सु प्रकेतं मदन्तो
बृहस्पते अभि ये नस्ततस्रे ।
पृषन्तं सृप्रमदब्धमूर्वं
बृहस्पते रक्षतादस्य योनिम् ॥२॥ ऋ. ४।५०।२

पदपाठः

धुनऽइतयः । सुऽप्रकेतम् । मदन्तः । बृहस्पते । अभि । ये । नः । ततस्रे । पृषन्तम् । सृप्रम् । अदब्धम् । ऊर्वम् । बृहस्पते । रक्षतात् । अस्य । योनिम् ॥२॥

हे **बृहस्पते ! धुनेतयः** धुना शत्रूणां कम्पयित्रीति गतिर्येषां ते तादृशाः **सुप्रकेतं** शोभनप्रज्ञं त्वां **मदन्तो** मादयन्तो **नः** अस्मत्सम्बन्धिनो **ये** ऋत्विजः **अभि-ततस्रे** आत्मानमुपक्षिपन्ति स्तुवन्ति वा **अस्य** एषां **योनिं** कारणं यज्ञं यजमानं वा मां **रक्षतात्** रक्ष । योनिर्विशेष्यते । **पृषन्तं** फलानि सिञ्चन्तं **सृप्रं** सर्पणस्वभावम्, **अदब्धम्** अहिंसितम्, **ऊर्वम्** उरुम् ।

बृहस्पते या परमा परावदत
आ त ऋतस्पृशो नि षेदुः ।
तुभ्यं खाता अवता अद्रिदुग्धा
मध्व श्चोतन्त्यभितो विरप्शम् ॥३॥ ऋ. ४।५०।३

पदपाठः

बृहस्पते । या । परमा । पराऽवत् । अतः । आ । ते । ऋतऽस्पृशः । नि । सेदुः । तुभ्यम् । खाताः । अवताः । अद्रिऽदुग्धाः । मध्वः । श्चोतन्ति । अभितः । विऽरप्शम् ॥३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे **बृहस्पते ! या** प्रसिद्धा परमोत्कृष्टा **परावत्** अत्यन्तं दूरभूता वसतिः स्वर्गाख्या अस्ति । यद्वा लिङ्गव्यत्ययः, परमं स्थानमस्ति । **अतः** अस्माद् देशात् **आ,** आ इत्यर्वागर्थे । अधस्तात् **ते** तव सम्बन्धिनः **ऋतस्पृशो** यज्ञं स्पृशन्तोऽश्वाः **निषेदुः** निषण्णाः भवन्ति । **तुभ्यं खाता अवताः** । लुप्तोपमैषा । यथा खाताः कूपाः **अभितश्चोतन्ति** तद्वत् । **अद्रिदुग्धाः** ग्रावभिः अभिषुताः सोमाः **विरप्शं** विशेषेण शब्देन स्तोत्रं यथा भवति तथा **मध्वः** मधुररसं **श्चोतन्ति** स्रवन्ति । ऋग्वेदे तु मन्त्रपाठे 'मध्वः' इति पाठो दृश्यते । पदपाठस्तूभयत्र समान एव ।

बृहस्पतिः प्रथमं जायमानो
महो ज्योतिषः परमे व्योमन् ।
सप्तास्यस्तुविजातो रवेण
वि सप्तरश्मिरधमत् तमांसि ॥४॥ ऋ. ४।५०।४

पदपाठः

बृहस्पतिः । प्रथमम् । जायमानः । महः । ज्योतिषः । परमे । विऽओमन् । सप्तऽआस्यः । तुविऽजातः । रवेण । वि । सप्तऽरश्मिः । अधमत् । तमांसि ॥४॥

अयं **बृहस्पतिः** मन्त्राभिमानी देवो **महो** महतो **ज्योतिषो** दीप्तस्य आदित्यस्य **परमे** निरतिशये **व्योमन्** व्योमनि **प्रथमं जायमानः** प्रादुर्भवन् **सप्तास्यः** सप्तच्छन्दोमयमुखः **तुविजातः** बहुप्रकारं संभूतः **रवेण** शब्देन **सप्तरश्मिः** सर्पणस्वभावतेजोयुक्तः तमांसि **वि अधमत्** । धमतिर्गतिकर्मा इति यास्कः (निरु० ६।२) विविधं गच्छति । नाशयतीत्यर्थः ।

स सुष्टुभा स ऋक्वता गणेन
वलं रुरोज फलिगं रवेण ।
बृहस्पतिरुस्रिया हव्यसूदः
कनिक्रदद् वावशतीरुदाजत् ॥५॥ ऋ. ४।५०।५

पदपाठः

सः । सुऽस्तुभा । सः । ऋक्वता । गणेन । वलम् । रुरोज । फलिऽगम् । रवेण । बृहस्पतिः । उस्रियाः । हव्यऽसूदः । कनिक्रदत् । वावशतीः । उत् । आजत् ॥५॥

स **बृहस्पतिः सुष्टुभा** शोभनस्तुतिमता **ऋक्वता** दीप्तिमता **गणेन** अङ्गिरसां **रवेण** शब्देन च सह **फलिगम्** । ञिफला विशरणे । फलिर्भेदः, तेन गच्छतीति

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

फलिगम् । वलं वलनामानमसुरं रुरोज बभञ्ज । द्वितीयः स-शब्द पूरणः । स एव देवः उस्त्रियाः भोगानामुत्स्राविणीः हव्यसूदः क्षीरादिहविष्प्रेरिकाः वावशतीः वावश्यमानाः गाः कनिक्रदत् शब्दं कुर्वन् आजत् उद्घाटयति स्म ।

एवा पित्रे विश्वदेवाय वृष्णे
यज्ञैर्विधेम नमसा हविर्भिः ।
बृहस्पते सु प्रजा वीरवन्तो
वयं स्याम पतयो रयीणाम् ॥६॥ ऋ. ४।५०।६

पदपाठः

एव । पित्रे । विश्वऽदेवाय । वृष्णे । यज्ञैः । विधेम । नमसा । हविःऽभिः । बृहस्पते । सुऽप्रजाः । वीरऽवन्तः । वयम् । स्याम । पतयः । रयीणाम् ॥६॥

पित्रे पालकाय **विश्वदेवाय** सर्वदेवतारूपाय । देवानां मन्त्रप्रतिपाद्यत्वादस्य च मन्त्राभिमानित्वात् विश्वदेवत्वम् । यद्वा अत्र देवशब्दः स्तुत्यर्थः । सर्वैः स्तुत्याय **वृष्णे** वर्षकाय **बृहस्पतये** देवाय **एव** एवमुक्तप्रकारेण **यज्ञैः** तत्साधनैः **हविर्भिः** आज्य-चर्वादिलक्षणैः **नमसा** स्तुत्या च **विधेम** परिचरेम । हे **बृहस्पते** ! **सुप्रजाः** शोभनपुत्राः **वीरवन्तः** वीर्योपेताः **वयं रयीणाम्** धनानां **पतयः स्याम** ।

इति सप्तमेऽनुवाके सप्तदशं सूक्तम् ।

एकोननवतितमं सूक्तम्

एकादशर्चस्यास्य सूक्तस्य कृष्ण ऋषिः । इन्द्रो देवता । त्रिष्टुप् छन्दः ।

द्वितीये छन्दोमेऽहनि 'अस्तेव सु प्रतरं लायमस्यन्' । इत्यस्य विनियोगः 'अध्वर्यवोऽरुणं दुग्धमंशुम्' (२०।८७) इत्ययेन सह उक्तः ।

अस्तेव सु प्रतरं लायमस्यन्
भूषन्निव प्र भरा स्तोममस्मै ।
वाचा विप्रास्तरत वाचमर्यो
नि रामय जरितः सोम इन्द्रम् ॥१॥ ऋ. १०।४२।१

पदपाठः

अस्ताऽइव । सु । प्रऽतरम् । लायम् । अस्यन् । भूषन्ऽइव । प्र । भर । स्तोमम् । अस्मै । वाचा । विप्राः । तरत । वाचम् । अर्यः । नि । रमय । जरितरिति । सोमे । इन्द्रम् ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रतरं प्रवृद्धतरं **लायं** संश्लेषणं हृदयवेधिनं शरं **सु** सुष्ठु **अस्यन्** प्रक्षिपन् **अस्तेव** यथा क्षेप्ता धानुष्को **भूषन्निव** यथा च अलङ्कारमलङ्कुर्वन् अलङ्कर्ता तद्वत् **स्तोममस्मै** इन्द्राय **प्रभर** प्रापय । हे अन्तरात्मन् ! त्वमिति शेषः । किञ्च हे **विप्राः** मेधाविनो यूयं **वाचा** स्तुत्या **अर्यः** अरेः शत्रोः **दाचं नि तरत,** निराकुरुतेत्यर्थः ! हे **जरितः** स्तोतः ! त्वं **सोमे** सोमयागे **इन्द्रं नि रमय** नितान्तं क्रीडय ।

दोहेन गामुप शिक्षा सखायं
प्र बोधय जरितर्जारमिन्द्रम् ।
कोशं न पूर्णं वसुना न्यृष्टमा च्यावय
मघदेयाय शूरम् ॥२॥ ऋ. १०।४२।२

पदपाठः

दोहेन । गाम् । उप । शिक्ष । सखायम् । प्र । बोधय । जरितः । जारम् । इन्द्रम् । कोशम् । न । पूर्णम् । वसुना । निऽऋष्टम् । आ । च्यवय । मघऽदेयाय । शूरम् ॥२॥

जरितः हे स्तोतः ! त्वं **दोहेन** कामानां दोहनाय गां गोरूपं **सखायं** प्रियम् **इन्द्रमुपशिक्ष** वशं नय । किञ्च जारं भूतानां जरयितारम् इन्द्रं **प्रबोधय,** स्तुतिभिः प्रबुद्धं विधेहि । किञ्च **पूर्णम्** उदकेन पूरितं **कोशं न** पात्रमिव **वसुना** हिरण्यादिभिः धनैः **न्यृष्टं** नीचैर्गतं शूरं वीरमिन्द्रं **मघदेयाय** धनदानाय **आ च्यवय,** अभिमुखं कुरु इत्यर्थः ।

किमङ्ग त्वा मघवन् भोजमाहुः
शिशीहि मा शिशयं त्वा शृणोमि ।
अप्नस्वती मम धीरस्तु शक्र
वसुविदं भगमिन्द्रा भरा नः ॥३॥ ऋ. १०।४२।३

पदपाठः

किम् । अङ्ग । त्वा । मघऽवन् । भोजम् । आहुः । शिशीहि । मा । शिशयम् । त्वा । शृणोमि । अप्नस्वती । मम । धीः । अस्तु । शक्र । वसुऽविदम् । भगम् । इन्द्र । आ । भर । नः ॥३॥

अङ्गेति सामान्याह्वानम् । **अङ्ग मघवन् !** हे **धनवन् इन्द्र शक्र ! त्वा** त्वां **किं** किमर्थं **भोजं** स्तोतृजनानां भोजकम् अभीष्टम् **आहुः** सर्वे । यदि न ददासी-त्यध्याहारः । तस्माद्ददास्येव स्तोतृभ्यो धनानीत्यर्थः । तथा सति मा मां स्तोतारं **शिशीहि** धनदानेन तीक्ष्णी कुरु । **त्वा** त्वां **शिशयं** स्तोतृजनानां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संस्कर्त्तारं शृणोमि। किञ्च मम **धीः** बुद्धिः **अप्नस्वती** कर्मवती **अस्तु** भवतु। किञ्च **नः** अस्माकं **वसुविदं** धनस्य लम्भकं **भगं** भाग्यम् **आभर** आहर।

त्वां जना ममसत्येष्विन्द्र
संतस्थाना वि ह्वयन्ते समीके।
अत्रा युजं कृणुते यो हविष्मान्नासुन्वता
सख्यं वष्टि शूरः ॥४॥ ऋ. १०।४२।४

पदपाठः

त्वाम्। जनाः। ममऽसत्येषु। इन्द्र। सम्ऽतस्थानाः। वि। ह्वयन्ते। सम्ऽईके। अत्र। युजम्। कृणुते। यः। हविष्मान्। न। असुन्वता। सख्यम्। वष्टि। शूरः ॥४॥

हे **इन्द्र! त्वां जनाः ममसत्येषु** सङ्ग्रामेषु **विह्वयन्ते** विविधमाह्वयन्ति साहाय्यार्थम्। एतदेव दर्शयति। **समीके** सङ्ग्रामे **सन्तस्थानाः** सहतिष्ठन्तो जना विह्वयन्ते इति। **अत्र** अस्मिन्नाह्वाने सः **शूरः** इन्द्रः तं **युजं** सखायं **कृणुते** कुरुते **यो** हि **हविष्मान्** भवति। **असुन्वता** सोमाभिषवम् अकुर्वता पुरुषेण सह **सख्यं** सखित्वं **न** अयं **वष्टि** कामयते।

धनं न स्पन्द्रं बहुलं यो अस्मै
तीव्रान्त्सोमाँ आसुनोति प्रयस्वान्।
तस्मै शत्रूॅन्त्सुतुकान् प्रातरह्नो
नि स्वष्ट्रान् युवति हन्ति वृत्रम् ॥५॥ ऋ.१०।४२।५

पदपाठः

धनम् न। स्पन्द्रम्। बहुलम् यः। अस्मै। तीव्रान्। सोमान्। आऽसुनोति। प्रयस्वान्। तस्मै। शत्रून्। सुऽतुकान्। प्रातः। अह्नः। नि। सुऽअष्ट्रान्। युवति। हन्ति। वृत्रम् ॥५॥

प्रयस्वान् हविष्मान् **यो** याजकः **स्पन्द्रं** स्पन्दनस्वभावं गवाश्वादिकं **बहुलं** प्रचुरं **धनं न** यथा धनं दरिद्राय पात्रभूताय दातुं संस्करोति तद्वत् **अस्मै** इन्द्राय **तीव्रान्** तीव्ररसान् **सोमान् आसुनोति** अभिषुणोति। अभिषवाख्येन संस्कारेण संस्करोतीत्यर्थः, **तस्मै** यजमानाय **प्रातरह्नः** पूर्वाह्णे **सुतुकान्** सुप्रेरणान् शोभन-पुत्रसहितान् वा **स्वष्ट्रान्** शोभनायुधान् शत्रून् **नि युवति** स इन्द्रः पृथक् करोति। किञ्च **वृत्रं** तदीयमुपद्रवं **हन्ति** हिनस्ति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यस्मिन् वयं दधिमा शंसमिन्द्रे
यः शिश्राय मघवा काममस्मे ।
आराच्चित् सन् भयतामस्य
शत्रुर्न्यस्मै द्युम्ना जन्या नमन्ताम् ॥६॥ ऋ. १०।४२।६

पदपाठः

यस्मिन् । वयम् । दधिम । शंसम् । इन्द्रे । यः । शिश्राय । मघऽवा । कामम् । अस्मे इति । आरात् । चित् । सन् । भयताम् । अस्य । शत्रुः । नि । अस्मै । द्युम्ना । जन्या । नमन्ताम् ॥६॥

यस्मिन्निन्द्रे वयं घौषेयाः सुहस्त्याः शंसं स्तुतिं **दधिम** विदध्मः **यश्च** मघवा धनवानिन्द्रः **अस्मे** अस्मासु **कामम्** अभिलाषं **शिश्राय** श्राययति । **अस्य** इन्द्रस्य **शत्रुः आरात्** दूर एव सन् **चित्** सन्नपि **भयतां** बिभेतु । किञ्च **अस्मै** इन्द्राय **जन्या** जन्यानि शत्रुजनपदभवानि **द्युम्ना** द्युम्नानि अन्नानि **नि नमन्तां** प्रह्वीभवन्तु । भोजनीयानि भवन्तु इत्यर्थः ।

आराच्छत्रुमप बाधस्व दूरमुग्रो
यः शम्बः पुरुहूत तेन ।
अस्मे धेहि यवमद् गोमदिन्द्र
कृधी धियं जरित्रे वाजरत्नाम् ॥७॥ ऋ. १०।४२।७

पदपाठः

आरात् । शत्रुम् । अप । बाधस्व । दूरम् । उग्रः । यः । शम्बः । पुरुऽहूत । तेन । अस्मे इति । धेहि । यवऽमत् । गोऽमत् । इन्द्र । कृधि । धियम् । जरित्रे । वाजऽरत्नाम् ॥७॥

हे **पुरुहूत** बहुभिराहूत इन्द्र ! तव **यः उग्रः** उद्गूर्णः **शम्बः** वज्रः, **तेन शत्रुम्** अस्मदरिम् **आरात्** अस्मत्समीपात् **दूरम् अपबाधस्व** त्वमपगमय । किञ्च **अस्मे** अस्मासु **यवमत्** यवयुक्तं **गोमत्** गोयुक्तं च धनं **धेहि** निधेहि । किञ्च **जरित्रे** स्तोत्रे मह्यं **वाजरत्नां** रमणीयां **धियं** कर्म **कृधि** कुरु । 'शम्बः शिम्ब इति वज्रनाम शमयतेर्वा शातयतेर्वा' (निरु. ५।२४) इति ।

प्र यमन्तर्वृषसवासो अग्मन्
तीव्राः सोमा बहुलान्तास इन्द्रम् ।
नाह दामानं मघवा नि यंसन्
नि सुन्वते वहति भूरि वामम् ॥८॥ ऋ. १०।४२।७

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

प्र। यम् । अन्तः। वृषऽसवासः । अग्मन्। तीव्राः। सोमाः। बहुलऽअन्तासः। इन्द्रम्। न। अह। दामानम्। मघऽवा। नि। यंसत्। नि। सुन्वते। वहति। भूरि। वामम् ॥८॥

अन्तः जठरे **यम्** इन्द्रं **वृषसवासः** वृषसवा अग्नौ सोमस्य वर्षितृभिः अध्वर्युभिः अभिषुताः **तीव्राः** तीव्ररसाः **बहुलान्तासः** बहुलमन्नादिकमन्ते येभ्यस्ते बहुलान्ताः **सोमाः प्र अग्मन्** प्रगच्छन्ति स **मघवा** धनवानिन्द्रः **दामानं** दातारं यजमानं **नाह** नैव **नि यसत** नियच्छति। किन्तु **सुन्वते** सोमाभिषवं कुर्वते यजमानाय **भूरि** अधिकं **वामं** वननीयं धनं **नि वहति** नितरां प्रापयति।

उत प्रहामतिदीवा जयति कृतमिव
श्वघ्नी वि चिनोति काले।
यो देवकामो न धनं रुणद्धि
समित् तं रायः सृजति स्वधाभिः ॥९॥ ऋ. १०।४२।९

पदपाठः

उत। प्रऽहाम्। अतिऽदीवा। जयति। कृतम्ऽइव। श्वऽघ्नी। वि। चिनोति। काले। यः। देवऽकामः। न। धनम्। रुणद्धि। सम्। इत्। तम्। रायः। सृजति। स्वधाभिः ॥९॥

व्याख्यातोऽयं मन्त्रः सायणेन (अथर्व० ६।५०।६)।

गोभिष्टरेमामतिं दुरेवां यवेन
वा क्षुधं पुरुहूत विश्वे।
वयं राजसु प्रथमा धनान्य-
रिष्टासो वृजनीभिर्जयेम ॥१०॥ ऋ. १०।४२।१०

पदपाठः

गोभिः। तरेम। अमतिम्। दुःऽएवाम्। यवेन। वा। क्षुधम्। पुरुऽहूत। विश्वे। वयम्। राजऽसु। प्रथमाः। धनानि। अरिष्टासः। वृजनीभिः। जयेम ॥१०॥

व्याख्यातोऽयं मन्त्रः सायणेन (अथर्व० ७।१७।१०)।

बृहस्पतिर्नः परिपातु
पश्चादुतोत्तरस्मादधरादघायोः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इन्द्रः पुरस्तादुत मध्यतो नः सखा
सखिभ्यो वरीयः कृणोतु ॥११॥ ऋ. १०।४२।११

पदपाठः

बृहस्पतिः । नः । परि । पातु । पश्चात् । उत । उत्ऽतरस्मात् । अधरात् । अघऽयोः । इन्द्रः । पुरस्तात् । उत । मध्यतः । नः । सखा । सखिऽभ्यः । वरीयः । कृणोतु ॥११॥

व्याख्यातोऽयं मन्त्रः सायणेन (२०।१७।११ तथा ७।५१।१) ।

इति सप्तमेऽनुवाके अष्टादशं सूक्तम् ।

नवतितमं सूक्तम्

तृचस्यास्य सूक्तस्य भरद्वाज ऋषिः । बृहस्पतिर्देवता । त्रिष्टुप् छन्दः ।

तृतीये छन्दोमेऽहनि 'यो अद्रिभित्' इत्यस्य विनियोगः 'अध्वर्यवोऽरुणम्' (२०।८७) इत्यनेन सहोक्तः ।

तथोभयोर्द्वितीय-तृतीययोरह्नोरैकाहिकानां सूक्तानां मध्यमस्य आदावन्ते वा 'यो अद्रिभित्' (२०।९०) 'इमां धियं सप्तशीर्ष्णीं पिता नः' (२०।९१) इत्येतयोर्यथाक्रमम् एकैकं शंसति । तदुक्तं वैताने—"यो अद्रिभित्', 'इमां धियं सप्तशीर्ष्णीं पिता नः' इत्युभयोरेकैकं मध्यमस्यादावन्त्ये वा" (वै० ३३।२१) इति ।

यो अद्रिभित् प्रथमजा ऋतावा
बृहस्पतिराङ्गिरसो हविष्मान् ।
द्विबर्हज्मा प्राघर्मसत् पिता न
आ रोदसी वृषभो रोरवीति ॥१॥ ऋ. ६।७३।१

पदपाठः

यः । अद्रिऽभित् । प्रथमऽजाः । ऋतऽवा । बृहस्पतिः । आङ्गिरसः । हविष्मान् । द्विबर्हऽज्मा । प्राघर्मऽसत् । पिता । नः । आ । रोदसी । वृषभः । रोरवीति ॥१॥

यो बृहस्पतिरद्रिभित् पणिभिर्विरचितानां शिलाखण्डानां भेत्ता मेघानां वा विदारकः । **प्रथमजाः** प्रजापतेः वीर्यात् प्रथमं जातः, **ऋतावा** सत्यवान् उदकवान् वा **अङ्गिरसः** पश्चाज्जातः । तथा च निगमः "येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन् यदङ्गाराः पुनरवशान्ता उददीप्यन्त तद् बृहस्पतिरभवत्" (ऐ० ब्रा० ३।३४) इति । **हविष्मान्** प्रशस्तानि हवींषि विद्यन्ते यस्य सः, तादृशः यज्ञभागवानित्यर्थः । **द्विबर्हज्मा**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वयोर्लोकयोर्वृंहितगमनः, **प्राचर्मसत्** प्रकर्षेण दीप्तस्थाने वर्त्तमानः **नः** अस्माकं **पिता** पालयिता भवति, स बृहस्पतिः **वृषभो** वर्षकः सन् **रोदसी** द्यावापृथिव्यौ **रोरवीति** अभिगर्जति ।

जनाय चिद् य ईवत उ लोकं
बृहस्पतिर्देवहूतौ चकार ।
घ्नन् वृत्राणि वि पुरो दर्दरीति
जयं छत्रूँरमित्रान् पृत्सु साहन् ॥२॥ ऋ. ६।७३।२

पदपाठः

जनाय । चित् । यः । ईवते । ऊं इति । लोकम् । बृहस्पतिः । देवऽहूतौ । चकार । घ्नन् । वृत्राणि । वि । पुरः । दर्दरीति । जयन् । शत्रून् । अमित्रान् । पृत्ऽसु । सहन् ॥२॥

अपि च **यो बृहस्पतिर्देवहूतौ** यज्ञे वर्त्तमानाय **ईवते** उपगच्छते स्तोत्रे **जनाय लोकं** स्थानं **चकार** करोति । **चिदिति** पूरणः । सः **वृत्राणि** आवरकाणि तमांसि **घ्नन्** निवारयन् **पृत्सु** युद्धेषु **शत्रून् जयन् अमित्रान्** सहन् अभिभवन् **पुरः** आसुरीः पुरीः **वि दर्दरीति** भृश विदारयति ।

बृहस्पतिः समजयद् वसूनि
महो व्रजान् गोमतो देव एषः ।
अपः सिषासन्त्स्वरप्रतीतो
बृहस्पतिर्हन्त्यमित्रमर्कैः ॥३॥ ऋ. ६।७३।३

पदपाठः

बृहस्पतिः । सम् । अजयत् । वसूनि । महः । व्रजान् । गोऽमतः । देवः । एषः । अपः । सिसासन् । स्वः । अप्रतिऽइतः । बृहस्पतिः । हन्ति । अमित्रम् । अर्कैः ॥३॥

देवो द्योतमान **एषः बृहस्पतिर्वसूनि** पणीनामसुराणां धनानि **महो** महतः **गोमतः** गोसहितान् **व्रजान्** च **समजयत्** । किञ्च **बृहस्पतिः अप्रतीतः** केनापि अप्रतिगतः **सिषासन्** सम्भक्तुकामः **स्वः** स्वर्गस्य **अमित्रम्** असुरम् **अर्कैः** अर्चनसाधनैर्मन्त्रैः **हन्ति** । 'अर्को मन्त्रो भवतीति' यास्कः (निरु० ५।४) ।

इति सप्तमेऽनुवाके एकोनविंशं सूक्तम् ।

इति सप्तमोऽनुवाकः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकनवतितमं सूक्तम्

द्वादशर्चस्यास्य सूक्तस्यायास्य ऋषिः । बृहस्पतिर्देवता । त्रिष्टुप् छन्दः ।

'इमां धियं सप्तशीर्ष्णीं पिता नः' इति सूक्तस्य पूर्वसूक्तेन सह उक्तो विनियोगः ।

इमां धियं सप्तशीर्ष्णीं पिता
न ऋतप्रजातां बृहतीमविन्दत् ।
तुरीयं स्विज्जनयद् विश्वजन्योऽयास्य
उक्थमिन्द्राय शंसन् ॥१॥ ऋ. १०।६७।१

पदपाठः

इमाम् । धियम् । सप्तऽशीर्ष्णीम् । पिता । नः । ऋतऽप्रजाताम् । बृहतीम् । अविन्दत् । तुरीयम् । स्वित् । जनयत् । विश्वऽजन्यः । अयास्यः । उक्थम् । इन्द्राय । शंसन् ॥१॥

अत्रेतिहासः । पुरा अङ्गिराः बृहस्पतिं पुत्रमलभत । स चेन्द्रस्य पुरोहितोऽभवत् । कदाचित्तस्य गावः पणिभिरपहृत्य वलपुरं प्रापय्य त्रिषु स्थानेषु तमसावृतेषु स्थापिता आसन् । अथ तासामन्वेषणाय इन्द्रेण प्रेरितो बृहस्पतिर्मरुद्भिः सह तत्रागत्य गवां दर्शनाय सूर्यं जनयित्वा वलमसुरं तदनुचरान् पणींश्च हत्वा गाः आजहारेति । तदत्र दर्शयिष्यते । **धियं** कर्मणां धात्रीं, **सप्तशीर्ष्णीं** सप्तशिरस्कां सप्तभिः शिरःस्थानीयैः तद्वत्प्रधानभूतैः मरुद्गणैरुपेताम् । यद्वा सप्तच्छन्दोमयशिरस्काम्, **ऋतप्रजातां** यज्ञार्थमुत्पन्नां **बृहतीं** महतीम् **इमां** तनुं **नः** अस्माकं **पिता** अङ्गिराः **अविन्दत्** लब्धवान् । कर्मणां ध्यातारं बृहस्पतिं पुत्रमलभतेत्यर्थः । भवत्यत्र ब्राह्मणम् "येऽङ्गारा आसंस्तेऽङ्गिरसोऽभवन्, यदङ्गाराः पुनरवशान्ता उददीप्यन्त तद् बृहस्पतिरभवत्" (ऐ. ब्रा. ३।३४) इति । तथा **तुरीयं स्वित्** नप्तारमपि **जनयत्** अजनयत् **विश्वजन्यः** सर्वजनहितः **इन्द्राय** ईश्वराय बृहस्पतये इन्द्राय वा **उक्थं** स्तोत्रं **शंसन्** अयम् **अयास्यो** नामर्षिः । पूर्वमेव नोऽस्माकं पिताकार्षीदित्याह ।

ऋतं शंसन्त ऋजु दीध्याना
दिवस्पुत्रासो असुरस्य वीराः ।
विप्रं पदमङ्गिरसो दधाना
यज्ञस्य धाम प्रथमं मनन्त ॥२॥ ऋ. १०।६७।२

पदपाठः

ऋतम् । शंसन्तः । ऋजु । दीध्यानाः । दिवः । पुत्रासः । असुरस्य ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वीराः । विप्रम् । पदम् । अङ्गिरसः । दधानाः । यज्ञस्य । धाम । प्रथमम् । मनन्त ॥२॥

ऋतं सत्यं स्तोत्रं **शंसन्तः** स्तुवन्तः **ऋजु** कल्याणं **दीध्यानाः** कर्माणि ध्यायन्तो **दिवो** दीप्तस्य **असुरस्य** प्रज्ञावतः अग्नेः **अङ्गिरसः पुत्रासः** पुत्राः । अङ्गिरसो ह्यङ्गारेभ्यो जाता इत्युक्तम् । **वीराः** विक्रान्तप्रज्ञा एतेऽङ्गिरसो **विप्रं** प्रज्ञापकं **यज्ञस्य धाम** धारकं पदं बृहस्पत्याख्यं **दधानाः** कर्मणा धारयन्तः सन्तः **प्रथमन्** आदित एव **मनन्त** स्तुवन्ति । प्रज्ञापकं ह्येतत्स्थानं यद् बृहस्पतिरिति ।

हंसैरिव सखिभिर्वावदद्भिरश्मन्मयानि
नहना व्यस्यन् ।
बृहस्पतिरभिकनिक्रदद् गा उत
प्रास्तौदुच्च विद्वाँ अगायत् ॥३॥ ऋ. १०।६७।३

पदपाठः

हंसैःऽइव । सखिऽभिः । वावदत्ऽभिः । अश्मन्ऽमयानि । नहना । विऽअस्यन् । बृहस्पतिः । अभिऽकनिक्रदत् । गाः । उत । प्र । अस्तौत् । उत् । च । विद्वान् । अगायत् ॥३॥

हंसैरिव मधुरवाग्भिः **सखिभिः** सखिभूतैः **वावदद्भिः** अत्यन्तं शब्दायमानैर्मरुद्भिः **अश्मन्मयानि** अश्ममयानि **नहना** गवां बन्धकानि आवरकाणि असुरस्थानानि **व्यस्यन्** विक्षिपन् शिथिलयन् **अभिकनिक्रदत्** आभिमुख्येन शब्दयन् **गाः** पणिभिरपहृतान् पशूनाजिहीर्षुः सः **बृहस्पतिः** वर्तते । यद्वा वावदद्भिः अत्यन्तं स्तुवद्भिः स्तोतृभिः सह गाः स्तोत्रलक्षणा वाचोऽभिकनिक्रदत् आभिमुख्येन उच्चारयन्, **उत** अपि **च प्रास्तौत्** । कर्मणि प्रवृत्तौ यज्ञस्य सखिभिः सहासीनः साम गातुं प्रस्तौति । **विद्वान्** सर्वं जानानः स उद्गाता भूत्वा **उदगायत्** देनान् उद्गायति, अभिष्टौति ।

अवो द्वाभ्यां पर एकया गा
गुहा तिष्ठन्तीरनृतस्य सेतौ ।
बृहस्पतिस्तमसि ज्योतिरिच्छन्नुदुस्रा
आकर्वि हि तिस्र आवः ॥४॥ ऋ. १०।६७।४

पदपाठः

अवः । द्वाभ्याम् । परः । एकया । गाः । गुहा । तिष्ठन्तीः । अनृतस्य । सेतौ । बृहस्पतिः । तमसि । ज्योतिः । इच्छन् । उत् । उस्राः । आ । अकः । वि । हि । तिस्रः । आविरित्यावः ॥४॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पणयो गा अपहृत्य त्रिषु स्थानेषु निदधुः । **अव:** अवस्तात् स्थिताः **अनृतस्य** तमसः **सेतौ** स्थाने **गुहा** गुहायां **तिष्ठन्तीः** गाः **द्वाभ्यां** स्थानाभ्याम् **उदाजत्** । ततः **परः** परस्तात् अवस्थिताः **गाः एकया एकेन** स्थानेन उदगमयत् । तदेवाह । **बृहस्पतिः** तस्मिन् **तमसि ज्योतिः** कर्त्तुम् **इच्छन्** वाञ्छन् तत्र स्थिताः **उस्राः** गाः **उद् आकः** उदकार्षीत्, प्रादुर्भूता अकार्षीत् । इत्थमयं **तिस्रः** असुराणां द्वारः **वि आवः** विवृतवान् खलु । वृणोतेर्लुङि 'मन्त्रेघस०' इति च्लेर्लुक् । 'वहुलं छन्दसि' इत्याडागमः ।

विभिद्या पुरं शयथेमपाचीं
निस्त्रीणि साकमुदधेरकृन्तत् ।
बृहस्पतिरुषसं सूर्यं गामर्कं
विवेद स्तनयन्निव द्यौः ॥५॥ ऋ. १०।६७।५

पदपाठः

विऽभिद्य । पुरम् । शयथा । ईम् । अपाचीम् । निः । त्रीणि । साकम् । उदऽधेः । अकृन्तत् । बृहस्पतिः । उषसम् । सूर्यम् । गाम् । अर्कम् । विवेद । स्तनयन्ऽइव । द्यौः ॥५॥

सः **बृहस्पतिः शयथा** उपशयेन स्थित्वा **अपाचीं** पराङ्मुखीम् **ईम्** इमान् असुरपुरीम् **विभिद्य** विदार्य **उदधेः** वलात् मेघरूपात् असुरात् **साकं** सह युगपत् **त्रीणि उषसं सूर्यं गाम्** एतानि त्रीणि **निः अकृन्तत्** निर्गतान्यकार्षीत् । तमसावृतेषु स्थानेषु उषःकालं ततः पश्चाद्-भाविनं सूर्यं च जनयित्वा पशून् निरगमयत् इत्यर्थः । सोऽयम् **अर्कम्** अर्चनीयं मन्त्रं सूर्यं **विवेद** प्रज्ञापयति । कथमिव ? **स्तनयन् इव** यथा स्तनयन् शब्दं कुर्वन् **द्यौः** इव स्थितः ।

इन्द्रो वलं रक्षितारं दुघानां
करेणेव वि चकर्ता रवेण ।
स्वेदाञ्जिभिराशिरमिच्छमानोऽरोदयत्
पणिमा गा अमुष्णात् ॥६॥ ऋ. १०।६७।६

पदपाठः

इन्द्रः । वलम् । रक्षितारम् । दुघानाम् । करेणऽइव । वि । चकर्त । रवेण । स्वेदाञ्जिऽभिः । आऽशिरम् । इच्छमानः । अरोदयत् । पणिम् । आ । गाः । अमुष्णात् ॥६॥

इन्द्रः ईश्वरो बृहस्पतिः **दुघानां** क्षीरस्य दोग्ध्रीणां गवां **रक्षितारं वलम्** असुरं **करेणेव** सायुधकरः इव स्थितेन **रवेण** शब्देन **विचकर्त** विचिच्छेद । किञ्च

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्वेदाञ्जिभिः स्वेदाञ्जयो मरुतः क्षरदाभरणाः, तैः सह **आशिरम्** आश्रयणं संयोगम् **इच्छमानः** कामयमानः सः पणिं वलस्यानुचरमसुरम् **अरोदयत्** व्यनाशयत् । ततस्तेनापहृताः **गाः अमुष्णात्** आ जहार ।

स ईं सत्येभिः सखिभिः शुचद्भिर्गोधायसं
वि धनसैरदर्दः ।
ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्म-
स्वेदेभिर्द्रविणं व्यानट् ॥७॥ ऋ. १०।६७।७

पदपाठः

सः । ईम् । सत्येभिः । सखिऽभिः । शुचत्ऽभिः । गोऽधायसम् । वि । धनऽसैः । अदर्दरित्यदर्दः । ब्रह्मणः । पतिः । वृषऽभिः । वराहैः । घर्मऽस्वेदेभिः । द्रविणम् । वि । आनट् ॥७॥

सः बृहस्पतिः **सत्येभिः** यथार्थबलैः **सखिभिः** सखिभूतैः **शुचद्भिः** दीप्यमानैः **धनसैः** धनस्य संभक्तृभिः मरुद्भिः सह **गोधायसं** गवां धारकम् **ईम्** एनं वलं **वि अदर्दः** व्यदारयत् । ततो **ब्रह्मणः** ऋग्यजुःसामलक्षणस्य स्तोत्रस्य **पतिः** स्वामी सः **वृषभिः** वर्षितृभिः **वराहैः** वराहारैः वरस्य वरणीयस्य उदकस्य आहर्तृभिः **घर्मस्वेदेभिः** दीप्तागमनैः, यद्वा क्षरदुदकैः, अथवा घर्मो यज्ञः, तं प्रति गन्तृभिः मरुद्भिः **द्रविणं** गोलक्षणं धनं **व्यानट्** व्याप्नोत् ।

ते सत्येन मनसा गोपतिं गा
इयानास इषणयन्त धीभिः ।
बृहस्पतिर्मिथो अवद्यपेभिरुस्रिया
असृजत स्वयुग्भिः ॥८॥ ऋ. १०।६७।७

पदपाठः

ते । सत्येन । मनसा । गोऽपतिम् । गाः । इयानासः । इषणयन्त । धीभिः । बृहस्पतिः । मिथः । अवद्यपेभिः । उत । उस्रियाः । असृजत । स्वयुक्ऽभिः ॥८॥

गाः पणिभिः अपहृतान् पशून् **इयानासः** अभिगच्छन्तः **सत्येन** यथार्थभूतेन **मनसा** युक्ताः **ते** मरुतः **धीभिः** आत्मीयैः कर्मभिरेतं बृहस्पतिं **गोपतिं** तदाहरणेन गवां स्वामिनं कुर्म इति **इषणयन्त** ऐच्छन् । **बृहस्पतिः** च **मिथो अवद्यपेभिः** । पातेः कर्मणि औणादिकः कप्रत्ययः । अवद्यरूपात् असुरात् रक्षितव्या गावो येषु मरुत्सु परस्परं सङ्गच्छन्त इति ते तथोक्ताः । तैः **स्वयुग्भिः** स्वयमेव युक्तैः मरुद्भिः **उस्रियाः** गाः **उत असृजत** पर्वतान्निरगमयत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तं वर्धयन्तो मतिभिः शिवाभिः
सिंहमिव नानदतं सधस्थे ।
बृहस्पतिं वृषणं शूरसातौ भरे भरे
अनु मदेम जिष्णुम् ॥९॥ ऋ, १०।६७।९

पदपाठः

तम् । वर्धयन्तः । मतिऽभिः । शिवाभिः । सिंहम्ऽइव । नानदतम् । सधऽस्थे । बृहस्पतिम् । वृषणम् । शूरऽसातौ । भरेऽभरे । अनु । मदेम । जिष्णुम् ॥९॥

सधस्थे सहतिष्ठन्ति अत्र देवा इति सधस्थमन्तरिक्षं तस्मिन् **सिंहम् इव नानदत** पुनः पुनः शब्दायमानं **वृषणं** कामानां वर्षितारं **जिष्णुं** जयशीलं तं **बृहस्पतिं** वर्धयन्तः मरुतो वयं **शूरसातौ** शूरैः सम्भजनीये **भरे भरे** सङ्ग्रामे **शिवाभिः** कल्याणीभिः **मतिभिः** स्तुतिभिः **अनुमदेम** अनुष्टुमः । स्तोतृपरत्वेन वा योजनीयम् ।

यदा वाजमसनद् विश्वरूपमा द्यामरुक्षदुत्तराणि सद्म ।
बृहस्पतिं वृषणं वर्धयन्तो
नाना सन्तो बिभ्रतो ज्योतिरासा ॥१०॥ ऋ. १०।६७।१०

पदपाठः

यदा । वाजम् । असनत् । विश्वऽरूपम् । आ । द्याम् । अरुक्षत् । उत्ऽतराणि । सद्म । बृहस्पतिम् । वृषणम् । वर्धयन्तः । नाना । सन्तः । बिभ्रतः । ज्योतिः । आसा ॥१०॥

स बृहस्पतिः **यदा** यस्मिन् काले **विश्वरूपं** नानारूपं **वाजं** गोलक्षणमन्नम् **असनत्** भजते यदा वा हृतपशुकः सन् **द्यां** द्युलोकम् **अरुक्षत्** आरोहति, अथवा **उत्तराणि** वा **सद्म** स्थानानि आरोहति रुहेर्लुङि च्लेः "शल इगुपधा०" (पा० सू० ३।१।४५) । तदानीं **वृषणं** वर्षितारं **बृहस्पतिम् आसा** आस्येन देवाः **वर्धयन्तः** भवन्ति । तथा **नाना** दिक्षु **सन्तो** भवन्तो **ज्योतिर्बिभ्रतो** धारयन्तो देवाश्च स्तुवन्ति इति शेषः ।

सत्यामाशिषं कृणुता वयोधै कीरिं
चिद्ध्यवथ स्वेभिरेवैः ।
पश्चा मृधो अप भवन्तु ।
विश्वास्तद् रोदसी शृणुतं विश्वमिन्वे ॥११॥

ऋ. १०।६७।११

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

सत्याम् । आऽशिषम् । कृणुत । वयःऽधै । कीरिम् । चित् । हि । अवथ । स्वेभिः । एवैः । पश्चा । मृधः । अप । भवन्तु । विश्वाः । तत् । रोदसी इति । शृणुतम् । विश्वमिन्वे इति विश्वम्ऽइन्वे ॥११॥

हे बृहस्पतिप्रभृतयो देवाः ! **वयोधै** अन्ननिधानाय अस्मदीयाम् **आशिषं** स्तुतिं **सत्याम्** अन्वयर्थां **कृणुत** कुरुत । यथा यूयं **स्वेभिः** आत्मीयैः **एवैः** गमनैः **कीरिं** स्तोतारं माम् **अवथ** रक्षथ । **हि** अवधारणार्थकः । **पश्चा** 'पश्चाच्चच्छन्दसि' (पा. सू. ५।३।३३) इति निपातितः । पश्चात् **विश्वाः** सर्वाः **मृधः** हिंसित्र्यः **अपभवन्तु** नश्यन्तु । **तत्** इदमस्माभिरुक्तं वचनं हे **विश्वमिन्वे** ! विश्वस्य प्रीणयित्र्यौ **रोदसी** द्यावापृथिव्यौ **शृणुतम्** ।

इन्द्रो मह्ना महतो अर्णवस्य
वि मूर्धानमभिनदर्बुदस्य ।
अहन्नहिमरिणात् सप्त सिन्धून्
देवैर्द्यावापृथिवी प्रावतं नः ॥१२॥ ऋ. १०।६७।१२

पदपाठः

इन्द्रः । मह्ना । महतः । अर्णवस्य । वि । मूर्धानम् । अभिनत् । उर्बुदस्य । अहन् । अहिम् । अरिणात् । सप्त । सिन्धून् । देवैः । द्यावापृथिवी ईति । प्र अवतम् । नः ॥१२॥

इन्द्रः ईश्वरो **मह्ना** महत्त्वेन युक्तो बृहस्पतिः **महतोऽर्णवस्य** उदकवतः **अर्बुदस्य** अम्बुदस्य मेघस्य **मूर्धानं** शिरः **वि अभिनत्** व्यच्छिनत् । तदुच्यते— **अहिम्** अहन्तव्यम् **अपाम्** आवरकं शत्रुम् **अहन्** अवधीत् । ततः **सप्त** सर्पणशीलान् **सिन्धून्** स्यन्दमाना अपः । यद्वा सप्तसङ्ख्याकाः गङ्गाद्याः नदीः । **अरिणात्** समुद्रं प्रत्यगमयत् । अस्रावयद्वा । अथ प्रत्यक्षकृतः । हे **द्यावापृथिव्यौ** ! **देवैः** सह **नः** अस्मान् **प्रावतं** रक्षतम् ।

इत्यष्टमेऽनुवाके प्रथमं सूक्तम् ।

द्विनवतितमं सूक्तम्

एकविंशत्यृचस्यास्य सूक्तस्य प्रथमादिपञ्चदशर्चां प्रियमेधः, षोडश्यादिषण्णाञ्च पुरुहन्मा ऋषी । प्रथमादिसप्तानां नवम्यादित्रयोदशानाञ्चेन्द्रः, अष्टम्याश्च पूर्वार्धस्य विश्वेदेवाः, उत्तरार्धस्य च वरुणो देवताः । प्रथमादितृचस्य गायत्री, [चतुर्थ्यादिचतसृणां, नवम्यादिचतसृणाञ्चानुष्टुप्, अष्टमी-त्रयोदश्योः पङ्क्तिः, चतुर्दशीपञ्चदश्योः पथ्याबृहती] षोडश्यादिषण्णाञ्च प्रगाथश्छन्दांसि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतिरात्रे मध्यमे पर्याये 'अभि त्वा वृषभा सुते' (२०।२२) 'अभि प्र गोपतिं गिरा' (२०।९२) एतौ स्तोत्रियानुरूपौ उक्थशंसनधर्मकौ भवतः। उक्तं वैताने— "अभि त्वा वृषणा सुते' 'अभि प्र गोपतिं गिरा' इति स्तोत्रियानुरूपौ" (वै. २६।९) इति।

तथा पृष्ठ्यषडहस्य षष्ठेऽहनि प्रातःसवने 'अभि प्र गोपतिं गिरा' इत्येकविंशतिमृच आवपते। तदुक्तं वैताने—"षष्ठे अभि प्र गोपतिं गिरा' इत्येकविंशतिः। (वै० ३२।५) इति।

तथा अभिजिति 'अभि प्र गोपतिं गिरा' इत्याज्यस्तोत्रियो भवति। तदुक्तं वैताने—"अभिजिति 'अभि प्र गोपतिं गिरा' इति च" (वै० ४०।९) इति।

तथा त्रिककुद्दशाहे अस्य विनियोगः 'क ईं वेद सुते सचा' (२०।५३) इत्यनेन सहोक्तः।

अभि प्र गोपतिं गिरेन्द्रमर्च यथा विदे।
सूनुं सत्यस्य सत्पतिम् ॥१॥ ऋ. ८।६९।४

पदपाठः

अभि। प्र। गोऽपतिम्। गिरा। इन्द्रम्। अर्च। यथा। विदे। सूनुम्। सत्यस्य। सत्ऽपतिम् ॥१॥

व्याख्यातोऽयं मन्त्रः सायणेनैव (अथर्व० २०।२२।४)।

आ हरयः ससृज्रिरेऽरुषीरधि बर्हिषि।
यत्राभि संनवामहे ॥२॥ ऋ ८।६९।५

पदपाठः

आ। हरयः। ससृज्रिरे। अरुषीः। अधि। बर्हिषि। यत्र। अभि। सम्ऽनवामहे ॥२॥

व्याख्यातोऽयं मन्त्रः सायणेनैव (अथर्व० २०।२२।५)।

इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु।
यत् सीमुपह्वरे विदत् ॥३॥ ऋ. ८।६९।६

पदपाठः

इन्द्राय। गावः। आऽशिरम्। दुदुह्रे। वज्रिणे। मधु। यत्। सीम्। उपऽह्वरे। विदत् ॥३॥

व्याख्यातोऽयं मन्त्रः सायणेनैव (अथर्व० २०।२२।६)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उद् यद् ब्रध्नस्य विष्टपं गृहमिन्द्रश्च गन्वहि ।
मध्वः पीत्वा सचेवहि त्रिः सप्त सख्युः पदे ॥४॥

ऋ. ८।६९।७

पदपाठः

उत् । यत् । ब्रध्नस्य । विष्टपम् । गृहम् । इन्द्रः । च । गन्वहि । पीत्वा । सचेवहि । त्रिः । सप्त । सख्युः । पदे ॥४॥

यत् यदा **ब्रध्नस्यविष्टपं** सूर्यस्य स्थानं **गृहम्** इन्द्रश्च अहं चोभौ **उत् गन्वहि** उद्गच्छावः, तदानीं **मध्वः** मधुरं सोमरसं **पीत्वा सचेवहि** संसृष्टौ भवेव । कुत्र ? **सख्युः पदे** सर्वेषां सखिभूतस्यादित्यस्य स्थाने । **त्रिः सप्त** इत्यनेन देवलोकानामुत्तम-मेकविंशं स्थानमुच्यते आदित्यैकविंशत्वात् । तादृश एकविंशस्थाने सचेवहीति ।

अर्चत प्रार्चत प्रियमेधासो अर्चत ।
अर्चन्तु पुत्रका उत पुरं न धृष्ण्वर्चत ॥५॥ ऋ. ८।६९।८

पदपाठः

अर्चत । प्र । अर्चत । प्रियऽमेधासः । अर्चत । अर्चन्तु । पुत्रकाः । उत । पुरम् । न । धृष्णु । अर्चत ॥५॥

हे अध्वर्यादयः ! यूयमिन्द्रम् **अर्चत** पूजयत । **प्रार्चत** इन्द्रमेव, हे **प्रियमेधासः** ! प्रियमेधसम्बन्धिनस्तद्गोत्रा यूयम् **अर्चत इन्द्रम्** । **पुत्रकाः** पुत्रा अपि **अर्चन्तु** इन्द्रम् । **उत** अपिच **पुरं न धृष्णु** यथा पुरं धर्षणशीलमर्चन्ति तादृशमिन्द्रम् **अर्चत** ।

अव स्वराति गर्गरो गोधा परि सनिष्वणत् ।
पिङ्गा परि चनिष्कददिन्द्राय ब्रह्मोद्यतम् ॥६॥

ऋ. ८।६९।९

पदपाठः

अव । स्वराति । गर्गरः । गोधा । परि । सनिस्वनन् । पिङ्गा । परि । चनिस्कदत् । इन्द्राय । ब्रह्म । उत्ऽयतम् ॥६॥

गर्गरः गर्गरध्वनियुक्तो वाद्यविशेषो युद्धे **अवस्वराति** भयं शब्दयति । **गोधा** हस्तघ्नः **परि** परितः **सनिष्णवत्** स्वनति भृशम् । **पिङ्गा** पिङ्गवर्णा ज्याऽपि **परि चनिष्कदत्** परिस्कन्दते । यस्मादेवं सङ्ग्रामः संनद्धोऽत **इन्द्राय ब्रह्म** परिवृढं कर्म स्तुतिलक्षणम् **उद्यतं** भवत्विति शेषः ।

आ यत् पतन्त्येन्यः सुदुघा अनपस्फुरः ।
अपस्फुरं गृभायत सोममिन्द्राय पातवे ॥७॥ ऋ. ८।६९।१०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

आ । यत् । पतन्ति । एन्यः । सुऽदुघाः । अनपऽस्फुरः । अपऽस्फुरम् । गृभायत । सोमम् । इन्द्राय । पातवे ॥७॥

यत् यदा **एन्यः** एतवर्णाः शुभ्रवर्णा नद्यः **आपतन्ति** आगच्छन्ति सर्वतः प्रवहन्ति । कीदृश्यः ? **सुदुघाः** सुदोहाः । **अनपस्फुरः** अपस्फुरोऽपस्फुरा अप्रवृद्धाः । अतादृश्योऽनपस्फुरः । अत्यन्तं प्रवृद्धा इत्यर्थः । यद्वा सुदुघाः प्रवृद्धा एतवर्णा गावो यदा पयआद्यर्थाय आपतन्ति तदा **अपस्फुरम्** अत्र अपशब्दो धात्वर्थानुवादी । अत्यर्थं प्रवृद्धं **सोममिन्द्राय पातवे** पातुं **गृभायत** ग्रहणं कुरुत । अथवा अनपस्फुर इत्यत्रापि अपशब्दोऽनुवादी धात्वर्थस्य । तथात्वेऽयमर्थः । यदा एन्यो नद्योऽनपस्फुरोऽप्रवृद्धोदका आपतन्ति वृष्टिरल्पा यदा भवति तदा सोममिन्द्रार्थं सम्पादयतेति ।

अपादिन्द्रो अपादग्निर्विश्वे देवा अमत्सत ।
वरुण इदिह क्षयत् तमापो अभ्यनूषत
वत्सं संशिश्वरीरिव ॥८॥ ऋ. ८।६९।११

पदपाठः

अपात् । इन्द्रः । अपात् । अग्निः । विश्वे । देवाः । अमत्सत । वरुणः । इत् । इह । क्षयत् । तम् । आपः । अभि । अनूषत । वत्सम् । संशिश्वरीःऽइव ॥८॥

इन्द्रः अपात् अपिबत् सोमम् । **अग्निः** अपि अपिबत्, **विश्वे देवाः** अपि **अमत्सत** तृप्ता अभवन् सोमपानेन । **वरुणः इत्** वरुणोऽपि **इह** अस्मिन् यागगृहे **क्षयत्** निवसतु सोमपानाय । निवसन्तं **तमापः** अभि **अभ्यनूषत** । उदकानि आपनशीला स्तुतयो वाभ्यष्टुवन् । किमिव ? **वत्सं** स्वीयं **संशिश्वरीः** संशिश्वर्यः संगच्छमाना गावः **इव** । ता यथा धावन्त्यो हम्भारवं कुर्वन्ति तद्वत् ।

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः ।
अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव ॥९॥ ऋ. ८।६९।१२

पदपाठः

सुऽदेवः । असि । वरुण । यस्य । ते । सप्त । सिन्धवः । अनुऽक्षरन्ति । काकुदम् । सूर्म्यम् । सुषिराम्ऽइव ॥९॥

वरुण हे जलाभिमानिन् देव ! त्वं **सुदेवोऽसि यस्य** सुदेवस्य **ते** तव **काकुदं** तालुं समुद्राख्यं **सप्तसिन्धवः** गङ्गाद्या सप्तनद्यः **अनुक्षरन्ति** जिह्वायां सर्वदा स्रवन्ति । तत्र दृष्टान्तः । **सूर्म्यं** लोहप्रतिमां **सुषिरामिव** सा यथा जलापूर्णा स्रवति तद्वदित्यर्थः । यद्वा सूर्म्यं सुषिरामिव, यथा सूर्यं प्रति रश्मिजालं तद्वत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यो व्यतीँरफाणयत् सुयुक्ताँ उप दाशुषे ।
तक्वो नेता तदिद् वपुरुपमा यो अमुच्यत ॥१०॥

ऋ. ८।६९।१३

पदपाठः

यः । व्यतीन् । अफाणयत् । सुऽयुक्तान् । उप । दाशुषे । तक्वः । नेता । तत् । इत् । वपुः । उपऽमा । यः । अमुच्यत ॥१०॥

यः इन्द्रः **व्यतीन्** विविधगमनान् **सुयुक्तान्** सुष्ठु रथे सम्बद्धान् अश्वान् **दाशुषे** हविर्दात्रे यजमानाय गन्तुं प्राप्तुम् **उप अफाणयत्** उपगमयति । फणतिर्गतिकर्मा । यदैवं करोति **तदित्** तदानीमेव **तक्वः** तकतिर्गतिकर्मा । यज्ञगमनशीलो **नेता** उदकस्य फलस्य वा नायकः इन्द्रः **वपुः** उदकमुत्पादयतीति शेषः । **यः** इन्द्रः **उपमा** उपमानभूतः **अमुच्यत** अन्यैर्वृष्टिनिवारकैरसुरादिभिर्मुक्तो भवति ।

अतीदु शक्र ओहत इन्द्रो विश्वा अति द्विषः ।
भिनत् कनीन ओदनं पच्यमानं परो गिरा ॥११॥

ऋ. ८।६९।१४

पदपाठः

अति । इत् । ऊं इति । शक्रः । ओहते । इन्द्रः । विश्वा । अति । द्विषः । भिनत् । कनीनः । ओदनम् । पच्यमानम् । परः । गिरा ॥११॥

अयम् इन्द्रः शक्रः शक्तः सन् **अतीत् ओहते** अतिक्रम्य गच्छत्येव, सङ्ग्रामे निरोधकान् शत्रून् । तदेवाह । अयमिन्द्रः **विश्वाः द्विषः** शत्रून् **अति** अतिक्रम्य गच्छति । **कनीनः** कमनीयः **परः** मेघानां परस्ताद् वर्त्तमान इन्द्रः **ओदनम्** । **भिनत्** मेघमभिनन् मेघनामैतत् । कीदृशम् ? **गिरा** माध्यमिकया वाचा स्तुतिलक्षणया **पच्यमानं** वज्रनिर्घोषेण ताडयमानमित्यर्थः ।

अर्भको न कुमारकोऽधितिष्ठन्नवं रथम् ।
स पक्षन्महिषं मृग पित्रे मात्रे विभुक्रतुम् ॥१२॥

ऋ. ८।६९।१५

पदपाठः

अर्भकः । न । कुमारकः । अधि । तिष्ठत् । नवम् । रथम् । सः । पक्षत् । महिषम् । मृगम् । पित्रे । मात्रे । विभुऽक्रतुम् ॥१२॥

अयमिन्द्रः **अर्भको न** अल्पशरीरः **कुमारकः**, कुमारः इव **नवं** स्तुत्यं **रथम् अधितिष्ठत्** अधितिष्ठति । **सः** इन्द्रः **महिषं** महान्तं **मृगं** मृगवदितस्ततो धावन्तं सर्वैर्मृग्यं वा **विभुक्रतुं** बहुकर्माणं मेघं **पक्षत्** पचति । वृष्ट्यभिमुखं करोतीत्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आ तू सुशिप्र दंपते रथं तिष्ठा हिरण्ययम् ।
अध द्युक्षं सचेवहि
सहस्रपादमरुषं स्वस्तिगामनेहसम् ॥१३॥ ऋ. ८।६९।१६

पदपाठः

आ । तु । सुऽशिप्र । दम्ऽपते । रथम् । तिष्ठ । हिरण्ययम् । अध । द्युक्षम् । सचेवहि । सहस्रऽपादम् । अरुषम् । स्वस्तिऽगाम् । अनेहसम् ॥१३॥

सुशिप्र हे सुहनो ! **दम्पते** हे गृहस्वामिन् ! अत्र गृहो रथः, तस्य स्वामिन्, **तु** त्वं तावत् **रथम् आतिष्ठ** । हविः स्वीकरणानन्तरं पश्चादहमारोहमिति भावः । कीदृशम् ? **हिरण्ययं** हिरण्मयम् । **अध** तवारोहणानन्तरमहमप्यारुह्योभौ **सचेवहि** सङ्गच्छेवहि, सङ्गतौ भवेव । पुनः कीदृशम् ? **द्युक्षं** दीप्तं रथं, **सहस्रपादं** बहुपादम्, **अरुषम्** आरोचमानम्, **स्वस्तिगां** कुशलगमनम्, **अनेहसम्**-अपापम् ।

तं घेमित्था नमस्विन उप स्वराजमासते ।
अर्थं चिदस्य सुधितं
यदेतव आवर्तयन्ति दावने ॥१४॥ ऋ. ८।६९।१७

पदपाठः

तम् । घ । ईम् । इत्था । नमस्विनः । उप । स्वऽराजम् । आसते । अर्थम् । चित् । अस्य । सुऽधितम् । यत् । एतवे । आऽवर्तयन्ति । दावने ॥१४॥

तं घ तं खलु **ईम्** एनमिन्द्रम् **इत्था** इत्थमनेन प्रकारेण **नमस्विनः** अन्नवन्तः स्तुतिवन्तो वा अध्वर्य्वादयः **स्वराजं** स्वयं राजमानं वा **उपासते** सेवन्ते । तथा कृत्वा **अर्थं चित्** अरणीयं धनं, **सुधितं** सुष्ठु स्थापितम् **अस्य** इन्द्रस्य सम्बन्धिनं प्राप्नुवन्तीति शेषः । कदेत्याह **यद्** यदा **एतवे** अस्येन्द्रस्य गमनार्थं स्वयं प्राप्तुं वा **दावने** हविर्दानाय **आवर्तयन्ति** स्तुतयस्तदेत्यर्थः । अथवा अश्वा आवर्त्तयन्ति तदेत्यर्थः ।

अनु प्रत्नस्यौकसः प्रियमेधास एषाम् ।
पूर्वामनु प्रयतिं वृक्तबर्हिषो हितप्रयस आशत ॥१५॥
ऋ. ८।६९।१८

पदपाठः

अनु । प्रत्नस्य । ओकसः । प्रियऽमेधासः । एषाम् । पूर्वाम् । अनु । प्रऽयतिम् । वृक्तऽबर्हिषः । हितऽप्रयसः । आशत ॥१५॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनेन मन्त्रेण स्तुतिमुपसंहरति। **एषाम्** इन्द्रादीनां देवानां **प्रत्नस्य** पुराणस्य **ओकसः** स्थानस्य पुराणं स्थानं **प्रियमेधासः** प्रियमेधाः **अनुआशत** अनुप्राप्ताः। कीदृशाः प्रियमेधाः? **पूर्वां** मुख्यं **प्रयतिं** प्रदानम् अनुलक्षीकृत्य **वृक्तबर्हिषः** स्तीर्णदर्भाः, **हितप्रयसः** आसादितसोमादिहविष्काः।

यो राजा चर्षणीनां याता रथेभिरध्रिगुः।
विश्वासां तरुता पृतनानां
ज्येष्ठो यो वृत्रहा गृणे ॥१६॥ ऋ. ८।७०।१

पदपाठः

यः। राजा। चर्षणीनाम्। याता। रथेऽभिः। अध्रिऽगुः। विश्वासाम्। तरुता। पृतनानाम्। ज्येष्ठः। यः। वृत्रऽहा। गृणे ॥१६॥

यः इन्द्रः **चर्षणीनां** मनुष्याणां **राजा** स्वामी **रथेभिः** रथैः **याता** गन्ता च **अध्रिगुः** अधृतगमनोऽन्यैः **विश्वासां** पृतनानां सेनानां **तरुता** तारकः। **यः** च **ज्येष्ठो** गुणैर्ज्यायान् यश्च **वृत्रहा** वृत्रं हतवान्। तमिन्द्रं **गृणे** स्तौमि।

इन्द्रं तं शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि।
हस्ताय वज्रः प्रति धायि दर्शतो
महो दिवे न सूर्यः ॥१७॥ ऋ. ८।७०।२

पदपाठः

इन्द्रम्। तम्। शुम्भ। पुरुऽहन्मन्। अवसे। यस्य। द्विता। विऽधर्तरि। हस्ताय। वज्रः। प्रति। धायि। दर्शतः। महः। दिवे। न। सूर्यः ॥१७॥

पुरुहन्मन् हे ऋषे! त्वं **तमिन्द्रं शुम्भ** हविष्प्रदानादिना अलङ्कुरु। किमर्थम्? **अवसे** रक्षणार्थम्। एवमात्मानं संबोध्य ब्रवीति। **यस्य** तव **विधर्तरि** विधारके इन्द्रे **द्विता** द्वित्वम् अस्त्यौग्र्यम् अनौग्र्यम्। तव शत्रून् हन्तुमुग्रत्वं त्वदनुग्रहाय अनौग्र्यं चेति द्वैतमस्ति। तत्रौग्र्यचिह्नं दर्शयति। **हस्ताय** कराय हननाय शत्रूणां **दर्शतः** दर्शनीयो **महः** महान् **वज्रः प्रति धायि** प्रतिनिहितो भवति **दिवे** प्रकाशाय दिवसाय वा, अथवा दिवि दृश्यमानः **सूर्यः न** सूर्य इव।

नकिष्टं कर्मणा नशद् यश्चकार सदावृधम्।
इन्द्रं न यज्ञैर्विश्वगूर्तमृभ्वसमधृष्टं
धृष्णवोजसम् ॥१८॥ ऋ. ८।७०।३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

नकिः । तम् । कर्मणा । नशत् । यः । चकार । सदाऽवृधम् । इन्द्रम् । न । यज्ञैः । विश्वऽगूर्तम् । ऋभ्वसम् । अधृष्टम् । धृष्णुऽओजसम् ॥१८॥

तं जनम् अन्यो जनः **कर्मणा** हननादिव्यापारेण **नकिः नशत्** नैव व्याप्तोति । **यः** इन्द्रं **चकार** इन्द्रमेव अनुकूलं यज्ञैः साधनैः । कीदृशमिन्द्रम् ? **सदावृधम्**, सदावर्धकं **विश्वगूर्तं** सर्वैः स्तुत्यम्, **ऋभ्वसं** महान्तम्, **अधृष्टम्** अन्यैः अधर्षणशीलम्, **धृष्ण्वोजसम्** धर्षकबलम् ।

अषाल्हमुग्रं पृतनासु सासहिं
यस्मिन् महीरुरुज्रयः ।
सं धेनवो जायमाने अनोनवुर्द्यावः
क्षामो अनोनवुः ॥१९॥ ऋ. ८।७०।४

पदपाठः

अषाल्हम् । उग्रम् । पृतनासु । सासहिम् । यस्मिन् । महीः । उरुऽज्रयः । सम् । धेनवः । जायमाने । अनोनवुः । द्यावः । क्षामः अनोनवुः ॥१९॥

अषाल्हम् असह्यम्, **उग्रम्** उद्गूर्णबलं **पृतनासु** शत्रुसेनासु **सासहिम्** अभिभवितारं स्तौमीति शेषः । **यस्मिन्** इन्द्रे जायमाने **महीः** महत्यः **उरुज्रयः** बहुवेगाः **धेनवः** हविरादिना प्रीणयित्र्यः प्रजाः, गाव एव वा **सम् अनोनवुः** समस्तुवन् । न केवलं धेनव एव अपितु **द्यावो** द्युलोकाः **क्षामः** पृथिव्यश्च **सम् अनोनवुः** । तत्रत्याः सर्वे प्राणिनो नमन्ति इत्यर्थः । अत्र 'त्रिवृतो लोकाः' (ऐ. ब्रा. २।१७) इति श्रुतेर्बहुवचनम् ।

यद् द्याव इन्द्र ते शतं शतं भूमिरुत स्युः ।
न त्वा वज्रिन्त्सहस्रं सूर्या
अनु न जातमष्ट रोदसी ॥२०॥ ऋ. ८।७०।५

पदपाठः

यत् । द्यावः । इन्द्र । ते । शतम् । शतम् । भूमिः । उत । स्युरिति स्युः । न । त्वा । वज्रिन् । सहस्रम् । सूर्याः । अनु । न । जातम् । अष्ट । रोदसी इति ॥२०॥

व्याख्यातोऽयं मन्त्रः (अथर्व० २०।८१।१) ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आ पप्राथ महिना वृष्ण्या
वृषन् विश्वा शविष्ठ शवसा ।
अस्माँ अव मघवन् गोमति
व्रजे वज्रिं चित्राभिरूतिभिः ॥२१॥ ऋ ८।७०।६

पदपाठः

आ । पप्राथ । महिना । वृष्ण्या । वृषन् । विश्वा । शविष्ठ । शवसा । अस्मान् । अव । मघऽवन् । गोऽमति । व्रजे । वज्रिन् । चित्राभिः । ऊतिऽभिः ॥२१॥

व्याख्यातोऽयं मन्त्रः (अथर्व० २०।८१।२) ।

इत्यष्टमेऽनुवाके द्वितीयं सूक्तम् ।

त्रिनवतितमं सूक्तम्

अष्टर्चस्यास्य सूक्तस्य प्रथमादितृचस्य प्रगाथ ऋषिः, चतुर्थ्यादिपञ्चानाञ्चेन्द्रमातरो देवजामय ऋषिकाः । इन्द्रो देवता । गायत्री छन्दः ।

दशरात्रे दशमेऽहनि 'उत् त्वा मन्दन्तु' इत्याज्यस्तोत्रियो भवति । तदुक्तं वैताने—"'उत् त्वा मन्दन्तु' इत्याज्यस्तोत्रियः" (वै० ३३।२३) इति ।

तथा श्येनसंदेशाजिरवज्रेषु एकाहेषु 'सुरूपकृत्नुमूतये' (२०।५७) 'उत् त्वा मन्दन्तु स्तोमाः' (२०।९३) 'त्वामिद्धि हवामहे' (२०।९८) इत्याद्यावाज्यस्तोत्रियौ विकल्पितौ भवतः । तृतीयः पृष्ठस्तोत्रियो भवति । तदुक्तं वैताने—"'श्येनसंदंशाजिरवज्रेषु' 'सुरूपकृत्नुमूतये' 'उत् त्वा मन्दन्तु स्तोमाः'" 'त्वामिद्धि हवामहे' इति (वै० ३९।५) इति ।

महाव्रते प्रातःसवने 'ईङ्खयन्तीरपस्युवः (२०।९३।४) इति पञ्चर्चं सूक्तमावापस्थाने आवपते । तदुक्तं वैताने—"ईङ्खयन्तीरपस्युवः इत्यावपते" (वै० ३४।७) ।

उत् त्वा मन्दन्तु स्तोमाः कृणुष्व राधो अद्रिवः ।
अव ब्रह्मद्विषो जहि ॥१॥ ऋ. ८।६४।१

पदपाठः

उत् । त्वा । मन्दन्तु । स्तोमाः । कृणुष्व । राधः । अद्रिऽवः । अव । ब्रह्मऽद्विषः । जहि ॥१॥

हे इन्द्र ! **त्वा** त्वां **स्तोमाः** स्तोत्राणि **उन्मन्दन्तु** उन्मादयन्तु । **कृणुष्व** कुरु

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

राध: अन्नम् । हे **अद्रिव:** वज्रिन् इन्द्र ! अस्मभ्यम् । किञ्च **ब्रह्मद्विष:** ब्राह्मणद्वेष्टॄन् **अवजहि** । अथवा अस्मान् अव, ब्रह्मद्वेष्टॄन् च जहि ।

पदा पणीँरराधसो नि बाधस्व महाँ असि ।

नहि त्वा कश्चन प्रति ॥२॥ ऋ. ८।६४।२

पदपाठः

पदा । पणीन् । अराधसः । नि । बाधस्व । महान् । असि । नहि । त्वा । कः । चन । प्रति ॥२॥

हे इन्द्र ! **पणीन्** लुब्धान् **अराधसः** यष्टव्यधनरहितान् केवलधनान् **पदा** पादेनातिक्रम्य **नि बाधस्व** नितान्तं पीडय । कुतो यतस्त्वं **महानसि** । **त्वा** त्वां तव **कश्चन** कश्चिदपि देव.. असुरो मनुष्यो वा **प्रति** प्रतिनिधिः सदृशः **नहि** अस्ति ।

त्वमीशिषे सुतानामिन्द्र त्वमसुतानाम् ।

त्वं राजा जनानाम् ॥३॥ ऋ. ८।६४।३

पदपाठः

त्वम् । ईशिषे । सुतानाम् । इन्द्र । त्वम् । असुतानाम् । त्वम् । राजा । जनानाम् ॥३॥

हे इन्द्र ! **त्वं सुतानाम्** अभिषुतसोमानाम् **ईशिषे** ईश्वरोऽसि । तथा **त्वम् असुतानां** वल्ल्याकारे । वर्त्तमानानामपि ईशिषे । **त्वं** सर्वेषां **जनानां राजा** भवसि ।

ईङ्खयन्तीरपस्युवः इन्द्रं जातमुपासते ।

भेजानासः सुवीर्यम् ॥४॥ ऋ. १०।१५३।१

पदपाठः

ईङ्खयन्तीः । अपस्युवः । इन्द्रम् । जातम् । उप । आसते । भेजानासः । सुऽवीर्यम् ॥४॥

ईङ्खयन्तीः गच्छन्त्यः स्तुत्यादिभिरिन्द्रं प्राप्नुवत्यः **अपस्युवः** अपः कर्म आत्मनः इच्छन्त्यः इन्द्रमातरः सूक्तस्यास्य द्रष्ट्र्यः **जातं** प्रादुर्भूतम् **इन्द्रम् उपासते** परिचरन्ति । **सुवीर्यं** शोभनवीर्योपेतं धनं च **भेजानासः** तस्मादिन्द्रात् सम्भक्तवत्यो भवन्ति ।

त्वमिन्द्र बलादधि सहसो जात ओजसः ।

त्वं वृषन् वृषेदसि ॥५॥ ऋ. १०।१५३।२

पदपाठः

त्वम् । इन्द्र । बलात् । अधि । सहसः । जात । ओजसः । त्वम् । वृषन् । वृषा । इत् । असि ॥५॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे **इन्द्र** ! **त्वं सहसः** परेषामभिभावुकात् बलात् **अधिजातोऽसि** अधिः पञ्चम्यर्थानुवादकः। वृत्रादिवधहेतुभूताद् **बलात्** हेतोस्त्वं प्रख्यातो भवसीत्यर्थः। अपि च **ओजसः** ओजोनाम बलहेतुहृदयगतं धैर्यं तस्मादपि त्वं जातोऽसि। हे **वृषन्** वर्षितः ! **त्वं वृषेत्** असि कामानां वर्षिता एव भवसि।

त्वमिन्द्रासि वृत्रहा व्यन्तरिक्षमतिरः।
उद् द्यामस्तभ्ना ओजसा ॥६॥ ऋ. १०।१५३।३

पदपाठः

त्वम्। इन्द्र। असि। वृत्रऽहा। वि। अन्तरिक्षम्। अतिरः। उत्। द्याम्। अस्तभ्नाः। ओजसा ॥६॥

हे **इन्द्र** ! **त्वं वृत्रहा असि** शत्रूणां हन्ता भवसि, **अन्तरिक्षं** मध्यमस्थानञ्च **व्यतिरः** आवरकापनोदनेन प्रावर्धयः, **द्यां** द्युलोकं च **ओजसा** बलेन **उदस्तभ्नाः** ऊर्ध्वम् अस्तम्भीः, यथा अधो न पतति तथा उपरि अवस्थापितवानित्यर्थः।

त्वमिन्द्र सजोषसमर्कं बिभर्षि बाह्वोः।
वज्रं शिशान ओजसा ॥७॥ ऋ. १०।१५३।४

पदपाठः

त्वम्। इन्द्र। सऽजोषसम्। अर्कम्। बिभर्षि। बाह्वोः। वज्रम्। शिशानः। ओजसा ॥७॥

हे **इन्द्र** ! **त्वं सजोषसं** सहप्रीयमाणम् **अर्कं** स्तुत्यं **वज्रं** स्वायुधम् **ओजसा** बलेन **शिशानः** निश्यन् तीक्ष्णीकुर्वन् **बाह्वोः** हस्तयोः **बिभर्षि** धारयसि शत्रूणां वधाय।

त्वमिन्द्राभिभूरसि विश्वा जातान्योजसा।
स विश्वा भुव आभुवः ॥८॥ ऋ. १०।१५३।५

पदपाठः

त्वम्। इन्द्र। अभिऽभूः। असि। विश्वा। जातानि। ओजसा। सः। विश्वा। भुव। आ। अभवः ॥८॥

हे **इन्द्र** ! **त्वं विश्वा** सर्वाणि **जातानि** जनिमन्ति भूतानि **ओजसा** बलेन **अभिभूः** अभिभविता भवसि। तथा **स** तादृशस्त्वं **विश्वाभुवः** सर्वाः भूमीः प्राप्तव्यानि सर्वाण्यपि स्थानानि **आभवः** अभितः प्राप्नोः। आ-अभवः इति भू प्राप्तौ धातोः रूपम्।

इत्यष्टमेऽनुवाके तृतीयं सूक्तम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चतुर्नवतितमं सूक्तम्

एकादशर्चस्यास्य सूक्तस्य कृष्ण ऋषिः। इन्द्रो देवता। प्रथमादितृचस्य दशम्येकादश्योश्च त्रिष्टुप्, चतुर्थ्यादिषण्णाञ्च जगती छन्दसी।

तृतीये छन्दोमेऽहनि 'आ यात्विन्द्रः स्वपतिर्मदाय' इत्यस्य 'अध्वर्यवोऽरुणद्' (२०।८७) इत्यनेन सहोक्तो विनियोगः।

आयात्विन्द्रः स्वपतिर्मदाय यो
धर्मणा तूतुजानस्तुविष्मान्।
प्र त्वक्षाणो अति विश्वा
सहांस्यपारेण महता वृष्ण्येन ॥१॥ ऋ. १०।४४।१

पदपाठः

आ। यातु। इन्द्रः। स्वऽपतिः। मदाय। यः। धर्मणा। तूतुजानः। तुविष्मान्। प्रऽत्वक्षाणः। अति। विश्वा। सहांसि। अपारेण। महता। वृष्ण्येन ॥१॥

य इन्द्रः **तूतुजानः** त्वरमाणः **तुविष्मान्** वृद्धिमान् **विश्वा सहांसि** सर्वाणि शत्रुबलानि **अपारेण** असङ्ख्यातेन **महता** अतएव समधिकेन **वृष्ण्येन** बलेन **प्रत्वक्षाणः** सप्रकर्षं तनूकुर्वन् अतिगच्छतीति शेषः। **स्वपतिः** धनपतिः **इन्द्रो मदाय धर्मणा** धारकेण रथेन **आयातु** अस्मद्यज्ञं प्रति आगच्छतु।

सुष्ठामा रथः सुयमा हरी ते
मिम्यक्ष वज्रो नृपते गभस्तौ।
शीभं राजन् सुपथा याह्यर्वाङ् वर्धाम
ते पपुषो वृष्ण्यानि ॥२॥ ऋ. १०।४४।२

पदपाठः

सुऽस्थामा। रथः। सुऽयमा। हरी इति। ते। मिम्यक्ष। वज्रः। नृऽपते। गभस्तौ। शीभम्। राजन्। सुऽपथा। आ। याहि। अर्वाङ्। वर्धाम। ते। पपुषः। वृष्ण्यानि ॥२॥

हे **नृपते** नृणां पालक इन्द्र **ते** तव **रथः सुष्ठामा** शोभनावस्थानः, **हरी** अश्वौ अपि **सुयमा** सुयमौ, सुनियन्त्रितौ इत्यर्थः। किञ्च तव **गभस्तौ** बाहौ **वज्रः मिम्यक्ष** संहृतो भवति। तथा सति हे **राजन्** सर्वस्य ईश्वर इन्द्र **शीभं** शीघ्रं **सुपथा** शोभनेन मार्गेण **अर्वाङ्** अस्मदभिमुखम् **आयाहि** आगच्छ। आगत्य **पपुषः** सोमं पीतवतः **ते** तव **वृष्ण्यानि** बलानि **वर्धाम,** वयं वर्धयामः। मिम्यक्ष 'म्यक्षतिर्गतिकर्मा' इति (निघं० २।१४)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एन्द्र वाहो नृपतिं वज्रबाहु-
मुग्रमुग्रासस्तविषास एनम् ।
प्रत्वक्षसं वृषभं सत्यशुष्म-
मेमस्मत्रा सधमादो वहन्तु ॥३॥ ऋ. १०।४४।३

पदपाठः

आ । इन्द्रवाहः । नृऽपतिम् । वज्रऽबाहुम् । उग्रम् । उग्रासः । तविषासः । एनम् । प्रऽत्वक्षसम् । वृषभम् । सत्यऽशुष्मम् । आ । ईम् । अस्मऽत्रा । सधऽमादः । वहन्तु ॥३॥

नृपतिं नॄणां पालकं **वज्रबाहुं** वज्रहस्तं **उग्रम्** उद्गूर्णं **प्रत्वक्षसं** शत्रुबलानां प्रकर्षेण तनूकर्त्तारं **वृषभं** कामानां वर्षितारं **सत्यशुक्रम्** अविसंवादिबलम् **एनम्** इन्द्रम् **आ ईम्** इति पूरणौ । **उग्रासः** उद्गूर्णाः **तविषासः** प्रवृद्धाः **सधमादः** सह माद्यन्तः **इन्द्रवाहः** इन्द्रस्य वोढारः **अस्मत्रा** अस्मासु **आवहन्तु** ।

एवा पतिं द्रोणसाचं सचेतसमूर्ज-
स्कम्भं धरुण आ वृषायसे ।
ओजः कृष्व सं गृभाय त्वे अप्यसो
यथा केनिपानामिनो वृधे ॥४॥ ऋ. १०।४४।४

पदपाठः

एव । पतिम् । द्रोणऽसाचम् । सऽचेतसम् । ऊर्जः । स्कम्भम् । धरुणे । आ । वृषऽयसे । ओजः । कृष्व । सम् । गृभाय । त्वे इति । अपि । असः । यथा । केऽनिपानाम् । इनः । वृधे ॥४॥

हे इन्द्र **त्वमेव** एवं **पतिं** पालकं **द्रोणसाचं** द्रोणकलशस्य सेवितारं **सचेतसं** सप्रज्ञम् **ऊर्जःस्कम्भं** बलस्य धारकं सोमं **धरुणे** धारके जठरे **आ वृषायसे** आसिञ्चसे । धारयसीत्यर्थः । किञ्च मह्यम् **ओजः** बलं **कृष्व** कुरुष्व । **त्वे** त्वयि अस्मान् **अपि सं गृभाय** संगृहाण च । किञ्च **केनिपानां** मेधाविनामस्माकम् । **वृधे** संवर्धनाय **यथा** यथावत् सर्वथा **इनः** स्वामी **असः** भवसि । 'केनिप उशिजः' इति मेधाविनामसु पाठः । ऋग्वेदे तु मन्त्रे 'ऊर्जः' इति पठ्यते ।

गमन्नस्मे वसून्या हि शंसिषं
स्वाशिषं भरमा याहि सोमिनः ।
त्वमीशिषे सास्मिन्ना सत्सि
बर्हिष्यनाधृष्या तव पात्राणि धर्मणा ॥५॥ ऋ. १०।४४।५

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

गमन् । अस्मे इति । वसूनि । आ । हि । शंसिषम् । सुऽआशिषम् । भरम् । आ । याहि । सोमिनः । त्वम् । ईशिषे । स । अस्मिन् । आ । सत्सि । बर्हिषि । अनाधृष्या । तव । पात्राणि । धर्मणा ॥५॥

हे इन्द्र ! **वसूनि** त्वद्देयानि धनानि **अस्मे** मयि **आगमन्** आगच्छन्तु । **हि** यस्मात् त्वामहं **शंसिषं** स्तौमि । किञ्च **सोमिनः** सोमवतः मम **स्वाशिषं** शोभना आशिषो यस्मिन् तं **भरं** यज्ञम् **आयाहि** त्वम् आगच्छ । किञ्च त्वम् **ईशिषे** धनस्य स्वामी असि । एवंविधः सः त्वम् **अस्मिन्** वेद्यास्तृते बर्हिषि **आ सत्सि** आसीद । किञ्च **तव पात्राणि** सोमपात्राणि **धर्मणा** राक्षसानां कर्मणा **अनाधृष्याणि** धर्षयितुमशक्यानि ।

पृथक् प्रायन् प्रथमा
देव हूतयोऽकृण्वत श्रवस्यानि दुष्टरा ।
न ये शेकुर्यज्ञियां नावमारुहमीर्मैव
ते न्यविशन्त केपयः ॥६॥ ऋ. १०।४४।६

पदपाठः

पृथक् । प्र । आयन् । प्रथमा । देवऽहूतयः । अकृण्वत । श्रवस्यानि । दुस्तरा । न । ये । शेकुः । यज्ञियाम् । नावम् । आऽरुहम् । ईर्मा । एव । ते । नि । अविशन्त । केपयः ॥६॥

हे इन्द्र तव प्रसादात् **ते पृथक् प्रायन्** देवलोकान् पृथग् गच्छन्ति **ये प्रथमाः** पूर्वे मुख्या वा **देवहूतयो** देवानामाह्वातारः ह्वेञ् स्पर्धायां स्त्रियां क्तिन् । किञ्च **दुष्टरा** अन्यैर्दुस्तराणि श्रवस्यानि श्रवणीयानि यशांसि **अकृण्वत** अकुर्वत । किञ्च **ये** त्वत्प्रसादरहिता जनाः **यज्ञियां** यज्ञसम्बन्धिनीम् । यज्ञमयीमित्यर्थः । **नावम् आरुहम्** आरोढुं **न शेकुः** न शक्नुवन्ति **ते केपयः** कुत्सितपूयकर्माणः पापिनो जनाः **ईर्मैव** ऋणेनैव **न्यविशन्त** नीचैरविशन्त । अधोगतिं प्राप्ता इत्यर्थः ।

एवैवापागपरे सन्तु दूढ्योऽश्वा
येषां दुर्युज आ युयुज्रे ।
इत्था ये प्रागुपरे सन्ति दावने
पुरूणि यत्र वयुनानि भोजना ॥७॥ ऋ. १०।४४।७

पदपाठः

एव । एव । अपाक् । अपरे । सन्तु । दुःऽध्यः । अश्वाः । येषाम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दुःऽयुजः । आ । उयुयुज्रे । इत्था । ये । प्राक् । उपरे । सन्ति । दावने । पुरूणि । यत्र । वयुनानि । भोजना ॥७॥

एवंव एवमेव **दूढ्यः** दुर्बुद्धयः **अपरे** अन्ये अयज्वानः इत्यर्थः । **अपाक्** अपाचीना अधोगन्तारः **सन्तु** भवन्तु । **येषां** यज्ञमकुर्वताम् **अश्वाः दुर्युजः** दुर्योजाः प्रबलाः अश्वाः **आ युयुज्रे** रथेषु युज्यन्ते । ये सत्यपि सामर्थ्ये न यजन्ति ते नरकं गच्छन्तीत्यर्थः । किञ्च **इत्था** इत्थं ते स्वर्गगामिनो भवन्ति **ये उपरे** यज्वानः **प्राक्** भरणात् पूर्वमेव **दावने** देवानां हविर्दानाय **सन्ति** भवन्ति । **यत्र** येषु च यज्ञकर्तृषु **वयुनानि** प्रज्ञानानि कान्तानि वा **भोजना** भोग्यानि धनानि **पुरूणि** बहूनि देवेभ्यो दातुं **सन्ति** ।

गिरीँ रज्रान् रेजमानाँ अधारयद्
द्यौः क्रन्ददन्तरिक्षाणि कोपयत् ।
समीचीने धिषणे वि ष्कभायति
वृष्णः पीत्वा मद उक्थानि शंसति ॥८॥ ऋ. १०।४४।८

पदपाठः

गिरीन् । अज्रान् । रेजमानान् । अधारयत् । द्यौः । क्रन्दत् । अन्तरिक्षाणि । कोपयत् । समीचीने इति सम्ऽईचीने । धिषणे इति । वि । स्कभायति । वृष्णः । पीत्वा । मदे । उक्थानि । शंसति ॥८॥

गिरीन् मेघान् **अज्रान्** गमनशीलान् **रेजमानान्** कम्पमानान् **अधारयत्** इन्द्रो धारितवान् निश्चलान् कृतवान् । किञ्च **द्यौः** द्युलोकस्तन्निवासी वा जनोऽसुर-राक्षसादिभ्यो भीतः सन् **क्रन्दत्** क्रन्दति । इन्द्रमाह्वयति आत्मरक्षार्थम् । किञ्चेन्द्रः **अन्तरिक्षाणि कोपयत्** कोपयति संक्षोभयतीत्यर्थः । किञ्चेन्द्रः **समीचीने** परस्परं सङ्गते **धिषणे** द्यावापृथिव्यो **विष्कभायति** अन्तरिक्षेण स्तभ्नाति । स्तम्भयतीत्यर्थः । किञ्चेन्द्रः **वृष्णः** स्वोदरस्यासेक्तॄन् सोमान् पीत्वा **मदे** सति **उक्थानि** प्रशस्यानि वचनानि **शंसति** ब्रवीति ।

इमं बिभर्मि सुकृतं ते अङ्कुशं
येनारुजासि मघवञ्छफारुजः ।
अस्मिन्त्सु ते सवने अस्त्वोक्यं
सुत इष्टौ मघवन् बोध्याभगः ॥९॥ ऋ. १०।४४।९

पदपाठः

इमम् । बिभर्मि । सुऽकृतम् । ते । अङ्कुशम् । येन । आऽरुजासि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मघऽवन् । शफऽआरुजः । अस्मिन् । सु । ते । सवने । अस्तु । ओक्यम् । सुते । इष्टौ । मघऽवन् । बोधि । आऽभगः ॥९॥

हे **मघवन्** धनवन्निन्द्र ! **ते सुकृतं संस्कृतम्** इमम् **अङ्कुशं बिभर्मि** धारयामि । अत्राङ्कुशशब्देन प्रेरकत्व-गुणयोगात् स्तुतिरुच्यते । स्तुतिं धारयामीत्यर्थः । **येन** स्तुतः सन् त्वं **शफारुजः** आभिमुख्येन परबलानां हन्तॄन् ऐरावतादीन् गजान् **आरुजासि** आभिमुख्येन रुजसि । पीडयसि इत्यर्थः । किञ्च **ते** तव **अस्मिन्** अस्मदीये **सवने ओक्यम्** ओको निवासो **अस्तु** भवतु । किञ्च हे **मघवन् आभगः** आभजनीयस्त्वं **सुते** सुतसोमे **इष्टौ** यज्ञे **बोधि** अस्मदीयाः स्तुतीः बुध्यस्व ।

गोभिष्टरेमामतिं दुरेवां
यवेन क्षुधं पुरुहूत विश्वाम् ।
वयं राजभिः प्रथमा
धनान्यस्माकेन वृजनेना जयेम ॥१०॥ ऋ० १०।४४।१०

पदपाठः

गोभिः । तरेम । अमतिम् । दुःऽएवाम् । यवेन । क्षुधम् । पुरुऽहूत । विश्वाम् । वयम् । राजऽभिः । प्रथमाः । धनानि । अस्माकेन । वृजनेन । जयेम ॥१०॥

"गोभिष्टरेमामतिं दुरेवां यवेन वा क्षुधं पुरुहूत विश्वे । वयं राजसु प्रथमा धनान्यरिष्टासो वृजनीभिर्जयेम ॥" अनेन पाठभेदेन व्याख्यातोऽयं मन्त्रः (अथर्व० ७।५०।७) ।

बृहस्पतिर्नः परिपातु
पश्चादुतोत्तरस्मादधरादघायोः ।
इन्द्रः पुरस्तादुतमध्यतो नः
सखा सखिभ्यो वरिवः कृणोतु ॥११॥ ऋ० १०।४४।११

पदपाठः

बृहस्पतिः । नः । परि । पातु । पश्चात् । उत । उत्ऽतरस्मात् । अधरात् । अघऽयोः । इन्द्रः । पुरस्तात् । उत । मध्यतः । नः । सखा । सखिऽभ्यः । वरिवः । कृणोतु ॥११॥

व्याख्यातोऽयं मन्त्रः (अथर्व० ७।५१।१) वरीयः इति अथर्व० ७।५१।१ ।

इत्यष्टमेऽनुवाके चतुर्थं सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पञ्चनवतितमं सूक्तम्

चतुर्ऋचस्यास्य सूक्तस्य प्रथमर्चो गृत्समदः, द्वितीयादि-त्रिक. तृचस्य च सुदाः पैजवनः ऋषी । इन्द्रो देवता । प्रथमाया अष्टिः, द्वितीयादि-—तृचस्य च शक्वरी छन्दसी ।

महाव्रतेषु त्रिकद्रुकेषु महिषः (२०।९५।१) 'प्रोष्वस्मै पुरोरथम्' (२०।९५।२) इति पृष्ठस्तोत्रियानुरूपौ भवतः । तदुक्तं वैताने – "त्रिकद्रुकेषु महिषः 'प्रोष्वस्मै पुरोरथम्' इति स्तोत्रियानुरूपौ" (वै० ३४।१८) इति ।

त्रिकद्रुकेषु महिषो यवाशिरं तुविशुष्मस्तृपत्
सोममपिबत् विष्णुना सुतं यथावशत् ।
स ईं ममाद महि कर्म कर्त्तवे महामुरुं सैनं
सश्चद् देवो देवे सत्यमिन्द्रं सत्य इन्दुः ॥१॥ ऋ. २।२२।१

पदपाठः

त्रिऽकद्रुकेषु । महिषः । यवऽआशिरम् । तुविऽशुष्मः । तृपत् । सोमम् । अपिबत् । विष्णुना । सुतम् । यथा । अवशत् । सः । ईम् । ममाद । महि । कर्म । कर्त्तवे । महाम् । उरुम् । सः । एनम् । सश्चत् । देवः । देवे । सत्यम् । इन्द्रम् । सत्यः । इन्दुः ॥१॥

गृत्समदो ब्रवीति । **महिषो** महान् पूज्यः, **तुविशुष्मः** प्रभूतबलः, **तृपत्** तृप्यन् इन्द्रः, **त्रिकद्रुकेषु** ज्योतिर्गौरायुरित्येतन्नामकेषु आभिप्लविकेषु अहःसु **सुतम्** अभिषुतं **यवाशिरं** यवमयैः सक्तुभिर्मिश्रितम् । यवाशिरः इत्यत्र यव-आङ्पूर्वस्य श्रीणातेः क्विपि 'अपस्पृधेथाम्' इत्यादिना शिर इत्यादेशः । तं **सोमं विष्णुना** सह **अपिबत्** । **यथावशत्** पूर्वं यथा तं सोममकामयत तथापिवत् । पीतः **सः** सोमः **महां** महान्तम् **उरुं** तेजसा विस्तीर्णम् **ईम् एनम्** इन्द्रं **ममाद** अमादयत् किमर्थम् । **महि** महत् वृत्रहननादिलक्षणं **कर्म कर्तवे** कर्तुम् । **सत्यः इन्दुः** स्रवन् **देवो** दीप्यमानः **सः** सोमः **सत्यं** यथार्थभूतं देवं सोमं कामयमानम् इन्द्रं **सश्चत्** । सश्चतिर्व्याप्तिकर्मा व्याप्नोतु ।

प्रो ष्वस्मै पुरोरथमिन्द्राय शूषमर्चत
अभीके चिदु लोककृत् संगे समत्सु ।
वृत्रहाऽस्माकं बोधि चोदिता नभन्ता-
मन्यकेषां ज्याका अधि धन्वसु ॥२॥ ऋ. १०।१३३।१

पदपाठः

प्रो इति । सु । अस्मै । पुरःऽरथम् । इन्द्राय । शूषम् । अर्चत ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अभीके । चित् । ऊं इति । लोकऽकृत् । सम्ऽगे । समत्ऽसु । वृत्रऽहा । अस्माकम् । बोधि । चोदिता । नभन्ताम् । अन्यकेषाम् । ज्याकाः । अधि । धन्वऽसु ॥२॥

अस्मै इन्द्राय। अत्र षष्ठ्यर्थे चतुर्थी । अस्येन्द्रस्य **पुरोरथं** रथस्य पुरः पुरतः । रथस्याग्रतो वर्त्तमानं **शूषं** बलं **सु प्रो अर्चत**। हे स्तोतारः सुष्ठु प्रपूजयत । इन्द्रो विशेष्यते । **समत्सु** सङ्ग्रामेषु **संगे** संगमनीये शत्रुबले । **अभीके चित्** अभ्यर्णेऽपि निकटं प्राप्तेऽपि केशाकेश्यवस्थायामपि **लोककृत्** स्थितिकृत्, न पलायिता, स्थित्वा च **वृत्रहा** वृत्राणामावरकाणां हन्ता एवंविधः स इन्द्रः **अस्माकं** स्तोतॄणां **चोदिता** धनानां प्रेरिता सन् **बोधि**। अस्माभिः कृतानि परिचरणानि बुध्यताम् । अपि च । **अन्यकेषां** कुत्सितानामन्येषां शत्रूणाम् **अधि धन्वसु** धनुःष्वधिरोपिता **ज्याकाः** कुत्सिता ज्या **नभन्तां** हिंस्यन्तां नश्यन्तु । ज्याशब्दात् कुत्सायां 'प्रागिवात्कः' (पा० ५।३।७०;७४) । 'नभ तुभ हिंसायाम्' क्रैयादिकः, व्यत्ययेन शप् । प्रो अत्र प्रे उ इति निपातसमुदायः । 'ओत्' इति प्रगृह्यसंज्ञम् ।

त्वं सिन्धूँरवासृजोऽधराचो अहन्नहिम् ।
अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यं
तं त्वा परिष्वजामहे ।
नभन्तामन्यकेषां ज्याका अधिधन्वसु ॥३॥ ऋ. १०।१३३।२

पदपाठः

त्वम् । सिन्धून् । अव । असृजः । अधराचः । अहन् । अहिम् । अशत्रुः । इन्द्र । जज्ञिषे । विश्वम् । पुष्यसि । वार्यम् । तम् । त्वा । परि । स्वजामहे । नभन्ताम् । अन्यकेषाम् । ज्याकाः । अधि । धन्वऽसु ॥३॥

हे इन्द्र ! **त्वं सिन्धून्** स्यन्दनशीलान् जलपूरान् **अधराचः** अधरम् अधोमुखम् **अञ्चतो** गन्तॄन् **अवासृजः** मेघान्निरगमयः । यतस्त्वम् **अहिम्** अन्तरिक्षे गतं मेघम् **अहन्** हतवानसि । यद्वा अहिमागत्य हन्तारं सर्वजगत आवरकं वृत्रम् असुरं हतवानसि । अतो हे इन्द्र ! त्वम् **अशत्रुः** शत्रुरहितो जज्ञिषे जायसे । तथा **विश्वं** सर्वं **वार्यं** वरणीयं सम्भजनीयं धनं **पुष्यसि** वर्धयसि । **तं** तादृशं **त्वा** त्वां **परिष्वजामहे** हविर्भिः स्तुतिभिश्चालिङ्गनं कुर्मः, वशीकुर्मः इत्यर्थः । शेषं पूर्ववत् ।

विषु विश्वा अरातयोऽर्यो नशन्त नो धियः ।
अस्तासि शत्रवे वधं यो न इन्द्र जिघांसति
या ते रातिर्ददिर्वसु नभन्तामन्यकेषां ज्याका
अधि धन्वसु ॥४॥ ऋ. १०।१३३।३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

वि । सु । विश्वाः । अरातयः । अर्यः । नशन्त । नः । धियः । अस्ता । असि । शत्रवे । वधम् । यः । नः । इन्द्र । जिघांसति । या । ते । रातिः । ददिः । वसु । नभन्ताम् । अन्यकेषाम् । ज्याकाः । अधि । धन्वऽसु ।।४।।

विश्वाः सर्वाः **अरातयः** अदात्र्यः **अर्यः** अभिगन्त्र्यः **नः** अस्माकं शत्रुभूताः प्रजाः **सु** सुष्ठु **विनशन्त** विनश्यन्तु । हे **इन्द्र** त्वदर्थं **धियः** कर्माणि स्तुतयो वा प्रवर्त्तन्ताम् । हे इन्द्र ! **यो नः** अस्मान् **जिघांसति** हन्तुमिच्छति तस्मै शत्रवे **वधं** हननसाधनमायुधम् **अस्तासि** क्षेप्ता भवसि । 'असु क्षेपणे' ताच्छीलिकस्तृन् । **ते** तव **या** रातिः धनप्रदानहेतुर्हस्तः । रा दाने करणे क्तिन् । सा रातिः **वासु** धनं **ददिः** अस्मभ्यं दाता भवतु । 'आदृगमहन०' इति ददातेः कि प्रत्ययः । 'न लोकाव्यय०' इति वसुशब्दात् षष्ठ्यभावः । शेषं पूर्ववत् ।

इत्यष्टमानुवाके पञ्चमं सूक्तम् ।

षण्णवतितमं सूक्तम्

चतुर्विंशत्यृचस्यास्य सूक्तस्य प्रथमादिदशर्चां पूरणः, एकादश्यादि-षण्णां रक्षोहाः, सप्तदश्यादि-सप्तानां ब्रह्मा, चतुर्विंश्याश्च प्रचेता ऋषयः । प्रथमादि-पञ्चानामिन्द्रः, षष्ठ्यादिचतसृणामिन्द्राग्नी, आयुर्यक्ष्मनाशनञ्च, दशम्या आयुः, एकादश्यादिषण्णां गर्भसंस्रावे प्रायश्चित्तम्, सप्तदश्यादिसप्तानां यक्ष्मविबर्हणम्, चतुर्विंश्याश्च दुःस्वप्ननाशनं देवताः । प्रथमाद्यष्टानां त्रिष्टुप्, नवम्याः शक्वरीगर्भा जगती, दशम्यादिनवानां चतुर्विंश्याश्चानुष्टुप्, एकोनविंश्याः ककुम्मत्यनुष्टुप्, विंश्याश्चतुष्पदा भुरिगुष्णिक्, एकविंश्या उपरिष्टाद्विराड्बृहती, द्वाविंश्या उष्णिग्-गर्भा निचृदनुष्टुप्, त्रयोविंश्याश्च पथ्यापङ्क्तिश्छन्दांसि ।

महाव्रते माध्यन्दिने सवने 'तीव्रस्याभिवयसो अस्य पाहि' इत्येताश्चतुर्विंशतिम् ऋचः आवापस्थाने आवपत । तदुक्तं वैताने—"तीव्रस्याभिवयसो अस्य पाहि' इति चतुर्विंशतिम् आवपते" (वै० ३४।२०) इति ।

तीव्रस्याभिवयसो अस्य पाहि
सर्वरथा वि हरी इह मुञ्च ।
इन्द्र मा त्वा यजमानासो अन्ये
नि रीरमन् तुभ्यमिमे सुतासः ।।१।। ऋ. १०।१६०।१

पदपाठः

तीव्रस्य । अभिऽवयसः । अस्य । पाहि । सर्वऽरथा । वि । हरी इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इह । मुञ्च । इन्द्र । मा । त्वा । यजमानासः । अन्ये । नि । रीरमन् । तुभ्यम् । इमे । सुतासः ॥१॥

तीव्रस्य तीक्ष्णस्य क्षिप्रं मदकरस्य, **अभिवयसः** वय इत्यन्ननाम । अभिगतं चरुपुरोडाशाद्यन्नं यस्य तादृशस्य **अस्य** सोमस्य । 'क्रियाग्रहणं कर्त्तव्यम्' इति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । ईदृशं सोमं हे इन्द्र **पाहि** पिब । पिबतेश्छान्दसः शपो लुक् । तदर्थं **सर्वरथा** सरणशीलरथौ हरी अश्वौ **इहा** अस्मिन् यज्ञगृहे **वि मुञ्च** रथाद् विसृज । हे इन्द्र अस्मत्तः **अन्ये यजमानासः** यजमानाः **त्वा** त्वां **मा नि रीरमन्** नितरां मा रमयन्तु । वयमेव रमयाम इत्यर्थः । ततः **तुभ्यं** त्वदर्थमेव **सुतासः** सुताः अभिषुताः **इमे** प्रत्यक्षमुपलभ्यमानाः सोमा वर्त्तन्ते ।

तुभ्यं सुतास्तुभ्यमु सोत्वासस्त्वां
गिरः श्वात्र्या आ ह्वयन्ति ।
इन्द्रेदमद्य सवनं जुषाणो विश्वस्य
विद्वाँ इह पाहि सोमम् ॥२॥ ऋ. १०।१६०।२

पदपाठः

तुभ्यम् । सुताः । तुभ्यम् । ऊं इति । सोत्वासः । त्वाम् । गिरः । श्वात्र्याः । आ । ह्वयन्ति । इन्द्र । इदम् । अद्य । सवनम् । जुषाणः । विश्वस्य । विद्वान् । इह । पाहि । सोमम् ॥२॥

हे इन्द्र **तुभ्यं** त्वदर्थमेव **सुताः** अभिषुताः सर्वे **सोमाः सोत्वासः** इतः परम् अभिषोतव्याश्च **तुभ्यमु** त्वदर्थमेव । सुनोतेः "कृत्यार्थे तवैकेत्" इति त्वन्प्रत्ययः । **श्वात्र्याः** शु आशु शीघ्रमतन्त्यः प्रवर्त्तमानाः **गिरः** स्तुतिरूपा वाचश्च **त्वाम्** एव **आ ह्वयन्ति** आक्रोशयन्ति । हे **इन्द्र अद्य** अस्मिन् काले **इदं** सवनं प्रातःसवनादिकं **जुषाणः** सेवमानो **विश्वस्य** सर्वस्य **विद्वान्** ज्ञाता त्वम् **इह** अस्मिन् यज्ञे **सोमं पाहि** पिब ।

य उशता मनसा सोममस्मै
सर्वहृदा देवकामः सुनोति ।
न गा इन्द्रस्तस्य परा ददाति
प्रशस्तमिच्चारुमस्मै कृणोति ॥३॥ ऋ. १०।१६०।३

पदपाठः

यः । उशता । मनसा । सोमम् । अस्मै । सर्वऽहृदा । देवऽकामः । सुनोति । न । गाः । इन्द्रः । तस्य । परा । ददाति । प्रऽशस्तम् । इत् । चारुम् । अस्मै । कृणोति ॥३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

य उशता कामयमानेन, **सर्वहृदा** सर्वमविकलं हृदयं यस्य । यद्वा सर्वेषामृत्विजां हृदयेन । सामर्थ्यान्मित्वर्थो लक्ष्यते । हृदयवता मनसा **अस्मै** इन्द्राय **देवकामः** देवमिन्द्रं कामयमानो यजमानः **सोम सुनोति** अभिषुणोति **इन्द्रस्तस्य** यजमानस्य **गाः न परा ददाति** । परादानं विनाशः । न विनाशयति । **अस्मै** यजमानाय **चारु** शोभनमत एव **प्रशस्तम्** । **इत्** इत्यवधारणे । प्रशंसनीयमेव धनं **कृणोति** करोति ।

अनुस्पष्टो भवत्येषो अस्य यो अस्मै
रेवान्न सुनोति सोमम् ।
निररत्नौ मघवा तं दधाति
ब्रह्मद्विषो हन्त्यनानुदिष्टः ॥४॥ ऋ. १०।१६०।४

पदपाठः

अनुऽस्पष्टः । भवति । एषः । अस्य । यः । अस्मै । रेवान् । न । सुनोति । सोमम् । निः । अरत्नौ । मघऽवा । तम् । दधाति । ब्रह्मऽद्विषः । हन्ति । अननुऽदिष्टः ॥४॥

अस्य यजमानस्य **एषः** इन्द्रः **अनुस्पष्टः** दृष्टिगोचरो भवति **यो रेवान्** धनवान् **अस्मै** इन्द्राय **सोमं सुनोति** अभिषुणोति । **मघवा** धनवान् इन्द्रः **तं** यजमानम् **अरत्नौ** हस्ते **निः दधाति** भयान्निष्कृष्य धारयति, रक्षिता सन् धृत्वा च **अननुदिष्टः** तेनानुक्तोऽप्रार्थित एव सन् **ब्रह्मद्विषः** ब्राह्मणद्वेष्ऋृन् शत्रून् **हन्ति** हिनस्ति ।

अश्वायन्तो गव्यन्तो वाजयन्तो
हवामहे त्वोपगन्तवा उ ।
आभूषन्तस्ते सुमतौ नवायां
वयमिन्द्र त्वा शुनं हुवेम ॥५॥ ऋ १०।१६०।५

पदपाठः

अश्वऽयन्तः । गव्यन्तः । वाजयन्तः । हवामहे । त्वा । उपऽगन्तवै । ऊं इति । आऽभूषन्तः । ते । सुऽमतौ । नवायाम् । वयम् । इन्द्र । त्वा । शुनम् । हुवेम ॥५॥

अश्वायन्तः अश्वानात्मन इच्छन्तः, **गव्यन्तः** गाः आत्मन इच्छन्तः, **वाजयन्तः** अग्नीन् वाजनेन शूर्पादिना प्रज्वालयन्तः । यद्वा वाजम् अन्नमात्मन इच्छन्त इति । एवं भूता **वयं** हे **इन्द्र त्वाम् उपगन्तवै** उपगन्तुं प्राप्तुं **हवामहे** आह्वयामहे । गमेः 'तुमर्थे से सेन्०' इति तवै प्रत्ययः । उ इति पूरकः । हे इन्द्र ! **ते** तव **नवायाम्** अभिनवायां प्रशस्तायां **सुमतौ** शोभनबुद्धौ **आभूषन्तः** आ समन्ताद् भवन्तो वर्त्तमानाः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यद्वा आ समन्ताद् भूषयन्तोऽलङ्कुर्वन्तस्तवानुग्रहबुद्धौ वर्त्तमानाः वयं **शुनं** सुखकरं त्वां **हुवेम** आह्वयेम । अश्वायन्तः । क्यचि 'अश्वाघस्यात्' (पा० ७।४।३७) इत्यात्वम् । गव्यन्तः । 'वान्तो यि प्रत्यये' (पा ६।१।७९) इत्यवादेशः । वाजयन्तः । वा गतिगन्धनयोः, णिचि 'वो विधूनने०' (पा. ७।३।३८) इति जुगागमः ।

मुञ्चामि त्वा हविषा जीवनाय
कमज्ञातयक्ष्मादुत राजयक्ष्मात् ।
ग्राहिर्जग्राह यदि वैतदेनं तस्या
इन्द्राग्नी प्र मुमुक्तमेनम् ।।६।। ऋ. १०।१६१।१

पदपाठः

मुञ्चामि । त्वा । हविषा । जीवनाय । कम् । अज्ञातऽयक्ष्मात् । ग्राहिः । जग्राह । यदि । वा । एतत् । एनम् । तस्याः । इन्द्राग्नी इति । प्र । मुमुक्तम् । एनम् ।।६।।

सायणेनैव व्याख्यातोऽयं मन्त्रः (अथर्व० ३।११।१) 'यदि वैतदेवम्' इति ऋक्पाठः ।

यदि क्षितायुर्यदि वा परेतो
यदि मृत्योरन्तिकं नीत एव ।
तमा हरामि निर्ऋतेरुपस्था-
दस्पर्शमेनं शतशारदाय ।।७।। ऋ. १०।१६१।२

पदपाठः

यदि । क्षितऽआयुः । यदि । वा । पराऽइतः । यदि । मृत्योः । अन्तिकम् । निऽइतः । एव । तम् । आ । हरामि । निःऽऋतेः । उपऽस्थात् । अस्पार्शम् । एनम् । शतऽशारदाय ।।७।।

सायणेनैव व्याख्यातोऽयं मन्त्रः (अथर्व० ३।११।२) ।

सहस्राक्षेण शतवीर्येण
शतायुषा हविषाहार्षमेनम् ।
इन्द्रो यथैनं शरदो नयात्यति विश्वस्य
दुरितस्य पारम् ।।८।। ऋ. १०।१६१।३

पदपाठः

सहस्रऽअक्षेण । शतऽवीर्येण । शतऽआयुषा । हविषा । आ । अहार्षम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एनम् । इन्द्रः । यथा । एनम् । शरदः । नयाति । अति । विश्वस्य । दुःऽइतस्य । पारम् ॥८॥

सहस्राक्षेण शतशारदेन शतायुषा हविषाहार्षमेनम् ।
शतं यथेमं नयातीन्द्रो विश्वस्य दुरितस्य पारम् ॥

इति ऋक्पाठः (ऋ. १०।१६१।३)

व्याख्यातोऽयं मन्त्रः सायणेनैव (अथर्व० ३।११।३) ।

शतं जीव शरदो वर्धमानः शतं
हेमन्ताञ्छतमु वसन्तान् ।
शतं त इन्द्रो अग्निः सविता बृहस्पतिः
शतायुषा हविषाहार्षमेनम् ॥९॥ ऋ. १०।१६१।४

पदपाठः

शतम् । जीव । शरदः । वर्धमानः । शतम् । हेमन्तान् । शतम् । ऊं इति । वसन्तान् । शतम् । ते । इन्द्रः । अग्निः । सविता । बृहस्पतिः । शतऽआयुषा । हविषा । आ । अहार्षम् । एनम् ॥९॥

शतमिन्द्राग्नी सविता बृहस्पतिः शतायुषा हविषेमं पुनर्दुः ॥

इति ऋक्पाठः (ऋ. १०।१६।४)

व्याख्यातोऽयं मन्त्रः सायणेनैव (अथर्व० ३।११।४) ।

आहार्षमविदं त्वा पुनरागाः पुनर्णवः ।
सर्वाङ्ग सर्वं ते चक्षुः सर्वमायुश्च तेऽविदम् ॥१०॥

ऋ. १०।१६१।५

पदपाठः

आ । अहार्षम् । अविदम् । त्वा । पुनः । आ । अगाः । पुनःऽअनवः । सर्वऽअङ्ग । सर्वम् । ते । चक्षुः । सर्वम् । आयुः । च । ते । अविदम् ॥१०॥

सायणेनैव व्याख्यातोऽयं मन्त्रः (अथर्व० ८।१।२०) ।

ब्रह्मणाग्निः संविदानो रक्षोहा बाधतामितः ।
अमीवा यस्ते गर्भं दुर्णामा योनिमाशये ॥११॥

ऋ. १०।१६२।१

पदपाठः

ब्रह्मणा । अग्निः । सम्ऽअविदानः । रक्षःऽहा । बाधताम् । इतः । अमीवा । यः । ते । गर्भम् । दुःनामा । योनिम् । आऽशये ॥११॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ब्रह्मणा मन्त्रेण सह **संविदानः** ऐकमत्यं प्राप्तः **रक्षोहा** रक्षसां हन्ता अग्निः **इतः** अस्मात् स्थानात् राक्षसादिकं **बाधतां** हिनस्तु । **यो** राक्षसः **अमीवा** रोगरूपः सन् **ते** तव **गर्भम् आशये** आशेते 'लोपस्त आत्मनेपदेषु' इति तलोपः, हन्तुं प्राप्नोति । **दुर्णामा** अर्श आख्यो रोगः । तद्रूपः सन् । यश्च **योनिं** रेतस आधानं गर्भस्थानमाशेते तं बाधतामित्यन्वयः ।

यस्ते गर्भममीवा दुर्णामा योनिमाशये ।
अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत् ।।१२।।

ऋ. १०।१६२।२

पदपाठः

यः । ते । गर्भम् । अमीवा । दुःनामा । योनिम् । आऽशये । तम् । ब्रह्मणा । सह । निः । क्रव्यऽअदम् । अनीनशत् ।।१२।।

हे योषित्, **यः** राक्षसः **अमीवा** रोगरूपः सन् **ते** तव **गर्भम् आशये** आशेते, अर्थात् हन्तुम् उपैति यश्च ते **योनिम्** गर्भस्थानम् आशेते **तं क्रव्यादं** मांसभक्षकं राक्षसं **ब्रह्मणा सह** ब्रह्मणा मन्त्रेण सहितः **अग्निः** नि निःशेषेण **अनीनशत्** नाशयतु ।

यस्ते हन्ति पतयन्तं निषत्स्नुं यः सरीसृपम् ।
जातं यस्ते जिघांसति तमितो नाशयामसि ।।१३।।

ऋ. १०।१६२।३

पदपाठः

यः । ते । हन्ति । पतयन्तम् । निऽसत्स्नुम् । यः । सरीसृपम् । जातम् । यः । ते । जिघांसति । तम् । इतः । नाशयामसि ।।१३।।

हे योषित् **ते** गर्भाशये **पतयन्तं** पतन्तं रेतोरूपेण गच्छन्तं तदनन्तरं तत्र **निषत्स्नुं** निषीदन्तं च गर्भं **यो** राक्षसादिः **हन्ति** हिनस्ति ततो मासत्रयादूर्ध्वं प्राप्तसर्वावयवं **सरीसृपं** सर्पणशीलं च गर्भं यो हन्ति, **जातं** दशसु मासेषूत्पन्नं ते तव शिशुं यो राक्षसादिः **जिघांसति** हन्तुमिच्छति **तमितः** स्थानात् **नाशयामसि** नाशयामः ।

यस्त ऊरू विहरत्यन्तरा दम्पती शये ।
योनिं यो अन्तरारेल्हि तमितो नाशयामसि ।।१४।।

ऋ १०।१६२।४

पदपाठः

यः । ते । ऊरू इति । विऽहरति । अन्तरा । दम्पती इति दम्ऽपती । शये । योनिम् । यः । अन्तः । आऽरेल्हि । तम् । इतः । नाशयामसि ।।१४।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे योषित् **ते ऊरू** पादमूलौ **यः** राक्षसादिः **विहरति** गर्भघाताय विश्लिष्टौ करोति, **दंपती अन्तरा** जायापत्योर्मध्ये गर्भहननार्थं यश्च **शये** शेते, **यः** च **योनिमन्तः** प्रविश्य **आरेल्हि** निषिक्तं रेतो जिह्वया आस्वादयति भक्षयतीत्यर्थः। शेषं पूर्ववत्।

यस्त्वा भ्राता पतिर्भूत्वा जारो भूत्वा निपद्यते।
प्रजां यस्ते जिघांसति तमितो नाशयामसि ।।१५।।

ऋ. १०।१६२।५

पदपाठः

यः। त्वा। भ्राता। पतिः। भूत्वा। जारः। भूत्वा। निऽपद्यते। प्रजाम्। यः। ते। जिघांसति। तम्। इतः। नाशयामसि ।।१५।।

हे योषित् **यो** राक्षसः **भ्राता** भ्रातृरूपो **भूत्वा, पतिः** भर्तृरूपो वा भूत्वा **त्वा** त्वां **निपद्यते** अभिगच्छति। अथवा **जारः** उपपतिरूपो **भूत्वा** अभिगच्छति एवं भूतः **यः** राक्षसादिः **ते प्रजां जिघांसति** तमितः **नाशयामसि** नाशयामः।

यस्त्वा स्वप्नेन तमसा मोहयित्वा निपद्यते।
प्रजां यस्ते जिघांसति तमितो नाशयामसि ।।१६।।

ऋ. १०।१६२।६

पदपाठः

यः। त्वा। स्वप्नेन। तमसा। मोहयित्वा। निऽपद्यते। प्रजाम्। यः। ते। जिघांसति। तम्। इतः। नाशयामसि ।।१६।।

हे योषित् **यो** राक्षसादिः **स्वप्नेन** स्वप्नावस्थया **तमसा** निद्रया **त्वा** त्वां **मोहयित्वा** मूढतां प्रापय्य **निपद्यते** गर्भघाताय गच्छति। शेषं पूर्ववत्।

अक्षीभ्यां ते नासिकाभ्यां कर्णाभ्यां छुबुकादधि।
यक्ष्मं शीर्षण्यं मस्तिष्काज्जिह्वाया वि वृहामि ते ।।१७।।

ऋ. १०।१६३।१

पदपाठः

अक्षीभ्याम्। ते। नासिकाभ्याम्। कर्णाभ्याम्। छुबुकात्। अधि। यक्ष्मम्। शीर्षण्यम्। मस्तिष्कात्। जिह्वायाः। वि। वृहामि। ते ।।१७।।

व्याख्यातोऽयं मन्त्रः सायणेन (अथर्व० १।३३।१)।

ग्रीवाभ्यस्त उष्णिहाभ्यः कीकसाभ्यो अनूक्यात्।
यक्ष्मं दोषण्यमंसाभ्यां बाहुभ्यां वि वृहामि ते ।।१८।।

ऋ. १०।१६३।२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

ग्रीवाभ्यः । ते । उष्णिहाभ्यः । कीकसाभ्यः । अनूक्यात् । यक्ष्मम् । दोषण्यम् । अंसाभ्याम् । बाहुभ्याम् । वि । वृहामि । ते ॥१८॥

व्याख्यातोऽयं मन्त्रः सायणेन (अथर्व० २।३३।२) ।

हृदयात् ते परि क्लोम्नो हलीक्ष्णात् पार्श्वाभ्याम् ।
यक्ष्मं मतस्नाभ्यां प्लीह्नो यक्नस्ते वि वृहामसि ॥१९॥

पदपाठः

हृदयात् । ते । परि । क्लोम्नः । हलीक्ष्णात् । पार्श्वाभ्याम् । यक्ष्मम् । मतस्नाभ्याम् । प्लीह्नः । यक्नः । ते । वि । वृहामसि ॥१९॥

सायणेनैव व्याख्यातोऽयं मन्त्रः (अथर्व० २।३३।३)

आन्त्रेभ्यस्ते गुदाभ्यो वनिष्ठोरुदरादधि ।
यक्ष्मं कुक्षिभ्यां प्लाशेर्नाभ्या वि वृहामि ते ॥२०॥

ऋ. १०।१६३।३

पदपाठः

आन्त्रेभ्यः । ते । गुदाभ्यः । वनिष्ठोः । उदरात् । अधि । यक्ष्मम् । कुक्षिऽभ्याम् । प्राशेः । नाभ्याः । वि । वृहामि । ते ॥२०॥

ऋग्वेदे तु स्वल्पेन पाठभेदेन पठ्यतेऽयं मन्त्रः ।

सायणेनैव व्याख्यातोऽयं मन्त्रः (अथर्व० २।३३।४) ।

ऊरुभ्यां ते अष्ठीवद्भ्यां पार्ष्णिभ्यां प्रपदाभ्याम् ।
यक्ष्मं भसद्यं श्रोणिभ्यां भासदं
भंससो वि वृहामि ते ॥२१॥ ऋ. १०।१६३।४

पदपाठः

ऊरुऽभ्याम् । ते । अष्ठीवत्ऽभ्याम् । पार्ष्णिऽभ्याम् । प्रऽपदाभ्याम् । यक्ष्मम् । भसद्यम् । श्रोणिऽभ्याम् । भासदम् । भंससः । वि । वृहामि । ते ॥२१॥

सायणेनैव व्याख्यातोऽयं मन्त्रः (अथर्व० २।३३।५) ।

अस्थिभ्यस्ते मज्जभ्यः स्नावभ्यो धमनिभ्यः ।
यक्ष्मं पाणिभ्यामङ्गुलिभ्यो
नखेभ्यो वि वृहामि ते ॥२२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

अस्थिऽभ्यः । ते । मज्जऽभ्यः । स्नावऽभ्यः । धमनिऽभ्यः । यक्ष्मम् । पाणिऽभ्याम् । अङ्गुलिऽभ्यः । नखेभ्यः । वि । वृहामि । ते ॥२२॥

व्याख्यातोऽयं मन्त्रः सायणेनैव (अथर्व० २।३३।६) ।

अङ्गे अङ्गे लोम्नि लोम्नि यस्ते पर्वणि पर्वणि ।
यक्ष्मं त्वचस्यं ते वयं कश्यपस्य विबर्हेण
विष्वञ्चं वि वृहामसि ॥२३॥ ऋ. १०।१६३।६

पदपाठः

अङ्गेऽअङ्गे । लोम्निऽलोम्नि । यः । ते । पर्वणिऽपर्वणि । यक्ष्मम् । त्वचस्यम् । ते । वयम् । कश्यपस्य । विऽबर्हेण । विश्वञ्चम् । वि । वृहामसि ॥२३॥

व्याख्यातोऽयं मन्त्रः सायणेनैव (अथर्व० २।३३।७) ।

अपेहि मनसस्पतेऽप क्राम परश्चर ।
परो निर्ऋत्या आ चक्ष्व बहुधा जीवतो मनः ॥२४॥
ऋ. १०।१६४।१

पदपाठः

अप । इहि । मनसः । पते । अप । क्राम । परः । चर । परः । निःऽऋत्यै । आ । चक्ष्व । बहुधा । जीवतः । मनः ॥२४॥

हे **मनसस्पते** ! स्वप्नावस्थस्य मनसः स्वामिन् दुःस्वप्नाधिदेवते **अपेहि** अपयाहि । स्वप्नावस्थावतो मत्तः निर्गच्छ । निर्गत्य च **अपक्राम,** देशान्तरं गन्तुं पादौ विक्षिप । दूरदेशं गच्छेत्यर्थः । अपक्रम्य च **परः** परस्ताद् विप्रकृष्टे देशे **चर** यथेच्छं वर्त्तस्व । अपि च **निर्ऋत्यै** पापदेवतायै **परः** परस्ताद् वर्त्तमानायै **आ चक्ष्व** । वयं न बाधनीयाः इति प्रब्रूहि । **जीवतो** मम **मनो** बहुधा बहुप्रकारं भवति । भोक्तव्येषु वहुषु विषयेषु उत्सुकं सत् वर्त्तते । अतस्तद्विनाशकं दुःस्वप्नदर्शनं नश्यतु इत्यर्थः ।

इत्यष्टमेऽनुवाके षष्ठं सूक्तम् ।

इत्यष्टमोऽनुवाकः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ नवमोऽनुवाकः

सप्तनवतितमं सूक्तम्

तृचस्यास्य सूक्तस्य कलिर्ऋषिः। इन्द्रो देवता। प्रथमाद्वितीययोर्ऋचोः प्रगाथः, तृतीयायाश्च बृहती छन्दसी।

बृहस्पतिसवे 'वयमेनमिदा ह्यः' इत्यस्य 'तद् वो गाय सुते सचा' (अथर्व० २०।७८) इत्यनेन सह उक्तो विनियोगः।

तथा सर्वजित्यृषभादिषु अस्य तेनैव सह उक्तो विनियोगः।

तथा त्रिवृदादिषु सूत्रोक्तेषु सप्तसु त्रिरात्रैकाहेषु 'उभयं शृणवच्च यः' (अथर्व० २०।११३), 'वयमेनमिदा ह्यः' (अथर्व० २०।९७), 'पिबा सोममिन्द्र मन्दतु त्वा' (अथर्व० २०।११७), एते आज्यस्तोत्रिया भवन्ति, चकारात् पृष्ठस्तोत्रिया विकल्पिता भवन्ति। तद् उक्तं वैताने—"त्रिवृत्पञ्चदशसप्तदशैकविंशत्रिणवत्रयस्त्रिंशनवसप्तदशेषु 'उभयं शृणवच्च नः,' 'वयमेनमिदा ह्यः', 'पिबा सोममिन्द्र मन्दतु त्वा' इति" (वैता० श्रौ० ४०।८) इति।

तथा त्रिककुद्दशाहे अस्य विनियोगः 'क ईं वेद सुते सचा' (अथर्व० २०।५३) इत्यनेन सह उक्तः।

वयमेनमिदा ह्योपीपेमेह वज्रिणम्।
तस्मा उ अद्य समना सुतं भरा नूनं भूषत श्रुते ॥१॥

ऋ. ८।६६।७

पदपाठः

वयम्। एनम्। इदा। ह्यः। अपीपेम। इह। वज्रिणम्। तस्मै। ऊँ इति। अद्य। समना। सुतम्। भर। आ। नूनम्। भूषत। श्रुते ॥१॥

वयं यजमानाः **एनम्** इन्द्रं **वज्रिणम्** वज्रधारिणम् **इदा** इदानीं **ह्यः** च पूर्वस्मिन्नपि दिने **इह** अत्र यज्ञे **अपीपेम** आप्याययाम सोमेन। **तस्मा उ** तस्मा एव **अद्य** अत्र **समना** सङ्ग्रामार्थं **सुतम्** अभिषुतं सोमं **भर** हरत हे अध्वर्य्वादयः! **नूनम्** इदानीं **श्रुते** स्तोत्रे श्रुते सति **आ भूषत** आभवतु आगच्छतु।

वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति।
सेमं नः स्तोमं जुजुषाण आ गहीन्द्र
प्र चित्रया धिया ॥२॥ ऋ. ८।६६।८

पदपाठः

वृकः। चित्। अस्य। वारणः। उराऽमथिः। आ। वयुनेषु। भूषति। सः। इमम्। नः। स्तोमम्। जुजुषाणः। आ। गहि। इन्द्र। प्र। चित्रया। धिया ॥२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृकश्चित् स्तोनोऽपि **वारणः** सर्वस्य वारयिता सन्नपि **उरामथिः** शत्रूणां मार्गे गच्छतां मथिता सन्नपि **अस्य** इन्द्रस्य **वयुनेषु** मार्गेषु प्रज्ञानेषु वा **आ भूषति** आनुकूल्यमेव भजते। अतीव हिंस्रोऽपीन्द्रस्यानुकूलो भवतीत्यर्थः। यद्वा अस्येति कर्मणि षष्ठी। अमुमिन्द्रमुक्तरूपो वृकोऽपि वयुनेषु स्तोत्रेष्वाभूषति। **सः** त्वम् **इमं नः स्तोमं जुजुषाणः** प्रीयमाणः **आ गहि** आगच्छ। हे इन्द्र! **चित्रया धिया** कर्मणा स्तुतिलक्षणेन निमित्तेन प्र प्रकर्षेण आगहि शीघ्रमागच्छ।

कदू न्वस्याकृतमिन्द्रस्यास्ति पौंस्यम्।
केनो नु कं श्रोमतेन न शुश्रुवे जनुषः परि वृत्रहा ॥३॥

ऋ. ८।६६।९

पदपाठः

कत्। ऊं इति। नु। अस्य। अकृतम्। इन्द्रस्य। अस्ति। पौंस्यम्। केनो इति। नु। कम्। श्रोमतेन। न। शुश्रुवे। जनुषः। परि। वृत्रऽहा ॥३॥

अस्य इन्द्रस्य **कदु नु** किं नु खलु **पौंस्यं** पौरुषम् **अकृतम्** अनाचरितम् अस्ति। सर्वमपि वृत्रवधादिकमनेन कृतमेव इतः परं न किं च पौंस्यं कृत्यमस्तीत्यर्थः। लोके स्वल्पमपि यः पुंस्त्वं कुर्यात् स तेन स्तूयतेऽयं तु न स्तुत एतदुच्यते। **केनो नु कं** केन खलु **श्रोमतेन** श्रवणीयेन पुंस्त्वेन **न शुश्रुवे** न श्रूयते। किं कतिपयैरेवाहोभिः कृतेन नेत्याह। अयं **वृत्रहा** वृत्रस्यातिप्रबलस्य हन्तायं **जनुषः परि** जन्मप्रभृति क्रियमाणैः सामर्थ्यैः श्रूयते। वृत्रहेत्येतत्पुंस्त्वप्रदर्शनद्योतनाय। यथा वृत्रहननं सर्वैः श्रूयते तद्वदन्यान्यमपीति भावः।

इति नवमेऽनुवाके प्रथमं सूक्तम्।

अष्टनवतितमं सूक्तम्

द्वयृचस्यास्य सूक्तस्य शंयुर्ऋषिः। इन्द्रो देवता। प्रगाथश्छन्दः।

श्येनसंदंशाजिरवज्रेषु एकाहेषु 'त्वामिद्धि हवामहे' इत्यस्य विनियोगः 'सुरूपकृत्नुमूतये' (अथर्व० २०।५७) इत्यनेन सह उक्तः।

तथा तनूपृष्ठे षडहे अस्य विनियोगः 'यद् द्याव इन्द्र ते शतम्' (अथर्व० २०।८१) इत्यनेन सह उक्तः।

त्वामिद्धि हवामहे साता वाजस्य कारवः।
त्वां वृत्रेष्विन्द्र सत्पतिं नरस्त्वां काष्ठास्वर्वतः ॥१॥

ऋ. ६।४६।१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

त्वाम् । इत् । हि । हवामहे । साता । वाजस्य । कारवः । त्वाम् । वृत्रेषु । इन्द्र । सत्ऽपतिम् । नरः । त्वाम् । काष्ठासु । अर्वतः ॥१॥

कारवः स्तोतारो वयं **वाजस्य** अन्नस्य **साता** सातौ संभजने निमित्तभूते सति हे **इन्द्र** ! **त्वामिद्धि** त्वामेव **हवामहे** स्तुतिभिराह्वयामः । हे इन्द्र ! **सत्पतिं** सतां पालयितारं श्रेष्ठं **त्वा नरः** अन्येऽपि मनुष्याः **वृत्रेषु** आवरकेषु शत्रुषु सत्सु **हवन्ते** आह्वयन्ति तज्जयार्थम् । अपि च **अर्वतः** अश्वस्य संबन्धिनीषु **काष्ठासु** यत्राश्वः क्रान्त्वा तिष्ठति तासु काष्ठासु सङ्ग्रामेषु युद्धकामाश्च त्वाम् एवाह्वयन्ति । अतो वयं त्वामेवाह्वयाम इत्यर्थः ।

स त्वं नश्चित्र वज्रहस्त धृष्णुया
महः स्तवानो अद्रिवः ।
गामश्वं रथ्यामिन्द्र सं किर
सत्रा वाजं न जिग्युषे ॥२॥ ऋ. ८।४६।२

पदपाठः

सः । त्वम् । नः । चित्र । वज्रऽहस्त । धृष्णुऽया । महः । स्तवानः । अद्रिऽवः । गाम् । अश्वम् । रथ्यम् । इन्द्र । सम् । किर । सत्रा । वाजम् । न । जिग्युषे ॥२॥

चित्र चायनीय ! **वज्रहस्त** वज्रबाहो ! **अद्रिवः** वज्रवन् ! यद्वा आदृणात्यनेनेत्यद्रिरशनिः । तद्वन् एवम्भूत हे इन्द्र ! **धृष्णुया** धृष्णुः शत्रूणां धर्षयिता **महः** महान् सः तादृशः त्वं **स्तवानः** अस्माभिः स्तूयमानः सन् **गां रथ्यं** रथवाहनम् **अश्वं** च **संकिर** सम्यक् प्रयच्छ । **जिग्युषे** जितवते पुरुषाय भोगार्थं **सत्रा** महत् प्रभूतं **वाजं न** अन्नमिव । यथा शत्रून् जितवते भोगार्थं बह्वन्नं प्रयच्छसि तद्वत् ।

इति नवमेऽनुवाके द्वितीयं सूक्तम् ।

नवनवतितमं सूक्तम्

द्व्यृचस्यास्य सूक्तस्य मेध्यातिथिर्ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः ।

अपूर्वाख्ये एकाहे 'अभि त्वा पूर्वपीतये' इत्येष पृष्ठस्तोत्रियो भवति । तदुक्तं वैताने—"अपूर्वे 'अभि त्वा पूर्वपीतय' इति (वैता. श्रौ. ३९।६) इति ।

अभि त्वा पूर्वपीतय इन्द्र स्तोमेभिरायवः ।
समीचीनास ऋभवः समस्वरन्
रुद्रा गृणन्त पूर्व्यम् ॥१॥ ऋ. ८।३।७

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

अभि । त्वा । पूर्वऽपीतये । इन्द्र । स्तोमेभिः । आयवः । सम्ऽईचीनासः । ऋभवः । सम् । अस्वरन् । रुद्राः । गृणन्त पूर्व्यम् ॥१॥

हे **इन्द्र** ! **आयवः** मनुष्याः स्तोतारः **स्तोमेभिः** स्तोत्रैः **त्वाम्** इन्द्रम् **अभि** ष्टुवन्ति । किमर्थम् ? **पूर्वपीतये** सर्वेभ्यो देवेभ्यः पूर्वं प्रथमत एव सोमस्य पानाय । सवनमुखे हि चमसगणैरिन्द्रस्यैव सोमो हूयते । तथा **समीचीनासः** सङ्गताः **ऋभवः** प्रथमवाचकेन शब्देन त्रयोऽप्युपलक्ष्यन्ते ऋभुर्विभ्वावाज इत्येते च **समस्वरन्** त्वामेव सम्यगस्तुवन् । स्वृ शब्दोपतापयोः (भ्वा०) धातोः रूपम् । **रुद्राः** रुद्रापुत्रा मरुतश्च **पूर्व्यं** पुरातनं वृद्धं त्वामेव **गृणन्त** अभ्यस्तुवन् । वृत्रवधसमये 'प्रहर भगवो जहि वीरयस्व' इत्येवंरूपया वाचा त्वां स्तुतवन्त इत्यर्थः ।

अस्येदिन्द्रो वावृधे वृष्ण्यं शवो मदे सुतस्य विष्णवि ।
अद्या तमस्य महिमानमायवोऽनु
ष्टुवन्ति पूर्वथा ॥२॥ ऋ ८।३।८

पदपाठः

अस्य । इत् । इन्द्रः । ववृधे । वृष्ण्यम् । शवः । मदे । सुतस्य । विष्णवि । अद्य । तम् । अस्य । महिमानम् । आयवः । अनु । स्तुवन्ति । पूर्वऽथा ॥२॥

अस्येत् अस्यैव यजमानस्य **वृष्ण्यं** वृषत्वं वीर्यं **शवः** बलं च **इन्द्रः वावृधे** परमैश्वर्यशाली इन्द्रो देवो वर्धयति । **सुतस्य** अभिषुतस्य सोमस्य पानेन **विष्णवि** कृत्स्नदेहस्य व्यापके **मदे** हर्षे सति **तस्य** एव यजमानस्य बलं वर्धयतीत्यर्थः । **अद्य** अस्मिन् काले **अस्य** इन्द्रस्य **तम्** उक्तगुणं **महिमानं** महत्त्वम् **आयवः** मनुष्याः **अनु ष्टुवन्ति**, आनुपूर्व्येण स्तुवन्ति । **पूर्वथा** पूर्वशब्दादिवार्थे 'प्रत्नपूर्वविश्वेमात्थाल् छन्दसि' (पा. अ.५।३।१११) इति थाल्प्रत्ययः । यथा पूर्वस्मिन् कालेऽस्तुवन् एवमिदानीमपि तेनैव क्रमेण स्तुवन्तीत्यर्थः ।

इति नवमेऽनुवाके तृतीयं सूक्तम् ।

शततमं सूक्तम्

तृचस्यास्य सूक्तस्य नृमेधऋषिः । इन्द्रो देवता । उष्णिक् छन्दः ।

व्रात्यस्तोमाख्येषु एकाहेषु 'आ त्वेता नि षीदत' (अथर्व० २०।६८।११), 'अधा हीन्द्र गिर्वणः' (अथर्व० २०।१००) इति आज्यपृष्ठस्तोत्रियौ यथाक्रमं भवतः । तद् उक्तं वैताने—''व्रात्यस्तोमेषु 'आ त्वेता नि षीदत', 'अधा हीन्द्र गिर्वणः' इति'' (वैता. श्रौ. ३९।७) ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथा पवित्रादिषु राजसूयैकाहेषु 'यत् सोममिन्द्र विष्णवि' (अथर्व. २०।१११), 'अधा हीन्द्र गिर्वणः' (अथर्व. २०।१००), 'अभ्रातृव्यो अना त्वम्' (अथर्व. २०।११४), त्वम् न इन्द्रा भर' (अथर्व. २०।१०८) एते यथासम्भवम् उक्थस्तोत्रिया भवन्ति। चकाराद् 'यदद्य फच्च वृत्रहन्' (अथर्व. २०।११२), 'उभयं शृणवच्च नः' (अथर्व. २०।११३) एतौ आज्यपृष्ठस्तोत्रियौ भवतः।

तथा चतुरहपञ्चाहाहीनदशाहच्छन्दोमदशाहेषु 'यत् सोममिन्द्र विष्णवि' एते चत्वारो यथासम्भवम् उक्थस्तोत्रिया भवन्ति।

तद् उक्तं वैताने—"राजसूयेषु 'यत्सोममिन्द्र विष्णवि', 'अधा हीन्द्र गिर्वणः', 'अभ्रातृव्यो अना त्वम्', 'त्वं न इन्द्रा भर' इति च। चतुरहपञ्चाहाहीनदशाहच्छन्दोमदशाहेषु च" (वैता. श्रौ. ४०।४) इति।

अधा हीन्द्र गिर्वण उप त्वा कामान्मह ससृज्महे।
उदेव यन्त उदभिः ॥१॥ ऋ. ८।९८।७

पदपाठः

अध। हि। इन्द्र। गिर्वणः। उप। त्वा। कामान्। महः। ससृज्महे। उदाऽईव। यन्तः। उदऽभिः ॥१॥

गिर्वणः गीर्भिर्वननीय इन्द्र! **अधा हि** सम्प्रति हि **त्वा** त्वां **महः** महतः **कामान्** कमनीयान् स्तोमान् **उप ससृज्महे** उपसृजामः प्रापयाम इत्यर्थः। तत्र दृष्टान्तमाह। **उदेव** यथोदकेन **यन्तः** गच्छन्तः **उदभिः** अञ्जलिना उत्क्षिप्य उदकैः समीपस्थान् पुरुषान् क्रीडार्थं संसृजन्ति तद्वदित्यर्थः।

वार्ण त्वा यव्याभिर्वर्धन्ति शूर ब्रह्माणि।
वावृध्वांसं चिदद्रिवो दिवेदिवे ॥२॥ ऋ. ८।९८।८

पदपाठः

वाः। न। त्वा। यव्याभिः। वर्धन्ति। शूर। ब्रह्माणि। ववृध्वांसम्। चित्। अद्रिऽवः। दिवेऽदिवे ॥२॥

हे **अद्रिवः**! **वज्रिन्**! **शूर**! इन्द्र! **वाः न** यथोदकमुदकस्थानं **यव्याभिः** नदीभिः 'अवनयो यव्या.' इति नदीनामसु पाठात्। **वर्धन्ति** वर्धयन्ति तथा **ब्रह्माणि** स्तोत्रैः **ववृध्वांसं चित्** यथा निरुदकं देशं नदीभिस्तथा न किन्तु प्रवृद्धमेव त्वां **दिवेदिवे** अन्वहं वर्धन्ति। स्तोतारो वर्धयन्ति।

युञ्जन्ति हरी इषिरस्य गाथयोरौ रथ उरुयुगे।
इन्द्रवाहा वचोयुजा ॥३॥ ऋ. ८।९८।९

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

युञ्जन्ति । हरी इति । इषिरस्य । गाथया । उरौ । रथे । उरुऽयुगे । इन्द्रऽवाहा । वचःऽयुजा ॥३॥

इषिरस्य गमनशीलस्येन्द्रस्य **उरु युगे** महायुगे **उरौ** महति **रथे इन्द्रवाहा** इन्द्रस्य वाहनभूतौ **वचोयुजा** वचनमात्रेणैव युज्यमानौ **हरी** अश्वौ **गाथया** स्तोत्रेण स्तोतारः **युञ्जन्ति** योजयन्ति ।

इति नवमेऽनुवाके चतुर्थं सूक्तम् ।

एकोत्तरशततमं सूक्तम्

तृचस्यास्य सूक्तस्य मेध्यातिथिर्ऋषिः । अग्निर्देवता । गायत्री छन्दः ।

अग्निष्टुत्सु एकाहेषु 'ईलेन्यो नमस्यः' (अथर्व. २०।१०२), 'अग्निं दूतं वृणीमहे' (अथर्व. २०।१०१), 'अग्निमीलिष्वावसे' (अथर्व. २०।१०३), 'अग्न आ याह्यग्निभिः' (अथर्व. २०।१०३.२) । एषु आद्यौ आज्यस्तोत्रियौ विकल्पितौ भवतः । उत्तरौ पृष्ठस्तोत्रियौ विकल्पितौ भवतः । तद् उक्तं वैताने—"अग्निष्टुत्सु 'इलेन्यो नमस्यः', 'अग्निं दूतं वृणीमहे', 'अग्निमीलिष्वावसे', 'अग्न आ याह्यग्निभिः' इति" (वैता. श्रौ. ३९।८) इति ।

तथा विराजेग्नेः स्तोमेग्नेः कुलाये 'अग्निं दूतं वृणीमहे', 'अग्निमीलिष्वावसे' एतौ आज्यपृष्ठस्तोत्रियौ भवतः । तद् उक्तं वैताने—"विराजेग्नेः स्तोमेग्नेः कुलाये 'अग्निं दूतं वृणीमहे', 'अग्निमीलिष्वा वसे' इति" (वैता. श्रौ. ४०।२) ।

अग्निं दूतं वृणीमहे होतारं विश्ववेदसम् ।
अस्य यज्ञस्य सुक्रतुम् ॥१॥ ऋ. १।१२।१

पदपाठः

अग्निम् । दूतम् । वृणीमहे । होतारम् । विश्वऽवेदसम् । अस्य । यज्ञस्य । सुक्रतुम् ॥१॥

दूतम् अग्निन् अग्नेर्दूतत्वम् एतन्मन्त्रव्याख्याने तैत्तिरीयब्राह्मणे समाम्नायते—'अग्निर्देवानां दूत आसीदुशनाः काव्योऽसुराणाम्' (तै. सं. २।५।८।५) इति । तादृशं देवदूतम् अग्निम् अस्मिन् कर्मणि **वृणीमहे** सम्भजामः कीदृशम् ? **होतारं** देवानामाह्वातारं **विश्ववेदसं** सर्वधनोपतम् अस्य प्रवर्तमानस्य यज्ञस्य निष्पादकत्वेन **सुक्रतुं** शोभनकर्माणं शोभनप्रज्ञं वा । 'मघम्' इत्यादिष्वष्टाविंशतिसङ्ख्याकेषु धननामसु वेदस् शब्दः (नि. २।१०।४) पठितः । होतारम् 'ह्वेञ् स्पर्धायां शब्दे च (भ्वा.) धातोः ताच्छील्यादिषु तृन् । 'बहुलं छन्दसि' (पा. सू. ६।१।३४) इति सम्प्रसारणे परपूर्वत्वे गुणः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अग्निमग्निं हविमभिः सदा हवन्त विश्पतिम् ।
हव्यवाहं पुरुप्रियम् ॥२॥ ऋ. १।१२।२

पदपाठः

अग्निम्ऽअग्निम् । हवीमऽभिः । सदा । हवन्त । विश्पतिम् । हव्यऽवाहम् । पुरुऽप्रियम् ॥२॥

यद्यप्यग्निः स्वरूपेणैक एव तथापि प्रयोगभेदात् आहवनीयादिस्थानभेदात् पावकादि-विशेषणभेदाद्वा बहुविधत्वमभिप्रेत्य **'अग्निमग्निम्'** इति वीप्सा । तं **हवीमभिः** आह्वानकरणैर्मन्त्रैः **सदा हवन्त** निरन्तरमनुष्ठातार आह्वयन्ति। कीदृशम् ? **विश्पतिं** विशां प्रजानां होत्रादीनां पालकं **हव्यवाहं** यजमानसमर्पितस्य हविषो देवान् प्रति वोढारम् । अतएव **पुरुप्रियं** बहूनां प्रीत्यास्पदम् । अग्निमग्निम् । 'नित्यवीप्सयोः' (पा. सू. ८।१।४) इति वीप्सायां द्विर्भावः । हवीमभिः 'ह्वेञ् स्पर्धायां शब्दे च' । आह्वानकरणभूतेषु मन्त्रेषु स्वव्यापारस्वातन्त्र्यात् कर्तृत्वविवक्षया 'अन्येभ्योऽपि दृश्यन्ते' (पा. सू. ३।२।७५) इति कर्तरि मनिन् । तस्य छान्दस ईडागमः । 'बहुलं छन्दसि' (पा. सू. ६।१।३४) इति धातोः सम्प्रसारणं परपूर्वत्वं गुणावादेशौ । सदा "सर्वैकान्य कियत्तदः कालेदा" (पा. सू. ५।३।१५) इति सूत्रेण सर्वशब्दात् दाप्रत्ययः। "सर्वस्य सोऽन्यतरस्यां दि" (पा. सू. ५।३।६) इति सभावः । हवन्त ह्वेञो लट् । झस्य अन्तादेश । टेः एत्वाभावश्छान्दसः । शपि 'बहुलं छन्दसि' इति सम्प्रसारणम् ।

अग्ने देवाँ इहा वह जज्ञानो वृक्तबर्हिषे ।
असि होता न ईड्यः ॥३॥ ऋ. १।१२।३

पदपाठः

अग्ने । देवान् । इह । आ । वह । जज्ञानः । वृक्तऽबर्हिषे । असि । होता । नः । ईड्यः ॥३॥

हे **अग्ने ! जज्ञानः** अरण्योरुत्पन्नस्त्वं **वृक्तबर्हिषे** आस्तरणार्थं छिन्नेन बर्हिषा युक्ताय तं यजमानमनुग्रहीतुम् इह कर्मणि हविर्भुजः **देवान् आ वह नः** अस्मदर्थं **होता** देवानामाह्वाता त्वम् **ईड्यः** स्तुत्यः असि । देवान् इत्यत्र संहितायां 'दीर्घादटि समानपादे' (पा. सू. ८।३।९) इति रुत्वम् । 'आतोऽटि नित्यम्' (पा. सू. ८।३।३) इत्यनुनासिकभावः । जज्ञानः, 'जनी प्रादुर्भावे' धातोः लिटः कानच् । 'गमहनजन-खनघसां लोपः क्ङित्यनङि (पा. सू. ६।४।९८) इत्यनेनोपधालोपः । 'द्विर्वचनेऽचि' (पा. सू. १।१।५९) इति तस्य स्थानिवद्भावात् द्विर्वचनम् । वृक्तबर्हिषे, ओव्रश्चू छेदने (तुदा०) धातोः 'निष्ठा' (पा. सू. ३।२।१०२) इति क्तप्रत्ययः । 'यस्य विभाषा' (पा. सू. ७।२।१५) इति इट्प्रतिषेधः । वृक्तं बर्हिर्यस्मै यजमानाय येन वा ऋत्विजा। असि । अस्तेः सिप् । 'अदिप्रभृतिभ्यः' शपः (पा. सू. २।४।७२) इति शपो लुक् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'तासस्त्योर्लोपः' (पा. सू. ७।४।५०) इति सकारस्य लोपः। होता, ह्वयतेस्ताच्छील्यादिषु तृन्। 'बहुलं छन्दसि' (पा. सू. ६।१।३४) इति सम्प्रसारणम्।

इति नवमेऽनुवाके पञ्चमं सूक्तम्।

द्व्युत्तरशततमं सूक्तम्

तृचस्यास्य सूक्तस्य विश्वामित्र ऋषिः। अग्निर्देवता। गायत्री छन्दः।

अग्निष्टुत्सु एकाहेषु 'ईलेन्यो तमस्यः' इत्यस्य पूर्वेण सह उक्तो विनियोगः।

ईलेन्यो नमस्यस्तिरस्तमांसि दर्शतः।
समग्निरिध्यते वृषा ॥१॥ ऋ. ३।२७।१३

पदपाठः

ईलेन्यः। नमस्यः। तिरः। तमांसि। दर्शतः। सम्। अग्निः। इध्यते। वृषा ॥१॥

ईलेन्यः स्तोतृभिरीड्यः अत एव **नमस्यः** सर्वैर्नमस्कार्यः **तमांसि तिरः** ध्वान्तानि स्वप्रभाभिस्तिरस्कुर्वन् **दर्शतः** कमनीयतया सर्वैर्दर्शनीयः। तादृशः **अग्निः वृषा** यजमानस्य कामानां वर्षिता **सम् इध्यते** आहुतिप्रक्षेपेण प्रज्वाल्यते। उक्तार्थे वाजसनेयकम्--'ईडेन्यो ह्येष नमस्यो ह्येष तिरस्तमांसि ददृशे समिद्धः' इति। ईलेन्यः, ईड स्तुतौ'। 'कृत्यार्थे तवैकेन्केन्यत्वनः' (पा. सू. ३।४।१४) इति केन्यः। नमस्यः, नमस्यतेः 'अचो यत्' इति यत्। अतोलोपयलोपौ। दर्शतः, 'दृशिर् प्रेक्षणे' अस्मात् 'भृमृदृशि' इत्यादिना कर्मणि अतच्प्रत्ययः। वृषा, 'वृषु सेचने' इत्यस्मात् 'कनिन्युवृषि' इत्यादिना कनिन्।

वृषो अग्निः समिध्यतेऽश्वो न देववाहनः।
तं हविष्मन्त ईलते ॥२॥ ऋ. ३।२७।१४

पदपाठः

वृषो इति। अग्निः। सम्। इध्यते। अश्वः। न। देवऽवाहनः। तम्। हविष्मन्तः। ईलते ॥२॥

वृषो कामानां वर्षिता **देववाहनः**। देवान् हवींषि वाहयति प्रापयतीति देववाहनः। तत्र दृष्टान्तः। **अश्वो न** इति। यथाश्वो राजानं वाहयति स्वपुरं प्रापयतीति। वाहनमश्वः। तद्वत् वाहनभूतो यः **अग्निः समिध्यते** आज्याहुतिप्रदानेन सम्यक् दीप्यते **तं** तादृशमग्निं **हविष्मन्तः** सम्भृतहविष्का यजमानाः **ईलते** कर्मसिद्ध्यर्थं स्तुवन्ति।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वृषणं त्वा वयं वृषन् वृषणः समिधीमहि ।
अग्ने दीद्यतं बृहत् ॥३॥ ऋ. ३।२७।१५

पदपाठः

वृषणम् । त्वा । वयम् । वृषन् । वृषणः । सम् । इधीमहि । अग्ने । दीद्यतम् । बृहत् ॥३॥

वृषन् कामानां वर्षितर्हे **अग्ने** ! **वृषणः** वृषाणः घृताज्याहुतीनां सेक्तारः **वयं वृषणम्** आहुतिद्वारा उदकस्य सेक्तारम् । तथा च स्मृतिः—'अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' (मनु, ३।७६) इति । **दीद्यतं** दीप्यमानं **बृहत्** अत एव महान्तं **त्वा** त्वाम् अग्निं **समिधीमहि** सम्यग्दीपयामः । इधीमहि, 'ञिइन्धी दीप्तौ' इत्यस्य प्रार्थने लिङि नकारलोपश्छान्दसः । दीद्यतम्, दीदेतिः दीप्तिकर्मा, तस्य शतरि रूपम् ।

इति नवमेऽनुवाके षष्ठं सूक्तम् ।

त्र्युत्तरशततमं सूक्तम्

तृचस्यास्य सूक्तस्य प्रथमर्चः सुदीतिपुरुमीढौ तयोरन्यतरो वा द्वितीया-तृतीययोश्च भर्ग ऋषयः । अग्निर्देवता । प्रथमाया बृहती, द्वितीया-तृतीययोश्च प्रगाथश्छन्दसी ।

'अग्निमीलिष्वावसे' इत्यस्य 'अग्निं दूतं वृणीमहे' (अथर्व. २०।१०१) इत्यनेन सह उक्तो विनियोगः ।

अग्निमीलिष्वावसे गाथाभिः शीरशोचिषम् ।
अग्निं राये पुरुमील्ह श्रुतं नरोऽग्निं सुदीतये छर्दिः ॥१॥
ऋ. ८।७१।१४

पदपाठः

अग्निम् । ईलिष्व । अवसे । गाथाभिः । शीरऽशोचिषम् । अग्निम् । राये । पुरुऽमील्ह । श्रुतम् । नरः । अग्निम् । सुऽदीतये । छर्दिः ॥१॥

हे **पुरुमील्ह** त्वम् **अग्निम् अवसे** आवयोः रक्षणाय **ईलिष्व** स्तुहि **गाथाभिः** । गाथेति वाङ्नाम । मन्त्ररूपाभिर्वाग्भिः । कीदृशम् ? **शीरशोचिषं** शयनस्वभाव-रोचिष्कम् । तथा **राये** धनाय ईलिष्व । **श्रुतम्** एनं **नरः** अन्येऽपि यजमानाः स्तुवन्ति स्वार्थम् । तस्मात् **सुदीतये** मह्यम् अग्निं **छर्दिः** गृहं याचस्वेत्येवं सुदीतिः पुरुमील्हं ब्रूते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अग्न आ याह्यग्निभिर्होतारं त्वा वृणीमहे ।
आ त्वामनक्तु प्रयता हविष्मती
यजिष्ठं बर्हिरासदे ॥२॥ ऋ. ८।६०।१

पदपाठः

अग्ने । आ । याहि । अग्निऽभिः । होतारम् । त्वा । वृणीमहे । आ । त्वाम् । अनक्तु । प्रऽयता । हविष्मती । यजिष्ठम् । बर्हिः । आऽसदे ॥२॥

हे **अग्ने ! अग्निभिः** यष्टव्यैः सह **आ याहि** आगच्छ । तदर्थं **होतारं** देवानामाह्वातारं **त्वा** त्वां **वृणीमहे** । त्वामागत **प्रयता** अध्वर्युहस्ताभ्यां नियता **हविष्मती** घृतवती **यजिष्ठं त्वां बर्हिः** बर्हिषि **आसदे** आसाद्य **आ** सर्वतः **अनक्तु** ।

अच्छा हि त्वा सूनो अङ्गिरः स्रुचश्चरन्त्यध्वरे ।
ऊर्जो नपातं घृतकेशमीमहेऽग्निं यज्ञेषु पूर्व्यम् ॥३॥
ऋ. ८।६०।२

पदपाठः

अच्छ । हि । त्वा । सहसः । सूनो इति । अङ्गिरः । स्रुचः । चरन्ति । अध्वरे । ऊर्जः । नपातम् । घृतऽकेशम् । ईमहे । अग्निम् । यज्ञेषु । पूर्व्यम् ॥३॥

हे **सहसः सूनो** बलस्य पुत्र ! बलेन मथ्यमानत्वात् । हे **अङ्गिरः** अङ्गिरसां मध्ये एक ! अथवाङ्गतिर्गतिकर्मा । सर्वत्र सङ्गत ! **त्वा** त्वाम् **अध्वरे** यागे **अच्छ** अभिप्राप्तुं **स्रुचः चरन्ति** गच्छन्ति । अतः **ऊर्जः** अन्नस्य **नपातं** न पातयितारं रक्षकं बलस्य नप्तारं वा **घृतकेशं** प्रदीप्तकेशस्थानीयज्वालं **पूर्व्यं** पुरातनं पूरकं वा **अग्निं यज्ञेषु** अस्मदीयेषु **ईमहे** स्तौमि ।

इति नवमेऽनुवाके सप्तमं सूक्तम् ।

चतुरुत्तरशततमं सूक्तम्

चतुर्ऋचस्यास्य सूक्तस्य प्रथमाद्वितीययोर्ऋचोर्मेध्यातिथिः, तृतीयाचतुर्थ्योश्च नृमेध ऋषी । इन्द्रो देवता । प्रगाथश्छन्दः ।

'इमा उ त्वा पुरूवसो गिरो' इत्यस्य विनियोगः 'अयमु ते समतसि' (अथर्व. २०। ४५) इत्यनेन सह उक्तः ।

इमा उ त्वा पुरूवसो गिरो वर्धन्तु या मम ।
पावकवर्णाः शुचयो विपश्चितोऽभि स्तोमैरनूषत ॥१॥
ऋ. ८।३।३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

इमाः । ऊं इति । त्वा । पुरुवसो इति पुरुऽवसो । गिरः । वर्धन्तु । याः । मम । पावकऽवर्णाः । शुचयः । विपःऽचितः । अभि । स्तोमैः । अनूषत ॥१॥

हे **पुरुवसो** बहुधनेन्द्र ! **मम** मदीयाः **इमाः गिरः** शस्त्ररूपा वाचः **त्वा** त्वां **वर्धन्तु** वर्धयन्तु । तथा **पावकवर्णाः** अग्निसमानतेजस्काः अत एव **शुचयः** शुद्धाः **विपश्चितः** विद्वांस उद्गातारश्च **स्तोमैः** स्तोत्रैर्बहिष्पवमानादिभिः **अभि अनूषत** त्वामभिष्टुवन्ति । 'नू स्तुतौ' कुटादिः ।

अयं सहस्रमृषिभिः सहस्कृतः समुद्र इव पप्रथे ।
सत्यः सो अस्य महिमा गृणे शवो
यज्ञेषु विप्रराज्ये ॥२॥ ऋ. ८।३।४

पदपाठः

अयम् । सहस्रम् । ऋषिऽभिः । सहःऽकृतः । समुद्रःऽइव । पप्रथे । सत्यः । सः । अस्य । महिमा । गृणे । शवः । यज्ञेषु । विप्रऽराज्ये ॥२॥

अयम् इन्द्रः **सहस्रं** सहस्रसङ्ख्याकैः **ऋषिभिः** अतीन्द्रियार्थदर्शिभिः स्तोतृभिः **सहस्कृतः** सहसा बलेन युक्तः कृतः । स्तुत्या हि देवताया बलं वर्धते । स चैवंभूतः सन् **समुद्र इव** उदधिरिव **पप्रथे** प्रथितो विस्तीर्णो बभूव । **अस्य** चेन्द्रस्य **सत्यः** अवितथः **सः** प्रसिद्धः **महिमा** महत्त्वं **शवः** बलं च **यज्ञेषु** यागेषु **विप्रराज्ये** । राज्ञः कर्म राज्यम्, विप्राणां स्तोतृजनानां राज्ये स्तुतशस्त्रसंघे **गृणे** स्तूयते ।

आ नो विश्वासु हव्य इन्द्रः समत्सु भूषतु ।
उप ब्रह्माणि सवनानि वृत्रहा
परमज्या ऋचीषमः ॥३॥ ऋ. ८।९०।१

पदपाठः

आ । नः । विश्वासु । हव्यः । इन्द्रः । समत्ऽसु । भूषतु । उप । ब्रह्माणि । सवनानि । वृत्रऽहा । परमऽज्याः । ऋचीषमः ॥३॥

ऋषिरनयेन्द्रः एवं करोत्वित्याशास्ते । **विश्वासु** सर्वासु **समत्सु** असुरयुद्धेषु **हव्यः** सर्वैर्देवैरात्मरक्षणार्थमाह्वातव्य एतादृशः **इन्द्रः नः** अस्माकं **ब्रह्माणि** स्तोत्राणि हवीरूपाण्यन्नानि वा **उप आ भूषतु** अनुभवतु । सेवतामित्यर्थः । यद्वा एतान्यलङ्करोतु । तदागमनेन स्तोत्राणि हवींषि वालङ्कृतानि भवन्ति तथा **सवनानि** प्रातःसवनादीनि त्रीणि सवनानि च भूषतु । कीदृश इन्द्रः ? **वृत्रहा** वृत्रस्यासुरस्य पापस्य वा हन्ता **परमज्याः** युद्धेषु शत्रुहननार्थं परमाविनश्वरी ज्या मौर्वी यस्य स

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथोक्तः । यद्वा परमान् बलेन प्रकृष्टाञ्शत्रूञ्जिनाति हिनस्तीति परमज्याः । **ऋचीषमः** स्तुत्या समः स्तुतिभिरभिमुखीकरणीयः । एतादृगिन्द्रः स्तोत्राणि भूषत्विति ।

त्वं दाता प्रथमो राधसामस्यसि सत्य ईशानकृत् ।
तुविद्युम्नस्य युज्या वृणीमहे
पुत्रस्य शवसो महः ॥४॥ ऋ. ८।९०।२

पदपाठः

त्वम् । दाता । प्रथमः । राधसाम् । असि । असि । सत्यः । ईशानऽकृत् । तुविऽद्युम्नस्य । युज्या । आ । वृणीमहे । पुत्रस्य । शवसः । महः ॥४॥

हे इन्द्र ! **प्रथमः** सर्वेषां मुख्यः **त्वं राधसां** धनानां दाता **असि** । यद्वा धनदातॄणां मध्ये त्वं प्रथम आदिमो भवसि । तथा **ईशानकृत्** तव स्तोतृजना ईशानान् ऐश्वर्ययुक्तान् कुर्वंस्त्वं **सत्यः** सत्यकर्मा **असि** । यथार्थकर्मा भवसीत्यर्थः । यस्मादेवं तस्माद्वयं **तुविद्युम्नस्य** बहुधनवतो बह्वन्नस्य वा **शवसः** बलस्य **पुत्रस्य** शत्रुवधार्थं बलकारणत्वेनोत्पन्नत्वात्तत्पुत्रस्य अत एव **महः** महतस्तव **युज्या** योग्यानि धनानि **आ वृणीमहे** सम्भजामहे ।

इति नवमेऽनुवाके अष्टमं सूक्तम् ।

पञ्चोत्तरशततमं सूक्तम्

पञ्चर्चस्यास्य सूक्तस्य प्रथमादितृचस्य नृमेधः, चतुर्थीपञ्चम्योश्च पुरुहन्मा ऋषी । इन्द्रो देवता । प्रथमाद्वितीयाचतुर्थीपञ्चमीनामृचां प्रगाथः, तृतीयायाश्च बृहती छन्दसी ।

प्रतीचीनस्तोमे एकाहे 'त्वमिन्द्र प्रतूर्तिषु' इत्येष आज्यपृष्ठस्तोत्रियो भवति । तद् उक्तं वैताने—"प्रतीचीनस्तोमे 'त्वमिन्द्र प्रतूर्तिषु' इति" (वैता. श्रौ. ३९।११) इति ।

राजि एकाहे 'यो राजा चर्षणीनाम्' (अथर्व. २०।१०५,४) इति पृष्ठस्तोत्रियो भवति । तद् उक्तं वैताने "राजि 'यो राजा चर्षणीनाम्' इति" (वैता. श्रौ. ३९। १२) इति ।

त्वमिन्द्र प्रतूर्तिष्वभि विश्वा असि स्पृधः ।
अशस्तिहा जनिता विश्वतूरसि त्वं तूर्य तरुष्यतः ॥१॥
ऋ. ८।९९।५

पदपाठः

त्वम् । इन्द्र । प्रऽतूर्तिषु । अभि । विश्वाः । असि । स्पृधः । अशस्तिऽहा । जनिता । विश्वऽतूः । असि । त्वम् । तूर्य । तरुष्यतः ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे **इन्द्र** ! **त्वं प्रतूर्तिषु** सङ्ग्रामेषु **विश्वाः** सर्वाः **स्पृधः** युद्धकारिणीः शत्रुसेनाः **अभि असि** अभिभवसि । किञ्च हे **तूर्य** शत्रूणां बाधकेन्द्र ! **त्वम् अशस्तिहा** दैव्यानामशस्तीनां हन्ता **असि** । **जनिता** असुरेभ्योऽशस्तीनां जनयिता चासि । **विश्वतूः** सर्वस्य शत्रुवर्गस्य हिंसिता चासि । **तरुष्यतः** बाधकांश्च बाधमानोऽसि ।

अनु ते शुष्मं तुरयन्तमीयतुः
क्षोणी शिशुं न मातरा ।
विश्वास्ते स्पृधः श्नथयन्त मन्यवे
वृत्रं यदिन्द्र तूर्वसि ॥२॥ ऋ. ८।९९।६

पदपाठः

अनु । ते । शुष्मम् । तुरयन्तम् । ईयतुः । क्षोणी इति । शिशुम् । न । मातरा । विश्वाः । ते । स्पृधः । श्नथयन्त । मन्यवे । वृत्रम् । यत् । इन्द्र । तूर्वसि ॥२॥

हे **इन्द्र** ! **ते** तव **शुष्मं** बलं **तुरयन्तं** हिंसन्तं शत्रुं **क्षोणी** द्यावापृथिव्यौ **मातरा** मातरौ **शिशुं न** शिशुमिव **अनु ईयतुः** अनुगच्छतः । गगनमात्रे दृष्टान्तः । किञ्च हे इन्द्र ! त्वं **यत्** यस्मात् **वृत्रं** शत्रुं **तूर्वसि** हंसि अतः **ते** तव **मन्यवे** क्रोधाय **विश्वाः** सर्वाः **स्पृधः** सङ्ग्रामकारिण्यः सेनाः **श्नथयन्त** श्नथिताः खिन्ना भवन्ति ।

इत ऊती वो अजरं प्रहेतारमप्रहितम् ।
आशुं जेतारं हेतारं रथीतममतूर्तं तुग्र्यावृधम् ॥३॥
ऋ. ८।९९।७

पदपाठः

इतः । ऊती । वः । अजरम् । प्रऽहेतारम् । अप्रऽहितम् । आशुम् । जेतारम् । हेतारम् । रथिऽतमम् । अतूर्तम् । तुग्र्यऽवृधम् ॥३॥

हे अस्मदीयजनाः ! **वः** यूयम् **अजरं** जरारहितं **प्रहेतारं** शत्रूणां प्रेरकम् **अप्रहितं** केनाप्यप्रेषितम् **आशुं** वेगवन्तं **जेतारं** शत्रूणां **हेतारं** गन्तारं **रथीतमं** रथिनां श्रेष्ठम् **अतूर्तं** केनाप्यहिंसितं **तुग्र्यावृधम्** उदकस्य वर्धयितारमिन्द्रम् **ऊती** ऊत्यै रक्षणाय **इतः** कुरुत । पुरस्कुरुतेति यावत् ।

यो राजा चर्षणीनां याता रथेभिरध्रिगुः ।
विश्वासां तरुता पृतनानां ज्येष्ठो यो वृत्रहा गृणे ॥४॥
ऋ. ८।७०।१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

यः । राजा । चर्षणीनाम् । याता । रथेभिः । अध्रिऽगुः । विश्वासाम् । तरुता । पृतनानाम् । ज्येष्ठः । यः । वृत्रऽहा । गृणे ॥४॥

यः इन्द्रः **चर्षणीनां** मनुष्याणां **राजा** स्वामी **रथेभिः** रथैः **याता** गन्ता च **अध्रिगुः** अधृतगमनोऽन्यैः **विश्वासां पृतनानां** सेनानां **तरुता** तारकः । **यः** च **ज्येष्ठः** गुणैर्ज्यायान् । यश्च **वृत्रहा** वृत्रं हतवान् । तं महाभागमिन्द्रं **गृणे** स्तौमि ।

इन्द्रं तं शुम्भ पुरुहन्मन्नवसे यस्य द्विता विधर्तरि ।
हस्ताय वज्रः प्रति धायि दर्शतो
महो दिवे न सूर्यः ॥५॥ ऋ० ८।७०।२

पदपाठः

इन्द्रम् । तम् । शुम्भ । पुरुऽहन्मन् । अवसे । यस्य । द्विता । विऽधर्तरि । हस्ताय । वज्रः । प्रति । धायि । दर्शतः । महः । दिवे । न । सूर्यः ॥५॥

हे **पुरुहन्मन्** ऋषे ! त्वं **तम् इन्द्रं शुम्भ** हविष्प्रदानादिनालङ्कुरु । किमर्थम् ? **अवसे** रक्षणाय । एवमात्मानं संबोध्य ब्रवीति । **यस्य** तव **विधर्तरि** विधारक इन्द्रे **द्विता** द्वित्वमस्त्यौग्र्यमनौग्र्यम् । तव शत्रून् हन्तुमुग्रत्वं त्वदनुग्रहायानौग्र्यं चेति द्वैतमस्ति । तत्रौग्र्यचिह्नं दर्शयति । **हस्ताय** कराय हननाय शत्रूणां **दर्शतः** दर्शनीयः **महः** महान् **वज्रः प्रति धायि** प्रतिनिहितो भवति **दिवे** प्रकाशाय दिवसाय वा अथवा दिवि दृश्यमानः **सूर्यः न** सूर्य इव ।

इति नवमेऽनुवाके नवमं सूक्तम् ।

षडुत्तरशततमं सूक्तम्

तृचस्यास्य सूक्तस्य गोषूक्त्यश्वसूक्तिनावृषी । इन्द्रो देवता । उष्णिक् छन्दः ।

इन्द्रस्तोमाख्ये एकाहे 'तव त्यदिन्द्रियं बृहत्' इत्यस्य 'इन्द्र क्रतुं न आ भर' (अथर्व० २०।७९) इत्यनेन सह उक्तो विनियोगः ।

तव त्यदिन्द्रियं बृहत्तव शुष्ममुत क्रतुम् ।
वज्रं शिशाति धिषणा वरेण्यम् ॥१॥ ऋ० ८।१५।७

पदपाठः

तव । त्यत् । इन्द्रियम् । बृहत् । तव । शुष्मम् । उत । क्रतुम् । वज्रम् । शिशाति । धिषणा । वरेण्यम् ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे इन्द्र ! **त्यत्** तत् प्रसिद्धम् **इन्द्रियम्** इन्द्रस्य लिङ्गं **बृहत्** प्रभूतं वीर्यं **धिषणा** स्तुतिः **शिशाति** तीक्ष्णीकरोति । तथा **तव** त्वदीयं **शुष्मं** शोषकं बलम् **उत** अपि च **क्रतुं** प्रज्ञानं बलं कर्म वा **वरेण्यं** वरणीयं **वज्रम्** आयुधं च स्तुतिस्तीक्ष्णीकरोति ।

तव द्यौरिन्द्र पौंस्यं पृथिवी वर्धति श्रवः ।
त्वामापः पर्वतासश्च हिन्विरे ॥२॥ ऋ. ८।१५।८

पदपाठः

तव । द्यौः । इन्द्र । पौंस्यम् । पृथिवी । वर्धति । श्रवः । त्वाम् । आपः । पर्वतासः । च । हिन्विरे ॥२॥

हे **इन्द्र** ! **तव** त्वदीयं **पौंस्यं** बलं **द्यौः वर्धति** वर्धयति, त्वदीयं **श्रवः** यशः **पृथिवी** वर्धयति । वृधेर्ण्यन्ताल्लटि शपि 'छन्दस्युभयथा' इत्यार्धधातुकत्वात् 'णेरनिटि' इति णिलोपः । तं **त्वाम् आपः** उदकानि अन्तरिक्षाणि **पर्वतासः** पर्वताः पर्ववन्तो मेघाः च गिरयश्च वा **हिन्विरे** प्रीणयन्ति स्वामित्वेन प्राप्नुवन्ति वा ।

त्वां विष्णुर्बृहन्क्षयो मित्रो गृणाति वरुणः ।
त्वां शर्धो मदत्यनु मारुतम् ॥३॥ ऋ. ८।१५।९

पदपाठः

त्वाम् । विष्णुः । बृहन् । क्षयः । मित्रः । गृणाति । वरुणः । त्वाम् । शर्धः । मदति । अनु । मारुतम् ॥३॥

हे इन्द्र ! बृहन् महान् **क्षयः** निवासहेतुः **विष्णुः मित्रः वरुणः** च **त्वां गृणाति** स्तौति । तथा **मारुतं** मरुत्संबन्धि **शर्धः** बलं **त्वाम् अनु मदति** तव मदमनुलक्ष्य पश्चान्माद्यति, त्वामनुमादयति वा ।

इति नवमेऽनुवाके दशमं सूक्तम् ।

सप्तोत्तरशततमं सूक्तम्

पञ्चदशर्चस्यास्य सूक्तस्य प्रथमादितृचस्य वत्सः, चतुर्थ्यादिनवर्चां बृहद्दिवोऽथर्वा, त्रयोदशीचतुर्दश्योर्ब्रह्मा, पञ्चदश्याश्च कुत्स ऋषयः । प्रथमादितृचस्येन्द्रः, चतुर्थ्यादिनवानां वरुणः, त्रयोदश्यादितृचस्य च सूर्यो देवताः । प्रथमादितृचस्य गायत्री, चतुर्थ्याद्यष्टानाञ्चतुर्दशी-पञ्चदश्योश्च त्रिष्टुप्, द्वादश्या भुरिक्परातिजागता त्रिष्टुप्, त्रयोदश्याश्चार्षी पङ्क्तिश्छन्दांसि ।

विघने एकाहे 'समस्य सन्यवे विशः' (अथर्व० २०।१०७), 'तदिदास भुवनेषु ज्येष्ठम्' (अथर्व० २०।१०७।४) इत्येतौ आज्यपृष्ठस्तोत्रियौ भवतः । तद् उक्तं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वैताने—"विघने 'समस्य मन्यवे विशः', 'तदिदास भुवनेषु ज्येष्ठम्' इति" (वैता. श्रौ. ३९।१५) इति ।

समस्य मन्यवे विशो विश्वा नमन्त कृष्टयः ।
समुद्रायेव सिन्धवः ॥१॥ ऋ. ८।६।४

पदपाठः

सम् । अस्य । मन्यवे । विशः । विश्वाः । नमन्त । कृष्टयः । समद्रायऽइव । सिन्धवः ॥१॥

विशः विशन्त्यः **विश्वाः** सर्वाः **कृष्टयः** प्रजाः **अस्य** इन्द्रस्य **मन्यवे** क्रोधाय यद्वा मन्युः मननसाधनं स्तोत्रं तदर्थं **सं नमन्त** सम्यक् स्वत एव नमन्ति । नमतेः कर्मकर्तरि छान्दसो लङ् । "न दुहस्नुनमां यक्चिणौ' (पा. सू. ३।१।८९) इति यक्चिणोः प्रतिषेधः । प्रह्वीभवन्ति । तत्र दृष्टान्तः । **समुद्रायेव** यथा समुद्रमब्धिं प्रति **सिन्धवः** स्यन्दनशीला नद्यः स्वयमेव नमन्ते तद्वत् ।

ओजस्तदस्य तित्विष उभे यत्समवर्तयत् ।
इन्द्रश्चर्मेव रोदसी ॥२॥ ऋ. ८।६।५

पदपाठः

ओजः । तत् । अस्य । तित्विषे । उभे इति । यत् । समऽअवर्तयत् । इन्द्रः । चर्मऽइव । रोदसी इति ॥२॥

अस्य इन्द्रस्य **तत् ओजः** बलं **तित्विषे** दिदीपे । त्विष दीप्तौ **यत्** येन ओजसा अयम् इन्द्रः **उभे रोदसी** द्यावापृथिव्यौ **चर्मेव समवर्तयत्** सम्यग्वर्तयति । यथा कश्चित् किञ्चिच्चर्म कदाचिद्विस्तारयति कदाचित् सङ्कोचयति एवं तदधीने अभूतामित्यर्थः ।

वि चिद्वृत्रस्य दोधतो वज्रेण शतपर्वणा ।
शिरो बिभेद वृष्णिना ॥३॥ ऋ. ८।६।६

पदपाठः

वि । चित् । वृत्रस्य । दोधतः । वज्रेण । शतऽपर्वणा । शिरः । बिभेद । वृष्णिना ॥३॥

चिदिति शब्दोऽप्यर्थे । स च भिन्नक्रमः । **वृत्रस्य चित्** आवरकस्यापि **दोधतः** अत्यर्थं जगत्कम्पयतोऽसुरस्य **शिरः** मूर्धानं **शतपर्वणा** शतसङ्ख्याकपर्वाणि धारा यस्य तादृशेन **वृष्णिना** वीर्यवता **वज्रेण इन्द्रः वि बिभेद** विचिच्छेद ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तद्विदास भुवनेषु ज्येष्ठं यतो जज्ञ उग्रस्त्वेषनृम्णः ।
सद्यो जज्ञानो नि रिणाति शत्रूननु
यदेनं मदन्ति विश्व ऊमाः ॥४॥ ऋ. १०।१२०।१

पदपाठः

तत् । इत् । आस । भुवनेषु । ज्येष्ठम् । यतः । जज्ञे । उग्रः । त्वेषऽनृम्णः । सद्यः । जज्ञानः । नि । रिणाति । शत्रून् । अनु । यत् । एनम् । मदन्ति । विश्वे । ऊमाः ॥४॥

तत् जगत्कारणत्वेन सर्ववेदान्त-प्रसिद्धम् **इत्** इति शब्दोऽवधारणे । **भुवनेषु** भू सत्तायाम् । सत्सु पृथिव्यादिषु लोकेषु मध्ये जगत्कारणं ब्रह्मैव **ज्येष्ठं** प्रशस्ततमम् **आस** बभूव । तस्य परमार्थत्वात् तद्व्यतिरिक्तानां व्यावहारिकत्वाच्च । यद्वा ज्येष्ठ वृद्धतमं जगत्कारणत्वेन सर्वेषामादिभूतं बभूव । अस्तेर्लिटि 'छन्दस्युभयथा' इति सार्वधातुकत्वात् 'अस्तेर्भूः' (पा. सू. २।४।५२) इदि भूभावाभावः । यद्वा वृद्धं तदेव ब्रह्म स्वप्रकाशतया आस दिदीपे । अस गति-दीप्त्यादानेषु । अस्माल्लिटि रूपम् । यतः उपादानभूतात् यस्मात् ब्रह्मणः उग्रः उद्गूर्णः **त्वेषनृम्णः** प्रदीप्तबलः सूर्यात्मक इन्द्रः **जज्ञे** जातो बभूव । श्रूयते हि 'चक्षोः सूर्यो अजायत' (ऋ. सं. १०।९०।१३) इति । 'सूर्याचन्द्रमसौ धाता यथा पूर्वमकल्पयत् (ऋ. सं. १०।१९०।३) इति च । 'जनिकर्तुः प्रकृतिः' (पा. सू. १।४।३०) इति पञ्चमी । जनेर्लिटि 'गमहन०' इत्यादिना उपधालोपः । 'द्विर्वचनेऽचि' इति तस्य स्थानिवद्भावात् द्विर्वचनादि । स च **जज्ञानः** जायमान एव **सद्यः** शीघ्रं **शत्रून्** शातयितृजनान् मन्देहादीन् राक्षसान् **नि रिणाति** निहिनस्ति । यद्वा उपासकानां पापरूपान् शत्रून् निहन्ति । तथा च ब्राह्मणं—'सद्यो ह्येष जातः पाप्मानमपाहत' (ऐ. आ. १।३।४) इति । जज्ञान इति जनेर्लिटि कानचि रूपमेतत् । रिणाति, 'री गतिरेषणयोः' क्र्यादिः । 'प्वादीनां ह्रस्वः' इति ह्रस्वत्वम् । **यदेनम्** इन्द्रमिमं **विश्वे** सर्वे **ऊमाः** । अवन्ति । रक्षन्तीत्यूमाः प्राणिनः । अवतेरौणादिको मन्प्रत्ययः । 'ज्वरत्वरस्रिव्यविमवामुपधायाश्च' (पा. ६।४।२०) इति वकारोपधयोः स्थाने ऊठ् । सर्वे प्राणिनः यं सूर्यात्मकमुद्यन्तमिन्द्रमनुलक्ष्य मदर्थमुदगात् इति **मदन्ति** हृष्यन्ति । 'मदी हर्षे' । व्यत्ययेन शप् । तथा च ब्राह्मणम्—'भूतानि वै विश्व ऊमास्त एनमनुमदन्त्युदगादुदगादिति' (ऐ. आ. १।३।४) इति । तैत्तिरीयकं च—'तस्मात्सर्व एव मन्यते मां प्रत्युदगादिति' (तै. सं. ६।५।४।२) इति । यद्वा । यं स्तुत्यादिभिर्माद्यन्तमनु पश्चात् सर्वे प्राणिनोऽभीष्टप्राप्त्या हृष्यन्ति । 'अनुर्लक्षणे' (पा. सू. १।४।८४) इत्यनोः कर्मप्रवचनीयत्वात् कर्मप्रवचनीययुक्त इति द्वितीया । स इन्द्रो जज्ञे इत्यन्वयः । 'यं विश्वे मदन्त्यूमा.' इति चतुर्थचरणे ऋक्पाठः (ऋ. १०।१२०।१)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वावृधानः शवसा भूर्योजाः
शत्रुर्दासाय भियसं दधाति ।
अव्यनच्च व्यनच्च सस्नि सं
ते नवन्त प्रभृता मदेषु ॥५॥ ऋ. १०।१२०।२

पदपाठः

ववृधानः । शवसा । भूरिऽओजाः । शत्रुः । दासाय । भियसम् । दधाति । अविऽअनत् । च । विऽअनत् । च । सस्नि । सम् । ते । नवन्त । प्रऽभृता । मदेषु ॥

शवसा बलेन **ववृधानः** वर्धमानः अत एव **भूर्योजाः** बहुबलः **शत्रुः** शातयितेन्द्रः **दासाय** उपक्षयकारिणे शत्रवे **भियस** भीतिं **दधाति** विदधाति, करोति **व्यनत् च अव्यनत्** विविधमनिति श्वसितीति व्यनत् प्राणवज्जङ्गमम्, तद्विलक्षणमव्यनत् स्थावरम् । तदुभयमपि **सस्नि** संस्नातमिन्द्रेण सम्यक् शोधितं भवति । स्नातेः **'आदृगमहन०'** इति व्यत्ययेन कर्मणि किन्प्रत्ययः । यद्वा अन्तर्णीतण्यर्थात् कर्तर्येव किन् । वृष्टयादिना सम्यक् स्नापयिता शोधयिता भवति । 'नलोकाव्यय०' इति कर्मणि षष्ठ्याः प्रतिषेधः । शिष्टः पादः प्रत्यक्षकृतः । हे इन्द्र ! **ते** तव **मदेषु** हर्षेषु हविषा स्तुत्या च जातेषु सत्सु **प्रभृता** प्रभृतानि प्रकर्षेण धृतानि पोषितानि वा सर्वाणि भूतजातानि **सं नवन्त** सं गच्छन्ते । स्तोतुं हवींषि च दातुं समूहीभवन्तीत्यर्थः । नवतिर्गतिकर्मा । प्रभृता । बिभर्तेः कर्मणि निष्ठा । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः ।

त्वे क्रतुमपि पृञ्चन्ति भूरि
द्विर्यदेते त्रिर्भवन्त्यूमाः ।
स्वादोः स्वादीयः स्वादुना सृजा समदः
सु मधु मधुनाऽभि योधीः ॥६॥ ऋ. १०।१६२।२

पदपाठः

त्वे इति । क्रतुम् । अपि । पृञ्चन्ति । भूरि । द्विः । यत् । एते । त्रिः । भवन्ति । ऊमाः । स्वादोः । स्वादीयः । स्वादुना । सृज । सम् । अदः । सु । मधु । मधुना । अभि । योधीः ॥६॥

हे इन्द्र ! **त्वे** त्वयि 'सुपां सुलुक्' इति सप्तम्येकवचनस्य शेआदेशः । सर्वे **यजमानाः क्रतुम्** अनुष्ठेयं कर्म पृञ्चन्ति । सम्बध्नन्ति सम्पर्कं स्थापयन्ति, पृची सम्पर्के (रुधा.) धातोर्लट् । **अपिशब्दो** ब्राह्मणोक्तसर्वभूतानां सर्वमनसां समुच्चयार्थः । सर्वाणि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृथिव्यादीनि भूतानि सर्वेषां प्राणिनां मनांसि सर्वे यज्ञक्रतवश्च व्याप्ते त्वय्येव यजमानैः परिसमाप्यन्त इत्यर्थः। तथा च ब्राह्मणं —'त्वयीमानि सर्वाणि भूतानि सर्वाणि मनांसि सर्वे क्रतवोऽपि वृञ्जन्तीत्येव ग्राह' (ऐ. ग्रा. १।३।४) इति। **यत्** यस्मात् **एते ऊमाः** तर्पकाः। अवतेस्तर्पणार्थादौणादिको मन्प्रत्ययः 'ज्वरत्वर०' इत्यादिना वकारोपधयोः ऊठ्। ईदृशा यजमानाः पूर्वमेकाकिनः सन्तः पश्चात् **द्विः** द्विवारं स्त्रीरूपेण पुंरूपेण च जाताः सन्तः पुनरपत्येन सार्धं **त्रिः** त्रिवारं जन्मभाजः **भवन्ति**। एक एवात्मा स्त्रीपुंसरूपेण जायते। 'अर्धो वा एष आत्मनो यत्पत्नी' (तै. ब्रा. ३।३।३) इति श्रुतेः। पुत्रोऽप्यात्मैव। 'आत्मा वै पुत्रनामासि' (श. ब्रा. १४।४९।।२६) इति श्रुतेः। यत एवमेतेऽभिवृद्धा भवन्ति ततोऽवगम्यते त्वय्येवानुष्ठितं सर्वं कर्म परिसमापयन्तीति। तथा च ब्राह्मणं – 'द्वौ वै सन्तौ मिथुनौ प्रजायेते प्रजात्यै (ऐ. आ. १।३।४) इति। हे इन्द्र! त्वं **स्वादोः** प्रियात् गृहधनादेरपि **स्वादीयः** स्वादुतरं प्रियतरमपत्यं **स्वादुना** स्वादुभूतेन मिथुनेन मातापित्रात्मकेन **सं सृज** संयोजय। यद्वा स्वादुना भावेनोत्पन्नं तदपत्यमपि संयोजय। एतदेवाह। **अदः** तदपत्यं **मधु** मधुरं **मधुना** मंदहेतुना मिथुनान्तरेण पौत्रेण वा **सु** सुष्ठु **अभि योधीः** अभियोधय, युध्यतिरत्र क्रीडार्थे वर्तते। 'मिथुनं वै स्वादु प्रजा स्वादु' (ऐ. आ. १।३।४) इत्यादिब्राह्मणमत्रानुसन्धेयम्।

यदि चिन्नु त्वा धना जयन्तं
रणेरणे अनुमदन्ति विप्राः।
ओजीयः शुष्मिन्त्स्थिरमा
तनुष्व मा त्वा दभन् दुरेवासः कशोकाः ।।७।।

पदपाठः

यदि। चित्। नु। त्वा। धना। जयन्तम्। रणेऽरणे। अनुऽमदन्ति। विप्राः। ओजीयः। शुष्मिन्। स्थिरम्। आ। तनुष्व। मा। त्वा। दभन्। दुःऽएवासः। कशोकाः।।७।।

शुष्मिन्. हे विशिष्टसामर्थ्यशालिन् इन्द्र! "शुष्मम् इति बलनाम शोषयतीति सतः" इति यास्कः (निरु. २।२४)। शुष शोषणे (दिवा०) धातोः 'अविसिविसिशुषिभ्यः कित्' (उ० सू० १।१।४४) इति सूत्रेण मन् किच्च। ततः प्रशंसायामर्थे भूम्न्यर्थे वा इनिः। तत्सम्बोधनरूपमिदम्। **यदि चिन्नु** एवमेव ननु **रणे रणे** प्रत्येकस्मिन् युद्धे, अत्र रणशब्दस्य वीप्सायां द्वित्वम्। अथवा 'रणाय रमणीयाय' इति निरुक्तम् (९।२७) सोमपानादिना रमणीये सभये समायाते सति **धना** शत्रुधनानि, रिपुदलद्रव्याणि। धनशब्दात् जसः शेरादेशस्य 'शेश्छन्दसि बहुलम्' इति लोपे रूपम्। यद्वा 'राष्ट्राणि वै धनानि' (ऐ. ८।२६) इत्यैतरेयवचनात् शत्रुराज्यानि **जयन्तं**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विजित्य लब्धवन्तं **त्वा** त्वामिन्द्रम् **अनु** पश्चात्। अत्र लक्षणे अनुशब्दस्य कर्मप्रवचनीयत्वम्। **विप्राः** मेधावन्तः स्तोतारः, **मदन्ति** हृष्यन्ति। मदि स्तुतिमोदमदस्वप्नकान्तिगतिषु (भ्वा०) धातोः रूपम्। परस्मैपदं छान्दसम्। 'मदन्ति सम्मोदन्ते' इति यास्कः (निरु. १०।२५) अथवा विप्राः ऋत्विजः त्वामनुमदन्ति अनुक्रमेण त्वामर्चन्ति। मदतिः अर्चतिकर्मेति निघण्टुः (३।१४)। अतो हे मघवन्! **ओजीयः** बलवत्तरम्। ओजस्विशब्दात् ईयसुनि 'विन्मतोर्लुक्' (पा. सू. ५।३।६५) इति विनो लुक्। 'टेः' (पा. सू. ६।४।१५५) इति टिलोपश्च। अत एव **स्थिरम्** अविचलं धनम् **आतनुष्व** अस्माकं कृते त्वं सर्वतो विस्तारय। **त्वा** त्वां धनदातारमिन्द्रं **दुरेवासः**, ये दुष्टं यन्ति ते दुरेवासः, पापिनः **राक्षसाः**, प्रथमाबहुवचने जसोऽसुगागमः। दुर्-एवपदयोः समासः। एव इत्यत्र **इण्** गतौ (अदा.) धातोः 'इण्शीभ्यां वन्' (उ. सू. १।१५२) इत्यनेन औणादिको वन्प्रत्ययः। कीदृशाः? **कशोकाः,** कशा निरन्तरं गतिशीलता, अथवा हिंसा एव ओकः आश्रयस्थली येषां ते कशोकाः छान्दसं रूपम्। कशि गतिशासनयोः (अदा.) यद्वा कष हिंसायां (भ्वा०) धातोः अच् प्रत्ययः। नित्यं चङ्क्रमशशीलाः, हिंसकाः वा राक्षसाः। अथवा कशः जलम् इति निघण्टु (१।१२) पाठात् जलमेव ओकः स्थानं येषां ते। जलाशयादिषु आत्मानं सङ्गोप्य निवसन्तो राक्षसाः। यद्वा 'प्राणो वाव कः' (जै. उ. ४।११।२।४) इति जैमिनीयवचनात् कः प्राणसामर्थ्यमस्ति शोकः येषां ते। शुच शोके (भ्वा०) धातोर्घञ्। लोकान् शोकमग्नान् विधायैव ये जीवन्तीति तादृशाः। यद्वा वर्णविपर्ययश्छान्दसः। कुत्सितः शोकः प्रकाशः आविर्भावः येषां ते। शुच (भ्वा०) धातोर्घञ्। शोचतिश्च ज्वलतिकर्मेति निघण्टुः (१।१६)। अथवा के सुखे शोकः सन्तापो दुःखं येभ्यस्ते कशोकाः। सुखे दुःखोत्पादका इत्यर्थः। अपि वा कः प्रजापतिः तस्य शोकः असन्तोषः प्रजापीडनदर्शनेन येभ्यः प्रजापीडकेभ्यः ते कशोकाः। प्रजापतेः सुखिनः प्रजाजनस्य पीडकः रक्षोगणः इत्यर्थः। **मा दभन्** न हिंसन्तु। दभ्नोतिर्वधकर्मेति निघण्टुः (२।१९) दम्भु दम्भने (स्वा.) धातोर्लङ्। लोडर्थे लङ्, अडभावश्च छान्दसः। पाठभेदेन ऋग्वेदेऽपि पठ्यतेऽयं मन्त्रः (१०।१२०।४)।

त्वया वयं शाशद्महे रणेषु
प्रपश्यन्तो युधेन्यानि भूरि।
चोदयामि त आयुधा वचोभिः
सं ते शिशामि ब्रह्मणा वयांसि ॥८॥ ऋ. १०।१२०।५

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

त्वया । वयम् । शाशद्महे । रणेषु । प्रऽपश्यन्तः । युधेन्यानि । भूरि । चोदयामि । ते । आयुधा । वचःऽभिः । सम् । ते । शिशामि । ब्रह्मणा । वयांसि ॥८॥

हे इन्द्र ! **त्वया** अनुगृहीताः **वयं रणेषु** सङ्ग्रामेषु **शाशद्महे** भृशं शत्रून् शातयामः । 'शद्लृ शातने' । अस्माद्यङन्तात् महिङः 'छन्दस्युभयथा' इति आर्धधातुकत्वादतोलोपयलोपौ । किं कुर्वन्तः ? **युधेन्यानि** योधनार्हाणि 'कृत्यार्थे तवैकेन्केन्यत्वनः' इति युधेरर्हार्थे केन्यप्रत्ययः । **भूरि** बहूनि बलानि । 'सुपां सुलुक्' इति शसो लुक् । **प्रपश्यन्तः** प्रकर्षेण जानन्तः । अपि च **ते** तव **आयुधा** आयुधानि आयोधनसाधनानि वज्रादीनि । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः । **वचोभिः** स्तुतिभिः **चोदयामि** शत्रून् प्रति प्रेरयामि **ते** त्वदर्थं **ब्रह्मणा** मन्त्रेण स्तुतिरूपेण सहितानि **वयांसि** । अन्ननामैतत् हविर्लक्षणान्यन्नानि **सं शिशामि** सम्यक् श्यामि । संस्करोमीत्यर्थः । 'शो तनूकरणे' छान्दसो विकरणस्य श्लुः । 'बहुलं छन्दसि' इत्यभ्यासस्येत्वम् ।

नि तद् दधिषेऽवरे परे च यस्मिन्नाविथावसा दुरोणे ।
आ स्थापयत मातरं जिगत्नुमत
इन्वत कर्वराणि भूरि ॥९॥ ऋ. १०।१२०।७

पदपाठः

नि । तत् । दधिषे । अवरे । परे । च । यस्मिन् । आविथ । अवसा । दुरोणे । आ । स्थापयत । मातरम् । जिगत्नुम् । अतः । इन्वत । कर्वराणि । भूरि ॥९॥

तत् तस्मिन् यजमानस्य गृहे **अवरे** अल्पान् पार्थिववैभवपदार्थान् परे उत्कृष्टान् दिव्यवैभवपदार्थान् च हे इन्द्र ! त्वं **नि दधिषे** निदधासि, निक्षिपसि अत्र विभक्तिव्यत्ययश्छान्दसः । **यस्मिन् दुरोणे** गृहे **अवसा** अन्ननामैतत् । तर्पकेणान्नेन हविर्लक्षणेन **आविथ** अवसि तृप्यसि । अवतेस्तृप्त्यर्थात् 'छन्दसि लुङ्-लङ्-लिटः' इति सार्वकालिको लिट् । 'अत आदेः' इत्यभ्यासस्यात्वम् । **अपि च मातरं** सकलस्य भूतजातस्य निर्मात्रीं रोदसीं यद्वा पृथ्वीं **जिगत्नुं** गमनशीलाम् इतस्ततः प्रचलन्तीम् **आ स्थापयत** व्यवस्थितां करोषि । यथा च निगमान्तरम्—'विष्वक् तस्तम्भ पृथिवीमुत द्याम्' (ऋ. सं. १०।८९.४) इति । हे इन्द्र ! **अतः** कारणात् भूरि बहूनि **कर्वराणि** कर्मनामैतत् । 'शेश्छन्दसि बहुलम्' इति शेर्लोपः । कर्माणि लौकिकानि वैदिकानि च **इन्वत** प्राप्नोषि । इन्वतिः व्याप्तिकर्मेति, निघण्टुः (२।१८) । 'नि तद्दधिषेऽवरं परं च यस्मिन्नाविथावरा दुरोणे । आमातरा स्थापयसे **जिगत्नू** अत इनोषि कर्वरा पुरूणि' इति ऋक्पाठः (ऋ. १०।१२०।७) ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्तुष्व वर्ष्मन् पुरुवर्त्मानं
समृभ्वाणमिनतममाप्तमाप्त्यानाम् ।
आ दर्शति शवसा भूर्योजाः
प्र सक्षति प्रतिमानं पृथिव्याः ॥१०॥

पदपाठः

स्तुष्व । वर्ष्मन् । पुरुऽवर्त्मानम् । सम् । ऋभ्वाणम् । इनऽतमम् । आप्तम् । आप्त्यानाम् । आ । दर्शति । शवसा । भूरिऽओजाः । प्र । सक्षति । प्रतिऽमानम् । पृथिव्याः ॥१०॥

शरीरवाचिना वर्ष्मशब्देन अत्र ऋषिः स्वशरीरव्याप्तमात्मानं सम्बोध्य ब्रवीति । **वर्ष्मन्** वृषु सेचने (भ्वा.) धातोः औणादिको मनिन् (उ. ४।१४५) प्रत्ययः । हे ममात्मन् ! त्वं **पुरुवर्त्मानं** प्रभूतमार्गं सहस्रलोचनत्वात् बहुनेत्रं वा, **ऋभ्वाणम्,** प्रभूतभासमानं यद्वा ऋभुरिति मेधाविनाम (निघं. ३।१५) बहुबुद्धिमन्तम्, **इनतमम्,** इनः इति ईश्वरनाम (निघं. २।२२), इण् गतौ (अदा.) धातोः 'इषसिञ्जि०' (उ. ३।३) इत्यनेन औणादिको नक् प्रत्ययः, इनशब्दाच्च अतिशायने तमप् । अतिशयेन ईश्वरं तथा **आप्त्यानाम्** आप्त्यमाप्तव्यम् इति यास्कः (निरु० ११।२१), आप्लृ व्याप्तौ धातोः क्तप्रत्यये आप्तः, ततो भवार्थे यत् । आप्तव्यानां मध्ये **आप्तम्** प्राप्तं व्याप्तं वा । एवं भूतमिन्द्रं **स्तुष्व** स्तुहि त्वमात्मन्निति पूर्वेणान्वयः । यो हीन्द्रः **शवसा** सामर्थ्येन **आ दर्शति** समन्ततो दृणाति शत्रूनिति शेषः । दॄ विदारणे (क्र्या.) धातोः लेटि रूपम् । 'सिब्बहुलम्' इति सिप्, तालव्यशकारश्छान्दसः । तथा **भूर्योजाः** महद्बलः, यद्वा ओजः इत्युदकनामसु (निघ. १।१२) पाठात् बहुजलः । अथवा 'वज्रो वा ओजः' (श. ८।४।१।२०) इति ब्राह्मणवचनात् महद्वज्रसामर्थ्यः यः **पृथिव्याः** विस्तृतायाः भूमेः **प्रतिमानं** सादृश्यम्, प्रतिपूर्वकात् माङ् माने (जु.) धातोः ल्युट् । **प्र सक्षति** सक्षतिर्गतिकर्मेति निघण्टुः (२।१४) । समेति प्राप्नोति । यद्वा पृथ्वीसादृश्यं प्रसहते बिभ्रतीत्यर्थः । पाठभेदेन ऋग्वेदेऽपि पठ्यतेऽयं मन्त्रः (ऋ. १०।१२०।६) ।

इमा ब्रह्म बृहद्दिवः कृणवदिन्द्राय शूषमग्रियः स्वर्षाः ।
महो गोत्रस्य क्षयति स्वराजा
तुरश्चिद् विश्वमर्णवत् तपस्वान् ॥११॥ ऋ. १०।१२०।८

पदपाठः

इमा । ब्रह्म । बृहत्ऽदिवः । कृणवत् । इन्द्राय । शूषम् । अग्रियः । स्वःऽसाः । महः । गोत्रस्य । क्षयति । स्वऽराजा । तुरः । चित् । विश्वम् । अर्णवत् । तपस्वान् ॥११॥

व्याख्यातोऽयं मन्त्रः पूर्वमेव (अथर्व० ५।२।८), पाठभेदेन च ऋग्वेदेऽपि पठ्यते (ऋ. १०।१२०।८) ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एवा महान् बृहद्दिवो अथर्वावोचत्
स्वां तन्वमिन्द्रमेव ।
स्वसारौ मातरिभ्वरी अरिप्रे
हिन्वन्ति चैने शवसा वर्धयन्ति च ।।१२।। ऋ. १०।१२०।६

पदपाठः

एव । महान् । बृहत्ऽदिवः । अथर्वा । अवोचत् । स्वाम् । तन्वम् । इन्द्रम् । एव । स्वसारौ । मातरिभ्वरी इति । अरिप्रे इति । हिन्वन्ति । च । एने । इति । शवसा । वर्धयन्ति । च ।।१२।।

व्याख्यातोऽयं मन्त्रः पूर्वमेव (अथर्व० ५।२।६) ।

"स्वसारो मातरिभ्वरीररिप्रा हिन्वन्ति च शवसा वर्धयन्ति च"

इति ऋक्पाठः (१०।१२०।६) ।

चित्रं देवानां केतुरनीकं ज्योतिष्मान्
प्रदिशः सूर्य उद्यन् ।
दिवाकरोति द्युम्नैस्तमांसि
विश्वातारीद् दुरितानि शुक्रः ।।१३।।

पदपाठः

चित्रम् । देवानाम् । केतुः । अनीकम् । ज्योतिष्मान् । प्रऽदिशः । सूर्यः । उत्ऽयन् । दिवाऽकरः । अति । द्युम्नैः । तमांसि । विश्वा । अतारीत् । दुःऽइतानि । शुक्रः ।।१३।।

चित्रम् इति । देवानाम् इति पदमनीकम् इत्यनेन सम्बद्धचते । दीव्यन्ति इति देवा रश्मयः, तेषां देवजनानामेव वा **अनीकम्** समूहरूपं **चित्रम्** आश्चर्यकरं सूर्यमण्डलं इति सायणः । तेन तदधिष्ठाता लक्ष्यते, तथा च तदधिष्ठातृदेवः **केतुः** दिवसागमस्य रात्रेरपगमस्य च ज्ञापकः लक्ष्मभूतः 'केतुर्ना रुक्पताकारिग्रहोत्पातेषु लक्ष्मणि' (५४।१३) इति मेदिनीकोषात्. सूर्यः सर्वप्रेरकः 'सु प्रेरणे' (१४०६ तुदा) क्यपि रूठ् । **ज्योतिष्मान्** ज्योतिर्मयः तेजोबहुलः **प्रदिशः** प्रकृष्ट दिक् प्रदिक्, प्राची दिशेति यावत् । तस्याः प्रदिशः **उद्यन्** उद्गच्छन्, उदयाचलं प्राप्नुवन् यद्वा प्रदिश इति सूर्यविशेषणं, प्रपूर्वात् 'दिश अतिसर्जने' (तुदा.) धातोः इगुपधलक्षणः कः (३।१।१३५) । अतिसर्जनमत्र न त्यागमात्रम् । किं तर्हि ? दानम्, लोकानाम् उपकारायातिशयेन ऋतुपरिवर्तनवृष्टयादिना विविधभोगजातस्य प्रदाता । अपि वा ज्योतिष्मान् ज्योतिष्मतीः लिङ्गवचनविभक्तिव्यत्ययश्छान्दसः । सम्पादयन् इति शेषः । प्राच्यादिसर्वाः दिशो ज्योतिषा संयुक्ता द्योतमानाः कुर्वन् इति भावः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दिवाकरः दिनकरः । **द्युम्नैः** द्योतमानैः स्वरश्मिभिः **तमांसि** अन्धकारान् **अति** अतिक्रामतु, उपसर्गेण योग्यक्रियाया अध्याहारः, तिरस्करोतु, गगनमण्डले स उद्गममात्रेण तमो निवारयतु, समूलघातमपहन्तु । किञ्च **शुक्रः** दीप्तः, सः सूर्यः **विश्वा** विश्वानि **दुरितानि** दुष्कृतानि पापानि तज्जन्यदुःखानि वा, द्वितीयात्र पञ्चम्यर्थे । सर्वपापेभ्यः अस्मान् **अतारीत्** तारयतु, अन्तर्गर्भितण्यर्थो अत्र तरतिः, अनेकजन्मार्जितदुरितसागरस्य पारं नयतु ।

"ध्वजिनी वाहिनी सेना पृतनाऽनीकिनी चमूः । वरूथिनी बलं सैन्यं चक्रं चानीकमस्त्रियाम् । इत्यमरः २।८।७८) अनीकं अनित्यनेन 'अन् प्राणने' धातोः "अनिहृषिभ्यां किच्च" (उ. ४।१७) इतीकन् । "अनीकोऽस्त्रीरणे सैन्ये" (इति च मेदिनी ४।४२) तद्बलात् अनीकशब्दो युद्धरतपुरुषसमूहरूपसेनावचनोऽपि लक्षणयात्र समूहमात्रपरः । विशिष्टवाचकानां पदानां सति विशेषणवाचकपदसन्निधाने विशेषमात्रपरत्वनियमात् । अपि वा "वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम् ।" (२।६।८९) इत्यमरः । आननं आनन्त्यनेन 'अन प्राणने' (अदा. पर. से.) धातोः ल्युट् । तदनुसारेण आननशब्दस्यापि अन्धातोः करणप्रत्ययनिष्पन्नत्वात् अनीकशब्दसमानार्थकता, तथा सति अनीकम् आननं मुखं सूर्यमण्डलम् इत्यर्थः पर्यवस्यति । "ग्रहभेदे ध्वजः केतुः" इत्यमरकोषबलात् केतुर्ध्वजः, ध्वजचिह्नभूतः । एतेन यथा वृषभध्वजो महादेवः, विष्णुर्गरुडध्वजः, तद्वत् भारतीयाः शूरचक्रचूडामणयो राजानः सूर्यध्वजा आसन्निति प्राचीना प्रथा दर्शिता । सूर्यस्य दिवसादिकेतुत्वम् अन्यत्राम्नायते "विश्वस्मा अग्निं भुवनाय देवा वैश्वानरं केतुमह्नामकृण्वन्" इति (ऋ. १०।८८।१२) । एवमेव "नवो नवो भवति जायमानोऽह्नां केतुरुषसामेष्यग्रम् ।" (अथर्व० ७।८६।२) इति च । अत्र सायणः केचन चान्ये एतमिति अत्रत्यं द्वितीयं पादम् आदित्यदेवत्यम् आहुः । तस्मिन् पक्षे अह्नां केतुत्वम् उषसाम् अग्रगतिश्च सूर्यस्य प्रसिद्धे इति । केतुः 'कित ज्ञाने' औणादिकः उः प्रत्ययः । चिकेति पुरुषो वस्त्वन्तरम् अनेन ज्ञापकः इत्यर्थः । यद्वा 'चायृ' पूजानिशामनयोः धातोः 'चायः किः' (उ. १।७३) इति तुः । किभावे गुणे केतुशब्दो निष्पद्यते । पूजयति, निशामयति, श्रावयति वा अनेनेति तद्विग्रहः । उदिते हि सूर्ये प्रातरुत्थाय स्नात्वा मन्दिरे गत्वा आस्तिको जनः देवपूजां करोति, वेदविशेषज्ञश्च वेदघोषं श्रावयतीति । तस्मात् देवपूजने वेदध्वनिश्रावणे च सूर्यस्य हेतुत्वमवसेयम् । अपि वा चिती संज्ञाने (भ्वा०) धातोः भावे करणे वा उप्रत्यये चकारस्य ककारः । चेतनं केतुः प्रज्ञा, चित्यते ज्ञायते प्रख्यायते लोकविश्रुतो भवति पुरुषो येन यज्ञादिकर्मणा तत् कर्म वा केतुः । 'महोर्णः सरस्वती०' (ऋ १।३।१२) इति ऋग्व्याख्याने केतुना कर्मणा प्रज्ञया वेति निरुक्तम् (नि. ११।२७)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चित्रं देवानामुदगादनीकं
चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्राद्द्यावापृथिवी अन्तरिक्षं
सूर्य आत्मा जगतस्तस्थुषश्च ॥१४॥ ऋ. १।११५।१

पदपाठः

चित्रम् । देवानाम् । उत् । अगात् । अनीकम् । चक्षुः । मित्रस्य । वरुणस्य । अग्नेः । आ । अप्रात् । द्यावापृथिवी इति । अन्तरिक्षम् । सूर्यः । आत्मा । जगतः । तस्थुषः । च ॥१४॥

देवानाम् दीव्यन्तीति देवा रश्मयः तेषाम् । देवजनानामेव वा । **अनीकं** समूहरूपं **चित्रम्** आश्चर्यकरं सूर्यस्य मण्डलम् **उदगात्** उदयाचलं प्राप्तमासीत् । कीदृशम् ? **मित्रस्य वरुणस्य अग्नेः** च उपलक्षणमेतत् । तदुपलक्षितानां जगतां **चक्षुः** प्रकाशकं चक्षुरिन्द्रियस्थानीयं वा । उदयं प्राप्य च **द्यावापृथिवी** दिवं पृथिवीम् **अन्तरिक्षं** च **आ अप्रात्** । स्वकीयेन तेजसा **आ** समन्तात् अपूरयत् ईदृग्भूतमण्डलान्तर्वर्ती सूर्यः अन्तर्यामितया सर्वस्य प्रेरकः परमात्मा **जगतः** जङ्गमस्य **तस्थुषः** स्थावरस्य च **आत्मा** स्वरूपभूतः । स हि सर्वस्य स्थावरजङ्गमात्मकस्य कार्यवर्गस्य कारणम् । कारणाच्च कार्यं नातिरिच्यते । तथा च पारमर्षं सूत्रं—'तदनन्यत्वमारम्भणशब्दादिभ्यः' (ब्र. सू. २।१।१४) इति । यद्वा स्थावरजङ्गमात्मकस्य सर्वस्य प्राणिजातस्य जीवात्मा । उदिते हि सूर्ये मृतप्रायं सर्वं जगत् पुनश्चेतनयुक्तं सदुपलभ्यते । तथा च श्रूयते—'योऽसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायोदेति' (तै. आ. १।१४।१) इति । अप्रात् । 'प्रा पूरणे' धातोः लङि रूपम् । अदादित्वात् शपो लुक् । जगतः । 'द्युतिमभि०' (पा. सू. वा. ३।२।१७८) इति क्विप् 'गमः क्वौ' (६।४।४०) इति म—लोपः, तुक् । तस्थुषः । तिष्ठतेर्लिटः क्वसुः । षष्ठ्येकवचने 'वसोः संप्रसारणम्' इति संप्रसारणम् । 'आतो लोप इटि च' इति आकारलोपः । शासिवसीति षत्वम् ।

सूर्यो देवीमुषसं रोचमानां
मर्यो न योषामभ्येति पश्चात् ।
यत्रा नरो देवयन्तो युगानि
वितन्वते प्रति भद्राय भद्रम् ॥१५॥ ऋ. १।११५।२

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

सूर्यः । देवीम् । उषसम् । रोचमानाम् । मर्यः । न । योषाम् । अभि । एति । पश्चात् । यत्र । नरः । देवऽयन्तः । युगानि । विऽतन्वते । प्रति । भद्राय । भद्रम् ॥१५॥

सूर्यः देवीं दानादिगुणयुक्तां **रोचमानां** दीप्यमानाम् **उषसं पश्चात् अभ्येति** उषसः प्रादुर्भावानन्तरं तामभिलक्ष्य गच्छति । तत्र दृष्टान्तः । **मर्यो न योषाम्** । यथा कश्चिन्मनुष्यः शोभनावयवां गच्छन्तीं युवतिं स्त्रियं सततमनुगच्छति तद्वत् । **यत्र** यस्यामुषसि जातायां **देवयन्तः** देवं द्योतमानं सूर्यं यष्टुमिच्छन्तः **नरः** यज्ञस्य नेतारो यजमानाः, **युगानि** युगशब्दः कालवाची । तेन च तत्र कर्तव्यानि कर्माणि लक्ष्यन्ते, यथा दर्शपूर्णमासौ इति । अग्निहोत्रादीनि कर्माणि **वितन्वते** विस्तारयन्ति । यद्वा देवयन्तो देवयागार्थं धनमात्मन इच्छन्तो यजमानपुरुषा युगानि हलावयवभूतानि कर्षणाय वितन्वते प्रसारयन्ति । तामुषसमनुगच्छन्तीत्यर्थः । एवं विधं **भद्रं** कल्याणं सूर्यं **प्रति भद्राय** कल्याणरूपाय कर्मफलाय स्तुमः इति शेषः । यद्वा देवयन्तः देव-कामा यजमाना युगानि ।युग्मानि भूत्वा पत्नीभिः सहिताः सन्तो भद्रं कल्याणम् अग्निहोत्रादिकं कर्म भद्राय तत्फलार्थं **प्रति** प्रत्येकं यस्यामुषसि प्रवृत्तायां वितन्वते विस्तारयन्ति ।

इति नवमेऽनुवाके एकादशं सूक्तम् ।

अष्टोत्तरशततमं सूक्तम्

तृचस्यास्य सूक्तस्य नृमेध ऋषिः । इन्द्रो देवता । प्रथमर्चो गायत्री, द्वितीयायाः ककुबुष्णिक्, तृतीयायाश्च पुर उष्णिक् छन्दांसि ।

वज्रपुनःस्तोमाख्ययोरेकाहयोः 'त्वं न इन्द्रा भर' इत्येष उक्थस्तोत्रियो भवति । तद् उक्तं वैताने—"वज्रे पुनःस्तोमे 'त्वं न इन्द्रा भर' इति" (वैता. श्रौ. ३९।१७) इति ।

तथा पवित्रादिषु राजसूयैकाहेषु एतस्य विनियोगः 'अधा हीन्द्र गिर्वणः' (अथर्व० २०।१००) इत्यनेन सह उक्तः ।

तथा वैदस्वरसाम्नोस्त्र्यहयोः प्रथमयोरह्नोः एष उक्थस्तोत्रियो भवति ! तद् उक्तं वैताने—"वैदस्वरसाम्नोः 'त्वं न इन्द्रा भर' इति" (वैता. श्रौ. ४१।४) इति ।

तथा चतुरहाणां तृतीयेष्वहःसु अस्य विनियोगः 'आयन्त इव सूर्यम्' (अथर्व० २०।५८) इत्यनेन सह उक्तः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथा अभ्यासङ्गचपञ्चशारदीययोः पञ्चाहयोर्द्वितीयेऽहनि एव उक्थस्तोत्रियो भवति। तद् उक्तं वैताने—"अभ्यासङ्गचपञ्चशारदीययोर्द्वितीये 'त्वं न इन्द्रा भर' इति" (वैता. श्रौ. ४१।१५) इति।

तथा अभिप्लवस्यायुराख्येऽहनि एष उक्थस्तोत्रियो भवति। तद् उक्तं वैताने—"आयुषि 'त्वं न इन्द्रा भर' इति" (वैता० श्रौ० ४१।२०) इति।

तथा पृष्ठचषडहस्य तृतीयेऽहनि अस्य विनियोगः 'इन्द्रेण सं हि दृक्षसे' (अथर्व० २०।४०) इत्यनेन सह उक्तः।

तथा द्वादशाहस्य च्छन्दोमत्र्यहस्य प्रथमान्त्ययोरह्नोः 'त्वं न इन्द्रा भर' (अथर्व० २०।१०८), 'य एक इद् विदयते' (२०।६३.४) एतौ उक्थस्तोत्रियौ यथाक्रमं भवतः। तद् उक्तं वैताने—"द्वादशाहस्य च्छन्दोमप्रथमान्त्ययोः 'त्वं न इन्द्रा भर', 'य एक इद् विदयते' इति" (वैता. श्रौ. ४२।७) इति।

त्वं न इन्द्रा भरँ ओजो नृम्णं शतक्रतो विचर्षणे।

आ वीरं पृतनाषहम् ॥१॥ ऋ. ८।९८।१०

पदपाठः

त्वम्। नः। इन्द्र। आ। भर। ओजः। नृम्णम्। शतक्रतो इति शतऽक्रतो। विऽचर्षणे। आ। वीरम्। पृतनाऽसहम् ॥१॥

हे **शतक्रतो**! बहुकर्मन्! **विचर्षणे** विद्रष्टः! **इन्द्र**! **त्वं नः** अस्मभ्यम् **ओजः** बलं **नृम्णं** धनम्, 'गयो नृम्णम्' इति धननामसु पाठात्। **आ भर** आहर। **वीरं** वीर्योपेतं **पृतनाषहं** सेनासहं सेनाभिभवितारं त्वाम् **आ** याचामह इति शेषः।

त्वं हि नः पिता वसो त्वं माता शतक्रतो बभूविथ।

अधा ते सुम्नमीमहे ॥२॥ ऋ. ८।९८।११

पदपाठः

त्वम्। हि। नः। पिता। वसो इति। त्वम्। माता। शतक्रतो इति शतक्रतो। बभूविथ। अध। ते। सुम्नम्। ईमहे ॥२॥

हे **वसो** वासयितः! शतक्रतो! बहुकर्मन्निन्द्र! **त्वं नः** अस्माकं **पिता** पितृवत्पालकः **बभूविथ** भव। **त्वं माता** मातृवद्धारकश्च बभूविथ। **अध** अथ च वयं **ते** तव स्वभूतं **सुम्नं** सुखम् **ईमहे** याचामहे।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्वां शुष्मिन्पुरुहूत वाजयन्तमुप ब्रुवे शतक्रतो ।
स नो रास्व सुवीर्यम् ॥३॥ ऋ. ८।९८।१२

पदपाठः

त्वाम् । शुष्मिन् । पुरुऽहूत । वाजऽयन्तम् । उप । ब्रुवे । शतक्रतो इति शतक्रतो । सः । न । रास्व । सुऽवीर्यम् ॥३॥

हे **शुष्मिन्** बलवन् ! **पुरुहूत** बहुभिर्यजमानैराहूत ! **शतक्रतो** बहुकर्मन्निन्द्र ! **वाजयन्तं** बलमिच्छन्तं **त्वाम् उप ब्रुवे** उपस्तौमि । **सः** त्वं **नः** अस्मभ्यं **सुवीर्यं** धनं **रास्व** देहि ।

इति नवमेऽनुवाके द्वादशं सूक्तम् ।

नवोत्तरशततमं सूक्तम्

तृचस्यास्य सूक्तस्य गोतम ऋषिः । इन्द्रो देवता । पथ्यापङ्क्तिश्छन्दः ।

साहस्राख्याश्चत्वार एकाहा ब्राह्मणपठिताः । तेषां प्रथमद्वितीययोः' 'स्वादोरित्था विषूवतः' इति पृष्ठस्तोत्रियो भवति । तद् उक्तं वैताने--"साहस्राद्ययोः 'स्वादोरित्था विषूवतः' इति" (वैता. श्रौ. ३९।१९) इति ।

तथा अश्वमेधत्र्यहस्य द्वितीयेऽहनि अस्य विनियोगः 'वाचमष्टापदीमहम्' (अथर्व० २०।४२) इत्यनेन सह उक्तः ।

स्वादोरित्था विषूवतो मध्वः पिबन्ति गौर्यः ।
या इन्द्रेण सयावरीर्वृष्णा मदन्ति
शोभसे वस्वीरनुस्वराज्यम् ॥१॥ ऋ. १।८४।१०

पदपाठः

स्वादोः । इत्था । विषुऽवतः । मध्वः । पिबन्ति । गौर्यः । याः । इन्द्रेण । सऽयावरीः । वृष्णा । मदन्ति । शोभसे । वस्वीः । अनु । स्वऽराज्यम् ॥१॥

स्वादोः स्वादुभूतस्य रसयुक्तस्य **इत्था विषुवतः** इत्थमनेन प्रकारेण सर्वयज्ञेषु व्याप्तियुक्तस्य **मध्वः** मधुररसस्य सोमस्य । 'क्रियाग्रहणं कर्त्तव्यम्' इति कर्मणः सम्प्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । एवं विधं सोमं **गौर्यः** गौरवर्णा गावः **पिबन्ति** । **याः** गावः **शोभसे** शोभार्थं **वृष्णा** कामाभिवर्षकेण **इन्द्रेण सयावरीः** सहयान्त्यो गच्छन्त्यः सत्यः **मदन्ति** हृष्टा भवन्ति । ता इन्द्रपीतस्य सोमस्य शेषं पिबन्तीत्यर्थः । **वस्वीः** पयःप्रदानेन निवासकारिण्यस्ता गावः **स्वराज्यं** स्वस्य स्वकीयस्येन्द्रस्य यद्राज्यं राजत्वं तदनुलक्ष्यावस्थिता इति शेषः । विषूवतः, 'अन्येषामपि दृश्यते' इति संहितायां दीर्घः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मध्वः, 'जसादिषु च्छन्दसि वा वचनम्' 'घेर्ङिति' इति गुणाभावे यणादेशः । गौर्यः, 'षिद्गौरादिभ्यश्च' इति ङीष् । मदन्ति 'मदी हर्षे' । श्यनि प्राप्ते व्यत्ययेन शप् । वस्वीः, 'वस निवासे' । 'शॄस्वृस्निहि॰ इत्यादिना वसेः उप्रत्ययः ।

ता अस्य पृशनायुवः सोमं श्रीणन्ति पृश्नयः ।
प्रिया इन्द्रस्य धेनवो वज्रं
हिन्वन्ति सायकं वस्वीरनु स्वराज्यम् ॥२॥ ऋ. १।८४।११

पदपाठः

ताः । अस्य । पृशनऽयुवः । सोमम् । श्रीणन्ति । पृश्नयः । प्रियाः । इन्द्रस्य । धेनवः । वज्रम् । हिन्वन्ति । सायकम् । वस्वीः । अनु । स्वऽराज्यम् ॥२॥

ताः पूर्वोक्ताः **अस्य** इन्द्रस्य **पृशनायुवः** स्पर्शनकामाः **पृश्नयः** नानावर्णा गावः इन्द्रेण पातव्यं **सोमं** पयसा **श्रीणन्ति** मिश्रीकुर्वन्ति । **इन्द्रस्य प्रियाः** प्रीतिहेतुभूतास्ताः **धेनवः सायकं** शत्रूणामन्तकारकं **वज्रम्** आयुधं **हिन्वन्ति** शत्रुषु प्रेरयन्ति । इन्द्रो यथा शत्रुषु वज्रं प्रेरयति तथेन्द्रस्य मदमुत्पादयन्तीत्यर्थः । अन्यत् पूर्ववत् । हिन्वन्ति हिविः प्रीणनार्थः । इदित्वात् नुम् । सायकम् 'षो अन्तकर्मणि' । ण्वुलि आत्वे युगागमः ।

ता अस्य नमसा सहः सपर्यन्ति प्रचेतसः ।
व्रतान्यस्य सश्चिरे पुरूणि पूर्वचित्तये
वस्वीरनु स्वराज्यम् ॥३॥ ऋ १।८४।१२

पदपाठः

ताः । अस्य । नमसा । सहः । सपर्यन्ति । प्रऽचेतसः । व्रतानि । अस्य । सश्चिरे । पुरूणि । पूर्वऽचित्तये । वस्वीः । अनु । स्वऽराज्यम् ॥३॥

प्रचेतसः प्रकृष्टज्ञानाः **ताः** गावः **अस्य** इन्द्रस्य **सहः** बलं **नमसा** स्वकीयेन पयोरूपेणान्नेन **सपर्यन्ति** परिचरन्ति । **पुरूणि** बहूनि **अस्य** इन्द्रस्य **व्रतानि** शत्रुवधादिरूपाणि वीर्यकर्माणि **सश्चिरे** सिषेविरे ज्ञायन्ते इत्यर्थः । किमर्थम् ? **पूर्वचित्तये** युयुत्सूनां शत्रूणां पूर्वमेव प्रज्ञापनाय । अनेन युध्यमाना वृत्रादयः सर्वे मरणं प्राप्ताः किमर्थं भवद्भिः प्राणास्त्यज्यन्ते इति तेषां बोधनायेत्यर्थः । अन्यत् पूर्ववत् । सश्चिरे, सश्च गतौ, व्यत्ययेनात्मनेपदम् । पूर्वचित्तये 'चिती संज्ञाने' भावे क्तिन् ।

इति नवमेऽनुवाके त्रयोदशं सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशोत्तरशततमं सूक्तम्

तृचस्यास्य सूक्तस्य श्रुतकक्षः सुकक्षो वा ऋषिः । इन्द्रो देवता । गायत्री छन्दः ।

विराडादिषु सप्तस्वेकाहेषु 'इन्द्राय मद्वने सुतम्' (अथर्व० २०।११०), 'यत् सोममिन्द्र विष्णवि' (अथर्व० २०।१११) एतौ आज्योक्थस्तोत्रियौ भवतः । तदुक्तं वैताने--"विराजे भूमिस्तोमे वनस्पतिसवे त्विष्यपचित्योरिन्द्राग्न्योः स्तोम इन्द्राग्न्योः कुलाये 'इन्द्राय मद्वने सुतम्', 'यत् सोममिन्द्र विष्णवि' इति" (वैता. श्रौ. ४०।१) इति ।

इन्द्राय मद्वने सुतं परि ष्टोभन्तु नो गिरः ।
अर्कमर्चन्तु कारवः ॥१॥ ऋ ८।९२।१९

पदपाठः

इन्द्राय । मद्वने । सुतम् । परि । स्तोभन्तु । नः । गिरः । अर्कम् । अर्चन्तु । कारवः ॥१॥

मद्वने माद्यतेः क्वनिप् । मदनशीलाय **इन्द्राय** तदर्थं **सुतम्** अभिषुतं सोमं **नः** अस्मदीयाः **गिरः** स्तुतिलक्षणा वाचः **परिष्टोभन्तु** । स्तोभतिः स्तुतिकर्मा । परितः सोमं स्तुवन्तु । ततः **कारवः** स्तुतिकारिणः स्तोतारश्च **अर्कं** सर्वैरर्चनीयं सोमम् **अर्चन्तु** पूजयन्तु ।

यस्मिन् विश्वा अधि श्रियो रणन्ति सप्त संसदः ।
इन्द्रं सुते हवामहे ॥२॥ ऋ. ८।९२।२०

पदपाठः

यस्मिन् । विश्वाः । अधि । श्रियः । रणन्ति । सप्त । सम्ऽसदः । इन्द्रम् । सुते । हवामहे ॥२॥

यस्मिन् इन्द्रे **विश्वाः** सर्वाः **श्रियः** कान्तयः **अधि** अधिकं **भवन्ति** । किञ्च **सप्त** सप्तसङ्ख्याकाः **संसदः** सम्यक् यज्ञेषु कर्मकरणार्थं सीदन्तीति संसदः होत्रकाः यस्मिन् **रणन्ति** सोमप्रदानार्थं रमन्ते । यद्वा यं शब्दयन्ति स्तुवन्ति । तं पूर्वोक्तलक्षणम् **इन्द्रं** **सुते** सोमेऽभिषुते सति **हवामहे** वयं सोमपानायाह्वयामः ।

त्रिकद्रुकेषु चेतनं देवासो यज्ञमत्नत ।
तमिद् वर्धन्तु नो गिरः ॥३॥ ऋ. ८।९२।२१

पदपाठः

त्रिऽकद्रुकेषु । चेतनम् । देवासः । यज्ञम् । अत्नत । तम् । इत् । वर्धन्तु । नः । गिरः ॥३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे **देवासः** देवा इन्द्रादयः **त्रिकद्रुकेषु** आभिप्लविकेष्वहःसु। ज्योतिर्गौरायुरिति त्रिकद्रुकाः तेषु, **चेतनम्** 'चिती संज्ञाने'। चेतन्ति जानन्त्यनेन स्वर्गादिकमिति चेतनः, ज्ञानसाधनं **यज्ञम् अत्नत** अतन्वत, स्वैः स्वैः कर्मभिः पालनैश्च विस्तारितवन्तः। 'तनु विस्तारे'। लङि 'बहुलं छन्दसि' इति विकरणस्य लुक्। 'तनिपत्योश्छन्दसि' इत्युपधालोपः। **तमित्** तमेवास्मदीयं यज्ञं **नः** अस्माकं **गिरः** स्तुतिलक्षणा वाचः **वर्धन्तु** वर्धयन्तु।

इति नवमेऽनुवाके चतुर्दशं सूक्तम्।

एकादशोत्तरशततमं सूक्तम्

तृचस्यास्य सूक्तस्य पर्वत ऋषिः। इन्द्रो देवता। उष्णिक् छन्दः।

'यत् सोममिन्द्र विष्णवि' इत्यस्य विनियोगः पूर्वसूक्तेन सह उक्तः।

तथा पवित्रादिषु राजसूयैकाहेषु चतुरहादिषु च अस्य विनियोगः 'अधा हीन्द्र गिर्वणः' (अथर्व० २०।१००) इत्यनेन सह उक्तः।

तथा अभिप्लवस्य षष्ठमहः उक्थ्यसंस्थं चेद् भवति तदा 'य एक इद् विदयते' (अथर्व० २०।६३।४), 'यत् सोममिन्द्र विष्णवि' (अथर्व० २०।११०) एतौ उक्थस्तोत्रियौ विकल्पितौ भवतः। तद् उक्तं वैताने—"षष्ठमुक्थ्यं चेद् 'य एक इद् विदयते', 'यत् सोममिन्द्र विष्णवि' इति" (वैता. श्रौ. ४१।२२) इति।

यत् सोममिन्द्र विष्णवि यद्वा घ त्रित आप्त्ये।
यद्वा मरुत्सु मन्दसे समिन्दुभिः ॥१॥ ऋ. ८।१२।१६

पदपाठः

यत्। सोमम्। इन्द्र। विष्णवि। यत्। वा। घ। त्रिते। आप्त्ये। यत्। वा। मरुत्ऽसु। मन्दसे। सम्। इन्दुऽभिः ॥१॥

हे **इन्द्र! विष्णवि** विष्णौ पानार्थमागते सत्यन्यदीये यागे **सोमं यत्** यदि तेन विष्णुना सार्धं पिबसि। **यद्वा** यदि च **आप्त्ये** अपां पुत्रे **त्रिते** एतत्संज्ञे राजर्षौ यजमाने सोमं पिबसि। **घ** इति पूरणः। **यद्वा** यदि च **मरुत्सु** च सोमपानायागतेषु अन्यदीये यज्ञे **मन्दसे** माद्यसि। तथाप्यस्मदीयैरेव **इन्दुभिः** सोमैः **सं** सम्यक् माद्य।

यद्वा शक्र परावति समुद्रे अधि मन्दसे।
अस्माकमित् सुते रणा समिन्दुभिः ॥२॥ ऋ. ८।१२।१७

पदपाठः

यत्। वा। शक्र। पराऽवति। समुद्रे। अधि। मन्दसे। अस्माकम्। इत्। सुते। रण। सम्। इन्दुऽभिः ॥२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे **शक्र** शक्तेन्द्र ! **परावति** परागते दूरदेशे **समुद्रे** समुन्दनशीले सोमे । **अधि** राष्ट्र यथानुवादी । **यद्वा** यदि वा **मन्दसे** माद्यसि तथापि अस्माकमित् अस्माकमेव सुते सोमे अभिषुते सति इन्दुभिः सोमरसैः **सं रण** सम्यग्रमस्व ।

यद्वासि सुन्वतो वृधो यजमानस्य सत्पते ।
उक्थे वा यस्य रण्यसि समिन्दुभिः ॥३॥ ऋ. ८।१२।१८

पदपाठः

यत् । वा । असि । सुन्वतः । वृधः । यजमानस्य । सत्ऽपते । उक्थे । वा । यस्य । रण्यसि । सम् । इन्दुऽभिः ॥३॥

हे **सत्पते** सतां पालयितरिन्द्र ! **सुन्वतः** सोमाभिषवं कुर्वतः यजमानस्य **यद्वा** यदि वा **वृधः असि** वर्धयिता भवसि । वृधेरन्तर्णीतण्यर्थादिगुपधलक्षणः कः । **यस्य** च यजमानस्य **उक्थे** शस्त्रे वा शंसिते सति **रण्यसि** रमसे । एवमपि **इन्दुभिः** अस्मदीयैरेव सोमैः **सं** सम्यग्रमस्व ।

इति नवमेऽनुवाके पञ्चदशं सूक्तम् ।

द्वादशोत्तरशततमं सूक्तम्

तृचस्यास्य सूक्तस्य सुकक्ष ऋषिः । इन्द्रो देवता । गायत्री छन्दः ।

विनुत्त्यभिभूत्यादिषु अष्टसु द्वन्द्वैकाहेषु 'यदद्य कच्च वृत्रहन्' (अथर्व० २०। ११२), 'उभयं शृणवच्च नः' (अथर्व० २०।११३) एतौ आज्यपृष्ठस्तोत्रियौ भवतः । तद् उक्तं वैताने—'विनुत्त्यभिभूत्योराशिमराययोः शदोपशदयोः सम्राट्स्वराजोः 'यदद्य कच्च वृत्रहन्', 'उभयं शृणवच्च नः' इति'' (वैता. श्रौ. ४०।३ इति ।

यदद्य कच्च वृत्रहन्नुदगा अभि सूर्य ।
सर्वं तदिन्द्र ते वशे ॥१॥ ऋ. ८।९३।४

पदपाठः

यत् । अद्य । कत् । च । वृत्रऽहन् । उत्ऽअगाः । अभि । सूर्य । सर्वम । तत् । इन्द्र । ते । वशे ॥१॥

हे **वृत्रहन्** वृत्रस्यापामावरकस्य मेघस्य हन्तः ! हे **सूर्य** सूर्यात्मक इन्द्र ! **अद्य** अस्मिन् दिने **यत् कच्च** यत्किञ्चित्पदार्थजातम् **अभि** अभिमुखीकृत्य **उदगाः**, 'इण् गतौ' उत्पूर्वः, तस्य लुङि गादेशः । स्वतेजसोद्गतः प्रादुर्भूतोऽसि तदा **सर्वं** स्थावरजङ्गमात्मकं जगत् **ते** तव **वशे** भवति, त्वदधीनं भवति । उदिते सूर्ये त्वदर्थं प्राक्कर्म कुर्वन्ति जुह्वति च ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यद्वा प्रवृद्ध सत्पते न मरा इति मन्यसे ।
उतो तत् सत्यमित् तव ॥२॥ ऋ. ८।९३।५

पदपाठः

यत् । वा । प्रऽवृद्ध । सत्ऽपते । न । मरै । इति । मन्यसे । उतो इति । तत् । सत्यम् । इत् । तव ॥२॥

वा शब्दः समुच्चये । अपि च हे **प्रवृद्ध** स्वबलेन प्रवर्धमान ! **सत्पते** सतां पते ! स्वप्रकाशाधिक्येन सतां नक्षत्राणां स्वामिन् हे इन्द्र ! **न मरै इति** मनुष्यवद्वार्धक्येनाहं न म्रिय इति यत् यदि **मन्यसे** बुध्यसे । 'मृङ् प्राणत्यागे' । लेटचडागमः । 'वैतोऽन्यत्र' इत्यैकारः । **उतो** अपि च **तव तत्** न म्रिय इति मननं **सत्यमित्** यथार्थमेव । इन्द्रो न म्रियते इत्यर्थे मन्त्रान्तरं—'न ह्यस्या अपरं चन जरसा मरते पतिः' **(ऋ. सं.** १०।८६।११) इति ।

ये सोमासः परावति ये अर्वावति सुन्विरे ।
सर्वांस्ताँ इन्द्र गच्छसि ॥३॥ ऋ. ८।९३।६

पदपाठः

ये । सोमासः । पराऽवति । ये । अर्वाऽवति । सुन्विरे । सर्वान् । तान् । इन्द्र । गच्छसि ॥३॥

हे **इन्द्र** ! **ये सोमासः** सोमाः **परावति** विप्रकृष्टेऽतिदूरदेशे, **ये** सोमाः **अर्वावति** अन्तिकतमे देशे च **सुन्विरे** । छन्दसि द्विर्वचनस्य विकल्पितत्वादत्र द्विर्वचनाभावः । ये सोमा ऋत्विग्भिरभिषूयन्ते **सर्वान्** दूरे समीपे चाभिषूयमाणान् **तान्** सोमान् **गच्छसि** तत्पानार्थं युगपत्प्राप्नोषि ।

इति नवमेऽनुवाके षोडशं काण्डम् ।

त्रयोदशोत्तरशततमं सूक्तम्

द्व्यृचस्यास्य सूक्तस्य भर्ग ऋषिः । [इन्द्रो देवता] प्रगाथश्छन्दः ।

विनुत्त्यमिभूत्यादिषु 'उभयं शृणवच्च नः' इत्यस्य विनियोगः पूर्वसूक्तेन सह उक्तः ।

तथा त्रिवृदादिषु अस्य विनियोगः 'वयमेन मिदा ह्यः' (अथर्व. २०।९७) इत्यनेन सह उक्तः ।

उभयं शृणवच्च न इन्द्रो अर्वागिदं वचः ।
सत्राच्या मघवा सोमपीतये धिया
शविष्ठ आ गमत् ॥१॥ ऋ. ८।६१।१

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

उभयम् । शृणवत् । च । नः । इन्द्रः । अर्वाक् । इदम् । वचः । सत्राच्या । मघऽवा । सोमऽपीतये । धिया । शविष्ठ । आ । गमत् ॥१॥

उभयं स्तोत्रात्मकं शस्त्रात्मकं चोभयविधम् इदं **वचः अर्वाक्** अस्मदभिमुखम् **इन्द्रः शृणवत्** शृणोतु । श्रुत्वा च **सत्राच्या** अस्माकं सहाञ्चन्या **धिया** युक्तः सन् **मघवा** धनवान् तथा **शविष्ठः** अतिशयेन बलवान् स **आ गमत्** आगच्छतु **सोमपीतये** सोमपानाय ।

तं हि स्वराजं वृषभं तमोजसे धिषणे निष्टतक्षतुः ।
उतोपमानां प्रथमो नि षीदसि
सोमकामं हि ते मनः ॥२॥ ऋ. ८।६१।२

पदपाठः

तम् । हि । स्वऽराजम् । वृषभम् । तम् । ओजसे । धिषणे इति । निःऽततक्षतुः । उत । उपऽमानाम् । प्रथमः । नि । सीदसि । सोमऽकामम् । हि । ते । मनः ॥२॥

तं हि तं खल्विन्द्रं **स्वराजं** स्वयमेव राजमानं **धिषणे** द्यावापृथिव्यौ **वृषभं** जगदुपकारिकाया वृष्टेर्वर्षकं **निष्टतक्षतुः** संचस्करतुः । **तं** तमेवेन्द्रम् **ओजसे** बलाय निष्टतक्षतुः । **उत** यस्मादेवं तस्मात् हे इन्द्र ! **उपमानाम्** उपमानभूतानामन्येषां देवानां मध्ये **प्रथमः** मुख्यः सन् **नि षीदसि** वेद्याम् । **सोमकामं** हि खलु **ते मनः** ।

इति नवमेऽनुवाके सप्तदशं सूक्तम् ।

चतुर्दशोत्तरशततमं सूक्तम्

द्व्यृचस्यास्य सूक्तस्य सौभरिर्ऋषिः । इन्द्रो देवता । गायत्री छन्दः ।

पवित्रादिषु राजसूयैकाहेषु 'अभ्रातृव्यो अना त्वम्' इत्यस्य विनियोगः 'अधा हीन्द्र गिर्वणः' (अथर्व. २०।१००) इत्यनेन सह उक्तः ।

तथा अभिप्लवषडहस्य गवाख्येऽहनि 'अभ्रातृव्यो अना त्वम्' इत्येष उक्थस्तोत्रियो भवति । तद् उक्तं वैताने—"षडहस्य गवि 'अभ्रातृव्यो अना त्वम्' इति" (वैता. श्रौ. ४१।२०) इति ।

अभ्रातृव्यो अना त्वमनापिरिन्द्र जनुषा सनादसि ।
युधेदापित्वमिच्छसे ॥१॥ ऋ. ८।२१।१३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

अभ्रातृव्यः । अना । त्वम् । अनापिः । इन्द्र । जनुषा । सनात् । असि । युधा । इत् । आपिऽत्वम् । इच्छसे ॥१॥

हे **इन्द्र** ! त्वं **जनुषा** जन्मनैव **अभ्रातृव्यः** । 'व्यन् सपत्ने' (पा सू. ४।१।१४५) इति व्यन्प्रत्ययः । **अना** अनेतृकः । 'ऋतश्छन्दसि' इति कपः प्रतिषेधः । अनियन्तृक इत्यर्थः । **अनापिः** बन्धुवर्जितश्च **सनादसि** चिरादेव भ्रातृव्यादिवर्जितोऽसि । यच्च त्वया **आपित्वं** बान्धवम् **इच्छसे** इच्छसि तत्र **युधा इत्** युद्धेनैव युद्धं कुर्वन्नेव स्तोतृजनानां सखा भवसीति ।

नकी रेवन्तं सख्याय विन्दसे पीयन्ति ते सुराश्वः ।
यदा कृणोषि नदनुं समूहस्यादित्
पितेव हूयसे ॥२॥ ऋ. ८।२१।१४

पदपाठः

नकिः । रेवन्तम् । सख्याय । विन्दसे । पीयन्ति । ते । सुराश्वः । यदा । कृणोषि । नदनुम् । सम् । ऊहसि । आत् । इत् । पिताऽइव । हूयसे ॥२॥

हे इन्द्र ! **रेवन्तं** धनवन्तं केवलधनवन्तं दानादिरहितमयष्टारमाढ्यं मानवं **सख्याय** सखिभावाय **नकिः विन्दसे** न भजसे नाश्रयसीत्यर्थः । अयष्टारो जनाः किं सन्तीत्यत आह । **सुराश्वः** 'टुओश्वि गतिवृद्धयोः' । सुरया वृद्धास्तद्वत् प्रमत्ता नास्तिकाः **ते** त्वां **पीयन्ति** । पीयतिर्हिंसाकर्मा, हिंसन्ति । अतः तान्नाश्रयसीत्यर्थः । किन्तु यदा त्वं तेषां नास्तिकानां विषये **सम् ऊहसि** सम्यक् वितर्कयसि, **नदनुं** सङ्ग्रामं च **कृणोषि** कुरुषे **आत् इत्** तत्कालमेव तैः त्वं **पितेव हूयसे** यथा पुत्रः आत्मरक्षार्थं पितरं ह्वयति तथा ते भीताः सन्तस्त्वामाह्वयन्तीत्यर्थः । ऊहसि ऊह वितर्के (भ्वा.) धातोर्लट्, व्यत्ययेन परस्मैपदम् । नदनुः सङ्ग्रामनामेति निघण्टुः (२।१७) णद शब्दे (भ्वा.) धातोः 'अनुङ् नदेश्च' (उ. ३।५२) इत्यौणादिकोऽनुङ् । नदति अव्यक्तशब्दं करोतीति विग्रहः ।

इति नवमेऽनुवाके अष्टादशं सूक्तम् ।

पञ्चदशोत्तरशततमं सूक्तम्

तृचस्यास्य सूक्तस्य वत्स ऋषिः । इन्द्रो देवता । गायत्री छन्दः ।

साद्यःक्राभिधानेषु एकाहेषु श्येनयागवर्जितेषु 'अहमिद्धि पितुष्परि' इत्याज्यस्तोत्रियो भवति । तद् उक्तं वैताने—"साद्यःक्रेषु श्येनवर्जम् 'अहमिद्धि पितुष्परि' इति च" (वैता. श्रौ. ४०।६) इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अहमिद्धि पितुष्परि मेधामृतस्य जग्रभ ।
अहं सूर्य इवाजनि ॥१॥ ऋ. ८।६।१०

पदपाठः

अहम् । इत् । हि । पितुः । परि । मेधाम् । ऋतस्य । जग्रभ । अहम् । सूर्यःऽइव । अजनि ॥१॥

पितुः पालकस्य **ऋतस्य** सत्यस्य अवितथस्येन्द्रस्य **मेधाम्** अनुग्रहात्मिकां बुद्धिम् **अहमित्** अहमेव **परि जग्रभ** परिगृहीतवानस्मि, नान्यः । **हि** यस्मादेवं तस्मात् **अहं सूर्य इवाजनि** सूर्यो यथा प्रकाशमानः सन् प्रादुर्भवति तथाजनिषं प्रादुरभूवम् ।

अहम् प्रत्नेन मन्मना गिरः शुम्भामि कण्ववत् ।
येनेन्द्रः शुष्ममिद्दधे ॥२॥ ऋ. ८।६।११

पदपाठः

अहम् । प्रत्नेन । मन्मना । गिरः । शुम्भामि । कण्ववत् । येन । इन्द्रः । शुष्मम् । इत् । दधे ॥२॥

कण्ववत् मम जनकः कण्व इव अहं **प्रत्नेन** नित्येन वेदरूपेण **मन्मना** मननसाधनेनेन्द्रविषयेण स्तोत्रेण **गिरः** वाचः **शुम्भामि** अलङ्करोमि । यदा हीन्द्रविषये प्रयुज्यन्ते तदानीं यथार्थत्वाद्वाचोऽलङ्कृता भवन्ति । **येन** खलु स्तोत्रेण **इन्द्रः शुष्मं** शत्रूणां शोषकं बलं **दधे इत्** धत्त एव धारयत्येव । यत्स्तोत्रमिन्द्रे ईदृशं बलमवश्यं जनयति तेन मन्मनेत्यर्थः ।

ये त्वामिन्द्र न तुष्टुवुर्ऋषयो ये च तुष्टुवुः ।
ममेद् वर्धस्व सुष्टुतः ॥३॥ ऋ. ८।६।१२

पदपाठः

ये । त्वाम् । इन्द्र । न । तुस्तुवुः । ऋषयः । ये । च । तुस्तुवुः । मम । इत् । वर्धस्व । सुऽस्तुतः ॥३॥

हे **इन्द्र** ! **ये** जनाः **त्वां न तुष्टुवुः** न स्तुवन्ति **ये च ऋषयः** मन्त्राणां द्रष्टारो जनाः **तुष्टुवुः** त्वां स्तुवन्ति उभयेषां मध्ये **ममेत्** ममैव स्तोत्रेण **सुष्टुतः** शोभनं स्तुतः सन् **वर्धस्व** वृद्धो भव ।

इति नवमेऽनुवाके एकोनविंशं सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

षोडशोत्तरशततमं सूक्तम्

द्वयृचस्यास्य सूक्तस्य मेध्यातिथिर्ऋषिः । इन्द्रो देवता । बृहती छन्दः ।

अतिरात्राणां सर्वस्तोमाख्ययोः 'मा भूम निष्टचा इव' (अथर्व० २०।११६), 'विधुं दद्राणं सलिलस्य पृष्ठे' (अथर्व० ६।१५।६) एतौ पृष्ठस्तोत्रियौ यथाक्रमं भवतः । तद् उक्तं वैताने - "अतिरात्राणां सर्वस्तोमयोः 'मा भूम निष्टचा इव', 'विधुं दद्राणं सलिलस्य पृष्ठे' इति" (वैता० श्रौ० ४०।७) इति ।

तथा चतुरहाणां सर्वेष्वहःसु एतौ पृष्ठस्तोत्रियौ विकल्पितौ भवतः । तद् उक्तं वैताने—"सर्वेषु 'मा भूम निष्टचा इव', 'विधुं दद्राणं सलिलस्य पृष्ठे' इति" (वैता० श्रौ० ४१।१२) इति ।

मा भूम निष्ट्या इवेन्द्र त्वदरणा इव ।
वनानि न प्रजहितान्यद्रिवो दुरोषासो अमन्महि ॥१॥

ऋ. ८।१।१३

पदपाठः

मा । भूम । निष्टचाःऽइव । इन्द्र । त्वत् । अरणाःऽइव । वनानि । न । प्रऽजहितानि । अद्रिऽवः । दुरोषासः । अमन्महि ॥१॥

हे **इन्द्र ! त्वत्** त्वत्तः त्वत्प्रसादात् **निष्टचा इव** । नीचैर्भूता हीना निष्टचाः, त इव वयं **मा भूम** । तथा **अरणा इव** अरमणा दुःखिता इव वयं मा भूम । अपि च **प्रजहितानि** प्रक्षीणानि शाखादिभिर्वियुक्तानि **वनानि न** वृक्षजातानीव वयं पुत्रादिभिर्वियुक्ता मा भूम । हे **अद्रिवः** वज्रवन्निन्द्र ! **दुरोषासः** ओषितुमन्यैर्दग्धुमशक्या दुर्येषु गृहेषु निवसन्तो वा वयम् **अमन्महि** त्वां स्तुमः ।

अमन्महीदनाशवोऽनुग्रासश्च वृत्रहन् ।
सकृत् सु ते महता शूर राधसाऽनु स्तोमं मुदीमहि ॥२॥

ऋ. ८।१।१४

पदपाठः

अमन्महि । इत् । अनाशवः । अनुग्रासः । च । वृत्रऽहन् । सकृत् । सु । ते । महता । शूर । राधसा । अनु । स्तोमम् । मुदीमहि ॥२॥

हे **वृत्रहन्** वृत्रस्यासुरस्य हन्तरिन्द्र ! **अनाशवः** अशीघ्रा अत्वरमाणाः **अनुग्रासः** अनुग्रा अनुद्गूर्णाः च सन्तो वयं भक्तिश्रद्धापुरःसरं शनैस्त्वाम् **अमन्महीत्** स्तुम एव । हे **शूर** ! वीर्यवन्निन्द्र ! **ते** त्वदर्थं **सकृत्** एकवारमपि **महता** प्रभूतेन **राधसा** धनेन हविर्लक्षणेन सह **सु** शोभनं **स्तोमं** स्तोत्रम् **अनु मुदीमहि** अनुमोदेमहि । अनुब्रवामेत्यर्थः ।

इति नवमेऽनुवाके विंशं सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सप्तदशोत्तरशततमं सूक्तम्

तृचस्यास्य सूक्तस्य वसिष्ठ ऋषिः । इन्द्रो देवता । विराड्गायत्री छन्दः ।

त्रिवृदादिषु 'पिबा सोममिन्द्र मन्दतु त्वा' इत्यस्य विनियोगः 'वयमेनमिदा ह्यः' (अथर्व० २०।९७) इत्यनेन सह उक्तः ।

तथा तनूपृष्ठे षडहे अस्य विनियोगः 'यद् द्याव इन्द्र ते शतम्' (अथर्व० २०।८१) इत्यनेन सह उक्तः ।

पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः ।
सोतुर्बाहुभ्यां सुयतो नार्वा ॥१॥ ऋ. ७।२२।१

पदपाठः

पिब । सोमम् । इन्द्र । मन्दतु । त्वा । यम् । ते । सुसाव । हरिऽअश्व । अद्रिः । सोतुः । बाहुऽभ्याम् । सुऽयतः । न । अर्वा ॥१॥

हे **इन्द्र** ! **सोमं पिब** । स सोमः **त्वा** त्वां **मन्दतु** मादयतु । हे **हर्यश्व** ! **ते** त्वदर्थं **सोतुः** अभिषवकर्तुः **बाहुभ्याम्** **अर्वा न** रश्मिभ्यामश्व इव **सुयतः** सुष्ठु परिगृहीतः **अद्रिः** ग्रावा **यं** सोमं **सुषाव** ।

यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि ।
स त्वामिन्द्र प्रभूवसो ममत्तु ॥२॥ ऋ. ७।२२।२

पदपाठः

यः । ते । मदः । युज्यः । चारुः । अस्ति । येन । वृत्राणि । हरिऽअश्व । हंसि । सः । त्वाम् । इन्द्र । प्रभुवसो इति प्रभुऽवसो । ममत्तु ॥२॥

हे **हर्यश्व** ! **ते** तव **यः** **युज्यः** अनुगुणः **चारुः** समीचीनः **मदः** मदकरः सोमः **अस्ति** विद्यते **येन** च पीतेन सोमेन **वृत्राणि हंसि** हे प्रभुवसो ! प्रभूतधन इन्द्र ! **त्वां** **सः** सोमः **ममत्तु** मादयतु ।

बोधा सु मे मघवन् वाचमेमां
यां ते वसिष्ठो अर्चति प्रशस्तिम् ।
इमा ब्रह्म सधमादे जुषस्व ॥३॥ ऋ. ७।२२।३

पदपाठः

बोध । सु । मे । मघऽवन् । वाचम् । आ । इमाम् । याम् । ते । वसिष्ठः । अर्चति । प्रऽशस्तिम् । इमा । ब्रह्म । सधऽमादे । जुषस्व ॥३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे मघवन् ! धनवन्निन्द्र ! **ते** तव **प्रशस्तिं** स्तुतिरूपां **यां** वाचं **वसिष्ठः अर्चति** वदति ताम् **इमां मे** वसिष्ठस्य सम्बन्धिनीं **वाचं सु आ बोध** सुष्ठु अभिवुध्यस्व । किञ्च **इमा** इमानि **ब्रह्म** ब्रह्माणि **सधमादे** यज्ञे **जुषस्व** सेवस्व ।

इति नवमेऽनुवाके एकविंशं सूक्तम् ।

अष्टादशोत्तरशततमं सूक्तम्

चतुर्ऋचस्यास्य सूक्तस्य प्रथमा-द्वितीययोर्ऋचोर्भर्गः, तृतीया-चतुर्थ्योश्च मेध्यातिथिर्ऋषी । इन्द्रो देवता । प्रगाथश्छन्दः ।

चातुर्मास्यवैश्वदेवादीनां सप्तानां त्र्यहाणां प्रथमेष्वहःसु 'शग्ध्यू षु शचीपते' इत्येष पृष्ठस्तोत्रियो भवति । तद् उक्तं वैताने--"चातुर्मास्यवैश्वदेवगर्गवैदच्छन्दोमवत्पराकान्तर्वस्वश्वमेधत्र्यहाणां 'शग्ध्यू षु शचीपते' इति" (वैता॰ श्रौ. ४१।२) इति ।

तथा त्रिककुद्दशाहाहीने अस्य विनियोगः 'क ईं वेद सुते सचा' (अथर्व॰ २०।५३) इत्यनेन सह उक्तः ।

साकमेधत्र्यहस्य प्रथमेऽहनि--'इन्द्रमिद् देवतातये' (अथर्व॰ २०।११८।३) इत्येष पृष्ठस्तोत्रियो भवति । तद् उक्तं वैताने--"साकमेधस्य 'इन्द्रमिद् देवतातये' इति" (वैता॰ श्रौ॰ ४१।३) इति ।

शग्ध्यू षु शचीपत इन्द्र विश्वाभिरूतिभिः ।
भगं न हि त्वा यशसं वसुविदमनु शूर चरामसि ॥१॥

ऋ. ८।६१।५

पदपाठः

शग्धि । ऊँ इति । सु । शचीऽपते । इन्द्र । विश्वाभिः । ऊतिऽभिः । भगम् । न । हि । त्वा । यशसम् । वसुऽविदम् । अनु । शूर । चरामसि ॥१॥

हे **शचीपते** ! **इन्द्र** ! **शग्धि** देह्यभिमतम् । **विश्वाभिः** सर्वाभिः **ऊतिभिः** मरुद्भिः सह । हे **शूर** ! **भगं न** भाग्यमिव **यशसं** यशस्विनं **वसुविदं** धनस्य लम्भकं **त्वा** त्वाम् **अनु चरामसि** अनुचरामः । परिचराम इत्यर्थः ।

पौरो अश्वस्य पुरुकृद् गवामस्युत्सो देव हिरण्ययः ।
नकिर्हि दानं परिमर्धिषत् त्वे यद्यद्यामि तदा भर ॥२॥

ऋ. ८।६१।६

पदपाठः

पौरः । अश्वस्य । पुरुऽकृत् । गवाम् । असि । उत्सः । देव । हिरण्ययः । नकिः । हि । दानम् । परिऽमर्धिषत् । त्वे इति । यत्ऽयत् । यामि । तत् । आ । भर ॥२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे इन्द्र ! त्वम् **अश्वस्य पौरः** पूरयिता **असि** भवसि । तथा **गवां पुरुकृत्** बहुकर्तासि । हे **देव** ! **हिरण्ययः** हिरण्मयशरीरस्त्वम् **उत्सः** उत्ससदृशोऽसि । हे इन्द्र ! **त्वे** त्वयि वर्तमानं **दानम्** अस्मद्विषयं देयं धनं वा **नकिः परिमर्धिषत्** न कश्चिद्धिनस्ति । अतः **यद्यद्यामि** याचे **तद् आभर** आहर मह्यम् ।

इन्द्रमिद् देवतातय इन्द्रं प्रयत्यध्वरे ।

इन्द्रं समीके वनिनो हवामह इन्द्रं धनस्य सातये ॥३॥

ऋ. ८।३।५

पदपाठः

इन्द्रम् । इत् । देवऽतातये । इन्द्रम् । प्रऽयति । अध्वरे । इन्द्रम् । सम्ऽईके । वनिनः । हवामहे । इन्द्रम् । धनस्य । सातये ॥३॥

देवतातये देवैः स्तोतृभिस्तायते विस्तार्यत इति देवतातिर्यज्ञः । तदर्थम् **इन्द्रमित्** देवेषु मध्य इन्द्रमेव **हवामहे** आह्वयामहे । **अध्वरे** यज्ञे **प्रयति** प्रगच्छत्युपक्रान्ते सति इन्द्रम् एवाह्वयामहे । समीकमिति सङ्ग्रामनाम । समीके सङ्ग्रामे इन्द्रमाह्वयामहे । **धनस्य सातये** लाभाय । कीदृशस्य ? **वनिनः** वनमिति रश्मिनाम (निघं. १।५) । वनानि बहुविधकिरणा विद्यन्ते यस्य तस्य । बहुविधप्रकाशकारकस्येत्यर्थः । वनशब्दात् भूम्न्यर्थे इनिः । इन्द्रम् एवाह्वयामहे । अतः शीघ्रमिन्द्र ! आगच्छत्वित्यर्थः ।

इन्द्रो मह्ना रोदसी पप्रथच्छव इन्द्रः सूर्यमरोचयत् ।

इन्द्रे ह विश्वा भुवनानि येमिर

इन्द्रे सुवानास इन्दवः ॥४॥ ऋ. ८।३।६

पदपाठः

इन्द्रः । मह्ना । रोदसी इति । पप्रथत् । शवः । इन्द्रः । सूर्यम् । अरोचयत् । इन्द्रे । ह । विश्वा । भुवनानि । येमिरे । इन्द्रे । सुवानासः । इन्दवः ॥४॥

अयम् **इन्द्रः शवः** शवस आत्मीयस्य बलस्य **मह्ना** महिम्ना महत्त्वेन **रोदसी** द्यावापृथिव्यौ **पप्रथत्** अप्रथयत् विस्तारितवान् । तथा स्वर्भानुनावृतं **सूर्यम्** अयमेव इन्द्रः **अरोचयत्** अदीपयत् । तस्यासुरस्य वधेन प्रकाशितवान् । अपि च **इन्द्रे ह** अस्मिन्नेवेन्द्रे **विश्वा** विश्वानि व्याप्तानि **भुवनानि** भूतजातानि **येमिरे** उपरमन्ते । इन्द्रेण नियम्यन्त इत्यर्थः । तथा **सुवानासः** सूयमाना अभिषूयमाणाः **इन्दवः** सोमाश्च अस्मिन्नेव इन्द्रे नियम्यन्ते अन्तर्भवन्तीत्यर्थः ।

इति नवमेऽनुवाके द्वाविंशं सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकोनविंशत्युत्तरशततमं सूक्तम्

द्व्यृचस्यास्य सूक्तस्य प्रथमर्च आयुः, द्वितीयायाश्च श्रुष्टिगुर्ऋषी। इन्द्रो देवता। [प्रगाथश्छन्दः]।

वैश्वदेवादिव्यहेषु 'अस्तावि मन्म पूर्व्यम्' इत्यस्य विनियोगः 'तमिन्द्रं वाजयामसि' (अथर्व. २०।४७) इत्यनेन सह उक्तः।

अस्तावि मन्म पूर्व्यं ब्रह्मेन्द्राय वोचत।
पूर्वीर्ऋतस्य बृहतीरनूषत स्तोतुर्मेधा असृक्षत ॥१॥

ऋ. ८।५२।९

पदपाठः

अस्तावि। मन्म। पूर्व्यम्। ब्रह्म। इन्द्राय। वोचत। पूर्वीः। ऋतस्य। बृहतीः। अनूषत। स्तोतुः। मेधाः। असृक्षत ॥१॥

हे ऋत्विजः! **मन्म** मननीयं **पूर्व्यं** पुरातनं **यत् ब्रह्म** स्तोत्रम् **अस्तावि** स्तुतिविषयीकृतं भवद्भिस्तत् ब्रह्म स्तोत्रम् **इन्द्राय** परमेश्वराय तदर्थं **वोचत** ब्रूत। यतो भवन्तः **ऋतस्य** सत्यस्येन्द्रस्य सम्बन्धिनीः **पूर्वीः** बह्वीः **बृहतीः** महतीः सामर्थ्यात् मूर्तीः, इन्द्रस्य प्रचुरान् महतो गुणावतारानित्यर्थः। **अनूषत** स्तुतिविषयीकृतवन्तः। किञ्च **स्तोतुर्मम** आयोः **मेधाः** धारणावतीः बुद्धीः **असृक्षत** सृष्टवन्तः। अतः प्रार्थये ब्रह्मेन्द्राय वोचतेति।

तुरण्यवो मधुमन्तं घृतश्चुतं विप्रासो अर्कमानृचुः।
अस्मे रयिः पप्रथे वृष्ण्यं
शवोऽस्मे सुवानास इन्दवः ॥२॥ ऋ. ८।५१।१०

पदपाठः

तुरण्यवः। मधुऽमन्तम्। घृतऽश्चुतम्। विप्रासः। अर्कम्। आनृचुः। अस्मे इति। रयिः। पप्रथे। वृष्ण्यम्। शवः। अस्मे इति। सुवानासः। इन्दवः ॥२॥

तुरण्यवः त्वरमाणाः **विप्रासो** मेधाविनो यजमानाः **अर्कम्** अर्चनीयमिन्द्रम्। **आनृचुः** अर्चन्ति। कीदृशम्? **मधुमन्तं** मधुरामृतरसोपेतम्, **घृतश्चुतं** जलस्राविणं मेघभेदनेन वृष्टिं कुर्वन्तमित्यर्थः। केनाभिप्रायेणार्चन्तीत्युच्यते। **अस्मे** अस्मासु **रयिः** धनराशिः **पप्रथे** प्रथितो भवतु तथा **वृष्ण्यम्** अपत्योत्पादकं **शवः** बलमस्तु। किञ्च **अस्मे** अस्मासु **सुवानासः** अभिषुता **इन्दवः** सोमाः सन्तु। इन्द्रानुग्रहेणैव तत्सर्वमस्मासु सम्पद्यतामित्याशयेनेत्यर्थः।

इति नवमेऽनुवाके त्रयोविंशं सूक्तम्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विंशत्युत्तरशततमं सूक्तम

द्वयृचस्यास्य सूक्तस्य देवातिथिर्ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः ।

दशाहस्य गवामयनिकस्य अष्टमेऽहनि 'यदिन्द्र प्रागपागुदक्' इत्येष उक्थ-स्तोत्रियो भवति । उक्तं वैताने—"दशाहस्याष्टमे 'यदिन्द्र प्रागपागुदक्' इति" (वैता. श्रौ. ४२।३) इति ।

तथा त्रिककुद्दशाहाहीने अस्य विनियोगः 'क ईं वेद सुते सचा' (अथर्व. २०।५३) इत्यनेन सह उक्तः ।

यदिन्द्र प्रागपागुदङ्न्यग् वा हूयसे नृभिः ।
सिमा पुरू नृषूतो अस्यानवेऽसि प्रशर्ध तुर्वशे ॥१॥

ऋ. ८।४।१

पदपाठः

यत् । इन्द्र । प्राक् । अपाक् । उदक् । न्यक् । वा । हूयसे । नृऽभिः । सिम । पुरु । नृऽसूतः । असि । आनवे । असि । प्रऽशर्ध । तुर्वशे ॥१॥

हे **इन्द्र** ! **यत्** यदि **प्राक्** प्राच्यां दिशि वर्तमानैः । सप्तम्यन्ताद्दिक्छब्दाद्वि-हितस्यास्तातेः 'अञ्चेर्लुक्' (पा. सू. ५।३।३०) इति लुक् । **अपाक्** प्रतीच्यां दिशि वर्तमानैः । यदि वा **उदक्** उदीच्यां दिशि वर्तमानैः । यत् **वा न्यक्** नीच्यां दिशि अधस्ताद्वर्तमानैः एवम्भूतैः **नृभिः** स्तोतृभिस्त्वं **हूयसे** स्वस्वकार्याय आहूयसे । हे **सिम** ! श्रेष्ठेन्द्र ! 'सिम श्रेष्ठेन्द्र ! 'सिम इति वै श्रेष्ठमाचक्षते' इति वाजसनेयकम् । यद्यप्येवं वहुभिराहूयसे तथापि **आनवे** अनुर्नाम राजा, तस्य पुत्रे राजर्षौ **पुरु** वहुलं **नृषूतः** नृभिस्तदीयैः स्तोतृभिः प्रेरितः **असि** भवसि । राज्ञो हितकरणे त्वां स्तोतारः प्रेरयन्तीत्यर्थः । 'षू प्रेरणे' अस्मात् कर्मणि निष्ठा । अपि च हे **प्रशर्ध** ! प्रकर्षेण शर्धयितरभिभवितरिन्द्र ! **तुर्वशे** एतत्संज्ञे च राजनि **नृषूतः** असि नृभिः प्रेरितो भवसि ।

यद्वा रुमे रुशमे श्यावके कृप इन्द्र मादयसे सचा ।
कण्वासस्त्वा ब्रह्मभिः स्तोमवाहस
इन्द्रा यच्छन्त्या गहि ॥२॥ ऋ. ८।४।२

पदपाठः

यत् । वा । रुमे । रुशमे । श्यावके । कृपे । इन्द्र । मादयसे । सचा । कण्वासः । त्वा । ब्रह्मऽभिः । स्तोमऽवाहसः । इन्द्र । आ । यच्छन्ति । आ । गहि ॥२॥

यद्वा यद्यपि **रुमे, रुशमे, श्यावके, कृपे** इत्येतेषु चतुर्षु राजसु हे **इन्द्र** ! त्वं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सचा सह **मादयसे** माद्यसि तथापि **स्तोमवाहसः** स्तोमानां स्तोत्राणां वोढारः **कण्वासः** कण्वगोत्रा ऋषयः **ब्रह्मभिः** परिवृढैर्मन्त्रैर्हविर्भिर्वा हे **इन्द्र** ! त्वाम् **आ यच्छन्ति** आगमयन्ति । यद्वा द्वितीयार्थे तृतीया । ब्रह्मभिर्ब्रह्माणि हवींष्याभिमुख्येन प्रयच्छन्ति ददति । 'दाण् दाने' । 'पाघ्रा०' इत्यादिना यच्छादेशः । अतस्त्वम् **आ गहि** शीघ्रमागच्छ । गमेर्लोटि छान्दसः शपो लुक् ।

इति नवमेऽनुवाके चतुर्विंशं सूक्तम् ।

एकविंशत्युत्तरशततमं सूक्तम्

द्वयृचस्यास्य सूक्तस्य देवातिथिर्ऋषिः । इन्द्रो देवता । प्रगाथश्छन्दः ।

तनूपृष्ठे षडहे 'अभि त्वा शूर नोनुमः' इत्यस्य विनियोगः 'यद् द्याव इन्द्र ते शतम्' (अथर्व० २०।८१) इत्यनेन सह उक्तः ।

अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।
ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥१॥

ऋ. ७।३२।२२

पदपाठः

अभि । त्वा । शूर । नोनुमः । अदुग्धाःऽइव । धेनवः । ईशानम् । अस्य । जगतः । स्वःऽदृशम् । ईशानम् । इन्द्र । तस्थुषः ॥१॥

हे **शूर** ! इन्द्र ! **अस्य जगतः** जङ्गमस्य **ईशानम्** ईश्वरं **तस्थुषः** स्थावरस्य च **ईशानम्** । ईशानमिति पदस्यावृत्तिरादरार्था । **स्वर्दृशं** सर्वदृशं त्वा त्वाम् **अदुग्धा इव धेनवः** यथा दुग्धा धेनवः क्षीरपूर्णोधस्त्वेन वर्तन्ते तद्वत्सोमपूर्णचमसत्वेन वर्तमाना वयम् **अभि नोनुमः** भृशमभिष्टुमः ।

न त्वावाँ अन्यो दिव्यो न
पार्थिवो न जातो न जनिष्यते ।
अश्वायन्तो मघवन्निन्द्र वाजिनो
गव्यन्तस्त्वा हवामहे ॥२॥ ऋ. ७।३२।२३

पदपाठः

न । त्वाऽवान् । अन्यः । दिव्यः । न । पार्थिवः । न । जातः । न । जनिष्यते । अश्वऽयन्तः । मघऽवन् । इन्द्र । वाजिनः । गव्यन्तः । त्वा । हवामहे ॥२॥

हे **मघवन्** ! इन्द्र ! **दिव्यः** दिवि भवः त्वावान् न त्वत्सदृशः **अन्यः** अपरः कश्चिन्न तथा **पार्थिवः** भौमोऽपि **न** नास्ति । न केवलं सम्प्रत्येव, अपितु पूर्वमपि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न जातः, नोत्पन्नः, **न** च **अग्रे जनिष्यते** उत्पत्स्यते । **अश्वायन्तः** अश्वानिच्छन्तः **वाजिनः** वाजमिच्छन्तः । इच्छायामिनिप्रत्ययः । हविष्मन्तो वा **गव्यन्तः** गा इच्छन्तश्च वयं त्वा त्वां **हवामहे** ह्वयामः ।

इति नवमेऽनुवाके पञ्चविंशं सूक्तम् ।

द्वाविंशत्युत्तरशततमं सूक्तम्

तृचस्यास्य सूक्तस्य शुनःशेप ऋषिः । इन्द्रो देवता । गायत्री छन्दः ।

तनूपृष्ठे षडहे 'रेवतीर्नः सधमादे' इत्यस्य विनियोगः 'यद् द्याव इन्द्र ते शतम्' (अथर्व० २०।८१) इत्यनेन सह उक्तः ।

रेवतीर्नः सधमाद इन्द्रे सन्तु तुविवाजाः ।
क्षुमन्तो याभिर्मदेम ॥१॥ ऋ. १।३०।१३

पदपाठः

रेवतीः । नः । सधऽमादे । इन्द्रे । सन्तु । तुविऽवाजाः । क्षुऽमन्तः । याभिः । मदेम ॥१॥

क्षुमन्तः अन्नवन्तो वयं **याभिः** गोभिः सह **मदेम** हृष्येम **इन्द्रे सधमादे** अस्माभिः सह हर्षयुक्ते सति **नः** अस्माकं ताः गावः **रेवतीः** क्षीराज्यादिधनवत्यः **तुविवाजाः** प्रभूतबलाश्च **सन्तु** । रेवतीः, रयिशब्दात् मतुपि 'रयेर्मतौ बहुलम्' इति सम्प्रसारणं परपूर्वत्वम् । 'छन्दसीरः' इति मतुपो वत्वम् । 'वा छन्दसि' इति पूर्वसवर्णदीर्घः । सधमादे । 'मद तृप्तियोगे' । चौरादिकः । सह मादयतीति सधमादः । पचाद्यच् । 'सधमादस्थयोश्छन्दसि' (पा. सू. ६।३।९६) इति सहशब्दस्य सधादेशः । तुविवाजाः, 'तु' इति सौत्रो धातुर्वृद्धचर्थः । 'अच इः' इति इः । संज्ञापूर्वकत्वात् गुणो न भवति ।

आ घ त्वावान्त्मनाप्तः स्तोतृभ्यो धृष्णवियानः ।
ऋणोरक्षं न चक्र्योः ॥२॥ ऋ. १।३०।१४

पदपाठः

आ । घ । त्वाऽवान् । त्मना । आप्तः । स्तोतृऽभ्यः । धृष्णो इति । इयानः । ऋणोः । अक्षम् । न । चक्र्योः ॥२॥

हे **धृष्णो** धाष्टर्ययुक्त इन्द्र ! **त्वावान्** त्वत्सदृशो देवताविशेषः **त्मनाप्तः** त्वदनुग्रहवशात् स्वयमेव आप्तः सन् **इयानः** अस्माभिर्याच्यमानः **स्तोतृभ्यः** स्तोतृजनानाषामनुग्रहाय तदभीष्टमर्थं **घ** अवश्यम् **आ ऋणोः** आनीय प्रक्षिपतु । तत्र दृष्टान्तः । **चक्र्योः** रथस्य चक्रयोः **अक्षं न** । यथा अक्षं प्रक्षिपन्ति तद्वत् । त्वावान्,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"वतुप्प्रकरणे युष्मदस्मद्भ्यां छन्दसि सादृश्य उपसङ्ख्यानम्" (पा. सू. ५।२।३९।१) इति वतुप्। 'प्रत्ययोत्तरपदयोश्च' इति मपर्यन्तस्य त्वादेशः। 'आ सर्वनाम्नः' (पा. सू. ६।३।९१) इति दकारस्य आत्वम्। त्मना। 'मन्त्रेष्वाङ्यादेरात्मनः' (पा सू. ६।४।१४१) इति आकारलोपः। धृष्णोः. ञिधृषा प्रागल्भ्ये।' त्रिसिगृधिधृषिक्षिपेः क्नुः (पा. सू. ३।२।१४०)। इयानः, 'ईङ् गतौ'। 'छन्दसि लिट्' (पा. सू. ३।२।१०५)। तस्य 'लिटः कानज्वा' (पा. सू. ३।२।१०६) इति कानजादेशः 'अचिश्नुधातु०' (पा. सू. ६।४।७७) इत्यादिना इयङादेशः। द्विर्वचनप्रकरणे छन्दसि वेति वक्तव्यम्' इति वचनात् अभ्यासो न क्रियते। ऋणोः, 'ऋण गतौ' लङि व्यत्ययेन तिपः सिपि 'इतश्च' (पा. सू. ३।४।१००) इति इकारलोपः। 'तनादिकृञ्भ्य उः' (पा. सू. ३।१।७९)। सार्वधातुकगुणः। 'बहुलं छन्दस्यमाङ्योगेऽपि' इति अडागमाभावः। चक्रचोः, अकारस्य इकारश्छान्दसः।

आ यद् दुवः शतक्रतवा कामं जरितॄणाम्।
ऋणोरक्षं न शचीभिः ॥३॥ ऋ १।३०।१५

पदपाठः

आ। यत्। दुवः। शतक्रतो इति शतऽक्रतो। आ। कामम्। जरितॄणाम्। ऋणोः। अक्षम्। न। शचीभिः ॥३॥

हे **शतक्रतो** इन्द्र! **यद् दुवः** धनं कामितार्थरूपम् आ स्तोतृभिराप्तव्यमस्ति तं कामं **जरितॄणां** स्तोतृजनानामनुग्रहाय **आ ऋणोः** आनीय प्रक्षिपसि। तत्र दृष्टान्तः। **शचीभिः** कर्मभिः शंकटोचितव्यापारविशेषैः **अक्षं न** यथा अक्षं प्रक्षिपन्ति तद्वत्।

इति नवमेऽनुवाके षड्विंशं सूक्तम्

त्रयोविंशत्युत्तरशततमं सूक्तम्

द्व्यृचस्यास्य सूक्तस्य कुत्स ऋषिः। सूर्यो देवता। त्रिष्टुप् छन्दः।

विषुवति सौर्यपृष्ठे माध्यन्दिने 'चित्रं देवानामुदगादनीकम्' अथर्व. २०।१०७।१४), 'तत् सूर्यस्य देवत्वं तन्महित्वम्' (अथर्व. २०।१२३) इति पृष्ठस्तोत्रियानुरूपौ भवतः। तद् उक्तं वैताने – 'चित्रं देवानामुदगादनीकम्' 'तत् सूर्यस्य देवत्वं तन्महित्वम्' इति पृष्ठस्तोत्रियानुरूपौ (वैता. श्रौ. ३३।६) इति।

तत् सूर्यस्य देवत्वं तन्महित्वं
मध्या कर्तोर्विततं सं जभार।
यदेदयुक्त हरितः सधस्थादाद्रात्री
वासस्तनुते सिमस्मै ॥१॥ ऋ. १।११५।४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

तत्। सूर्यस्य। देवऽत्वम्। तत्। महिऽत्वम्। मध्या। कर्तोः। विऽततम्। सम्। जभार। यदा। इत्। अयुक्त। हरितः। सधऽस्थात्। आत्। रात्री। वासः। तनुते। सिमस्मै ॥१॥

सूर्यस्य सर्वप्रेरकस्य आदित्यस्य **तत् देवत्वम्** ईश्वरत्वम्। स्वातन्त्र्यमिति यावत्। **महित्वं** महत्त्वं माहात्म्यं च **तत्** एव। तच्छब्दश्रुतेः यच्छब्दाध्याहारः। यत् **कर्तोः** कर्मनामैतत्। प्रारब्धापरिसमाप्तस्य कृष्यादिलक्षणस्य कर्मणः **मध्या** मध्ये अपरिसमाप्ते एव तस्मिन् कर्मणि **विततं** विस्तीर्णं स्वकीयं रश्मिजालम् अस्तं गच्छन् सूर्यः **सं जभार** अस्माल्लोकात् स्वात्मन्युपसंहरति। कर्मकरश्च प्रवृत्तमपरिसमाप्तमेव कर्म विसृजति अस्तं यन्तं सूर्यं दृष्ट्वा। ईदृशं स्वातन्त्र्यं महिमा च सूर्यव्यतिरिक्तस्य कस्यास्ति, न कस्यापि। सूर्य एवेदृशं स्वातन्त्र्यं महिमानं चावगाहते। अपि च **इत्** इत्यवधारणे। **यदेत्** यस्मिन्नेव काले **हरितः** रसहरणशीलान् स्वरश्मीन् हरिद्वर्णानश्वान् वा **सधस्थात्** सहस्थानात् अस्मात् पार्थिवाल्लोकादादाय **अयुक्त** अन्यत्र संयुक्तान् करोति। यद्वा युजिः केवलोऽपि विपूर्वः द्रष्टव्यः। यदैवासौ स्वरश्मीनश्वान् वा सधस्थात् सहतिष्ठन्त्यस्मिन्निति सधस्थो रथः, तस्मात् अयुक्त अमुञ्चत्। **आत्** अनन्तरमेव **रात्री** निशा **वासः** आच्छादयितृ तमः **सिमस्मै** सिमशब्दः सर्वशब्दपर्यायः, सप्तम्यर्थे चतुर्थी। सर्वस्मिन् लोके **तनुते** विस्तारयति। यद्वा वासो वासरम् अहः, तत् सर्वस्मात् अस्माल्लोकादपनीय रात्री तमस्तनुते। अत्र निरुक्तं-'तत्सूर्यस्य देवत्वं तन्महित्वं मध्ये यत्कर्मणां क्रियमाणानां विततं संह्रियते यदासौ अयुक्त हरणानादित्यरश्मीन् हरितोऽश्वानिति वा अथ रात्री वासस्तनुते सिमस्मै वेसरमहरवयुवती सर्वस्मात्' (निरु. ४।११) इति। महित्वम्। मह पूजायाम्।' औणादिक इन्प्रत्ययः। 'तस्य भावस्त्वतलौ' (पा. सू. ५।१।११९)। मध्या, मध्यशब्दात् सप्तम्येकवचनस्य 'सुपां सुलुक्' इति डादेशः। कर्तोः। करोतेरौणादिकः स्तुन्प्रत्ययः। विततम्, विपूर्वात्तनोतेः कर्मणि निष्ठा, उदित्त्वेन क्त्वाप्रत्यये इटो विकल्पनात् 'यस्य विभाषा' इति इट्प्रतिषेधः। जभार 'हृग्रहोर्भः०' इति भत्वम्। अयुक्त, युजेर्लुङि 'झलो झलि' इति सिचो लोपः। सधस्थात्, 'घञर्थे कविधानम्' इति अधिकरणे कप्रत्ययः। 'सधमादस्थयोश्छन्दसि' इति सधादेशः।

तन्मित्रस्य वरुणस्याभिचक्षे
सूर्यो रूपं कृणुते द्योरुपस्थे।
अनन्तमन्यद्रुशदस्य पाजः
कृष्णमन्यद्धरितः सं भरन्ति ॥२॥ ऋ. १।११५।५

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

तत् । मित्रस्य । वरुणस्य । अभिऽचक्षे । सूर्यः । रूपम् । कृणुते । द्योः । उपऽस्थे । अनन्तम् । अन्यत् । रुशत् । अस्य । पाजः । कृष्णम् । अन्यत् । हरितः । सम् । भरन्ति ॥२॥

तत् तदानीम् उदयसमये **मित्रस्य वरुणस्य** एतदुभयोपलक्षितस्य सर्वस्य जगतः **अभिचक्षे** आभिमुख्येन प्रकाशनाय **द्योः** नभसः **उपस्थे** उपस्थाने मध्ये **सूर्यः** सर्वस्य प्रेरकः सविता **रूपं** सर्वस्य निरूपकं प्रकाशकं तेजः **कृणुते** करोति । अपि च **अस्य** सूर्यस्य **हरितः** रसहरणशीला रश्मयः हरिद्वर्णाः अश्वा वा **अनन्तम्** अवसानरहितं कृत्स्नस्य जगतो व्यापकं **रुशत्** दीप्यमानं श्वेतवर्णं **पाजः**, बलनामैतत् । बलयुक्तम् अतिबलस्यापि नैशस्य तमसो निवारणे समर्थम् अन्यत् तमसो विलक्षणं तेजः **सं भरन्ति** अहनि स्वकीयागमनेन निष्पादयन्ति । तथा **कृष्णं** कृष्णवर्णम् **अन्यत्** तमः स्वकीयापगमनेन रात्रौ । अस्य रश्मयोऽप्येवं कुर्वन्ति किमु वक्तव्यं तस्य माहात्म्यमिति सूर्यस्य स्तुतिः । अभिचक्षे । संपदादिलक्षणो भावे क्विप् । द्यौः । 'ङसिङसोश्च' (पा. सू. ६।१।११०) इति पूर्वरूपता । उपस्थे, 'घञर्थे कविधानम्' इति कप्रत्ययः । पाजः । पाति रक्षतीति पाजो बलम् । 'पातेर्बले जुट् च (उ० सू० ४।६४२) इति असुन् जुडागमश्च । छान्दसो मत्वर्थीयस्य विनो लोपः ।

इति नवमेऽनुवाके सप्तविंशं सूक्तम्

चतुर्विंशत्युत्तरशततमं सूक्तम्

षड्ऋचस्यास्य सूक्तस्य वामदेव ऋषिः । इन्द्रो देवता । प्रथमाद्वितीययोऋचोर्गायत्री, तृतीयायाः पादनिचृद्गायत्री, [चतुर्थ्यादितृचस्य च त्रिष्टुप्] छन्दांसि ।

तनूपृष्ठे षडहे 'कया नश्चित्र आ भुवत्' इत्यस्य विनियोगः 'यद् द्याव इन्द्र ते शतम्' (अथर्व. २०।८१) इत्यनेन सह उक्तः ।

कया नश्चित्र आ भुवदूती सदावृधः सखा ।
कया शचिष्ठया वृता ॥१॥ ऋ. ४।३१।१

पदपाठः

कया । नः । चित्रः । आ । भुवत् । ऊती । सदाऽवृधः । सखा । कया । शचिष्ठया । वृता ॥१॥

सदावृधः सदा वर्धमानः **चित्रः** चायनीयः पूजनीयः **सखा** मित्रभूत इन्द्रः **कया ऊती** ऊत्या तर्पणेन **नः** अस्मान् **आ भुवत्** आभिमुख्येन भवेत् । **शचिष्ठया** प्रज्ञावत्तमया प्रज्ञासहितमनुष्ठीयमानेन **कया वृता** केन वर्तनेन कर्मणा चाभिमुखो भवेत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कस्त्वा सत्यो मदानां मंहिष्ठो मत्सदन्धसः ।
दृल्हा चिदारुजे वसु ॥२॥ ऋ. ४।३१।२

पदपाठः

कः । त्वा । सत्यः । मदानाम् । मंहिष्ठः । मत्सत् । अन्धसः । दृल्हा । चित् । आऽरुजे । वसु ॥२॥

मंहिष्ठः पूजनीयः **सत्यः** सत्यभूतः **मदानां** मदकारकाणां मध्ये **कः** मदकरः **अन्धसः** सोमस्य रसः **दृल्हा चित्** दृढान्यपि **वसु** वसूनि शत्रूणां धनानि **आरुजे आ** समन्तात् भङ्क्तुं हे इन्द्र ! त्वां **मत्सत्** मादयेत् ।

अभी षु णः सखीनामविता जरित्ऋृणाम् ।
शतं भवास्यूतिभिः ॥३॥ ऋ ४।३१।३

पदपाठः

अभि । सु । नः । सखीनाम् । अविता । जरित्ऋृणाम् । शतम् । भवासि । ऊतिऽभिः ॥३॥

हे इन्द्र ! त्वं **सखीनां** समानख्यातीनां जरित्ऋृणां स्तोतृजनानाम् **अविता** रक्षिता त्वं शतं शतेन बह्वीभिः **ऊतिभिः** रक्षाभिः सह **नः** अस्माकं **सु** सुष्ठु **अभि** भवासि अभिमुखो भव ।

इमा नु कं भुवना सीषधामेन्द्रश्च विश्वे च देवाः ।
यज्ञं च नस्तन्वं च प्रजां
चादित्यैरिन्द्रः सह चीक्लृपाति ॥४॥ ऋ. १०।१५७।१-२

पदपाठः

इमा । नु । कम् । भुवना । सीसधाम । इन्द्रः । च । विश्वे । च । देवाः । यज्ञम् । च । नः । तन्वम् । च । प्रऽजाम् । च । आदित्यैः । इन्द्रः । सह । चीक्लृपाति ॥४॥

इमा इमानि प्रदृश्यमानानि **भुवना** भुवनानि **नु** क्षिप्रं **सीषधाम** साधयामः वशीकुर्मः । **कम्** इति पूरकः । यद्वा, इमानि सर्वाणि भूतजातान्यस्मभ्यं कं सुखं सींसधाम । साधयन्तु । पुरुषव्यत्ययः । **इन्द्रश्च विश्वे** सर्वे अन्ये **देवाः** च स्तुत्या प्रीता इममर्थं साधयन्तु । **नः** अस्माकं **यज्ञं** ज्योतिष्टोमादिकं यागं **तन्वं** शरीरं च **प्रजां** पुत्रादिकांश्च **आदित्यैः** अदितिपुत्रैरन्यैर्देवैः सह वर्तमानः **इन्द्रः चीक्लृपाति** कल्पयतु । यज्ञादिकं स्वव्यापारसमर्थं करोतु ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आदित्यैरिन्द्रः सगणो मरुद्भिरस्माकं
भूत्वविता तनूनाम् ।
हत्वाय देवा असुरान् यदायन्
देवा देवत्वमभिरक्षमाणाः ॥५॥ ऋ. १०।१५७।३-४

पदपाठः

आदित्यैः । इन्द्रः । सऽगणः । मरुत्ऽभिः । अस्माकम् । भूतु । अविता । तनूनाम् । हत्वाय । देवाः । असुरान् । यत् । आयन् । देवाः । देवऽत्वम् । अभिऽरक्षमाणाः ॥५॥

आदित्यैः अदितिपुत्रैर्मित्रादिभिः **मरुद्भिः** च **सगणः** सहितः **इन्द्रः अस्माकं तनूनां** शरीराणां तनयानां वा **अविता भूतु** रक्षिता भवतु । **देवाः** इन्द्रादयः **असुरान्** क्षेपकान् वृत्रादीन् **हत्वाय** हत्वा विनाश्य **यत्** यदा **आयन्** आगच्छन् स्वकीयं स्थानं प्राप्नुवन् तदानीं ते **देवाः देवत्वम्** आत्मीयममृतत्वम् **अभिरक्षमाणाः** अभितः सर्वतो रक्षन्तोऽभूवन् । बाधकाभावात् सर्वत्र प्रख्यापितवन्त इत्यर्थः ।

प्रत्यञ्चमर्कमनयञ्छचीभिरादित्
स्वधामिषिरां पर्यपश्यन् ।
अया वाजं देवहितं सनेम
मदेम शतहिमाः सुवीराः ॥६॥ ऋ. १०।१५७।५

पदपाठः

प्रत्यञ्चम् । अर्कम् । अनयन् । शचीभिः । आत् । इत् । स्वधाम् । इषिराम् । परि । अपश्यन् । अया । वाजम् । देवऽहितम् । सनेम । मदेम । शतऽहिमाः । सुऽवीराः ॥६॥

शचीभिः कर्मभिः परिचरणात्मकैः सार्धम् **अर्कम्** अर्चनसाधनं स्तोत्रं **प्रत्यञ्चम्** इन्द्रादीन् प्रत्यञ्चत् **अनयन्** स्तोतारः प्रापयन् । यदैवम् **आदित्** अनन्तरमेव **इषिरां** गमनशीलं **स्वधां** वृष्टचुदकं **पर्यपश्यन्** सर्वे जनाः परितः पश्यन्ति । यद्वा इषिरामेषणीयां स्वधाम् । अन्ननामैतत् । हविर्लक्षणमन्नं सर्वे देवाः परिपश्यन्ति ।

इति नवमेऽनुवाके अष्टाविंशं सूक्तम् ।

पञ्चविंशत्युत्तरशततमं सूक्तम्

सप्तर्चस्यास्य सूक्तस्य सुकीर्तिर्ऋषिः । प्रथमादितृचस्य षष्ठीसप्तम्योऋचोश्चेन्द्रः, चतुर्थीपञ्चम्योश्चाश्विनौ देवताः । प्रथमादितृचस्य पञ्चम्यादितृचस्य च त्रिष्टुप्, चतुर्थ्याश्चानुष्टुप् छन्दसी ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृष्ठयस्य षष्ठेऽहनि 'अपेन्द्र प्राचो मघवन्नमित्रान्' इति सुकीर्त्याख्यस्य सकलसूक्तस्य पच्छः शंसने प्राप्ते चतुर्थीम् अर्धर्चशः शंसति। तद् उक्तं वैताने—" 'अपेन्द्र प्राचो मघवन्नमित्रान्' इति सुकीर्तिम्। चतुर्थीमर्धर्चशः" (वैता. श्रौ. ३२।१३) इति।

सौत्रामण्यां गृहीतेष्वाज्येषु 'कुविदङ्ग यवमन्तः' (अथर्व. २०।१२५।२) इति ऋचा पयोग्रहान् गृह्णन्तमध्वर्युम् अभिमन्त्रयते। तद् उक्तं वैताने—'गृहीतेष्वाज्येषु 'कुविदङ्ग यवमन्त' इति पयोग्रहान् गृह्णन्तम्" (वैता. श्रौ. ३०।१०) इति।

तत्रैव वपामार्जनादनन्तरम् 'युवं सुराममश्विना' (अथर्व. २०।१२५।४-७) इति चतसृभिर्ऋग्भिः पयःसुराग्रहाणां होमान् अनुमन्त्रयते। तद् उक्तं वैताने—"वपामार्जनाद् 'युवं सुराममश्विना' इति चतसृभिः पयःसुराग्रहाणान्" (वैता. श्रौ. ३०।११) ति।

अपेन्द्र प्राचो मघवन्नमित्रा-
नपापाचो अभिभूते नुदस्व।
अपोदीचो अप शूराधराच उरौ
यथा तव शर्मन् मदेम ॥१॥ ऋ. १०।१३१।१

पदपाठः

अप। इन्द्र। प्राचः। मघवन्। अमित्रान्। अप। अपाचः। अभिऽभूते। नुदस्व। अप। उदीचः। अप। शूर। अधराचः। उरौ। यथा। तव। शर्मन्। मदेम ॥१॥

हे **मघवन्निन्द्र! प्राचः** प्रमुखमञ्चतः प्राग्देशे वर्तमानान्। अस्मत्तः पूर्वभागे वर्तमानानित्यर्थः। प्रपूर्वादञ्चतेः 'ऋत्विक्०' इत्यादिना क्विन्। 'अनिदिताम्' इति नलोपः। शसि 'अचः' इत्यकारलोपे 'चौ' इति दीर्घत्वम्। तादृशान् **विश्वान्** सर्वान् **अमित्रान्** शत्रून् **अप नुदस्व** अस्मत्तोऽपगमय। तथा हे **अभिभूते!** शत्रूणामभिभवितरिन्द्र! **अपाचः** अपमुखमञ्चतः पृष्ठभागे वर्तमानान् सर्वान् शत्रून् अप नुदस्व। **अपि च उदीचः** ऊर्ध्वमञ्चतः उपरि वर्तमानान्। उत्पूर्वादञ्चतेः पूर्ववत् क्विनि 'उद ईत्' इत्यञ्चतेरकारस्येकारः। तथाविधानपि शत्रून् अप नुदस्व। तथा हे **शूर!** शौर्यवन्निन्द्र! **अधराचः** अधरदेशमधोभागमञ्चतश्च अधस्तनानपि शत्रून् अप नुदस्व। अधरशब्दोपपदादञ्चतेः शसि पूर्ववत् प्रक्रिया। **उरौ** विस्तीर्णे तव सम्बन्धिनि त्वया दत्ते **शर्मन्** शर्मणि गृहे सुखे वा **यथा** वयं **मदेम** निरुपद्रवाः सन्तो हृष्येम तथा त्वं सर्वत्र वर्तमानानस्मदीयान् शत्रून् विनाशयेत्यर्थः। 'अप प्राच इन्द्र विश्वाँ अमित्रानपपाचो अभिभूते नुदस्व" इति ऋक्पाठः (१०।१३१।१)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

**कुविदङ्ग यवमन्तो यवं चिद्यथा दान्त्यनुपूर्वं वियूय ।
इहेहैषां कृणुहि भोजनानि
ये बर्हिषो नमोवृक्तिं न जग्मुः ॥२॥** ऋ. १०।१३१।२

पदपाठः

कुवित् । अङ्ग । यवऽमन्तः । यवम् । चित् । यथा । दान्ति । अनुऽपूर्वम् । विऽयूय । इहऽइह । एषाम् । कृणुहि । भोजनानि । ये । बर्हिषः । नमःऽवृक्तिम् । न । जग्मुः ॥२॥

अङ्ग हे इन्द्र ! **यवमन्तः** यवादिधान्ययुक्ताः कर्षकाः यवं **चित्** । उपलक्षणमेतत् । यवगोधूमादीन् **अनुपूर्वं** यो यो धान्यविशेषः प्रथमं पच्यते तेनानुपूर्व्येण **वियूय** पृथक्कृत्य **यथा कुवित्** बहुलं **दान्ति** लुनन्ति । दाप् लवने, आदादिकः । विपूर्वात् यौतेर्ल्यपि 'युप्लुवोर्दीर्घश्छन्दसि' (पा. सू. ६ ४।५८) इति दीर्घः । एवम् **इह इह** अस्मिन्नस्मिन् देशे सर्वस्मिन् **एषां** यजमानानां **भोजनानि** । धननामैतत् । भोगसाधनानि धनानि **कृणुहि** कुरु । यस्मिन् यस्मिन् देशे यद्धनमपेक्षितं तदनुगुणं प्रयच्छेत्यर्थः । 'उतश्च प्रत्ययाच्छन्दसि वा वचनम्' (पा. सू. ६।४।१०६.१) इति हेर्लुगभावः । एषामित्युक्तं के पुनरिमे इत्यत आह । **ये** यजमानाः **बर्हिषः** यज्ञस्य **नमोवृक्तिं** नमसो हविर्लक्षणस्यान्नस्य नमस्कारात्मकस्य स्तोत्रस्य वा वर्जनमकरणं न **जग्मुः** न प्राप्नुवन्ति किन्तु सर्वदा हविर्भिर्यजन्ति स्तुतिभिः स्तुवन्ति च । एषां कृणुहीत्यन्वयः ।

**नहि स्थूर्यृतुथा यातमस्ति नोत श्रवो विविदे संगमेषु ।
गव्यन्त इन्द्रं सख्याय
विप्रा अश्वायन्तो वृषणं वाजयन्तः ॥३॥** ऋ. १०।१३१।३

पदपाठः

नहि । स्थूरि । ऋतुऽथा । यातम् । अस्ति । न । उत । श्रवः । विविदे । सम्ऽगमेषु । गव्यन्तः । इन्द्रम् । सख्याय । विप्राः । अश्वऽयन्तः । वृषणम् । वाजयन्तः ॥३॥

एकेन धुर्येण युक्तमनः **स्थूरि** इत्युच्यते । **ऋतुथा** ऋतौ यद्यस्मिन् काले प्राप्तव्यं तद्योग्यकाले स्थूरि अनः **यातं** तं देशं प्राप्तं **नहि अस्ति** न हि भवति । एकेन धुर्येण युक्तः शकटः शीघ्रं गन्तव्यं न प्राप्नोतीत्यर्थः । **उत** अपि च **संगमेषु** सङ्ग्रामेषु **श्रवः** अन्नं यशो वा **न विविदे** न लभते । इन्द्रस्तु उक्तविलक्षणः । **वृषणं** वर्षितारं तम् **इन्द्रं गव्यन्तः** गा इच्छन्तः **विप्राः** मेधाविनो वयं **सख्याय** सखिकर्मणे आह्वयाम इति शेषः । कथंभूताः ? **अश्वायन्तः** अश्वानप्यात्मन इच्छन्तः **वाजयन्तः** अन्नकामा बलकामाश्च ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

युवं सुराममश्विना नमुचावासुरे सचा ।
विपिपाना शुभस्पती इन्द्रं कर्मस्वावतम् ॥४॥

ऋ. १०।१३१।४

पदपाठः

युवम् । सुरामम् । अश्विना । नमुचौ । आसुरे । सचा । विऽपिपाना । शुभः । पती इति । इन्द्रम् । कर्मऽसु । आवतम् ॥४॥

हे **अश्विना** अश्विनौ ! हे **शुभस्पती** ! उदकस्य शोभनालङ्कारस्य वा पती पालयितारौ **सुरामं** सुष्ठु रमणसाधनमिदं हविः **विपिपाना** विशेषेण पीतवन्तौ **युवं** युवां **सचा** सन्तौ संगतौ **आसुरे** असुरपुत्रे **नमुचौ** एतत्संज्ञे असुरे हन्तव्ये सति **कर्मसु** योधनकर्मसु **इन्द्रम् आवतम्** अरक्षतम् । विपिपाना, 'पा पाने' इत्यस्मात् लिटः कानच् । 'बहुलं छन्दसि' इत्यभ्यासस्येत्वम् ।

पुत्रमिव पितरावश्विनोभेन्द्रावथुः काव्यैर्दंसनाभिः ।
यत्सुरामं व्यपिबः शचीभिः
सरस्वती त्वा मघवन्नभिष्णक् ॥५॥ ऋ. १०।१३१।४

पदपाठः

पुत्रम्ऽइव । पितरौ । अश्विना । उभा । इन्द्र । आवथुः । काव्यैः । दंसनाभिः । यत् । सुरामम् । वि । अपिबः । शचीभिः । सरस्वती । त्वा । मघऽवन् । अभिष्णक् ॥५॥

हे **इन्द्र** ! त्वां **पितरौ** मातापितरौ **पुत्रमिव** । 'पिता मात्रा' (पा. सू. १।२। ७०) इति पितुः शेषः । **उभा** उभौ **अश्विनौ काव्यैः** प्रशस्यैः **दंसनाभिः** आत्मीयैः कर्मभिः **आवथुः** । मध्यमो व्यत्ययेन । आवतुः ररक्षतुः । त्वं च **सुरामं** सुखेन रमणसाधनं हविः **यत्** यदा **शचीभिः** शक्तिभिः सार्धं **व्यपिबः** विशेषेण पीतवानसि तदा हे **मघवन्** ! धनवन्निन्द्र ! **सरस्वती** देवी **त्वा** त्वाम् **अभिष्णक्** उपासेवत । भिष्णक् उपसेवायाम् । कण्ड्वादिः । छान्दसो यगभावः । लङि 'बहुलं छन्दसि' इति शपो लुक्' । 'हल्ङ्याब्भ्यः' इति लोपः ।

इन्द्रः सुत्रामा स्ववाँ अवोभिः
सुमृडीको भवतु विश्ववेदाः ।
बाधतां द्वेषो अभयं नः कृणोतु
सुवीर्यस्य पतयः स्याम ॥६॥ ऋ. १०।१३१।६.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

इन्द्रः । सुऽत्रामा । स्वऽवान् । अवःऽभिः । सुऽमृडीकः । भवतु । विश्वऽवेदाः । बाधताम् । द्वेषः । अभयम् । नः । कृणोतु । सुऽवीर्यस्य । पतयः । स्याम ।।६।।

व्याख्यातोऽयं मन्त्रः सायणेनैव (अथर्व० ७।९१।१)।

स सुत्रामा स्ववाँ इन्द्रो
अस्मदाराच्चिद् द्वेषः सनुतर्युयोतु ।
तस्य वयं सुमतौ यज्ञियस्यापि
भद्रे सौमनसे स्याम ।।७।। ऋ १०।१३१।७

पदपाठः

सः । सुत्रामा । स्वऽवान् । इन्द्रः । अस्मत् । आरात् । चित् । द्वेषः । सनुतः । युयोतु । तस्य । वयम् । सुऽमतौ । यज्ञियस्य । अपि । भद्रे । सौमनसे । स्याम ।।८।।

व्याख्यातोऽयं मन्त्रः सायणेन (अथर्व० ७।९२।१)।

इति नवमेऽनुवाके एकोनविंशं सूक्तम् ।

षड्विंशत्युत्तरशततमं सूक्तम्

त्रयोविंशत्यृचस्यास्य सूक्तस्य वृषाकपिर्ऋषिरिन्द्राणी च ऋषिका । इन्द्रो देवता । पङ्क्तिश्छन्दः ।

पृष्ठ्यस्य षष्ठेऽहनि 'वि हि सोतोरसृक्षत' इति वृषाकप्याख्यं सूक्तं सूत्रोक्तधर्मकं शंसति । तद् उक्तं वैताने— "वि हि सोतोरसृक्षत' इति वृषाकपिम्" (वैता. श्रौ. ३२।१४) इत्यादि ।

वि हि सोतोरसृक्षत
नेन्द्रं देवममंसत ।
यत्रामदद् वृषाकपिरर्यः पुष्टेषु
मत्सखा विश्वस्मादिन्द्र उत्तरः ।।१।। ऋ. १०।८६।१

पदपाठः

वि । हि । सोतोः । असृक्षत । न । इन्द्रम् । अमंसत । यत्र । अमदत् । वृषाकपिः । अर्यः । पुष्टेषु । मत्ऽसखा । विश्वस्मात् । इन्द्रः । उत्ऽतरः ।।१।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सोतोः सोमाभिषवं कर्तुं **वि असृक्षत**। यागं प्रति मया विसृष्टा अनुज्ञाताः स्तोतारो वृषाकपेर्यष्टारः। हि इति पूरणः। तत्र देवं द्योतमानम् **इन्द्रं मां न अमंसत**। मया प्रेरिताः सन्तोऽपि ते स्तोतारो न स्तुतवन्तः। किन्तु मम पुत्रं वृषाकपिमेव स्तुतवन्तः। **यत्र** येषु **पुष्टेषु** सोमेन प्रवृद्धेषु यागेषु **अर्यः** स्वामी **वृषाकपिः** मम पुत्रः **मत्सखा** मम सखिभूतः सन् **अमदत्** सोमपानेन हृष्टोऽभूत्। यद्यप्येवं तथापि **इन्द्रः** अहं **विश्वस्मात्** सर्वस्माज्जगतः **उत्तरः** उत्कृष्टतरः। माधवभट्टास्तु वि हि सोतोरित्येषर्गिन्द्राण्या वाक्यमिति मन्यन्ते। तथा च तद्वचनम्। इन्द्राण्यै कल्पितं हविः कश्चिन्मृगोऽदूदुषदिन्द्रपुत्रस्य वृषाकपेर्विषये वर्तमानः। तदेन्द्रमिन्द्राणी वदति। तस्मिन् पक्षे त्वस्या ऋचोऽयमर्थः। सोतोः सोमाभिषवं कर्तुं वि ह्यसृक्षत। उपरतसोमाभिषवा आसन् यजमाना इत्यर्थः। किञ्च मम पतिमिन्द्रं देवं नामंसत स्तोतारो न स्तुवन्ति। कुत्रेति अत्राह। यत्र यस्मिन् जनपदे पुष्टेषु प्रवृद्धेषु धनैश्वर्यः स्वामी वृषाकपिरमदत्। मत्सखा मत्प्रियश्चेन्द्रो विश्वस्मात् सर्वस्माज्जगत उत्तरः उत्कृष्टतरः।

परा हीन्द्र धावसि वृषाकपेरति व्यथिः।
नो अह प्र विन्दस्यन्यत्र
सोमपीतये विश्वस्मादिन्द्र उत्तरः ॥२॥ ऋ. १०।८६।२

पदपाठः

परा। हि। इन्द्र। धावसि। वृषाकपेः। अति। व्यथिः। नो इति। अह। प्र। विन्दसि। अन्यत्र। सोमऽपीतये। विश्वस्मात्। इन्द्रः। उत्ऽतरः ॥२॥

हे **इन्द्र**! त्वम् **अति** अत्यन्तं **व्यथिः** चलितः **वृषाकपेः** वृषाकपिं **परा धावसि** प्रतिगच्छसि। **अन्यत्र सोमपीतये** सोमपानाय **नो अह** नैव च **प्र विन्दसि** प्रगच्छसीत्यर्थः। सोऽयम् इन्द्रः विश्वस्मात् उत्तरः।

किमयं त्वां वृषाकपिश्चकार हरितो मृगः।
यस्मा इरस्यसीदु न्वर्यो वा
पुष्टिमद् वसु विश्वस्मादिन्द्र उत्तरः ॥ ऋ. १०।८३।३

पदपाठः

किम्। अयम्। त्वाम्। वृषाकपिः। चकार। हरितः। मृगः। यस्मै। इरस्यसि। इत्। ऊं इति। नु। अर्यः। वा। पुष्टिऽमत्। वसु। विश्वस्मात्। इन्द्रः। उत्ऽतरः ॥३॥

हे इन्द्र! **त्वां** प्रति **हरितः** हरितवर्णः **मृगः** मृगभूतः **अयं** वृषाकपिः। मृगजातिर्हि वृषाकपिः। **किं** प्रियं **चकार** अकार्षीत्। **यस्मै** वृषाकपये **पुष्टिमत्**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पोषयुक्तं **वसु** धनम् **अर्यो** वा उदार इव स त्वं **नु** क्षिप्रम् **इरस्यसीत्** प्रयच्छस्येव । यः **इन्द्रः विश्वस्मात् उत्तरः** ।

यमिमं त्वं वृषाकपिं प्रियमिन्द्राभिरक्षसि ।
श्वा न्वस्य जम्भिषदपि कर्णे
वराहयुर्विश्वस्मादिन्द्र उत्तरः ॥४॥ ऋ. १०।८६।४

पदपाठः

यम् । इमम् । त्वम् । वृषाकपिम् । प्रियम् । इन्द्र । अभिऽरक्षसि । श्वा । नु । अस्य । जम्भिषत् । अपि । कर्णे । वराहऽयुः । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥४॥

हे **इन्द्र** ! **त्वं प्रियम्** इष्टं पुत्रं **यमिमं वृषाकपिम्** अभिरक्षसि परिपालयसि **अस्य** एनं वृषाकपिम् । द्वितीयार्थे षष्ठी । **वराहयुः** वराहमिच्छन् **श्वा नु** क्षिप्रं **जम्भिषत्** भक्षयतु । अपि च **कर्णे** गृह्णात्विति शेषः । श्वानो हि वराहमिच्छन्ति । सिद्धमन्यत् ।

प्रिया तष्टानि मे कपिर्व्यक्ता व्यदूदुषत् ।
शिरो न्वस्य राविषं न सुगं
दुष्कृते भुवं विश्वस्मादिन्द्र उत्तरः ॥५॥ ऋ. १०।८६।५

पदपाठः

प्रिया । तष्टानि । मे । कपिः । विऽअक्ता । वि । अदूदुषत् । शिरः । नु । अस्य । राविषम् । न । सुऽगम् । दुःऽकृते । भुवम् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥५॥

मे मह्यम् इन्द्राण्यै **तष्टानि** यजमानैः कल्पितानि **प्रिया** प्रियाणि **व्यक्ता** व्यक्तान्याज्यैर्विशेषेणाक्तानि हवींषि कश्चित् वृषाकपेर्विषये वर्तमानः **कपिः व्यदूदुषत्** दूषयामास । ततोऽहम् **अस्य** तत्कपिस्वामिनो वृषाकपेः **शिरो नु** क्षिप्रं **राविषं** लुनीयाम् । **दुष्कृते** दुष्टस्य कर्मणः कर्त्रे वृषाकपयेऽस्मै **सुगं** सुखं **न भुवम्** अहं न भवेयम् । अस्मै सुखप्रदात्री न भवामीत्यर्थः । अस्या मम पतिः **इन्द्रः विश्वस्मात् उत्तरः** ।

न मत् स्त्री सुभसत्तरा न
सुयाशुतरा भुवत् ।
न मत् प्रतिच्यवीयसी न
सक्थ्युद्यमीयसी विश्वस्मादिन्द्र उत्तरः ॥६॥ ऋ. १०।८६।६

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

न। मत्। स्त्री। सुभसत्ऽतरा। न। सुयाशुऽतरा। भुवत्। न। मत्। प्रतिऽच्यवीयसी। न। सक्थि। उत्ऽयमीयसी। विश्वस्मात्। इन्द्रः उत्ऽतरः ॥६॥

मत् मत्तोऽन्या **स्त्री** नारी **सुभसत्तरा** अतिशयेन सुभगा **न भुवत्** न भवति। नास्तीत्यर्थः। किञ्च मत्तोऽन्या स्त्री सुयाशुतरा अतिशयेन सुसुखाऽतिशयेन सुपुत्रा वा **न** भवति। तथा च मन्त्रान्तरं—'ददाति मह्यं यादुरी याशूनां भोज्या शता' (ऋ. सं. १।१२६।६) इति। किञ्च **मत्** मत्तोऽन्या **प्रतिच्यवीयसी** पुमांसं प्रति शरीरस्यात्यन्तं च्यावयित्री **न** अस्ति। किञ्च मत्तोऽन्या स्त्री **सक्थ्युद्यमीयसी** सम्भोगेऽत्यन्तमुत्क्षेप्त्री न अस्ति। न मत्तोऽन्या काचिदपि नारी मैथुनेऽनुगुणं सक्थ्युद्यच्छतीत्यर्थः। मम पतिः **इन्द्रः विश्वस्मात् उत्तरः** उत्कृष्टः।

उवे अम्ब सुलाभिके यथेवाङ्ग भविष्यति।
भसन्मे अम्ब सक्थि मे शिरो मे वीव
हृष्यति विश्वस्मादिन्द्र उत्तरः ॥७॥ ऋ. १०।८६।७

पदपाठः

उवे। अम्ब। सुलाभिके। यथाऽइव। अङ्ग। भविष्यति। भसत्। मे। अम्ब। सक्थि। मे। शिरः। मे। विऽइव। हृष्यति। विश्वस्मात्। इन्द्रः। उत्ऽतरः ॥७॥

एवमिन्द्राण्या शप्तो वृषाकपिर्ब्रवीति। **उवे** इति सम्बोधनार्थी निपातः। हे **अम्ब** मातः! **सुलाभिके** शोभनलाभे! त्वया **यथेव** येन प्रकारेणैवोक्तं तथैव **तत् अङ्ग** क्षिप्रं **भविष्यति** भवतु। किमनेन त्वदनुप्रीतिकारिणाग्रहेण मम प्रयोजनम्। किञ्च मे मम पितुः त्वदीयो **भसत्** भग उपयुज्यताम्। किञ्च **अम्ब** हे मातः! मम पितुस्त्वदीयं **सक्थि** चोपयुज्यताम्। किञ्च **मे** मम पितरमिन्द्रं त्वदीयं **शिरः** च प्रियालापेन **वीव** यथा कोकिलादिः पक्षी तद्वत् **हृष्यति** हर्षयतु। मम पिता **इन्द्रः विश्वस्मात्** उत्तरः।

किं सुबाहो स्वङ्गुरे पृथुष्टो पृथुजाघने।
किं शूरपत्नि नस्त्वमभ्यमीषि
वृषाकपिं विश्वस्मादिन्द्र उत्तरः ॥८॥ ऋ. १०।८६।८

पदपाठः

किम्। सुबाहो इति सुऽबाहो। सुऽअङ्गुरे। पृथुस्तो इति पृथुऽस्तो।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृथुऽजघने । किम् । शूरऽपत्नि । नः । त्वम् । अभि । अमीषि । वृषाकपिम् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥८॥

क्रुद्धामिन्द्र उपशमयति । हे **सुबाहो** ! हे शोभनबाहो ! **स्वङ्गुरे** शोभनाङ्गुलिके ! **पृथुष्टो** ! पृथुकेशसंघाते ! **पृथुजघने** हे विस्तीर्णजघने ! शूरपत्नि ! वीरभार्ये हे इन्द्राणि ! त्वं **नः** अस्मदीयं **वृषाकपिं किं** किमर्थम् **अभ्यमीषि** अभिक्रुध्यसि । एकः किंशब्दः पूरणः । यस्य पिता **इन्द्रः** अह **विश्वस्मात् उत्तरः** ।

अवीरामिव मामयं शरारुरभि मन्यते ।
उताहमस्मि वीरिणीन्द्रपत्नी
मरुत्सखा विश्वस्मादिन्द्र उत्तरः ॥९॥ ऋ. १०।८६।९

पदपाठः

अवीराम्ऽइव । माम् । अयम् । शरारुः । अभि । मन्यते । उत । अहम् । अस्मि । वीरिणी । इन्द्रऽपत्नी । मरुत्ऽसखा । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥९॥

पुनरिन्द्रमिन्द्राणी ब्रवीति । **शरारुः** घातुको मृगः **अयं** वृषाकपिः **माम्** इन्द्राणीम् **अवीरामिव अभिमन्यते** विजानाति । **उत** अपि च **इन्द्रपत्नी** इन्द्रस्य भार्या **अहम्** इन्द्राणी **वीरिणी** पुत्रवती **मरुत्सखा** मरुद्भिर्युक्ता च **अस्मि** भवामि । यस्या मम पतिः **इन्द्रः विश्वस्मात् उत्तरः** ।

संहोत्रं स्म पुरा नारी समनं वाव गच्छति ।
वेधा ऋतस्य वीरिणीन्द्रपत्नी
महीयते विश्वस्मादिन्द्र उत्तरः ॥१०॥ ऋ. १०।८६।१०

पदपाठः

सम्ऽहोत्रम् । स्म । पुरा । नारी । समनम् । वा । अव । गच्छति । वेधाः । ऋतस्य । वीरिणी । इन्द्रऽपत्नी । महीयते । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१०॥

नारी स्त्री **ऋतस्य** सत्यस्य **वेधाः** विधात्री **वीरिणी** पुत्रवती **इन्द्रपत्नी** इन्द्रस्य भार्येन्द्राणी **संहोत्रं स्म** समीचीनं यज्ञं खलु **समनं** सङ्ग्रामं वा । 'समितिः समनम्' इति सङ्ग्रामनामसु पाठात् । **अव** प्रति पुरा गच्छति । **महीयते** स्तोतृभिः स्तूयते वा । तस्या मम पतिः **इन्द्रः विश्वस्मात् उत्तरः** ।

इन्द्राणीमासु नारिषु सुभगामहमश्रवम् ।
नह्यस्या अपरं चन जरसा
मरते पतिर्विश्वस्मादिन्द्र उत्तरः ॥११॥ ऋ. १०।८६।११

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

इन्द्राणीम् । आसु । नारिषु । सुऽभगाम् । अहम् । अश्रवम् । नहि । अस्याः । अपरम् । चन । जरसा । मरते । पतिः । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥११॥

अथेन्द्राणीमिन्द्रः स्तौति । **आसु** सौभाग्यवत्तया प्रसिद्धासु **नारिषु** स्त्रीषु स्त्रीणां मध्ये **इन्द्राणीं सुभगां** सौभाग्यवतीम् **अहम्** इन्द्रः **अश्रवम्** अश्रौषम् । किञ्च **अस्याः** इन्द्राण्याः **पतिः** पालकः **विश्वस्मात् उत्तरः** उत्कृष्टतरः **इन्द्रः अपरं चन** अन्यद्भूतजातमिव **जरसा** वयोहान्या **नहि मरते** न खलु म्रियते । यद्वा इदं वृषाकपेर्वाक्यम् । तस्मिन् पक्षे त्वहमिति शब्दो वृषाकपिपरतया योज्यः । अन्यत्समानम् ।

नाहमिन्द्राणि रारण सख्युर्वृषाकपेर्ऋते ।
यस्येदमप्यं हविः प्रियं देवेषु
गच्छति विश्वस्मादिन्द्र उत्तरः ॥१२॥ ऋ. १०।८६।१२

पदपाठः

न । अहम् । इन्द्राणि । ररण । सख्युः । वृषाकपेः । ऋते । यस्य । इदम् । अप्यम् । हविः । प्रियम् । देवेषु । गच्छति । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१२॥

हे **इन्द्राणि ! अहम्** इन्द्रः **सख्युः** मम सखिभूतात् **वृषाकपेर्ऋते प्रियं** वृषाकपिं विना **न ररण** न रमे । **अप्यम्** अप्सु भवमद्भिर्वा सस्कृत **प्रियं** प्रीतिकरम् **इदम्** उपस्थितं हविः **देवेषु** देवानां मध्ये **यस्य** ममेन्द्रस्य सकाश **गच्छति** । यश्चाहम् **इन्द्रः सर्वस्मात् उत्तरः** । यद्वा अयमर्थः । हे इन्द्राणि ! वृषाकपेः सख्युरिन्द्रादृतेऽहं वृषाकपिर्न ररण न रमे । अन्यत्समानम् ।

वृषाकपायि रेवति सुपुत्र आदु सुस्नुषे ।
घसत् त इन्द्र उक्षणः प्रियं
काचित्करं हविर्विश्वस्मादिन्द्र उत्तरः ॥१३॥
ऋ. १०।८६।१३

पदपाठः

वृषाकपायि । रेवति । सुऽपुत्रे । आत् । ऊँ इति । सुऽस्नुषे । घसत् । ते । इन्द्रः । उक्षणः । प्रियम् । काचित्ऽकरम् । हविः । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१३॥

हे **वृषाकपायि** ! कामानां वर्षकत्वादभीष्टदेशगमनाच्चेन्द्रो वृषाकपिः । तस्य पत्नि ! यद्वा वृषाकपेर्मम मातरित्यर्थः । **रेवति** ! धनवति ! **सुपुत्रे** हे शोभनपुत्रे ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुस्नुषे हे शोभनस्नुषे ! हे इन्द्राणि ! **ते** तवायम् **इन्द्रः उक्षणः** सेचनसमर्थान् **आदु** अनन्तरमेव । शीघ्रमेवेत्यर्थः । **पशून् घसत्** प्राश्नातु । किञ्च **काचित्करम्** कं सुखम् तस्याचित् संघः । तत्करं **हविः प्रियम्** इष्टं कुर्विति शेषः । किञ्च **ते** पतिः **इन्द्रः विश्वस्मात् उत्तरः** । तथा च यास्कः—'वृषाकपायि रेवति सुपुत्रे मध्यमेन, सुस्नुषे माध्यमिकया वाचा । स्नुषा साधु सादिनीति वा साधु सानिनीति वा । प्रियं कुरुष्व सुखाचयकरं हविः सर्वस्माद्य इन्द्र उत्तरः (निरु० १२।९) इति ।

उक्ष्णो हि मे पञ्चदश साकं पचन्ति विंशतिम् ।
उताहमद्मि पीव इदुभा कुक्षी
पृणन्ति मे विश्वस्मादिन्द्र उत्तरः ॥१४॥ ऋ. १०।८६।१४

पदपाठः

उक्षणः । हि । मे । पञ्चदश । साकम् । पचन्ति । विंशतिम् । उत । अहम् । अद्मि । पीवः । इत् । उभा । कुक्षी इति । पृणन्ति । मे । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१४॥

अथेन्द्रो ब्रवीति । **मे** मदर्थं **पञ्चदश** पञ्चदशसङ्ख्याकान् **विंशतिं** विंशतिम् सङ्ख्याकांश्च **उक्षणः** वृषभान् **साकं** सह **मे** मम भार्ययेन्द्राण्या प्रेरिता यष्टारः **पचन्ति** । **उत** अपि च **अहमद्मि** तान् भक्षयामि । जग्ध्वा चाहं **पीव इत्** स्थूल एव भवामीति शेषः । किञ्च **मे** मम **उभा** उभौ **कुक्षी पृणन्ति** सोमेन पूरयन्ति यष्टारः । सोऽहम् **इन्द्रः सर्वस्मात् उत्तरः** ।

वृषभो न तिग्मशृङ्गोऽन्तर्यूथेषु रोरुवत् ।
मन्थस्त इन्द्र शं हृदे यं ते
सुनोति भावयुर्विश्वस्मादिन्द्र उत्तरः ॥१५॥
ऋ. १०।८६।१५

पदपाठः

वृषभः । न । तिग्मऽशृङ्गः । अन्तः । यूथेषु । रोरुवत् । मन्थः । ते । इन्द्र । शम् । हृदे । यम् । ते । सुनोति । भावयुः । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१५॥

अथेन्द्राणी ब्रवीति । **तिग्मशृङ्गः** तीक्ष्णशृङ्गः **वृषभो न** यथा वृषभः **यूथेषु** गोसंघेषु **अन्तः** मध्ये **रोरुवत्** शब्दं कुर्वन् गा अभिरमयति तथा हे **इन्द्र** ! त्वं मामभिरमयेति शेषः । किञ्च हे इन्द्र ! **ते** तव **हृदे** हृदयाय **मन्थः** दध्नो मथनवेलायां शब्दं कुर्वन् **शं** शङ्करो भवत्विति शेषः । किञ्च **ते** तुभ्यं **यं** सोमं **भावयुः** भावमिच्छन्तीन्द्राणी **सुनोति** अभिषुणोति सोऽपि शङ्करो भवत्वित्यर्थः । मम **पतिः इन्द्रः विश्वस्मात् उत्तरः** ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

न सेशे यस्य रम्बतेऽन्तरासक्थ्या कपृत् ।
सेदीशे यस्य रोमशं निषेदुषो
विजृम्भते विश्वस्मादिन्द्र उत्तरः ॥१६॥ ऋ. १०।८६।१६

पदपाठः

न । सः । ईशे । यस्य । रम्बते । अन्तरा । सक्थ्या । कपृत् । सः । इत् । ईशे । यस्य । रोमशम् । निऽसेदुषः । विऽजृम्भते । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१६॥

हे इन्द्र ! **स** जनः **न ईशे** मैथुनं कर्तुं नेष्टे न शक्नोति **यस्य** जनस्य **कपृत्** शेपः **सक्थ्या** सक्थिनी **अन्तरा रम्बते** लम्बते । **सेत्** स एव स्त्रीजने **ईशे** मैथुनं कर्तुं शक्नोति **यस्य** जनस्य **निषेदुषः** शयानस्य **रोमशम्** उपस्थं **विजृम्भते** विवृतं भवति । **यस्य** च **पतिः** इन्द्रः **विश्वस्मात्** उत्तरः ।

न सेशे यस्य रोमशं निषेदुषो विजृम्भते ।
सेदीशे यस्य रम्बतेऽन्तरा सक्थ्या
कपृद् विश्वस्मादिन्द्र उत्तरः ॥१७॥ ऋ. १०।८६।१७

पदपाठः

न । सः । ईशे । यस्य । रोमशम् । निऽसेदुषः । विऽजृम्भते । सः । इत् । ईशे । यस्य । रम्वते । अन्तरा । सक्थ्या । कपृत् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१७॥

सः जनः **न ईशे** मैथुनं कर्तुं नेष्टे **यस्य** जनस्य **निषेदुषः** शयानस्य **रोमशम्** उपस्थं **विजृम्भते** विवृतं भवति । **सेत्** स एव जनः **ईशे** ईष्टे मैथुनं कर्तुं शक्नोति **यस्य** जनस्य **कपृत्** प्रजननं **सक्थ्या** सक्थिनी **अन्तरा रम्बते** लम्बते । सिद्धमन्यत् । पूर्वोक्तव्यतिरेकोऽत्र द्रष्टव्यः । पूर्वस्यामृचि यियप्सुरिन्द्राणीन्द्रं वदति । अत्र त्वयियप्सुरिन्द्र इन्द्राणीं वदतीत्यविरोधः ।

अयमिन्द्र वृषाकपिः परस्वन्तं हतं विदत् ।
असिं सूनां नवं चरुमादेधस्यान
आचितं विश्वस्मादिन्द्र उत्तरः ॥१८॥ १०।८६।१८

पदपाठः

अयम् । इन्द्र । वृषाकपिः । परस्वन्तम् । हतम् । विदत् । असिम् । सूनाम् । नवम् । चरुम् । आत् । एधस्य । अनः । आऽचितम् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१८॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे इन्द्र ! **अयं वृषाकपिः परस्वन्तं** परस्वमात्मनो विषयेऽवर्तमानं **हतं** हिंसितं **विदत्** विन्दतु । तथा हतस्य विशसनाय **असिं** शस्त्रं **सूनाम्** उद्धानं पाकार्थं **नवं** प्रत्यग्रं **चरुं** भाण्डम् **आत्** अनन्तरम् **एधस्य** काष्ठस्य **आचितं** पूर्णम् **अनः** शकटं च विन्दतु । मम पतिः इन्द्रः विश्वस्मात् उत्तरः ।

अयमेमि विचाकशद् विचिन्वन् दासमार्यम् ।
पिबामि पाकसुत्वनोऽभि धीरमचाकशं
विश्वस्माद‍िन्द्र उत्तरः ॥१०॥ ऋ. १०।८६।१९

पदपाठः

अयम् । एमि । विऽचाकशत् । विऽचिन्वन् । दासम् । आर्यम् । पिबामि । पाकऽसुत्वनः । अभि । धीरम् । अचाकशम् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥१९॥

अथेन्द्रो ब्रवीति । **विचाकशत्** पश्यन् यजमानान् **दासम्** उपक्षपयितारंमसुरम् **आर्यम्** अपि च **विचिन्वन्** पृथक्कुर्वन् **अयम्** अहमिन्द्रः **एमि** यज्ञं प्रति गच्छामि । यज्ञं गत्वा च **पाकसुत्वनः** पचतीति पाकः, सुनोतीति सुत्वा । हविषां पक्तुः सोमस्याभिषोतुर्यजमानस्य पाकेन विपक्वेन मनसा सोमस्याभिषोतुर्वा यजमानस्य सम्वन्धिनं सोमं **पिबामि** । तथा **धीरं** धीमन्तं यजमानम् **अभि अचाकशम्** अभि-पश्यामि । योऽहम् इन्द्रः **विश्वस्मात् उत्तरः** ।

धन्व च यत् कृन्तत्रं च कति स्वित् ता वि योजना ।
नेदीयसो वृषाकपेऽस्तमेहि
गृहाँ उप विश्वस्माद‍िन्द्र उत्तरः ॥२०॥ ऋ. १०।८६।२०

पदपाठः

धन्व । च । यत् । कृन्तत्रम् । च । कति । स्वित् । ता । वि । योजना । नेदीयसः । वृषाकपे । अस्तम् । आ । इहि । गृहान् । उप । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥२०॥

धन्व निरुदकोऽरण्यरहितो देशः । **कृन्तत्रं** कर्तनीयमरण्यम् । **यत्** यच्च **धन्व** च कृन्तत्रं च भवति । मृगोद्वासमरण्यमेवंविधं भवति न त्वत्यन्तविपिनम् । तस्य शत्रुनिलयस्यास्मदीयगृहस्य च मध्ये **कति स्वित् ता** तानि **योजना** योजनानि स्थितानि, नात्यन्तदूरे तद्भवतीत्यर्थः । अतः **नेदीयसः** अतिशयेन समीपस्थाच्छत्रुनिलयात् हे **वृषाकपे !** त्वम् **अस्तम्** अस्माकं गृहं वि **एहि** विशेषेणागच्छ । आगत्य च **गृहान्** यज्ञगृहान् **उप गच्छ** । यतोऽहम् इन्द्रः सर्वस्माद‍ुत्कृष्टः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुनरेहि वृषाकपे सुविता कल्पयावहै ।
य एष स्वप्ननंशनोऽस्तमेषि
पथा पुनर्विश्वस्मादिन्द्र उत्तरः ॥२१॥ ऋ. १०।८६।२१

पदपाठः

पुनः । आ । इहि । वृषाकपे । सुविता । कल्पयावहै । यः । एषः । स्वप्नऽनंशनः । अस्तम् । एषि । पथा । पुनः । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥२१॥

आगत्य प्रतिगतं वृषाकपिमिन्द्रो ब्रवीति । हे **वृषाकपे ! त्वं पुनरेहि** अस्मान् प्रत्यागच्छ । आगते च त्वयि **सुविता** सुवितानि कल्याणानि त्वच्चित्तप्रीतिकराणि कर्माणि **कल्पयावहै** इन्द्राण्यहं च आवामुभौ पर्यालोच्य कुर्याव । किञ्च **यः स्वप्न-नंशनः** उदयेन सर्वस्य प्राणिनः स्वप्नानां नाशयिता आदित्यः स **एषः** त्वं **पथा** मार्गेण **अस्तम्** आत्मीयमावासं **पुनः एषि** गच्छसि । यतोऽहम् इन्द्रः विश्वस्मात् उत्तरः । तथा च यास्कः— सुप्रसूतानि वः कर्माणि कल्पयावहै । य एष स्वप्ननंशनः स्वप्नान्नाशयत्यादित्य उदयेन सोऽस्तमेषि पता पुनः (निरु० १२।२८) इति ।

यदुदञ्चो वृषाकपे गृहमिन्द्राजगन्तन ।
क्व स्य पुल्वघो मृगः कमग-
ञ्जनयोपनो विश्वस्मादिन्द्र उत्तरः ॥२२॥ ऋ. १०।८६।२२

पदपाठः

यत् । उदञ्चः । वृषाकपे । गृहम् । इन्द्र । अजगन्तन । क्व । स्यः । पुल्वघः । मृगः । कम् । अगन् । जनऽयोपनः । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥२२॥

गत्वा पुनरागतं वृषाकपिमिन्द्रः पृच्छति । हे **इन्द्र** ! परमैश्वर्यवन् हे **वृषाकपे !** यूयम् **उदञ्चः** उद्गामिनः सन्तो **गृहं** मद्गृहम् **अजगन्तन** आगच्छत । एकस्यापि बहुवचनं पूजार्थम् । तत्र भवतः सम्बन्धी **पुल्वघः** बहूनां भौमरसानामत्ता **स्यः** सः **मृगः** क्व अभूत् ? **जनयोपनः** जनानां मोदयिता मृगः कं वा देशम् **अगन्** अगच्छत् । सोऽहम् इन्द्रः विश्वस्मात् उत्तरः । यद्वा इन्द्राणीवाक्यमिदम् । अत्र यास्कः— 'यदुदञ्चो वृषाकपे गृहमिन्द्रा जगमत क्व स्य पुल्वघो मृगः क्व स बह्वादी मृगः । मृगो मार्ष्टेर्गतिकर्मणः । कमगमद्देशं जनयोपनः' (निरु० १३।३) इति ।

पर्शुर्ह नाम मानवी साकं ससूव विंशतिम् ।
भद्रं भल त्यस्या अभूद् यस्या उदरमामयद्
विश्वस्मादिन्द्र उत्तरः ॥२३॥ ऋ. १०।८६।२३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

पर्शुः । ह । नाम । मानवी । साकम् । ससूव । विंशतिम् । भद्रम् । भल । त्यस्यै । अभूत् । यस्याः । उदरम् । आमयत् । विश्वस्मात् । इन्द्रः । उत्ऽतरः ॥२३॥

इन्द्रविसृज्यमानमनेन मन्त्रेण वृषाकपिराशास्ते । हे भल ! इन्द्रेण विसृज्यमान शर ! भलतिर्भेदनकर्मा । **पर्शुः नाम मृगी** । ह इति पूरणः । **मानवी** मनोर्दुहितेयं **विंशतिं** विंशतिसङ्ख्याकान् पुत्रान् साकं सह **ससूव** अजीजनत् । **त्यस्यै** तस्यै भद्रं भजनीयं कल्याणम् **अभूत्** भवतु । लोडर्थे लुङ् । यस्या उदरमामयत् गर्भस्थैर्विंशतिभिः पुत्रैः पुष्टमासीत् । मम पिता इन्द्रः विश्वस्मात् उत्तरः ।

इति नवमेऽनुवाके त्रिंशं सूक्तम् ।

अथ कुन्तापसूक्तानि

विंशकाण्डस्य नवमानुवाके श्रीमद्भिः स्वामिचरणैस्त्रयः पर्याया निर्धारिताः । तत्र प्रथमे पर्याये सप्तनवतितमसूक्तादारभ्य षड्विंशत्युत्तरशततमान्तानि त्रिंशत्सूक्तानि, द्वितीये पर्याये सप्तविंशत्युत्तरशततमसूक्तादारभ्य षट्त्रिंशदुत्तरशततमान्तानि दश सूक्तानि, अथ तृतीये सप्तत्रिंशदुत्तरशततमसूक्तादारभ्य त्रिचत्वारिंशदुत्तरशततमान्तानि सप्त सूक्तानि वर्त्तन्ते । द्वितीयपर्यायस्य दश सूक्तानि कुन्तापसूक्तनाम्ना संविदन्ति वैदिका विद्वांसः । किन्तु खिलसूक्तसंज्ञयाऽप्येतानि परिचिन्वन्ति आथर्वणिकाः । अथर्ववेदीयबृहत्सर्वानुक्रमण्यामेषां खिलसूक्तसंज्ञैवालिख्यत । आराध्यचरणा इमे कुन्तापसूक्तानामेषां विविधभावरहस्यप्रदर्शनपूर्वकं समन्वयभाष्यं पूर्वमेवातनिषत । वैदिकविज्ञानस्य निस्तुलव्याख्यातृभिः स्वामिश्रीसुरजनदासाचार्यैश्च सम्पाद्य तत् प्रकाशितमपीति नात्र दश सूक्तानामेषां भाष्यं प्रकाश्यते । पिपठिषुभिस्तत एव पठनीयं कुन्तापसूक्तानां भाष्यम् । सायणाचार्येणैषां पदपाठोऽपि नादीयत, न च ऋषिछन्दो-देवतानामुल्लेखोऽकारीत्यस्माभिरप्येतेषामुल्लेखो नाक्रियतेति––

सम्पादकः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सप्तविंशत्युत्तरशततमं सूक्तम्

पृष्ठ्यस्य षष्ठेऽहनि 'इदं जना उपश्रुत' इति कुन्तापम् अर्धर्चशः शंसति। तत्र प्रथमाश्चतुर्दश ऋचः पदावग्राहं शंसति। तदुक्तं वैताने—"इदं जना उप श्रुत" इति कुन्तापम् अर्धर्चशः। चतुर्दश पदावग्राहम् (वै० श्रौ० ३२।३६) इति।

इदं जना उप श्रुत नराशंस स्तविष्यते।
षष्टिं सहस्रा नवतिं च कौरम आ रुशमेषु दद्महे ॥१॥

उष्ट्रा यस्य प्रवाहणो वधूमन्तो द्विर्दश।
वर्ष्मा रथस्य नि जिहीडते दिव ईषमाणा उपस्पृशः ॥२॥

एष इषाय मामहे शतं निष्कान्दश स्रजः।
त्रीणि शतान्यर्वतां सहस्रा दश गोनाम् ॥३॥

इति नाराशंस्यः।

वच्यस्व रेभ वच्यस्व वृक्षे न पक्वे शकुनः।
नष्टे जिह्वा चर्चरीति क्षुरो न भुरिजोरिव ॥४॥

प्र रेभासो मनीषा वृषा गाव इवेरते।
अमोत पुत्रका एषाममोत गा इवासते ॥५॥

प्र रेभ धीं भरस्व गोविदं वसुविदम्।
देवत्रेमां वाचं श्रीणीहीषुर्नावीरस्तारम् ॥६॥

राज्ञो विश्वजनीनस्य यो देवोऽमर्त्याँ अति।
वैश्वानरस्य सुष्टुतिमा सुनोता परिक्षितः ॥७॥

परिच्छिन्नः क्षेममकरोत्तम आसनमाचरन्।
कुलायन् कृण्वन् कौरव्यः पतिर्वदति जायया ॥८॥

कतरत्त आ हराणि दधि मन्थां परि श्रुतम्।
जायाः पतिं वि पृच्छति राष्ट्रे राज्ञः परिक्षितः ॥९॥

अभीवस्वः प्र जिहीते यवः पक्वः पथो बिलम्।
जनः स भद्रमेधति राष्ट्रे राज्ञः परिक्षितः ॥१०॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इन्द्रः कारुमबूबुधदुत्तिष्ठ विचरा जनम् ।
ममेदुग्रस्य चर्कृधि सर्व इत् ते पृणादरिः ॥११॥

इह गावः प्रजायध्वमिहाश्वा इह पूरुषाः ।
इहो सहस्रदक्षिणोऽपि पूषा नि षीदति ॥१२॥

नेमा इन्द्र गावो रिषन्मो आसां गोप रीरिषत् ।
मासाममित्रयुर्जन इन्द्र मा स्तेन ईशत ॥१३॥

उप नो न रमसि सूक्तेन वचसा
वयं भद्रेण वचसा वयम् ।
वनादधिध्वनो गिरो न रिष्येम कदा चन ॥१४॥

इति नवमेऽनुवाके एकत्रिंशं सूक्तम् ।

अष्टाविंशत्युत्तरशततमं सूक्तम्

'यः सभेयो विदथ्यः' इति षोडशर्चः एतस्य शंसनप्रकारः पूर्वसूक्ते उक्तः ।

यः सभेयो विदथ्यः सुत्वा यज्वाथ पूरुषः ।
सूर्यं चामू रिशादसस्तद्देवाः प्रागकल्पयन् ॥१॥

यो जाम्या अप्रथयस्तद्यत्सखायं दुधूर्षति ।
ज्येष्ठो यदप्रचेतास्तदाहुरधरागिति ॥२॥

यद् भद्रस्य पुरुषस्य पुत्रो भवति दाधृषिः ।
तद्विप्रो अब्रवीदुदग्गन्धर्वः काम्यं वचः ॥३॥

यश्च पणि रघुजिष्ठ्यो यश्च देवाँ अदाशुरिः ।
धीराणां शश्वतामहं तदपागिति शुश्रुम ॥४॥

ये च देवा अयजन्ताथो ये च परादिः ।
सूर्यो दिवमिव गत्वाय मघवा नो वि रप्शते ॥५॥

योऽनाक्ताक्षो अनभ्यक्तो अमणिवो अहिरण्यवः ।
अब्रह्माब्रह्मणः पुत्रस्तोता कल्पेषु संमिता ॥६॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

य आक्ताक्षः स्वभ्यक्तः सुमणिः सुहिरण्यवः ।
सुब्रह्मा ब्रह्मणः पुत्रस्तोता कल्पेषु संमिता ॥७॥

अप्रपाणा च वेशन्ता रेवाँ अप्रतिदिश्ययः ।
अयभ्या कन्याकल्याणी तोता कल्पेषु संमिता ॥८॥

सुप्रपाणा च वेशन्ता रेवान्त्सुप्रतिदिश्ययः ।
सुयभ्या कन्या कल्याणी तोता कल्पेषु संमिता ॥९॥

परिवृक्ता च महिषी स्वस्त्या च युधिंगमः ।
अनाशुरश्चायामी तोता कल्पेषु संमिता ॥१०॥

वावाता च महिषी स्वस्त्या च युधिंगमः ।
श्वाशुरश्चायामी तोता कल्पेषु संमिता ॥११॥

यदिन्द्रादो दाशराज्ञे मानुषं वि गाहथाः ।
विरूपः सर्वस्मा आसीत् सह यक्षाय कल्पते ॥१२॥

त्वं वृषाक्षुं मघवन्नम्रं मर्याकरो रविः ।
त्वं रौहिणं व्यास्यो वि वृत्रस्याभिनच्छिरः ॥१३॥

यः पर्वतान् व्यदधाद् यो अपो व्यगाहथाः ।
इन्द्रो यो वृत्रहान्महं तस्मादिन्द्र नमोऽस्तु ते ॥१४॥

पृष्ठं धावन्तं हर्योरौच्चैःश्रवसमब्रुवन् ।
स्वस्त्यश्व जैत्रायेन्द्रमा वह सुस्रजम् ॥१५॥

युक्त्वा श्वेता औच्चैःश्रवसं हर्योर्युञ्जन्ति दक्षिणम् ।
पूर्वतमं स देवानां बिभ्रदिन्द्रं महीयते ॥१६॥

इति नवमेऽनुवाके द्वात्रिंशं सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकोनत्रिंशदुत्तरशततमं सूक्तम्

'एता अश्वा आ प्लवन्ते' इति षट्सप्तत्यष्टादशपदान्त्यः प्रणवत्यष्ट प्रति त्वा ।

'एता अश्वा आ प्लवन्ते' (अ० २०।१२९) इत्यादि 'नीलशिखण्डवाहनः' (अ० २०।१३२) इत्यन्तम् ऐतशप्रलापाख्यं षट्सप्ततिपादसमुदायं पदावग्राहं सूत्रोक्त-प्रकारेण शंसति । तद् उक्तं वैताने—"एता अश्वा आ प्लवन्ते' । इत्यैतशप्रलापं पदावग्राहम् । तासामुत्तमेन पदेन प्रणौति" (वै० श्रौ० ३२।२०) इति ।

एता अश्वा आ प्लवन्ते ॥१॥
प्रतीपं प्रातिसुत्वनम् ॥२॥
तासामेका हरिक्निका ॥३॥
हरिक्निके किमिच्छसि ॥४॥
साधुं पुत्रं हिरण्ययम् ॥५॥
क्वाहतं परास्यः ॥६॥
यत्रामूस्तिस्रः शिंशपाः ॥७॥
परि त्रयः ॥८॥
पृदाकवः ॥९॥
शृङ्गं धमन्त आसते ॥१०॥
अयमिहागतो अर्वा ॥११॥
स इच्छकना संज्ञायते ॥१२॥
गोमयाद् गोगतिरिव ॥१३॥
पुंसां कुले किमिच्छसि ॥१४॥
पक्वौ व्रीहियवा इति ॥१५॥
व्रीहियवा अद्या इति ॥१६॥
अजगर इवाविकाः ॥१७॥
अश्वस्य वारो गोशफश्च ते ॥१८॥
श्येनपर्णी सा ॥१९॥
अनामयोपजिह्विका ॥२०॥

इति नवमेऽनुवाके त्रयस्त्रिंशं सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

त्रिंशदुत्तरशततमं सूक्तम्

को अर्य बहुलिमा इषूनि ॥१॥

को असिद्याः पयः ॥२॥

को अर्जुन्याः पयः ॥३॥

कः कार्ष्ण्याः पयः ॥४॥

एतं पृच्छ कुहं पृच्छ ॥५॥

कुहाकं पक्वकं पृच्छ ॥६॥

यवानो यतिस्वभिः कुभिः ॥७॥

अकुप्यन्तः कुपायकुः ॥८॥

आमणको मणत्सकः ॥९॥

देव त्वप्रतिसूर्य ॥१०॥

एनश्चिपङ्क्तिका हविः ॥११॥

प्रदुद्रुदो मघा प्रति ॥१२॥

शृङ्ग उत्पन्न ॥१३॥

मा त्वाभि सखा नो विदन् ॥१४॥

वशायाः पुत्रमायन्ति ॥१५॥

इरावेदुमयं दत ॥१६॥

अथो इयन्नियन्निति ॥१७॥

अथो इयन्निति ॥१८॥

अथो श्वा अस्थिरो भवन् ॥१९॥

उयं यकांशलोकका ॥२०॥

इति नवमेऽनुवाके चतुस्त्रिंशं सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एकत्रिंशदुत्तरशततमं सूक्तम्

आमिनोनिति भद्यते ॥१॥

तस्य अनु निभञ्जनम् ॥२॥

वरुणो याति वस्वभिः ॥३॥

शतं वा भारती शवः ॥४॥

शतमाश्वा हिरण्ययाः । शतं रथ्या हिरण्ययाः ।
शतं कुथा हिरण्ययाः । शतं निष्का हिरण्ययाः ॥५॥

अहल कुश वर्त्तक ॥६॥

शफेन इव ओहते ॥७॥

आय वने नती जनी ॥८॥

वनिष्ठा नावगृह्यन्ति ॥९॥

इदं मह्यं मदूरिति ॥१०॥

ते वृक्षाः सह तिष्ठति ॥११॥

पाक बलिः ॥१२॥

शक बलिः ॥१३॥

अश्वत्थ खदिरो धवः ॥१४॥

अरदुपरम ॥१५॥

शयो हत इव ॥१६॥

व्याप पूरुषः ॥१७॥

अदूहमित्यां पूषकम् ॥१८॥

अत्यर्धर्च परस्वतः ॥१९॥

दौव हस्तिनो दृती ॥२०॥

इति नवमेऽनुवाके पञ्चत्रिंशं सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वात्रिंशदुत्तरशततमं सूक्तम्

आदलाबुमेककम् ॥१॥

अलाबुकं निखातकम् ॥२॥

कर्करिको निखातकः ॥३॥

तद् वात उन्मथायति ॥४॥

कुलायं कृणवादिति ॥५॥

उग्रं वनिषदाततम् ॥६॥

न वनिषदनाततम् ॥७॥

क एषां कर्करी लिखत् ॥८॥

क एषां दुन्दुभिं हनत् ॥९॥

यदीयं हनत् कथं हनत् ॥११॥

देवी हनत् कुहनत् ॥११॥

पर्यागारं पुनः पुनः ॥१२॥

त्रीण्युष्ट्रस्य नामानि ॥१३॥

हिरण्य इत्येके अब्रवीत् ॥१४॥

द्वौ वा ये शिशवः ॥१५॥

नीलशिखण्डवाहनः ॥१६॥

इति नवमेऽनुवाके षट्त्रिंशं सूक्तम् ।

त्रयस्त्रिंशदुत्तरशततमं सूक्तम्

'विततौ किरणौ द्वौ' इति प्रवह्लिकाख्या ऋचः अर्धर्चशः शंसति । तद् उक्तं वैताने श्रौतसूत्रे—"विततौ किरणौ द्वौ—इति प्रवह्लिकाः" (वैता. श्रौ. ३२।२१) इति ।

विततौ किरणौ द्वौ तावा पिनष्टि पूरुषः ।

न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मातुष्टे किरणौ द्वौ निवृत्तः पुरुषानृते ।
न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥२॥
निगृह्य कर्णकौ द्वौ निरायच्छसि मध्यमे ।
न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥३॥
उत्तानायै शयानायै तिष्ठन्ती वाव गूहसि ।
न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥४॥
श्लक्ष्णायां श्लक्ष्णिकायां श्लक्ष्णमेवाव गूहसि ।
न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥५॥
अवश्लक्ष्णमिव भ्रंशदन्तर्लोममति ह्रदे ।
न वै कुमारि तत्तथा यथा कुमारि मन्यसे ॥६॥

इति नवमेऽनुवाके सप्तत्रिंशं सूक्तम् ।

चतुस्त्रिंशदुत्तरशततमं सूक्तम्

'इहेत्थ प्रागपागुदगधराक्' इति प्रतिराधाख्या ऋचः अर्धर्चशः शंसति । न सन्तनोति । तद् उक्तं वैताने--"इहेत्थ प्रागपागुदगधराक् इति प्रतिराधान् । न संतनोति" (वैता. श्रौ. ३२।२२) इति ।

इहेत्थ प्रागपागुदगधराग् अरालागुदभर्त्सथ ॥१॥
इहेत्थ प्रागपागुदगधराग् वत्साः पुरुषन्त आसते ॥२॥
इहेत्थ प्रागपागुदगधराक् स्थालीपाको वि लीयते ॥३॥
इहेत्थ प्रागपागुदगधराक् स वै पृथु लीयते ॥४॥
इहेत्थ प्रागपागुदगधराग् आष्टे लाहणि लीशाथी ॥५॥
इहेत्थ प्रागपागुदगधराग् अक्ष्लिली पुच्छिलीयते ॥६॥

इति नवमेऽनुवाके अष्टत्रिंशं सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पञ्चत्रिंशदुत्तरशततमं सूक्तम्

'भुगित्यभिगतः' इत्याजिज्ञासेन्याख्यास्तिस्रः ऋचः शंसति । तद् उक्तं वैताने—"भुगित्यभिगतः इत्याजिज्ञासेन्यास्तिस्रः" (वै० श्रौ० ३२।२३) इति ।

'वीमे देवा अक्रंसत' इत्यतीवादाख्या ऋचः अर्धर्चशः शंसति । तद् उक्तं वैताने—"वीमे देवा अक्रंसत इत्यतीवादम्" (वै० श्रौ० ३२।२६) इति ।

भुगित्यभिगतः शलित्यपक्रान्तः फलित्यभिष्ठितः ।
दुन्दुभिमाहननाभ्यां जरितरोथामो दैव ॥१॥

कोशबिले रजनि ग्रन्थेर्धनिमुपानहि पादम् ।
उत्तमां जनिमां जन्यानुत्तमां जनीन् वर्त्मन्यात् ॥२॥

अलाबूनि पृषातकान्यश्वत्थपलाशम् ।
पिपीलिकावटश्वसो विद्युत्स्वापर्णशफो
गोशफो जरितरोथामो दैव ॥३॥

वीमे देवा अक्रंसताध्वर्यो क्षिप्रं प्रचर ।
सुसत्यमिद् गवामस्यसि प्रखुदसि ॥४॥

पत्नी यद्दृश्यते पत्नी यक्ष्यमाणा जरितरोथामो दैव ।
होता विष्टीमेन जरितरोथामो दैव ॥५॥

आदित्या ह जरितरङ्गिरोभ्यो दक्षिणामनयन् ।
तां ह जरितः प्रत्यायँस्तामु ह जरितः प्रत्यायन् ॥६॥

तां ह जरितर्नः प्रत्यगृभ्णन्
तामु ह जरितर्नः प्रत्यगृभ्णः ।
अहानेतरसं न वि चेतनानि
यज्ञानेतरसं न पुरोगवामः ॥७॥

उत श्वेत आशुपत्वा उतो पद्याभिर्यविष्ठः ।
उतेमाशु मानं पिपर्ति ॥८॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आदित्या रुद्रा वसवस्त्वेऽनु त
इदं राधः प्रति गृभ्णीह्यङ्गिरः ।
इदं राधो विभु प्रभु इदं राधो बृहत् पृथु ॥६॥
देवा ददत्वासुरं तद् वो अस्तु सुचेतनम् ।
युष्माँ अस्तु दिवे दिवे प्रत्येव गृभायत ॥१०॥
त्वमिन्द्र शर्मरिणा हव्यं पारावतेभ्यः ।
विप्राय स्तुवते वसुवनिं दुरश्रवसे वह ॥११॥
तमिन्द्र कपोताय च्छिन्नपक्षाय वञ्चते ।
श्यामाकं पक्वं पीलु च वारस्मा अकृणोर्बहुः ॥१२॥
अरंगरो वावदीति त्रेधा बद्धो वरत्रया ।
इरामह प्रशंसत्यनिरामप सेधति ॥१३॥

इति नवमेऽनुवाके एकोनचत्वारिंशं सूक्तम् ।

षट्त्रिंशदुत्तरशततमं सूक्तम्

'यदस्याः' इति षोडशे आहनस्या वृषाकपिला वैशिषमुत्तमेन पादेन प्रणौति ।
'यदस्या अंहुभेद्याः' इत्याहनस्याख्याः षोडशर्चः वृषाकपिशस्त्रवच्छंसति । तद् उक्तं वैताने—"यदस्या अंहुभेद्याः—इत्याहनस्या वृषाकपिवत्" (वैता. श्रौ. ३२।३१) इति ।

यदस्या अंहुभेद्याः कृधु स्थूलमुपातसत् ।
मुष्काविदस्या एजतो गोशफे शकुलाविव ॥१॥
यदा स्थूलेन पससाणौ मुष्का उपावधीत् ।
विश्वञ्चा वस्या वर्धतः सिकतास्वेव गर्दभौ ॥२॥
यदल्पिकास्वल्पिका कर्कन्धूकेवपद्यते ।
वासन्तिकमिव तेजनं यन्त्यवाताय वित्पति ॥३॥
यद्देवासो ललामगुं प्रविष्टीमिनमाविषुः ।
सकुला देदिश्यते नारी सत्यस्याक्षिभुवो यथा ॥४॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

महानग्न्यतृप्नद्वि मोक्रददस्थानासरन् ।
शक्तिकानना स्वचमशकं सक्तु पद्यम ।।५।।
महानग्न्युलूखलमतिक्रामन्त्यब्रवीत् ।
यथा तव वनस्पते निरघ्नन्ति तथैवेति ।।६।।
महानग्न्युप ब्रूते भ्रष्टोथाप्यभूभुवः ।
यथैव ते वनस्पते पिप्पति तथैवति ।।७।।
महानग्न्युप ब्रूते भ्रष्टोथाप्यभूभुवः ।
यथा वयो विदाह्य स्वर्गे नमवदह्यते ।।८।।
महानग्न्युप ब्रूते स्वसावेशितं पसः ।
इत्थं फलस्य वृक्षस्य शूर्पे शूर्पं भजेमहि ।।९।।
महानग्नी कृकवाकं शम्यया परि धावति ।
अयं न विद्म यो मृगः शीर्ष्णा हरति धाणिकाम् ।।१०।।
महानग्नी महानग्नं धावन्तमनुधावति ।
इमास्तदस्य गा रक्ष यभ मामद्ध्यौदनम् ।।११।।
सुदेवस्त्वा महानग्नीर्बबाधते महतः साधु खोदनम् ।
कुसं पीवरो नवत् ।।१२।।
वशा दग्धामिमाङ्गुरिं प्रसृजतोग्रतं परे ।
महान् वै भद्रो यभ मामद्ध्यौदनम् ।।१३।।
विदेवस्त्वा महानग्नीर्विबाधते महतः साधु खोदनम् ।
कुमारिका पिङ्गलिका कार्द भस्मा कु धावति ।।१४।।
महान् वै भद्रो बिल्वो महान् भद्र अदुम्बरः ।
महाँ अभिक्त बाधते महतः साधु खोदनम् ।।१५।।
यः कुमारी पिङ्गलिका वसन्तं पीवरी लभेत् ।
तैलकुण्डमिमाङ्गुष्ठं रोदन्तं शुदमुद्धरेत् ।।१६।।

इति नवमेऽनुवाके चत्वारिंशं सूक्तम् ।

इति कुन्तापसूक्तानि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सप्तत्रिंशदुत्तरशततमं सूक्तम्

चतुर्दशर्चस्यास्य सूक्तस्य प्रथमर्चः शिरिम्बिठिः, द्वितीयाया बुधः, तृतीयाया वामदेवः, चतुर्थ्यादितृचस्य ययातिः, सप्तम्यादिपञ्चानां तिरश्चीराङ्गिरसो द्युतानो वा, द्वादश्यादितृचस्य च सुकक्ष ऋषयः। प्रथमाया अलक्ष्मीनाशनम्, द्वितीयाया विश्वे देवा ऋत्विक्स्तुतिर्वा, [तृतीयाया दधिक्राः], चतुर्थ्यादितृचस्य सोमः पवमानः, सप्तम्या अष्टम्याद्यत्रिपादानां दशम्यादिपञ्चानाञ्चेन्द्रः, अष्टमीचतुर्थपादस्य मरुतः, नवम्याश्चेन्द्राबृहस्पती देवताः। प्रथमायास्तृतीयादिचतसृणाञ्चानुष्टुप्, द्वितीयाया जगती, सप्तम्यादिपञ्चानां त्रिष्टुप्, द्वादश्यादितृचस्य च गायत्री छन्दांसि।

सोमयागे 'दधिक्राव्णः' (अथर्व० २०।१३७।३) इत्यस्या ऋच आग्नीध्रीये दधिभक्षणे विनियोगः। तद् उक्तं वैताने--आग्नीध्रीये दधि भक्षयन्ति 'दधिक्राव्णः' इति'' (वैता. श्रौ. २३।१७) इति।

तथा पृष्ठचषडहे 'दधिक्राव्णः' इत्येतामृचम् अर्धर्चशः शंसति। तद् उक्तं वैताने- ''दधिक्राव्णो अकारिषम् इत्यर्धर्चशः'' (वैता. श्रौ. ३२।३३) इति।

तत्रैव 'सुतासो मधुमत्तमाः' (अथर्व० २०।१३१।४-६) इति पावमान्याख्यास्तिस्र ऋचः अर्धर्चशः शंसति। तद् उक्तं वैताने--''सुतासो मधुमत्तमाः' इति पावमानीः'' (वैता. श्रौ. ३२।३३)।

तत्रैव 'अव द्रप्सो अंशुमतीम्' (अथर्व० २०।१३७।७-९)इति तिस्र ऋचः पच्छः शंसति। तद् उक्तं वैताने--''अव द्रप्सो अंशुमतीमतिष्ठद् इति पच्छः'' (वैता. श्रौ. ३२।३३) इति।

यद्ध प्राचीरजगन्तोरो मण्डूरधाणिकीः।
हता इन्द्रस्य शत्रवः सर्वे बुद्बुदयाशवः ॥१॥

ऋ. १०।१५५।४

पदपाठः

यत्। ह। प्राचीः। अजगन्त। उरः। मण्डूरऽधाणिकीः। हताः। इन्द्रस्य। शत्रवः। सर्वे। बुद्बुदऽयाशवः ॥१॥

हे **मण्डूरधाणिकीः** मण्डूरवत् कुत्सितशब्दकारिण्यो मन्दनस्य धनस्य धारयित्र्यो वा लक्ष्म्यः! **उरः** उर्वी हिंसार्थः। अस्मात् क्विपि 'राल्लोपः' इति वलोपः। ततो जसि रूपमेतत्। हिंसित्र्यो यूयं **प्राचीः** प्रकर्षेणाञ्चन्त्यः प्रकृष्टगमनाः सत्यो **यद्ध** यदा खलु **अजगन्त** अगच्छत। गमेर्लङि मध्यमबहुवचने छान्दसः शपः श्लुः। 'तप्तनप्तनथनाश्च' इति तस्य तबादेशः। अत एव ङित्वाभावादनुनासिकलोपो न भवति। तदानीमेव **सर्वे इन्द्रस्य शत्रवः बुद्बुदयाशवः**, यान्ति गच्छन्तीति याः। अश्नुवत इत्याशवः, याश्च त आशवश्च याशवः। बुद्बुदवद्यातारो व्यापनशीलाश्च सन्तः **हताः** नष्टा आसन्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कपृन्नरः कपृथमुद्दधातन चोदयत
खुदत वाजसातये ।
निष्टिग्र्यः पुत्रमा च्यावयोतय इन्द्रं
सबाध इह सोमपीतये ॥२॥ ऋ. १०।१०१।१२

पदपाठः

कपृत् । नरः । कपृथम् । उत् । दधातन । चोदयत । खुदत । वाजऽसातये । निष्टिग्र्यः । पुत्रम् । आ । च्यवय । ऊतये । इन्द्रम् । सऽबाधः । इह । सोमऽपीतये ॥२॥

हे **नरः** नेतार ऋत्विजः ! एष इन्द्रः **कपृत्** । सुखस्य पूरको याजकानां स्तोतृजनानां च । कमिति सुखनाम, तं कपृथं सुखस्य पूरयितारमिन्द्रं **चोदयत** प्रेरयत, **खुदत** खुर्दत क्रीडयत । खुर्द क्रीडायां' भौवादिकः, व्यत्ययेन शः । रेफलोपश्छान्दसः । किमर्थम् ? **वाजसातये** अन्नस्य लाभाय । तदेवाह । हे होतः ! **निष्टिग्र्यः पुत्रम्** । निष्टिं दितिं स्वसपत्नीं गिरतीति निष्टिग्रीरदितिः । तस्याः पुत्रम् इन्द्रं **सबाधः** । सह पापैः प्रयासरूपैः कर्मभिर्बाध्यन्त इति सबाध ऋत्विजः । तथाविधा यूयं **सोमपीतये** तस्य सोमपानाय **ऊतये** अस्माकं रक्षणाय वा **आ च्यवय** । व्यत्ययेनैकवचनम् । आच्यावयतेत्यर्थः ।

दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभि नो मुखा करत् प्र ण
आयूंषि तारिषत् ॥३॥ ऋ. ४।३९।६

पदपाठः

दधिऽक्राव्णः । अकारिषम् । जिष्णोः । अश्वस्य । वाजिनः । सुरभि । नः । मुखा । करत् । प्र । नः । आयूंषि । तारिषत् ॥३॥

दधिक्राव्णः देवस्य स्तुतिम् **अकारिषं** करवाणि । **जिष्णोः** जयशीलस्य **अश्वस्य** व्यापकस्य **वाजिनः** वेगवतः । स देवः **नः** अस्माकं **मुखा** मुखानि चक्षुरादीन्द्रियाणि **सुरभि** सुरभीणि **करत्** करोतु । **नः** अस्मभ्यम् **आयूंषि प्र तारिषत्** प्रवर्धयतु । प्रपूर्वस्तिरतिर्वर्धनार्थः ।

सुतासो मधुमत्तमाः सोमा इन्द्राय मन्दिनः ।
पवित्रवन्तो अक्षरन्देवान् गच्छन्तु वो मदाः ॥४॥
ऋ. ९।१०१।४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

सुतासः । मधुमत्ऽतमाः । सोमाः । इन्द्राय । मन्दिनः । पवित्रऽवन्तः । अक्षरन् । देवान् । गच्छन्तु । वः । मदाः ॥४॥

मधुमत्तमाः अतिशयेन माधुर्योपेता अत एव **मन्दिनः** मदकराः **सुतासः** अभिषुताः **सोमाः पवित्रवन्तः** पवित्रे वर्तमानाः सन्तः **इन्द्राय** इन्द्रार्थम् **अक्षरन्** पात्रेषु क्षरन्ति । अथ प्रत्यक्षकृतः । **वः** युष्माकं **मदाः** मदहेतवो रसाः **देवान्** इन्द्रादीन् **गच्छन्तु** ।

इन्दुरिन्द्राय पवत इति देवासो अब्रुवन् ।
वाचस्पतिर्मखस्यते विश्वस्येशान ओजसा ॥५॥

ऋ. ९।१०१।५

पदपाठः

इन्दुः । इन्द्राय । पवते । इति । देवासः । अब्रुवन् । वाचः । पतिः । मखस्यते । विश्वस्य । ईशानः । ओजसा ॥५॥

इन्दुः सोमः **इन्द्राय** इन्द्रार्थं **पवते** कलशे क्षरति **इति देवासः** स्तुतिकारिणः स्तोतारः **अब्रुवन्** वदन्ति । यदा स्तोतार एवं वदन्ति तदानीं **वाचः** स्तुतेः **पतिः** पालयिता । यद्वा शब्दस्य स्वामी अत्यन्तं शब्दायमान इत्यर्थः । तादृशः सोमः **मखस्यते** स्तुतिभिः पूजामिच्छति । लालसायां सुगागमः । कीदृशः ? **ओजसा** बलेन **विश्वस्य** सर्वस्य **ईशानः** प्रभुः ।

सहस्रधारः पवते समुद्रो वाचमीङ्खयः ।
सोमः पती रयीणां सखेन्द्रस्य दिवेदिवे ॥६॥ ऋ. ९।१०१।६

पदपाठः

सहस्रऽधारः । पवते । समुद्रः । वाचम्ऽईङ्खयः । सोमः । पतिः । रयीणाम् । सखा । इन्द्रस्य । दिवेऽदिवे ॥६॥

सहस्रधारः बहुविधधारोपेतः **सोमः पवते** क्षरति । कीदृशः ? **समुद्रः** । यस्मात्समुद्द्रवन्ति रसाः । सरःस्थानीयः **वाचमीङ्खयः** । ईङ्खतेर्ण्यन्तस्य सुप्युपपदे खच्प्रत्ययः । स्तुतीनां प्रेरयिता **रयीणां** धनानां **पतिः** प्रभुः । यद्वा रयीणां हविषो दातृजनानां यजमानानां पतिः पालयिता । **दिवेदिवे** प्रत्यहम् **इन्द्रस्य सखा** मित्रभूतः सोमः पवते ।

अव द्रप्सो अंशुमतीमतिष्ठदियानः
कृष्णो दशभिः सहस्रैः ।
आवत्तमिन्द्रः शच्या धमन्तमप
स्नेहितीर्नृमणा अधत्त ॥७॥ ऋ. ८।९६।१३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

अव । द्रप्सः । अंशुऽमतीम् । अतिष्ठत् । इयानः । कृष्णः । दशऽभिः । सहस्रैः । आवत् । तम् । इन्द्रः । शच्या । धमन्तम् । अप । स्नेहितीः । नृऽमनाः । अधत्त ॥७॥

अत्रेतिहासमाचक्षते किल । कृष्णो नामासुरो दशसहस्रसङ्ख्यैरसुरैः परिवृतः सन्नंशुमतीनामधेयाया नद्यास्तीरेऽतिष्ठत् । तत्र तं कृष्णमुदकमध्ये स्थितमिन्द्रो बृहस्पतिना सहागच्छत् । आगत्य तं कृष्णं तस्यानुचरांश्च बृहस्पतिसहायो जघानेति । केचिदन्यथा वदन्ति । तेषां कथा हेतुः । **द्रप्स** इत्युदककणोऽभिधीयते, स तु सोमो 'द्रप्सश्चस्कन्द' (ऋ. सं. १०।१७।११) इत्यादिषु सोमपरत्वेनोक्तत्वात् । एतत्पद-माश्रित्याहुः––"अपक्रम्य तु देवेभ्यः सोमो वृत्रभयार्दितः । नदीमंशुमतीं नाम ह्यभ्य-तिष्ठत् कुरुन् प्रति । तं बृहस्पतिनैकेन सोऽभ्ययाद्वृत्रहा सह । योत्स्यमानः सुसंहृष्टै-र्मरुद्भिर्विविधायुधैः । दृष्ट्वा तानायतः सोमः स्वबलेन व्यवस्थितः । मन्वानो वृत्रमायान्तं जिघांसुमरिसेनया । व्यवस्थितं धनुष्मन्तं तमुवाच बृहस्पतिः । मरुत्पतिरयं सोम प्रेहि देवान् पुनर्विभो । सोऽब्रवीन्नेति तं शक्रः स्वर्गमेव बलाद्बली । इयाय देवानादाय तं पपुर्विधिवत्सुराः । जघ्नुः पीत्वा च दैत्यानां समरे नवतीर्नव । तदव द्रप्स इत्यस्मिन् तृचे सर्वं निगद्यते" (बृहद्दे. ६।१०९-११५) । एतदनार्षत्वेनानाद-रणीयं भवति । एषोऽर्थः क्रमेणर्क्षु वक्ष्यते । तथा चास्या ऋचोऽयमर्थः । **द्रप्सः** द्रुतं सरति गच्छतीति द्रप्सः । पृषोदरादिः । द्रुतं गच्छन् **दशभिः सहस्रैः** दशसहस्र-सङ्ख्यैरसुरैः **इयानः कृष्णः** एतन्नामकोऽसुरः **अंशुमतीं** नाम नदीम् **अव अतिष्ठत्** अवतिष्ठते । ततः **शच्या** कर्मणा प्रज्ञानेन वा **धमन्तम्** उदकस्यान्तरुच्छ्वसन्तं यद्वा जगद्भीतिकरं शब्दं कुर्वन्तं **तं** कृष्णमसुरम् **इन्द्रः** मरुद्भिः सह **आवत्** प्राप्नोत् । पश्चात्तं कृष्णमसुरं तस्यानुचरांश्च हतवानिति वदति । **नृमणाः** नृषु मनो यस्य सः । यद्वा कर्मनेतृष्वृत्विक्ष्वेकविधं मनो यस्य स तथोक्तः । तादृशः सन् **स्नेहितीः**, स्नेहतिर्वधकर्मसु पठितः । सर्वस्य हिंसीत्रीस्तस्य सेनाः **अप अधत्त** । अपधानं हननम् । अवधीदित्यर्थः । 'अप स्नीहितिं' नृमणा अधद्राः' (साम. सं. १।४।१।४।१) इति छन्दोगाः पठन्ति । तस्यानुचरान् हत्वा तं द्रुतं गच्छन्तमसुरमपाधत्त हतवान् ।

द्रप्समपश्यं विषुणे चरन्तमुपह्वरे
नद्यो अंशुमत्याः ।
नभो न कृष्णमवतस्थिवांसमिष्यामि
वो वृषणो युध्यताजौ ॥८॥ ऋ. ८।९६।१४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

द्रप्सम् । अपश्यम् । विषुणे । चरन्तम् । उपऽह्वरे । नद्यः । अंशुमत्याः । नभः । न । कृष्णम् । अवतस्थिऽवांसम् । इष्यामि । वः । वृषणः । युध्यत । आजौ ॥८॥

तुरीयपादो मारुतः। मरुतः प्रति यद्वाक्यमिन्द्र उवाच तदत्र कीर्त्यते। हे मरुतः! **द्रप्सं** द्रुतगामिनं कृष्णमहम् **अपश्यम्** अदर्शम्। कुत्र वर्तमानम्? **विषुणे** विष्वगञ्चने सर्वतो विस्तृते देशे। यद्वा, विषुणो विषमः। विषमे परैरदृश्ये गुहारूपे देशे। **चरन्तं** परितो गच्छन्तम्। किञ्च **अंशुमत्याः** एतन्नामिकायाः **नद्यः** नद्याः **उपह्वरे** अत्यन्तं गूढे स्थाने **नभो न** नभसि यथाऽऽदित्यो दीप्यते तद्वत्तत्र दीप्यमानम् **अवतस्थिवांसम्** उदकस्यान्तरवस्थितं **कृष्णम्** एतन्नामकमसुरमपश्यम्। तस्मिन् दृष्टे सति हे **वृषणः**! कामानामुदकानां वा सेक्तारो मरुतः! **वः** युष्मान् युद्धार्थम् **इष्यामि** अहमिच्छामि। ततो यूयं तमिमं कृष्णम् **आजौ**। **अजन्ति** गच्छन्त्यत्र योद्धार आयुधानि प्रक्षेपयन्तीति वाजिः सङ्ग्रामः। तस्मिन् **युध्यत** संहरत। वाक्यभेदादनिघातः। केचित्। इष्यामि वो मरुतः इति पठन्ति। तत्र हे मरुतः! वो युष्मानिच्छामीत्यर्थो भवति।

अध द्रप्सो अंशुमत्या उपस्थेऽधारयत्
तन्वं तित्विषाणः।
विशो अदेवीरभ्याचरन्तीर्बृहस्पतिना
युजेन्द्रः ससाहे ॥९॥ ऋ. ८।९६।१५

पदपाठः

अध । द्रप्सः । अंशुऽमत्याः । उपऽस्थे । अधारयत् । तन्वम् । तित्विषाणः । विशः । अदेवीः । अभि । आऽचरन्तीः । बृहस्पतिना । युजा । इन्द्रः । ससहे ॥९॥

अध अथ **द्रप्सः** द्रुतगामी कृष्णः **अंशुमत्याः** नद्याः **उपस्थे** समीपे **तित्विषाणः** दीप्यमानः सन् **तन्वम्** आत्मीयं शरीरम् **अधारयत्**। परैरहिंस्यत्वेन बिभर्ति। यद्वा, बलप्राप्त्यर्थं स्वशरीरमाहारादिभिरपोषयत्। तत्र **इन्द्रः** गत्वा **बृहस्पतिना** एतन्नामकेन देवेन **युजा** सहायेन **अदेवीः** अद्योतमानाः कृष्णरूपा इत्यर्थः। यद्वा पापयुक्तत्वादस्तुत्याः। **आचरन्तीः** आगच्छन्तीः **विशः** असुरसेनाः **अभि ससहे** जघान। तमवधीदिति प्रसङ्गादवगम्यते।

त्वं ह त्यत् सप्तभ्यो जायमानोऽशत्रुभ्यो
अभवः शत्रुरिन्द्र।
गूल्हे द्यावापृथिवी अन्वविन्दो
विभुमद्भ्यो भुवनेभ्यो रणं धाः ॥१०॥ ऋ. ८।९६।१६

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

त्वम् । ह । त्यत् । सप्तऽभ्यः । जायमानः । अशत्रुऽभ्यः । अभवः । शत्रुः । इन्द्र । गूल्हे इति । द्यावापृथिवी इति । अनु । अविन्दः । विभुमत्ऽभ्यः । भुवनेभ्यः । रणम् । धाः ।।१०।।

हे **इन्द्र** ! **त्वं** खलु **त्यत्** तत् कर्म कृतवानसि । किं तत् ? उच्यते । **जायमानः** त्वं प्रादुर्भवन्नेव **अशत्रुभ्यः** शत्रुरहितेभ्यः **सप्तभ्यः** कृष्णवृत्रनमुचिशम्बरादिसप्तभ्यो बलवद्भ्यः शत्रुभ्यः तदर्थं **शत्रुः अभवः** । यद्वा, सप्तभ्यः सप्तैवाङ्गिरसः । सप्तभ्योऽङ्गिरोभ्यो गवानयनार्थं प्रादुर्भवन्नेवाशत्रुभ्यो बलवद्भ्यः पणिभ्यः शत्रुरभवः । किञ्च हे इन्द्र ! त्वं **गूल्हे** तमसा गूढे संवृते **द्यावापृथिवी** द्यावापृथिव्यौ सूर्यात्मना ते प्रकाश्यानुक्रमेण **अविन्दः** अलभथाः । तथा **विभुमद्भ्यः** महत्त्वयुक्तेभ्यः **भुवनेभ्यः** लोकेभ्यः **रणं** रमणं **धाः** धारयसि । विदधासीत्यर्थः ।

त्वं ह त्यदप्रतिमानमोजो वज्रेण
वज्रिन् धृषितो जघन्थ ।
त्वं शुष्णस्यावातिरो वधत्रैस्त्वं
गाः इन्द्र शच्येदविन्दः ।।११।। ऋ. ८।९६।१७

पदपाठः

त्वम् । ह । त्यत् । अप्रतिऽमानम् । ओजः । वज्रेण । वज्रिन् । धृषितः । जघन्थ । त्वम् । शुष्णस्य । अव । अतिरः । वधत्रैः । त्वम् । गाः । इन्द्र । शच्या । इत् । अविन्दः ।।११।।

हे **इन्द्र** ! **त्वं ह** त्वं खलु **त्यत्** एतत् कर्माकार्षीः । किं तत् ? अभिधीयते । हे **वज्रिन्** वज्रवन्निन्द्र ! **धृषितः** धृष्टः सङ्ग्रामेषु शत्रुहनने कुशलः सन् । यद्वा, धृष्टो धीरः सन् **अप्रतिमानम्** । प्रतिमानमुपमा, निरुपमम् । अस्य सदृशमन्यदीयं वीर्यं नास्तीत्यर्थः । तादृशं **शुष्णस्य ओजः** बलं **वज्रेण** आयुधेन **जघन्थ** हतवानसि । 'अभ्यासाच्च' इति हन्तेर्घत्वम् । पूर्वं शुष्णस्य बलं विनाश्येदानीं शुष्णमपि हतवानित्याह । **त्वं वधत्रैः** हननसाधनैरायुधैः **शुष्णस्य** । 'क्रियाग्रहणं कर्तव्यम्' इति सम्प्रदानसंज्ञा । 'चतुर्थ्यर्थे बहुलम्' इति षष्ठी । शुष्णम् **अवातिरः** । कुत्साय राजर्षयेऽवाङ्मुखं कृत्वाऽवधीः । तथा च निगमः—'कुत्साय शुष्णमशुषं नि बर्हीः' (ऋ० सं० ४।१६।१२) इति । तथा हे इन्द्र ! **त्वं शच्या** स्वकीयया प्रज्ञया कर्मणा वा **गाः** शत्रून् हत्वा तेषां गाः **अविन्दः इत्** अलभथा एव । यद्वा, अङ्गिरसां गाः पणीन् संप्रहृत्य लब्धवानसि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तमिन्द्रं वाजयामसि महे वृत्राय हन्तवे ।
स वृषा वृषभो भुवत् ॥१२॥ ऋ. ८।९३।७

पदपाठः

तम् । इन्द्रम् । वाजयामसि । महे । वृत्राय । हन्तवे । सः । वृषा । वृषभः । भुवत् ॥१२॥

यजमाना आहुः । तं पूर्वोक्तलक्षणम् इन्द्रं **वाजयामसि** वाजयामः । सोमेन स्तुतिभिर्वा वाजवन्तं बलवन्तं कुर्मः । किमर्थम् ? **महे** महते **वृत्राय** अपामावरकं वृत्रासुरं **हन्तवे** हन्तुम् । सोमपानेन मत्तः स्तुतिभिर्वा स्तुतः सन् **वृषा** धनानां सेक्ता दाता **सः** इन्द्रः **वृषभः** अस्माकं स्तोतॄणां सोमस्य दातृजनानां धनादिसेचको दाता **भुवत्** भवतु ।

इन्द्रः स दामने कृत ओजिष्ठः स मदे हितः ।
द्युम्नी श्लोकी स सोम्यः ॥१३॥ ऋ. ८।९३।८

पदपाठः

इन्द्रः । सः । दामने । कृतः । ओजिष्ठः । सः । मदे । हितः । द्युम्नी । श्लोकी । सः । सोम्यः ॥१३॥

सः इन्द्रः दामने स्तोतृभ्यो धनादिदानायैव **कृतः** प्रजापतिना सृष्टः । किञ्च **ओजिष्ठः** ओजस्वितमः **सः** एवेन्द्रः **मदे** । माद्यन्त्यनेनेति मदः सोमः । तस्मिंश्च प्रजापतिना सृष्टिकाले **हितः** । सोमपानार्थं च निहित इत्यर्थः । **द्युम्नी** । 'द्युम्नं द्योततेर्यशो वान्नं वा' इति । यशस्व्यन्नवान् वा, अत एव **श्लोकी** । श्लोकः स्तुतिः । तद्वान् **सः** इन्द्रः **सोम्यः** सोमार्हो भवति ।

गिरा वज्रो न संभृतः सबलो अनपच्युतः ।
ववक्ष ऋष्वो अस्तृतः ॥१४॥ ऋ. ८।९३।९

पदपाठः

गिरा । वज्रः । न । सम्ऽभृतः । सऽबलः । अनपऽच्युतः । ववक्षे । ऋष्वः । अस्तृतः ॥१४॥

गिरा स्तुतिलक्षणया वाचा स्तोतृभिः **संभृतः** उत्पादितस्तीक्ष्णीकृतः । तत्र दृष्टान्तः । **वज्रो न** । वज्र आयुधम् । तत्कर्तृभिर्निशितधारो यथा भवति तीक्ष्णीक्रियते तद्वत् स्तोतृभिः स्तुत्या संभृतोऽत एव **सबलः** बलसहितस्तस्मात् **अनपच्युतः** परैरप्रच्युतः, अनभिगत इत्यर्थः । तादृशः **ऋष्वः** महान् दीप्यमानो वा **अस्तृतः** युद्धे शत्रुभिरहिंसित इन्द्रः **ववक्षे** स्तोतृभ्यो धनादिकं वोढुमिच्छति ।

इति नवमेऽनुवाके एकचत्वारिंशं सूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अष्टात्रिंशदुत्तरशततमं सूक्तम्

तृचस्यास्य सूक्तस्य वत्स ऋषिः । इन्द्रो देवता । गायत्री छन्दः ।

अतिरात्रे अतिरिक्तोक्थेषु 'महाँ इन्द्रो य ओजसा' इत्यस्य विनियोगः 'तमिन्द्रं वाजयामसि' (अथर्व० २०।४७) इत्यनेन सह उक्तः ।

तथा छन्दोमाख्येषु त्रिष्वहःसु अस्य विनियोगस्तत्रैवोक्तः । तथा त्र्यहाणां तृतीयेष्वहःसु 'महाँ इन्द्रो य ओजसा' इत्यस्य विनियोगः अभि प्र वः सुराधसम्' (अथर्व० २०।५१) इत्यत्र उक्तः ।

तथा चतुरहाणां चतुर्थेष्वहःसु 'महाँ इन्द्रो य ओजसा' (अथर्व० २०।१३८) 'य एक इद् विदयते' (२०।६३।४) इत्येतौ आज्योक्थस्तोत्रियौ भवतः । तद् उक्तं वैताने—"चतुर्थेषु 'महाँ इन्द्रो य ओजसा', 'य एक इद् विदयते' इति" (वैता. श्रौ. ४१।११) इति ।

तथा त्रिककुद्दशाहस्य अष्टमेऽहनि एष आज्यस्तोत्रियो भवति । तद् उक्तं वैताने—"अष्टमे 'महाँ इन्द्रो य ओजसा' इति" (वैता. श्रौ. ४२।६) इति ।

महाँ इन्द्रो य ओजसा पर्जन्यो वृष्टिमाँ इव ।
स्तोमैर्वत्सस्य वावृधे ॥१॥ ऋ. ८।६।१

पदपाठः

महान् । इन्द्रः । यः । ओजसा । पर्जन्यः । वृष्टिमान्ऽइव । स्तोमैः । वत्सस्य । ववृधे ॥१॥

यः इन्द्रः ओजसा बलेन **महान्** सर्वेभ्योऽधिकः । क इव ? **वृष्टिमानिव** । यथा वृष्ट्या युक्तः **पर्जन्यः** रसानां प्रार्जयिता देवो महान् स इवेत्यर्थः । **स इन्द्रः वत्सस्य** पुत्रस्थानीयस्य स्तोतुर्वत्सनाम्न एवर्षेः **स्तोमैः** स्तोत्रैः **ववृधे** प्रवर्धते ।

प्रजामृतस्य पिप्रतः प्र यद्भरन्त वह्नयः ।
विप्रा ऋतस्य वाहसा ॥२॥ ऋ. ८।६।२

पदपाठः

प्रऽजाम् । ऋतस्य । पिप्रतः । प्र । यत् । भरन्त । वह्नयः । विप्राः । ऋतस्य । वाहसा ॥२॥

ऋतस्य यज्ञस्य सत्यस्य वा **प्रजां** प्रकर्षेण जातमिन्द्रं **पिप्रतः** नभसः प्रदेशान् पूरयन्तः **वह्नयः** वाहका अश्वाः **यत्** यदा **प्र भरन्त** प्रकर्षेण भरन्ति वहन्ति तदा **विप्राः** मेधाविनः **ऋतस्य** यज्ञस्य **वाहसा** प्रापकेण स्तोत्रेण तमिन्द्रं स्तुवन्तीति शेषः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कण्वा इन्द्रं यदक्रत स्तोमैर्यज्ञस्य साधनम् ।
जामि ब्रुवत आयुधम् ।।३।। ऋ. ८।६।३

पदपाठः

कण्वाः । इन्द्रम् । यत् । अक्रत । स्तोमैः । यज्ञस्य । साधनम् । जामि । ब्रुवते । आयुधम् ।।३।।

कण्वाः स्तोतृनामैतत् स्तोतारः कण्वगोत्रा वा **इन्द्रं** **स्तोमैः** स्तोत्रैः **यज्ञस्य** यागस्य साधनं साधयितारं निष्पादकं **यत्** यदा **अक्रत** अकृषत । करोतेर्लुङि 'मन्त्रे घस०' इति च्लेर्लुक् । तदानीम् **आयुधं** शत्रूणां हिंसकं बाणादिकं **जामि** अतिरेकनामैतत् । अतिरिक्तमहितं प्रयोजनरहितं **ब्रुवते** कथयन्ति । आयुधसाध्यस्य सर्वकार्यस्येन्द्रेण कृतत्वादायुधं निष्प्रयोजनमित्यर्थः । यद्वा आयुधमायोधनशीलमिन्द्रं जामि जामिं भ्रातरं ब्रुवते वदन्ति । सर्वकार्येषु भ्रातृवद्वर्तत इत्यर्थः ।

इति नवमेऽनुवाके द्विचत्वारिंशं सूक्तम् ।

एकोनचत्वारिंशदुत्तरशततमं सूक्तम्

पञ्चर्चस्यास्य सूक्तस्य शशकर्ण ऋषिः । अश्विनौ देवते । प्रथमाचतुर्थ्यो-ऋचोर्बृहती, द्वितीया-तृतीययोर्गायत्री, पञ्चम्याश्च ककुप् छन्दांसि ।

अतिरात्रे अतिरिक्तोक्थेषु स्तोत्रियानुरूपयोरनन्तरम् 'आ नूनमश्विना युवम्' (अथर्व० २०।१३९) 'तं वां रथम्' (अथर्व० २०।१४३) इति सूक्ते शंसति । तत्र पूर्वसूक्तस्य दशमीं द्वादशीमृचम् उत्तरसूक्तं च **पच्छः** शंसति । तद् उक्तं वैताने—"आ नूनमश्विना युवं' 'तं वां रथम्' इति सूक्ते । पूर्वस्य दशमीं द्वादशीमुत्तरं च पच्छः" (वैता. श्रौ. २७।२९) इति ।

आ नूनमश्विना युवं वत्सस्य गन्तमवसे ।
प्रास्मै यच्छतमवृकं पृथुच्छर्दिर्युयुतं या अरातयः ।।१।।
ऋ. ८।९।१

पदपाठः

आ । नूनम् । अश्विना । युवम् । वत्सस्य । गन्तम् । अवसे । प्र । अस्मै । यच्छतम् । अवृकम् । पृथु । छर्दिः । युयुतम् । याः । अरातयः ।।१।।

हे **अश्विना** अश्विनौ ! युवं युवां **वत्सस्य** स्तोतुर्मम **अवसे** रक्षणार्थं **नूनम्** अवश्यम् **आ गन्तम्** आगच्छतम् । आगत्य च **अस्मै** ऋषये **अवृकं** बाधकरहितं **पृथु** विस्तीर्णं **छर्दिः** गृहं **प्र यच्छतं** प्रदत्तम् । तथा **याः** **अरातयः** अदानशीलाः शत्रुभूताः प्रजास्ताः **युयुतं** स्तोतृभ्यः पृथक्कुरुतम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदन्तरिक्षे यद्दिवि यत्पञ्च मानुषाँ अनु ।
नृम्णं तद्धत्तमश्विना ॥२॥ ऋ. ८।६।२

पदपाठः

यत् । अन्तरिक्षे । यत् । दिवि । यत् । पञ्च । मानुषान् । अनु । नृम्णम् । तत् । धत्तम् । अश्विना ॥२॥

अन्तरिक्षे गन्धर्वादिभिः सेविते मध्यमे लोके **यत् नृम्णं** धनमस्ति । **दिवि** द्युलोके च **यत्** अस्ति । **पञ्च** पञ्चसङ्ख्याकान् **मानुषान्** मनुष्यान् **अनु** । लक्षणेऽनोः कर्मप्रवचनीयत्वम् । 'कर्मप्रवचनीययुक्ते' इति द्वितीया । पञ्चविधा मनुष्या निषादपञ्चमाश्चत्वारो वर्णा यत्र वर्तन्ते तत्र चेह लोके यत् नृम्णं धनमस्ति । हे **अश्विनौ !** तत् त्रिविधं नृम्णं धनं **धत्तम्** अस्मभ्यं प्रयच्छतम् ।

ये वां दंसांस्यश्विना विप्रासः परिमामृशुः ।
एवेत्काण्वस्य बोधतम् ॥३॥ ऋ. ८।६।३

पदपाठः

ये । वाम् । दंसांसि । अश्विना । विप्रासः । परिऽममृशुः । एव । इत् । काण्वस्य । बोधतम् ॥३॥

हे **अश्विनौ ! वां** युवयोः सम्बन्धीनि **दंसांसि** कर्माणि परिचरणात्मकानि **ये विप्रासः** विप्रा मेधाविनो यजमानाः **परिमामृशुः** परिमृशन्ति पुनः स्पृशन्ति । अनुतिष्ठन्तीत्यर्थः । यथा तदीयानि परिचरणानि युवां जानीथः **एवेत्** एवमेव **काण्वस्य** कण्वपुत्रस्य मम परिचरणं **बोधतम्** अवगच्छतम् ।

अयं वां घर्मो अश्विना स्तोमेन परि षिच्यते ।
अयं सोमो मधुमान् वाजिनीवसू
येन वृत्रं चिकेतथः ॥४॥ ऋ. ८।६।४

पदपाठः

अयम् । वाम् । घर्मः । अश्विना । स्तोमेन । परि । सिच्यते । अयम् । सोमः । मधुऽमान् । वाजिनीवसू इति वाजिनीऽवसू । येन । वृत्रम् । चिकेतथः ॥४॥

हे **अश्विनौ ! वां** युवयोः सम्बन्धी **अयं घर्मः** प्रवर्ग्यं **स्तोमेन** स्तोत्रेण ऋक्सामरूपेण **परि षिच्यते** आर्द्रीक्रियते । यथा युवयोस्तृप्तिकरो भवति तथा क्रियत इत्यर्थः । यद्वा घर्मस्य हविष आधारभूतो महावीरो घर्मः । सः स्तोमेन स्तोतव्येन पयसा परि षिच्यते आसिक्यते वां युवयोरर्थम् । अपि च हे **वाजिनीवसू** अन्नवद्धनौ !

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अयं सोमः तार्तीयसवनिको **मधुमान्** माधुर्यवान् युवाभ्यां दीयते । **येन** युवां **वव्रम्** आवरकं शत्रुं **चिकेतथः** हन्तव्यतया जानीथः । अयं घर्मः सोमश्चेत्युभयत्रान्वयः ।

यदप्सु यद्वनस्पतौ यदोषधीषु पुरुदंससा कृतम् ।
तेन माविष्टमश्विना ॥५॥ ऋ. ८।९।५

पदपाठः

यत् । अप्ऽसु । यत् । वनस्पतौ । यत् । ओषधीषु । पुरुऽदंससा । कृतम् । तेन । मा । अविष्टम् । अश्विना ॥५॥

हे **पुरुदंससा** बहुकर्माणावश्विनौ ! **अप्सु** उदकेषु **यत्** भेषजं **कृतं** युवामकार्ष्टम् । करोतेर्लुङि 'मन्त्रेघस०' इत्यादिना च्लेर्लुक् । तथा **वनस्पतौ** । वनानां पतिर्वनस्पतिः । पारस्करादित्वात् सुट् । जातौ त्वेकवचनम् । वनस्पतिषु वृक्षेषु यत् च भेषजं युवामकुरुतम् । **ओषधीषु** । ओषः पाक आसु धीयते इत्योषधयो व्रीह्यादयः । 'कर्मण्यधिकरणे च' इति दधातेरधिकरणे किप्रत्ययः । 'ओषधेश्च विभक्तावप्रथमायाम्' (पा. सू ६।३।१३२) इति दीर्घः । हे **अश्विना** अश्विनौ ! **तेन** सर्वेण भेषजेन **मा** माम् **अविष्टं** रक्षतम् । अवतेर्लोटि 'सिब्बहुलम्' इति बहुलग्रहणात् सिप्, तत इट् ।

इति नवमेऽनुवाके त्रिचत्वारिंशं सूक्तम् ।

चत्वारिंशदुत्तरशततमं सूक्तम्

पञ्चर्चस्यास्य सूक्तस्य शशकर्ण ऋषिः । अश्विनौ देवते । प्रथमर्चो बृहती, द्वितीयादितृचस्यानुष्टुप्, पञ्चम्याश्च त्रिष्टुप् छन्दांसि ।

यन्नासत्या भुरण्यथो यद्वा देव भिषज्यथः ।
अयं वां वत्सो मतिभिर्न विन्धते
हविष्मन्तं हि गच्छथः ॥१॥ ऋ. ८।९।६

पदपाठः

यत् । नासत्या । भुरण्यथः । यत् । वा । देवा । भिषज्यथः । अयम् । वाम् । वत्सः । मतिऽभिः । न । विन्धते । हविष्मन्तम् । हि । गच्छथः ॥१॥

हे **नासत्या** सत्यस्वभावावश्विनौ ! **यत्** यौ युवां **भुरण्यथः** सर्वं जगत्पोषयथः । 'भुरण् धारणपोषणयोः' । कण्ड्वादिः । हे **देवा** दानादिगुणयुक्तावश्विनौ ! छान्दसः सांहितिको ह्रस्वः, **यद्वा** यौ च युवां **भिषज्यथः** सर्वस्य प्राणिजातस्य भैषज्यं रोगोपशमनं कुरुथः । 'भिषज् चिकित्सायाम्' । अयमपि कण्ड्वादिः । तौ **वां** युवाम् **अयं वत्सः** स्तोता **मतिभिः** मननीयैः केवलैः स्तोत्रैः **न विन्धते** न विन्दते न लभते । वर्णविकारश्छान्दसः । कुत इति चेत् उच्यते । **हविष्मन्तं** हविर्भिर्युक्तं स्तोतारं **हि** युवां **गच्छथः** । तस्माद्युवां हविर्भिर्युक्तैः स्तोत्रैः प्रसीदथ इति भावः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आ नूनमश्विनोर्ऋषि स्तोमं चिकेत वामया ।
आ सोमं मधुमत्तमं घर्मं सिञ्चादथर्वणि ॥२॥

ऋ. ८।९।७

पदपाठः

आ । नूनम् । अश्विनोः । ऋषिः । स्तोमम् । चिकेत । वामया । आ । सोमम् । मधुमत्ऽतमम् । घर्मम् । सिञ्चात् । अथर्वणि ॥२॥

हे अश्विनौ ! यदा युवामागच्छेयाथां तदानीं युवयोः **अश्विनोः स्तोमं** स्तोत्रम् **ऋषिः** मन्त्रद्रष्टा **वामया** वननीययोत्कृष्टया बुद्धया **नूनम्** अवश्यम् **आ चिकेत** अभिजानीयात् । 'कित ज्ञाने' । छान्दसो लिट् । तथा **मधुमत्तमम्** अतिशयेन मधुरं **सोमं घर्मं** प्रवर्ग्यसम्बन्धि घर्माख्यं हविश्च **अथर्वणि** अहिंसके अग्नौ । यद्वा, अथर्वा ऋषिः तेन निर्मथितोऽग्निः उपचारादथर्वेत्युच्यते । अथर्वणा निर्मथनं च 'त्वामग्ने पुष्करादधि' (ऋ. सं. ६।१६।१३) इत्यादिनिगमान्तरेऽवगम्यते । तस्मिन्नग्नौ **आसिञ्चात्** आसिञ्चेत् प्रक्षिपेत् । अतः शीघ्रमागच्छतमित्यर्थः । 'ऋषिः' इति ऋक्पाठः ।

आ नूनं रघुवर्तनिं रथं तिष्ठाथो अश्विना ।
आ वां स्तोमा इमे मम नभो न चुच्यवीरत ॥३॥

ऋ. ८।९।८

पदपाठः

आ । नूनम् । रघुऽवर्तनिम् । रथम् । तिष्ठाथः । अश्विना । आ । वाम् । स्तोमाः । इमे । मम । नभः । न । चुच्यवीरत ॥३॥

हे अश्विनौ ! **रघुवर्तनिं** लघुवर्तनं शीघ्रगमनं **रथं नूनम्** अवश्यमिदानीमेव **आ तिष्ठाथः** आतिष्ठतम् अधिरोहतम् । 'वालमूललघ्वलमङ्गुलीनां०' (वा० ८।२।१८) इति लघोर्लकारस्य रेफः । **मम** मदीयाः **इमे स्तोमाः** स्तोत्राणि **नभो न** सूर्यमिव तेजस्विनौ **वां** युवाम् **आ चुच्यवीरत** आच्यवन्ते अभिगच्छन्ति । यद्वा, च्यवतिरत्र अन्तर्भावितण्यर्थः आच्यावयन्ति युवामभिप्रापयन्ति ।

यदद्य वां नासत्योक्थैराचुच्युवीमहि ।
यद्वा वाणीभिरश्विनेवेत् काण्वस्य बोधतम् ॥४॥

ऋ. ८।९।९

पदपाठः

यत् । अद्य । वाम् । नासत्या । उक्थैः । आऽचुच्युवीमहि । यत् । वा । वाणीभिः । अश्विना । एव । इत् । काण्वस्य । बोधतम् ॥४॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नासत्या हे अश्विनौ ! **अद्य** इदानीम् उक्थैः शस्त्रैः **यत्** यथा येन प्रकारेण **वां** युवाम् **आचुच्युवीमहि** आगमयेम **यद्वा** यथा **वाणीभिः** उक्थव्यतिरिक्ताभिरपि वाग्भिः स्तुतिभिः युवामागमयेम **एवेत्** एवमेव तथैव **काण्वस्य** मम तदुक्थादिकं **बोधतम्** अवगच्छतम् ।

यद्वां कक्षीवाँ उत यद्व्यश्व
ऋषिर्यद् वां दीर्घतमा जुहाव ।
पृथी यद् वां वैन्यः सादनेष्वेवेदतो
अश्विना चेतयेथाम् ॥५॥ ऋ. ८।९।१०

पदपाठः

यत् । वाम् । कक्षीवान् । उत । यत् । विऽअश्वः । ऋषिः । यत् । वाम् । दीर्घऽतमाः । जुहाव । पृथी । यत् । वाम् । वैन्यः । सदनेषु । एव । इत् । अतः । अश्विना । चेतयेथाम् ॥५॥

हे अश्विनौ ! **वां** युवां **कक्षीवान्** ऋषिः **यत्** यथा **जुहाव** तुष्टाव । **उत** अपि च **व्यश्वः** एतत्संज्ञः ऋषिश्च **यत्** यथा जुहाव । **यत्** यथा च **वां** युवां **दीर्घतमाः** ऋषिर्जुहाव । **सदनेषु** यज्ञगृहे **वैन्यः** वेनस्य पुत्रः **पृथी** एतत्संज्ञो राजर्षिः **वां** युवां **यत्** यथा जुहाव तुष्टाव । **एवेत्** एवमेव स्तुवतो मम **अतः** इदं स्तोत्रम् । इदंशब्दात् द्वितीयार्थे तसिः । हे **अश्विनौ** ! **चेतयेथां** जानीतम् ।

इति नवमेऽनुवाके चतुश्चत्वारिंशं सूक्तम् ।

एकचत्वारिंशदुत्तरशततमं सूक्तम्

पञ्चर्चस्यास्य सूक्तस्य शशकर्ण ऋषिः । अश्विनौ देवते । प्रथमर्चो विराडनुष्टुप्, द्वितीयाया जगती, तृतीयाया अनुष्टुप्, चतुर्थी–पञ्चम्योश्च बृहती छन्दांसि ।

यातं छर्दिष्पा उत नः परस्पा
भूतं जगत्पा उत नस्तनूपा ।
वर्तिस्तोकाय तनयाय यातम् ॥१॥ ऋ. ८।९।११

पदपाठः

यातम् । छर्दिःऽपौ । उत । नः । परःऽपा । भूतम् । जगत्ऽपौ । उत । नः । तनूऽपा । वर्तिः । तोकाय । तनयाय । यातम् ॥१॥

हे अश्विनौ ! **छर्दिष्पौ**, छर्दिरिति गृहनाम । तस्यास्मदीयस्य पालकौ सन्तौ **युवां यातम्** आगच्छतम् । **उत** अपि च **नः** अस्माकं **परस्पा** परमतिशयेन पालकौ

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भूतं भवतम् । पारस्करादित्वात्सुट् । तथा **जगत्पौ** सर्वस्य जगतो जङ्गमस्य प्राणि-जातस्यास्मदीयस्य पालकौ भवतम् । **उत** अपि च **नः** अस्माकं **तनूपा** तनूनां शरीराणां तनयानां वा पालकौ भवतम् । एतत्सर्वार्थं **तोकाय** तोकस्य पुत्रस्य **तनयाय** तनयस्य पौत्रस्य चास्मदीयस्य **वर्तिः** गृहं **यातं** गच्छतम् ।

यदिन्द्रेण सरथं याथो अश्विना यद् वा
वायुना भवथः समोकसा ।
यदादित्येभिर्ऋभुभिः सजोषसा
यद्वा विष्णोर्विक्रमणेषु तिष्ठथः ॥२॥ ऋ. ८।९।१२

पदपाठः

यत् । इन्द्रेण । सऽरथम् । याथः । अश्विना । यत् । वा । वायुना । भवथः । सम्ऽओकसा । यत् । आदित्येभिः । ऋभुऽभिः । सऽजोषसा । यत् । वा । विष्णोः । विऽक्रमणेषु । तिष्ठथः ॥२॥

हे अश्विनौ ! **इन्द्रेण** सह **सरथं** समानमेकं रथमास्थाय **यत्** यदि **याथः** गच्छथः । यद्वा यदि वा **वायुना** सह **समोकसा** समाननिवासौ **भवथः** । **यत्** यदि वा **आदित्येभिः** अदितिपुत्रैर्मित्रादिभिः **ऋभुभिः** च **सजोषसा** सह प्रीयमाणौ वर्तेथे । **यद्वा** यदि वा **विष्णोर्विक्रमणेषु** विष्णुना देवेन विक्रान्तेषु त्रिषु लोकेषु **तिष्ठथः** । अतः सर्वस्मादपि स्थानादागच्छतमिति शेषः ।

यदद्याश्विनावहं हुवेय वाजसातये ।
यत्पृत्सु तुर्वणे सहस्तच्छ्रेष्ठमश्विनोरवः ॥३॥
ऋ. ८।९।१३

पदपाठः

यत् । अद्य । अश्विनौ । अहम् । हुवेय । वाजऽसातये । यत् । पृत्ऽसु । तुर्वणे । सहः । तत् । श्रेष्ठम् । अश्विनोः । अवः ॥३॥

यत् यदा **अहम् अश्विनौ वाजसातये** सङ्ग्रामार्थं **हुवेय** आह्वयेय **अद्य** इदानीं तावागच्छमिति शेषः । **पृत्सु** पृतनासु सङ्ग्रामेषु **तुर्वणे** शत्रूणां हिंसने **यत् सहः** शत्रूणामभिभवितृरक्षणम् **अश्विनोः तत् अवः** रक्षणं **श्रेष्ठं** प्रशस्यतमम् । अतस्ता-वाह्वयामीति भावः ।

आ नूनं यातमश्विनेमा हव्यानि वां हिता ।
इमे सोमासो अधि पुर्वशे यदाविमे
कण्वेषु वामथ ॥४॥ ऋ. ८।९।१४

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

आ । नूनम् । यातम् । अश्विना । इमा । हव्यानि । वाम् । हिता । इमे । सोमासः । अधि । तुर्वशे । यदौ । इमे । कण्वेषु । वाम् । अथ ॥४॥

हे अश्विनौ ! **नूनम्** अवश्यम् **आ यातम्** आगच्छतम् । **इमा** इमानि पुरोवर्तीनि **हव्यानि** हवींषि **वां** युवाभ्यां **हिता** हितानि । **यद्वा** युवयोरर्थं विहितानि कृतानि । **इमे** च **सोमासः** सोमाः **तुर्वशे यदौ** च वर्तमानाः । **वां** युवाभ्यां युवयोरर्थे संस्कृता वा । अधिः सप्तम्यर्थानुवादकः । **अथ** अपि च **कण्वेषु** कण्वपुत्रेष्वस्मासु च इमे सोमाः **वां** युवाभ्यां दत्ताः । अत आयातमित्यर्थः ।

यन्नासत्या पराके अर्वाके अस्ति भेषजम् ।
तेन नूनं विमदाय प्रचेतसा
छर्दिर्वत्साय यच्छतम् ॥५॥ ऋ. ८।९।१५

पदपाठः

यत् । नासत्या । पराके । अर्वाके । अस्ति । भेषजम् । तेन । नूनम् । विऽमदाय । प्रऽचेतसा । छर्दिः । वत्साय । यच्छतम् ॥५॥

हे **नासत्या** ! अश्विनौ ! **पराके** दूरदेशे **अर्वाके** समीपे च **यत्** युवयोः संबन्धि **भेषजं** रोगोपशमनकारणम् अस्ति **तेन** भेषजेन सहितं **छर्दिः** गृहं हे **प्रचेतसा** प्रकृष्टज्ञानावश्विनौ ! **विमदाय**। लुप्तोपममेतत् । एतत्संज्ञाय इव ऋषये **वत्साय नूनम्** अवश्यं प्रयच्छतम् ।

इति नवमेऽनुवाके पञ्चचत्वारिंशं सूक्तम् ।

द्विचत्वारिंशदुत्तरशततमं सूक्तम्

षड्ऋचस्यास्य सूक्तस्य शशकर्ण ऋषिः । अश्विनौ देवते । प्रथमादिचतुर्ऋचामनुष्टुप्, पञ्चमीषष्ठयोश्च गायत्री छन्दसी ।

अभुत्स्यु प्र देव्या साकं वाचाहमश्विनोः ।
व्यावर्देव्या मतिं वि रातिं मर्त्येभ्यः ॥१॥ ऋ. ८।९।१६

पदपाठः

अभुत्सि । उं इति । प्र । देव्या । साकम् । वाचा । अहम् । आश्विनोः । वि । आवः । देवि । आ । मतिम् । वि । रातिम् । मर्त्येभ्यः ॥१॥

अश्विनोः सम्बन्धिन्या द्योतमानया **वाचा** स्तुतिरूपया **साकं** सह **अहं प्र अभुत्सि** प्रवुद्धोऽस्मि । उ इति पूरणः । हे **देवि** द्योतमान उषः ! त्वं च **मतिं** मया

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृतां स्तुतिम् **आ** अभिलक्ष्य **व्याव:** तमांसि विवृणु अपगमय, प्रकाशयेत्यर्थ:। वृणोतेश्छान्दसे लुङि 'मन्त्रे घस०' इत्यादिना च्लेर्लुक्। 'छन्दस्यपि दृश्यते' इत्याडागम:। अपि च **मर्त्येभ्य:** मनुष्येभ्य: स्तोतृभ्योऽस्मभ्यं **रातिं वि आव:** प्रकाशय।

प्र बोधयोषो अश्विना प्र देवि सूनृते महि।
प्र यज्ञहोतरानुषक् प्र मदाय श्रवो बृहत् ॥२॥

ऋ. ८।९।१७।

पदपाठ:

प्र। बोधय। उष:। अश्विना। प्र। देवि। सूनृते। **महि।** प्र। **यज्ञऽहोत:**। आनुषक्। प्र। मदाय। श्रव:। बृहत् ॥२॥

हे उष:! **अश्विनौ** देवौ **प्र बोधय** अस्मत्–स्तोत्रस्य श्रवणार्थम्। हे **देवि** दानादिगुणयुक्ते! हे **सूनृते** सुष्ठुनेत्रि! हे **महि** महति! इत्थं महाभागा त्वमश्विनौ प्र बोधय। हे **यज्ञहोत:**! यज्ञानां यष्टव्यानां देवानामाह्वातर्होतर्वा **आनुषक्** अनुषक्त संततं यथा भवति तथाश्विनौ स्तुतिभि: प्र बोधय। तथा **मदाय** अश्विनोर्मदोत्पादनार्थं **बृहत्** महत् **श्रव:** श्रवणीयं सोमलक्षणमन्नमस्माभि: कल्पितम्।

यदुषो यासि भानुना सं सूर्येण रोचसे।
आ हायमश्विनो रथो वर्तिर्याति नृपाय्यम् ॥३॥

ऋ. ८।९।१८

पदपाठ:

यत्। उष:। यासि। भानुना। सम्। सूर्येण। रोचसे। आ। ह। अयम्। अश्विनो:। रथ:। वर्ति:। याति। नृऽपाय्यम् ॥३॥

हे उष:! **भानुना** दीप्त्या सह **यत्** यदा **यासि** गच्छसि तदानीं **सूर्येण सं रोचसे** सम्यग्दीप्यसे। अपि च तस्मिन् समये अश्विनो: **अयं रथ: नृपाय्यं** यत् नृभिर्नेतृभिर्ऋत्विग्भि: पालनीयं **वर्ति:** यज्ञगृहम् **आ याति ह** आगच्छति खलु।

यदापीतासो अंशवो गावो न दुह्र ऊधभि:।
यद्वा वाणीरनूषत प्र देवयन्तो अश्विना ॥४॥

ऋ. ८।९।१९

पदपाठ:

यत्। आऽपीतास:। अंशव:। गाव:। न। दुह्रे। ऊधऽभि:। यत्। वा। वाणी:। अनूषत। प्र। देवऽयन्त:। अश्विना ॥४॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यत् यदा **आपीतासः** आ समन्तात् पीतवर्णाः **अंशवः** सोमलताः **ऊधभिः गावो** न गाव इव **दुह्रे** रसं दुहते । 'लोपस्त आत्मनेपदेषु' इति तलोपः । 'बहुलं छन्दसि' इति रुडागमः । **यद्वा** यदा च **देवयन्तः** देवान् कामयमाना ऋत्विजः **वाणीः** वाचः स्तुतीः **अनूषत** अस्तुवन् । अकुर्वन्नित्यर्थः । तदाश्विनौ देवौ **प्रावतं** प्ररक्षतम् ।

प्र द्युम्नाय प्र शवसे प्र नृषाह्याय शर्मणे ।
प्र दक्षाय प्रचेतसा ॥५॥ ऋ. ८।९।२०

पदपाठः

प्र । द्युम्नाय । प्र । शवसे । प्र । नृऽसह्याय । शर्मणे । प्र । दक्षाय । प्रऽचेतसा ॥५॥

प्रचेतसा प्रकृष्टज्ञानावाश्विनौ **द्युम्नाय** द्योतमानायान्नाय यशसे वा । तादर्थ्ये चतुर्थी । द्युम्नार्थमस्मान् **प्र** रक्षतम् । **शवसे** बलाय च **प्र** रक्षतम् । **नृषह्याय** नृभिः सोढव्याय **शर्मणे** सुखाय च प्ररक्षतम् । **दक्षाय** वृद्धचर्थं प्ररक्षतम् । यद्वा । द्युम्नायेत्यादौ 'क्रियाग्रहणमपि कर्तव्यम्' इति कर्मणः सम्प्रदानत्वाच्चतुर्थी । द्युम्नादीन्यस्मभ्यं प्रयच्छतमित्यर्थः ।

यन्नूनं धीभिरश्विना पितुर्योना निषीदथः ।
यद्वा सुम्नेभिरुक्थ्या ॥६॥ ऋ. ८।९।२१

पदपाठः

यत् । नूनम् । धीभिः । अश्विना । पितुः । योना । निऽसीदथः । यत् । वा । सुम्नेभिः । उक्थ्या ॥६॥

हे **अश्विनौ ! पितुः** पालयितुर्द्युलोकस्य संबन्धिनि **योना** योनौ स्थाने **यत्** यदि **धीभिः** कर्मभिः सह **निषीदथः** निवसथः । **यद्वा** यदि वा हे **उक्थ्या ! उक्थ्यौ** प्रशस्यौ **सुम्नेभिः** सुम्नैः सुखैः सह निवसथः । तदास्माभिः स्तुतौ सन्तावागच्छतमिति शेषः । अथवा पितुः पालयितुर्यजमानस्य संबन्धिनि योनौ यज्ञगृहे धीभिः स्तुतिभिः साधं यदि निवसथः यदि च सुम्नैः सुखकरैर्हविर्भिश्च सह निवसथः तर्ह्यागच्छतम् । **नूनम्** इति पदपूरणः । उक्तं च यास्केन—'अथापि पदपूरणः । नूनं सा ते प्रति वरं जरित्रे' (निरु. १।७) इति ।

इति नवमेऽनुवाके षट्चत्वारिंशं सूक्तम् ।

त्रिचत्वारिंशदुत्तरशततमं सूक्तम्

नवर्चस्यास्य सूक्तस्य प्रथमादिसप्तर्चां पुरुमीढाजमीढौ, अष्टम्याः पूर्वार्धस्य वामदेवः, अष्टम्या उत्तरार्धस्य नवम्याश्च मेध्यातिथिर्ऋषयः । अश्विनौ देवते । त्रिष्टुप् छन्दः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

'तं वां रथम्' इत्यस्य विनियोगः 'आ नूनमश्विना युवम्' (अथर्व २०।१३९) इत्यत्र उक्तः।

अतिरात्रे अतिरिक्तोक्थे 'मधुमतीरोषधीः' (अथर्व. २०।१४३।८।९) इति द्वे ऋचौ परिधानीयाशस्त्रयाज्ये क्रमेण भवतः। तद् उक्तं वैताने—" 'मधुमतीरोषधीः' इति परिधानीया। उत्तरा याज्या" (वैता. श्रौ. २७।३०) इति।

तं वां रथं वयमद्या हुवेम
पृथुज्रयमश्विना संगतिं गोः।
यः सूर्यां वहति वन्धुरायुर्गिर्वाहसं
पुरुतमं वसूयुम् ॥१॥ ऋ. ४।४४।१

पदपाठः

तम्। वाम्। रथम्। वयम्। अद्य। हुवेम। पृथुऽज्रयम्। अश्विना। सम्ऽगतिम्। गोः। यः। सूर्याम्। वहति। वन्धुरऽयुः। गिर्वाहसम्। पुरुऽतमम्। वसुऽयुम् ॥१॥

हे अश्विनौ! **वां** युवयोः **रथं वयं** स्तोतारः **अद्य** सुत्याहनि **हुवेम** आह्वयामः। कीदृशं तम्? **पृथुज्रयं** प्रथितवेगं **गोः** गवां **संगतिं** संगमयितारम्। **यः** रथः **सूर्यां वहति** धारयति। **वन्धुरयुः** रथे निवासाधारभूतः काष्ठो वन्धुरं तद्वान्। तं **गिर्वाहसं** गिरां स्तुतीनां वोढारं **पुरुतमं** प्रभूततमं **वसुयुं** वसुमन्तम्।

युवं श्रियमश्विना देवता तां दिवो
नपाता वनथः शचीभिः।
युवोर्वपुरभि पृक्षः सचन्ते वहन्ति
यत्ककुहासो रथे वाम् ॥२॥ ऋ. ४।४४।२

पदपाठः

युवम्। श्रियम्। अश्विना। देवता। ताम्। दिवः। नपाता। वनथः। शचीभिः। युवोः। वपुः। अभि। पृक्षः। सचन्ते। वहन्ति। यत्। ककुहासः। रथे। वाम् ॥२॥

हे **दिवो नपाता!** आदित्यस्य पुत्रस्थानीयौ द्युलोकस्य वा न पातयितारौ हे **अश्विनौ! युवं** युवां **देवता** देवते। विभक्तिव्यत्ययः। **तां** प्रसिद्धां **श्रियं शचीभिः** कर्मभिः शक्तिभिर्वा **वनथः** संभजेथे। यद्वा वनतिर्दानार्थः। **युवोः** युवयोः **वपुः** शरीरं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पृक्षः अन्नानि सोमलक्षणानि **अमी सचन्ते** प्राप्नुवन्ति **यत्** यदा रथे वां **वहन्ति ककुहासः** महान्तोऽश्वाः । यद्वा स्तुतयो वां युवां रथे वहन्ति ।

को वामद्या करते रातहव्य ऊतये
वा सुतपेयाय वार्कैः ।
ऋतस्य वा वनुषे पूर्व्याय नमो
येमानो अश्विना ववर्तत् ॥३॥ ऋ. ४।४४।३

पदपाठः

कः । वाम् । अद्य । करते । रातऽहव्यः । ऊतये । वा । सुतऽपेयाय । वा । अर्कैः । ऋतस्य । वा । वनुषे । पूर्व्याय । नमः । येमानः । अश्विना । आ । ववर्तत् ॥३॥

कः यजमानः **अद्य वां** युवयोः **करते** कुर्यात् स्तुतिम् । **अर्कैः** मन्त्रैः **रातहव्यः** दत्तसोमः **ऊतये** वा रक्षणाय वा **सुतपेयाय** सोमपानाय वा । **ऋतस्य** उदकस्य यज्ञस्य वा **पूर्व्याय** पुराणाय **वनुषे** संभजनाय हे **अश्विना** ! अश्विनौ ! **नमो येमानः** नमस्कारं कुर्वाणः कः **आववर्तत्** आवर्तयेत् यज्ञं प्रति ।

हिरण्ययेन पुरुभू रथेनेमं यज्ञं नासत्योप यातम् ।
पिबाथ इन्मधुनः सोम्यस्य दधथो
रत्नं विधते जनाय ॥४॥ ऋ. ४।४४।४

पदपाठः

हिरण्ययेन । पुरुभू इति पुरुऽभू । रथेन । इमम् । यज्ञम् । नासत्या । उप । यातम् । पिबाथः । इत् । मधुनः । सोम्यस्य । दधथः । रत्नम् । विधते । जनाय ॥४॥

हे **पुरुभू** बहु भवन्तो नासत्यौ ! **इमं यज्ञं हिरण्ययेन रथेन उप यातम्** । **सोम्यस्य** सोमसम्बन्धिनः **मधुनः** मधुररसस्य । कर्मणि षष्ठ्यौ । सोमरसं **पिबाथः** पिबथः । **विधते** परिचरते **जनाय** मह्यं **रत्नं** रमणीयं धनं **दधथः** धारयथः । दधते-र्दानार्थस्य लेटि रूपम् ।

आ नो यातं दिवो अच्छा पृथिव्या
हिरण्ययेन सुवृता रथेन ।
मा वामन्ये नि यमन् देवयन्तः
सं यद् ददे नाभिः पूर्व्या वाम् ॥५॥ ऋ. ४।४४।५

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

आ । नः । यातम् । दिवः । अच्छ । पृथिव्याः । हिरण्ययेन । सुऽवृता । रथेन । मा । वाम् । अन्ये । नि । यमन् । देवऽयन्तः । सम् । यत् । ददे । नाभिः । पूर्व्या । वाम् ॥५॥

नः अस्मान् **अच्छ** अभि प्राप्तुं **दिवः** द्युलोकात् पृथिव्याः सकाशाद्वा **आ यातम्** । केन साधनेन ? **हिरण्ययेन** हितरमणीयेन **सुवृता** शोभनावर्तनेन **रथेन** । वां युवां **अन्ये देवयन्तः** देवौ युवामिच्छन्तो यजमानाः **मा नियमन्** नियमनं मा कुर्वन् । **यत्** यस्मात् **पूर्व्या** पूर्वाहा इतरयष्टृभ्यः पूर्वभाविनी **नाभिः** बन्धिका स्तुतिः **सं ददे** सम्बध्नाति, तस्मादायातम् ।

नू नो रयिं पुरुवीरं बृहन्तं
दस्रा मिमाथामुभयेष्वस्मे ।
नरो यद्वामश्विना स्तोम-
मावन्त्सधस्तुतिमाजमीळ्हासो अग्मन् ॥६॥ ऋ. ४।४४।६

पदपाठः

नु । नः । रयिम् । पुरुऽवीरम् । बृहन्तम् । दस्रा । मिमाथाम् । उभयेषु । अस्मे इति । नरः । यत् । वाम् । अश्विना । स्तोमम् । आवन् । सधऽस्तुतिम् । आजऽमीळ्हासः । अग्मन् ॥६॥

नु क्षिप्रं **नः** अस्माकं **रयिं** धनं **पुरुवीरं** बहुपुत्रोपेतं **बृहन्तं** महान्तं हे **दस्रा** अश्विनौ ! **मिमाथां** कुरुतम् । **उभयेषु** पुरुमीळ्हाजमीळ्हेषु **अस्मे** अस्मासु **यत्** यदा **नरः** नेतार ऋत्विजः पुरुमीळ्हसम्बन्धिनः **वां** युवयोः **स्तोमं** स्तोत्रम् **आवन्** अगमन् प्राप्ताः । तथा **सधस्तुतिं** सहस्तुतिम् **आजमीळ्हासः** अजमीळ्हसम्बन्धिनोऽपि तैः सह **अग्मन्** अगमन् ।

इहेह यद्वां समना पपृक्षे सेयमस्मे सुमतिर्वाजरत्ना ।
उरुष्यतं जरितारं युवं ह श्रितः
कामो नासत्या युवद्रिक् ॥७॥ ऋ. ४।४४।७

पदपाठः

इहऽइह । यत् । वाम् । समना । पपृक्षे । सा । इयम् । अस्मे इति । सुऽमतिः । वाजऽरत्ना । उरुष्यतम् । जरितारम् । युवम् । ह । श्रितः । कामः । नासत्या । युवद्रिक् ॥७॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे **अश्विनौ ! यत्** यस्मात् यया वा **सुमत्या इहेह** अस्मिन्नेव **यज्ञे समना** समानमनस्कौ । सदृशावित्यर्थः । तौ **वां** युवां सुमत्या **पपृक्षे** स्तुत्या संयोजयामि । **सेयम्** इदानीं क्रियमाणा **सुमतिः** शोभनस्तुतिः **अस्मे** अस्माकमेव फलवती भवत्विति शेषः । हे **वाजरत्ना** रमणीयान्नौ ! 'अन्नं वै वाजः' (श. ब्रा. ६।३।४।१) इति श्रुतेः । **युवं** युवां **जरितारं** गरितारं स्तोतारं माम् **उरुष्यतं** रक्षतम् । हे **नासत्या** अश्विनौ ! **कामः** अस्मदीयः **युवद्रिक्** ह युवामेव गच्छन् **श्रितः** प्राप्तः ।

मधुमतीरोषधीर्द्याव आपो
मधुमन्नो भवत्वन्तरिक्षम् ।
क्षेत्रस्य पतिर्मधुमान्नो अस्त्वरिष्यन्तो
अन्वेनं चरेम ॥८॥ ऋ. ४।५७।३

पदपाठः

मधुऽमतीः । ओषधीः । द्यावः । आपः । मधुऽमत् । नः । भवतु । अन्तरिक्षम् । क्षेत्रस्य । पतिः । मधुऽमान् । नः । अस्तु । अरिष्यन्तः । अनु । एनम् । चरेम ॥८॥

ओषधीः ओषध्यो व्रीहिप्रियङ्ग्वादयः **नः** अस्मभ्यं **मधुमतीः** मधुमत्यः भवन्तु । **तथा द्यावः** तिस्रो दिव इत्युक्तत्वात् बहुवचनं युक्तम् । तथा **आपः** अन्तरिक्षं च **नः मधुमत्** भवतु । किञ्च **क्षेत्रस्य पतिः** अपि **मधुमान्नो** अस्तु । **अरिष्यन्तः** अन्यैरहिंस्यन्तो वयम् **एनं** क्षेत्रपतिम् **अनु** अनुसृत्य **चरेम** संचरेम सुखेन ।

पनाय्यं तदश्विना कृतं वां
वृषभो दिवो रजसः पृथिव्याः ।
सहस्रं शंसा उत ये गविष्टौ
सर्वाँ इत् ताँ उप याता पिबध्यै ॥९॥ ऋ. ४।५७।३

पदपाठः

पनाय्यम् । तत् । अश्विना । कृतम् । वाम् । वृषभः । दिवः । रजसः । पृथिव्याः । सहस्रम् । शंसाः । उत । ये । गोऽइष्टौ । सर्वान् । इत् । तान् । उप । यात । पिबध्यै ॥९॥

हे **अश्विना** अश्विनौ ! **पृथिव्याः** भूमेर्हेतोः **दिवः** द्युलोकात् सकाशात् **रजसः** उदकस्य **वृषभः** वर्षिता सूर्योऽस्तीति यत् **तत्** सर्वं **वां** युवयोः **कृतं** कर्म **पनाय्यं**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्तुत्यं भवति। भवदनुग्रहादेव युष्मत्पिता सूर्यः पृथिव्यां वर्षति। नो चेत् तेन तु स्वरश्मिनाडीभिः भूमेर्जलमाकृष्टमस्ति स कथं वर्षेदाकर्षकः सन्। तस्मात् भवतोरेवैतत्कर्मेत्यभिप्रायः। यत एवमतः **गविष्टौ** गवामेषणे निमित्ते सति ते प्रसिद्धाः सहस्रसङ्ख्याकाः **शंसाः**। शस्यन्ते स्तूयन्त इति शंसा यज्ञाः। आरब्धाः सन्तीति शेषः। तान् **सर्वानित्** सर्वानपि यज्ञान् युवाम् **उप यात** समीपे गच्छतम्, वचनव्यत्ययश्छान्दसः। किमर्थम्? **पिबध्यै** सोमं पातुम्। **उत** इत्यनर्थकः।

□

अभिनवमिदं भाष्यं सायणकृतिसन्निभम्।
अनुपलब्धतद्भाष्यस्थाने विलिखितं मया॥

इति नवमेऽनुवाके सप्तचत्वारिंशं सूक्तम्।

इति नवमोऽनुवाकः।

इत्याथर्वणसंहितायां विंशतितमं काण्डं समाप्तम्।

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya ... Bharatiya Vidya
1054

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Sri Sankaracharya Sanskrit

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE